[66] A paper ms. in Grantha characters from the same library under R. 3743.

[67] See F. O. Schrader, *Introduction to the Pāñcarātra and the Ahirbudhnya Saṁhitā*, p. 26.

[68] This text is being published by the Adyar Library and Research Center, in Devanāgarī letters.

Digitized by Google Original from UNIVERSITY OF MICHIGAN

same name (*e.g.*, *Agastya Saṁhitā* and *Īśvara Saṁhitā*). In such cases the editors' test of genuineness was based upon some of the cardinal considerations that generally characterise the *āgamas* of this particular school—reference to the *pañcakāla*-practices, stress laid upon the *dīkṣā*-ceremony, value attached to the *Vyūha*-theory, and the like. Thus, to give a single example, there appears to have been at least three *Īśvara Saṁhitās*. The one that is readily available in print, in spite of its popularity, seems to be somewhat late in origin; this is clear from the references it makes to persons dateable in history[69] and also from the absence of certain passages in it quoted as from "Īśvara Saṁhitā" by Yāmunācārya in his *Āgamaprāmāṇya*. The presumably older text referred to by Yāmuna, which must have been a dialogue between Īśvara and Ṣaṇmukha,[70] seems to have been lost. Likewise, there is another *Pañcarātra-saṁhitā* bearing the name *Īśvara Saṁhitā*[71] (also called *Nṛsiṁhakalpa*) but which, by means of the considerations indicated above, proved to be another text of secondary value, the entire bulk of it being devoted to *mantras*, *homas*, *mudrās*, *etc.*, of Narasiṁha. This curious problem gives insight into the careful work that went into the preparation of this Sourcebook by its Editors.

In the process of editing and selecting texts several parallel passages—the recognition of which may be of potential use to textual historians—were encountered, and, wherever possible these parallel passages have been indicated in foot-notes. The present compilation has also brought other evidence to light in regard to the interesting point that some of the texts are obviously earlier, and some, being derivatives of these, are later in origin. Further, several passages were found corrupt in manner and metre; as is the habit with such traditional texts which claim to be *ārṣa*, grammar and diction are very little cared for. So, while presenting what is relevant in a particular context, editing and rectifying the texts whenever necessary had also to be done. While doing so, mostly at the proof-stage, care was taken to see that the passages are now intelligible though still as true to the originals as possible.

Altogether, the world of scholars is indebted to Dr. Smith and Sri Venkatachari for their exemplary work in this volume, and to Sri Ganapati for

---

[69] *Cf. Īśvarasaṁhitā* VIII. 175*b* (Sudarsana Press edn.) : "*ekāntino mahābhāgāḥ śaṭhakopapurassarāḥ*".

[70] *Vide Āgamaprāmāṇya* (Benares edn.), pp. 81-82.

[71] Deposited in the Oriental Institute, Baroda, under no. 7967. See *New Catalogus Catalogorum*, Vol. II, p. 279a.

Digitized by Google Original from UNIVERSITY OF MICHIGAN

gracing it with his skilful renderings of text into drawings. In particular, the community of Pāñcarātrins should be particularly beholden to Dr. Smith for the very useful and colossal work he has been doing in this vigorous branch of Vaiṣṇava faith and religion over the past ten years. Dr. Smith, with whom the present writer has had the pleasure of working on the Pāñcarātra literature during the former's sojourns in India on two different occasions, is an American scholar of rare abilities and virtues. Not only has he published the already alluded to *Pāñcarātraprāsādaprasādhana*, comprising a critical edition and study of the first ten chapters of the *kriyā-pāda* of the influential *Pādma Saṁhitā*, but he has written a number of serious and searching articles on aspects of Pāñcarātra literature and thought; moreover, while good collections of Pāñcarātra texts are no doubt preserved in several Indian libraries and institutions like the Adyar Library and Research Centre and the Government Oriental Manuscripts Library, Madras, the credit of having collected and maintained the most complete Āgama Collection in the world—all transliterated into the Devanāgarī script—goes to Dr. Smith alone. In addition, he is the founder of the Pāñcarātra Pariśodhana Pariṣad—a society devoted to the promotion of research on the Pāñcarātra and the continued preservation of Pāñcarātra traditions and texts—which is already international in its membership and under whose sponsorship this Sourcebook is being printed in its publication series. Of late, he, in collaboration with Sri K. K. A. Venkatachari of Madras, a scholar of creative thinking, has published another monograph, also numbering in the publication series of the Pāñcarātra Pariśodhana Pariṣad. This one in Tamil is entitled 'A Panorama of the Pāñcarātra Literature,'[72] and it has already proved itself to be of special use to the *arcakas* of the South Indian Vaiṣṇava temples.

The present work, then, continues in the tradition of concerned and generous scholarship already established by Dr. Smith in former publications. This work, the result of a co-operative enterprise of what is best in both Indian and American scholarship, surely meets the high standards of the scholarly norms of each Editor. The happy blending of talents will, it is hoped, encourage others to such ventures in the future.

MADRAS, 1969 M. NARASIMHACHARY

[72] Printed at the Hoe & Co., Madras, 1967.

Digitized by Google Original from UNIVERSITY OF MICHIGAN

CHAPTER ONE

WHY IMAGES?

The origins of image-worship in Hinduism are still unknown to us. Evidence that icons were used at least in domestic devotions can be found as early as the times of the Indus Valley Civilization (3000–1500 B.C.E.). But there is, however, no clear evidence in the primary strata of Vedic literature that the Aryans used idols in their religious routines.* How the use of images in modern Hindu religious life has become so important and so normative is, in the present state of our knowledge, impossible to trace. All that can be done is to acknowledge that forms of iconic worship are now a characteristic of popular Hinduism.

In contemporary Hinduism the literature dealing with worship routines is vast. Various sects have their own special versions of how worship should

* *See* discussion of this matter in P. V. Kane's *History of Dharmaśāstra*, (Bhandarkar Oriental Research Institute, Poona, (1930–62), II : p. 706 ff.

Digitized by Google Original from UNIVERSITY OF MICHIGAN

be undertaken. The literature is collectively known as '*āgama*'—for examples, the *Śaivāgamas*, followed by devotees of Śiva; the *Śāktāgamas*, followed by the devotees of the Mother Goddess; the *Vaikhānasāgamas* and the *Pāñcarātrāgamas*, followed by the devotees of Viṣṇu. We are dealing here with the last-named of the *āgama*-traditions, namely that of the Pāñcarātra School. These texts yield valuable information and insight regarding—among other things—the rich heritage of sculpture and art of at least this one community. And, by extracting the passages relating to icons and instruments used in worship we may also be in a better position not only to judge the art and sculpture of the Vaiṣṇava traditions but also to comprehend these within the larger context of the history of Indian art through the ages. Moreover, we may come to understand something of the answer to the question posed by the title of this chapter " Why Images ? "

At the outset, then, we shall try in this first chapter to see what the *Pāñcarātrāgama* texts have to say in regard to *why* icons are so honoured. First, we shall notice some of the theological and speculative attempts to justify the use of images in worship. Then, turning to more practical concerns, we shall consider various passages outlining the different types and kinds of images required to fulfil the needs of everyday, established liturgical cycles and of festival routines. Finally, we shall present some passages relating to images of human beings, famous devotees of the past (*bhaktabimbas*).

Theological and speculative supports for use of icons

The first excerpt (§1) points out that while the philosophical contemplation of a god beyond form-and-shape is an ideal according to the Vedānta, yet for practical reasons and due to man's weakness there is a need for a *form* and *shape*. Why ? To give an object on which to focus the mind and to which to address liturgical ministrations. §2 indicates that this *form* should be in a human *shape*. Why ? Because the Lord assumes different forms to achieve different results, and in His mercy (*anugraha*) to men He assumes human shape so that they may recognize Him and turn to Him. In §3 we learn that the descent of the Lord into a permanent abode in an iconic form is due to His Divine Initiative only. Why ? So that He may forever bless His devotees, granting them all their wishes. §4 reiterates the theme that He can be found in an icon made of wood or metal or stone. Why ? Because so that by undertaking such activities as providing Him with a place to dwell many people may be saved by resorting to His Presence. For, by such activity is He pleased. In §5 the temple residence—its various structural parts and its precincts are analogies to His Being in its visible, subtle and transcendent modes—a veritable symbol of God's Presence in the world. Even the names of the various elements in the structural buildings are called by names that signify His bodily parts. If this is so—if the temple is the Body of the Lord—

Digitized by Google Original from UNIVERSITY OF MICHIGAN

then no temple is 'alive' without the vital Presence of the Divine Spirit in its innermost recesses, namely the Lord in His iconic form, the image of God in the *sanctum sanctorum*. As §6 puts it : " For all temples, the *pratimā*-image is the animating *jīva*-spirit. Therefore by all means a wise man should prepare a *pratimā*-image (of the Lord)."

§ 1

. . . ध्यात्वार्कमण्डले विष्णुं वेदमन्त्रैरभिष्टुतम् ॥
धार्यमाणे तथैवाग्नौ जुहुयात् कार्यसिद्धये । तत्र यत् केवलं ध्यानं वेदान्तोक्तमनाश्रयम् ॥
न तत्रेन्द्रियदौर्बल्यात् कर्मस्थस्याधिकारिता । यथा गिरितटाग्रस्थवनस्पतिफलेच्छया ॥
उपायो वर्ततेऽश्रान्तस्तथासौ यत्नमाचरेत् । सर्वत्र क्रमवान् यत्नः कार्यो नेच्छैव केवला ॥
तत् कायवाङ्मनोवेगैः क्रमादिच्छेत् परां गतिम् । निराकारे तु या भक्त्या पूजेष्टा ध्यानमेव वा ॥
रमणीयमिवाभाति तदनर्थस्य कारणम् । स्थूलभावप्रसङ्गीनि जन्मनास्येन्द्रियाणि हि ॥
सूक्ष्मार्थं न प्रपद्यन्ते चिराच्च किमुताचिरात् । न च रूपं विना देवो ध्यातुं केनापि शक्यते ॥
सर्वरूपनिवृत्ता हि बुद्धिः कुत्रास्य तिष्ठति । निवृत्ता ग्लायते बुद्धिः निद्रया वा परीयते ॥
तस्माद् विद्वानुपासीत बुद्ध्या साकारमेव तम् । अस्ति तस्य परोक्षं तदिति किञ्चिदनुस्मरेत् ॥
सर्वथाकारमुद्दिष्टं न परित्यज्य पण्डितः । परं देवमुपासीत मुक्तये वा फलाय वा ॥

Viṣṇu XXIX : 49*b*–58

§ 2

मूर्तिमानेव पूज्योऽसावमूर्तेर्न तु पूजनम् । कार्यार्थं मूर्तयस्तस्य लोकानुग्रहहेतवः ॥
अतः पुरुषरूपेण कल्पयित्वा तमच्युतम् । अभ्यर्च्य परया भक्त्या सिद्धिं गच्छन्ति मानवाः ॥
निराकारे तु देवेशे नार्चनं सम्भवेन्नृणाम् । न च ध्यानं न च स्तोत्रं तस्मात् साकारमर्चयेत् ॥
आकारे तु कृता पूजा स्तुतिर्वा ध्यानमेव वा । विधिना शास्त्रदृष्टेन देव एव कृता भवेत् ॥
भक्त्या परमयाऽऽकृष्टो देवदेवस्स योगिभिः । तेषामनुग्रहार्थाय रूपं भेजे चतुर्भुजम् ॥
तस्मात् तेनैव रूपेण देवदेवं समर्चयेत् । . . . .

Parama III : 5–10*a*

§ 3

अथ प्रतिष्ठां वक्ष्यामि बिम्बरूपस्य मे विभोः । मानुषाणां इष्टसिद्ध्यै भूयस्सान्निध्यकारणात् ॥
मन्त्रस्य गौरवाद् देवि तपसा देशिकस्य च । तेन संप्रार्थितश्चाहं अर्चायां इष्टसिद्धिदः ॥

* * *

युष्माकं प्रीतयेऽहं वै बिम्बरूपं समास्थितः । तत्र तत्र वसिष्यामि पूजयिष्यन्तु नित्यशः ॥
युष्माकमिष्टसिद्धिं च दास्याम्यत्र न संशयः । . . . .

Śripraśna XVIII : 1–2, 18–19*a* *

* *cf.* Pādma "kr." XXVI : 1–7

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 4

कृत्वा प्रतिनिधिं सम्यग् दारुलोहशिलादिभिः । तत् स्थापयित्वा मां स्थाने शास्त्रदृष्टेन वर्त्मना ॥
यजस्व मां वक्ष्यमाणविधिना कमलासन । कर्षणादिप्रतिष्ठान्तं क्रियाविधिमतः शृणु ॥
वक्ष्यामि येन विधिना प्रसीदाम्यचिरादहम् । अधीतिनो ये विद्यासु शास्त्राणि श्रुतपूर्विणः ॥
ते मां भजन्ते पुरुषाः ज्ञानयोगपरायणाः । अन्येषामप्यविदुषां भक्तानां बहुसम्पदाम् ॥
जायते सिद्धिरचिरात् स्थाने स्थापयतां च माम् । ज्ञानं योगश्च यदिदं केवलं मुक्तिकारणम् ॥
स्थापयित्वाऽच्युतं स्थाने पुरुषः सत्त्वमश्नुते । यो मां संस्थाप्य सदने समाराधयति स्वयम् ॥
न तस्य केवलं सिद्धिः स्थानाभ्यर्णजुषामपि । तस्मात् सर्वात्मना ब्रह्मन् स्थाने मां स्थापयेत् पुमान् ॥

Pādma "kr." I : 5–11

§ 5

. . . ज्ञातव्याः गृहगर्भार्चाः स्थूलसूक्ष्मपरात्मिकाः ॥
अनन्तं पादुकं विद्यादात्मतत्त्वेश्वरं प्रभुम् । विद्यातत्त्वमधिष्ठानमित ऊर्ध्वं परं तथा ॥
वेद्यमिन्द्रादयो दिक्स्था विष्वक्सेनः प्रणालके । पादुकाद्यङ्घ्रिजङ्घोरुपट्टिकान्तं प्रतिः कटिः ॥
मेखला रशना कुक्षिः गर्भः स्तम्भाश्च बाहवः । मध्यं नाभिश्च हृत् पीठमपानं जलनिर्गमः ॥
पादाधारस्त्वहंकारः पिण्डिका बुद्धिरुच्यते । तदन्ते प्रकृतिः पद्मं प्रतिमा पुरुषः स्मृतः ॥
घण्टा जिह्वा मनो दीपो दारु स्नायुः शिलास्थि च । त्वक् सुधा लेपनं मांसं रुधिरं तत्र यो रसः ॥
चक्षुः शिखरपार्श्वे तु ध्वजाग्रं च शिखा भवेत् । तलकुम्भो भवेत् पाणिः द्वारं प्रजननं स्मृतम् ॥
शुकनासैव नासोक्ता गवाक्षं श्रवणं विदुः । कपोतालि तथा स्कन्धं कण्ठं चामलसारकम् ॥
घटं शिरो घृतं मज्जा वाङ्ग मन्त्रः सेचनं पयः । नामशैत्यादिवर्णान्निधूपेषु विषयाः स्थिताः ॥
रन्ध्रे वातायने धाम्नि लेपे स्थैर्ये च खादयः । पर्वाणि सन्धयो ज्ञेया लोहबन्धास्तथा नखाः ॥
केशरोमाणि चैवास्य विज्ञेया दुग्धकूर्चकाः । प्रासादपादमात्रोच्चः प्राकारः परितो भवेत् ॥

Viṣṇu XIII : 60*b*–70 *

§ 6

प्रासादानां तु सर्वेषां प्रतिमा जीव उच्यते । तस्मात् सर्वप्रयत्नेन प्रतिमां कारयेद् बुधः ॥

Vasiṣṭha V : 35 †

---

* *cf.* Pādma "kr." XXX : 48–53 (not so clear); *see* also Īśvara[1] III : 114*b*–123*a*, and Viṣṇutilaka VII : 614–632.

† *cf.* Hayaśīrṣa "Ādi" XXXV : 55*b* (Adyar *ms.*) = XXXIX : 61*b* (printed edition); *see* also Pādma "kr." XXX : 49.

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

Practical necessities requiring different types of images

It is necessary to make a distinction between the icon that is found in the central *sanctum sanctorum* of a temple and the various, smaller images used in various public routines of worship. The former icon is usually large ; it is immovable. The latter images are, as it were, ' proxies ' of the main icon ; these are used for various liturgical and festive activities—for processions, for special bathing rites, for annual festivals, etc. Why ? So that more devotees may witness and take part in the ministrations to the Lord's gracious Presence—for the time-being ' transferred ' into the smaller, moveable ' proxie ' image.

Temples differ in the number of images recommended for these practical purposes : some have none, using only the main icon for all purposes ; others have several images in addition to the main, immovable icon—one, three, five, or six (*see* §7, §8, §22, §23). These so-called ' *karmabimbas* ' used for various practical purposes should correspond to a certain degree in posture and attitude to the main icon—if the main icon stands, the *karmabimba* stands ; if the main icon sits, the *karmabimbas* should also sit, although they may also stand ; if the main icon, however, reclines, the *karmabimbas* cannot be shown likewise but may be shown only standing or sitting. Further correspondences are to be noted in regard to the number of arms, the specific weapons borne, *etc.* (*see* §16–§18). The measurements used are units corresponding to those of the main icon (*see* §8–§10, §14, §16, §23). * And when not in use the *karmabimbas* are placed in certain positions in relation to the main icon (*see* §12).

Theological considerations among Śrī-vaiṣṇavas have also made it desirable to show Śrī, the Consort of the Lord, alongside Viṣṇu. Thus, for reasons of popular piety it has become necessary to distinguish, further, two other types of icons—those in which Viṣṇu is revealed alone (*ekabera*, ' single icon '), and those in which He is shown with one or more of His Consorts and entourage members (*bahubera*, ' many icons ')—*see* §7–§9, §12, §22 and §23.

A further practical differentiation of icons comes in regard to how they have been portrayed—in the round (*citra*), in relief (*ardhacitra*) and in two dimensions as in paintings (*citrābhāsa*). *See* §15. So also is there a typology according to the materials used in fashioning the icon or icons—*see* §14.

§ 7

कर्मार्चादिविशेषाणां संज्ञाभेदं च लक्षणम् । उपयोगस्तथैतेषां कथ्यते कमलेक्षणे ॥
कर्मार्चा चोत्सवार्चा च बल्यर्चा च तथापरे । तीर्थस्नानोभये स्यातामपरा शयनार्थिका ॥
पूज्यन्ते यत्र तद्वेरं तां पूजामुत्तमां विदुः । मध्यमं त्रीणि बिम्बानि चरमं त्वेकपूजनम् ॥
बहुबेरे विधिरयमेकबेरस्य वै रमे । मूलार्चायां पूजनं च स्नपनं च भवेत् सदा ॥
तस्मात् स्नपनपूजार्थं नेष्यते कौतुकद्वयम् । . . . .

Śrīpraśna XIV : 1–5a

* *See* § 188–196, below for specific measurements.

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 8

ततस्तु कर्मबिम्बेषु विशेषः कथ्यतेऽधुना । कर्मार्चा चोत्सवार्चा च बल्यर्चा तीर्थकौतुकम् ॥
निमित्तस्नपनार्चा च शयनार्चेति षड्विधाः । अर्चाः कार्यास्त्विमा विप्राः बहुबेरविधानके ॥
एकबेरे तु कर्मार्चां विना पञ्च प्रकल्पयेत् । एतैः सर्वैरङ्गबिम्बैः युक्तं चेन्मूलकौतुकम् ॥
उत्तमं स्यात् त्रिभिर्युक्तं मध्यमं परिकीर्तितम् । एकेन युक्तमधमं तत्तन्मानमिहोच्यते ॥
मूलबिम्बसमुच्छ्रायं द्विधा वापि त्रिधापि वा । चतुर्धा वा संविभज्य एकभागेन कल्पयेत् ॥
उत्सवार्चां तदुच्छ्रायं द्विधा वापि त्रिधापि वा । चतुर्धा वा विभज्यैकभागेन परिकल्पयेत् ॥
कर्मार्चादीनि बिम्बानि पञ्चापि द्विजपुङ्गवाः । बिम्बषट्कं च देवीभ्यां सहितं परिकल्पयेत् ॥
अथवा चौत्सवं बिम्बं तथा शयनकौतुकम् । श्रीपुष्टिसहितं कार्यं मूलबिम्बे द्विजोत्तमाः ॥
स्थिते वा वाहनारूढे समासीनेऽपि वा द्विजाः । कर्मबिम्बादिषट्कं च तथैव स्यात् स्थितं तु वा ॥
मूलबिम्बे शयाने तु कर्मबिम्बादयो द्विजाः । स्थितावपि समासीनाः विधातव्या मुनीश्वराः ॥
नित्योत्सवार्थबिम्बं तु सर्वत्रैव स्थितं भवेत् । . . . .

Īśvara [1] XVII : 238–248*a*

§ 9

प्रासादस्यानुरूपेण प्रतिमां कारयेत् पुनः । एकहस्तां न च न्यूनां पञ्चहस्तां न चाधिकाम् ॥
प्रतिमां नवतालेन दशतालेन वा पुनः । शैलजां मणिजां ताम्रां दारुजां लोहजां तु वा ॥
आसीनां वा स्थितां वापि दैवं वा मानुषं तु वा । बहुबेरविधानेन सर्वलक्षणसंयुतम् ॥
मूलार्चालक्षणं ह्येतत् कर्मार्चालक्षणं शृणु । षडङ्गुलान्न च न्यूनं नाधिकं द्वादशाङ्गुलात् ॥
पूजाबिम्बं तु कर्तव्यं सर्वत्रैव विचक्षणैः । एवं वै सालबिम्बस्य लक्षणं समुदाहृतम् ॥
तीर्थयात्रार्थबिम्बस्याप्येवमेव तु लक्षणम् । एकतालं न च न्यूनं चतुस्तालं न चाधिकम् ॥
प्रोक्तमुत्सवबिम्बस्य लक्षणं मुनिपुङ्गव । एवं वै स्नपनार्चायां लक्षणं समुदाहृतम् ॥
लक्षणं यत् पुरा प्रोक्तं तद्वत् सर्वत्र कारयेत् ॥ . . . .

Nāradīya XXIII : 109–116*a*

§ 10

. . . श्रीवत्सेनाङ्कितोरस्कान् जटामुकुटसंयुतान् ॥
किरीटिनो वा कुर्वीत कर्मबिम्बांश्च लोहजान् । विष्णोरंशावताराणां कर्मार्चाद्यास्तु कौतुकाः ॥
कल्पनीयाश्चतुर्हस्ताः द्विभुजा वा यथारुचि । दशतालेन मीयन्ते वराहाद्याश्च मूर्तयः ॥
बाह्यांश्चाभ्यन्तरांश्चैव परिवारान् प्रकल्पयेत् । आदिमूर्तेर्यथा तद्वत् न विशेषोऽस्ति कश्चन ॥

Pādma "kr." XVIII : 46*b*–49

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 11

अथातः संप्रवक्ष्यामि जङ्गमस्थापनं परम् । अप्रधानं च बिम्बं तु जङ्गमं बिम्बमुत्तमम् ॥
पृथक् चेत् सर्वकर्माणि बिम्बशुद्ध्यर्थमेव च । कारयेन्मुनिशार्दूल स्नानादिप्रतिमाक्रियाम् ॥

* * *

तत्तत्स्थाने स्वमन्त्रेण संस्थाप्यार्चादि नारद । यद्रूपं मूलबेरस्य यच्चिह्नैः चिह्नितं पुरा ॥
या मूर्तिस्स्थापिता पूर्वं मूलाच्चेति महात्मभिः । यथा चायुधविन्यासं कथं बुद्धिमता हरेः ॥
कर्मार्चादिषु बेरेषु तत् सर्वं कारयेत् तथा । न विधिश्शयितस्यैषः स्थापनादि प्रकीर्तितम् ॥
शयितस्य तु कर्मार्चा स्थानकं त्वासनं तु वा । संस्थाप्य वासुदेवाख्यं न संकर्षणमिष्यते ॥
तथा संकर्षणं प्राप्य प्रद्युम्नं नार्चयेद् बुधः । प्रद्युम्नस्थापनार्चायां कर्मार्चा नानिरुद्धिका ॥
कर्मार्चा सर्वथा कार्या मूलबिम्बानुसारिणी । विशेषमत्र संप्रोक्तं शेषं पूर्ववदाचरेत् ॥
एवं संक्षेपतः प्रोक्तं जङ्गमस्थापने मुने । धन्यं यशस्यमायुष्यं सर्वकामप्रदं सदा ॥

Viṣvaksena XVII : 1–2, 7–13

§ 12

मूलबेरस्य पुरतः उत्सवं संनिवेशयेत् । तत्पूर्वे कर्मबेरं तु बलिं दीपं च दक्षिणे ॥
तस्य दक्षिणपार्श्वे तु स्नपनं सन्निवेशयेत् । उत्सवस्य च वामे तु तीर्थं शयनमेव च ॥

Aniruddha XV : 41–42

§ 13

कर्मार्चा स्थापनार्चेति द्विविधा परिकीर्तिता । यत्कृता प्रतिमा पूर्वप्रासादे मृण्मयादिभिः ॥
सा स्थापनार्चा विज्ञेया रत्नन्यासोपरि स्थिता । अन्या तु लोहजा यात्र सा कर्मार्चेति कीर्तिता ॥

Sanatkumāra " Br." VI : 17-18

§ 14

. . . प्रतिमे द्विविधे प्रोक्ते सौम्याग्नेपि विधानतः ॥
श्रौतं च शीतला ज्ञेया प्रतिमा श्रीविवर्धनी । उष्णान्ते शीतिविज्ञेया दारिद्रियविवर्धिनी ॥
सौम्यं तु वैष्णवीया वा आग्नेयी शाङ्करी मता । तस्मादात्मा न कर्तव्या आग्नेयी वा कदाचन ॥
विशुद्धा चापि सङ्कीर्णे न्यस्तापि प्रतिमाद्वयम् । एकवर्णा विशुद्धिस्स्यात् संकीर्णा विस्तृतामयी ॥
शुद्धैव प्रतिमा ग्राह्या संकीर्णा तदलाभतः । अनुलोमं तु गृह्णीयात् प्रतिलोमं तु वर्जयेत् ॥

* * *

. . . कर्मार्चालक्षणं वक्ष्ये कौबेरस्य च सांप्रतम् ॥
शुद्धलोहेन कर्तव्यं नान्येन तु कदाचन । येन कौतुकप.....योजयेत् ॥
योनयोन्येव कुर्वीत प्रभापीठयुतान्यपि । अर्चायां तु त्रिधा कृत्वा तत्रैकं पीठमुच्यते ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

वर्तुलं चतुरश्रं वा पूर्वोक्तं पीठमुच्यते । तथा पादसमं कुर्याद् विस्तारं तु प्रचक्षते ॥
दलं च पादमानेन अत्यर्थं समुदाहृतः । पीठोत्सेधसमं चैव विस्तारायाममेव च ॥
दशतालक्रमेणैव कौतुकं कारयेद् बुधः । ध्रुवं च स्थानकं यद्वत् मूलबेरं यथाक्रमम् ॥
तथैव कुर्यात् कर्मार्चा जङ्गमं तु चतुर्विधम् । अतीव रूपसम्पन्नं प्रथमे वयसि स्थितम् ॥
भक्तानां दर्शनार्थाय क्रियते तन्मनोहरम् । . . . .

Vasiṣṭha IV : 68*b*–72, 95*b*–102*a*

§ 15

त्रिविधं प्रतिमाकर्म शास्त्रज्ञास्संप्रचक्षते । चित्रं चाप्यर्धचित्रं च चित्राभासं तथैव च ॥
दृश्यन्तेऽवयवास्तत्र प्रतिमायां तथैव च । मानोन्मानप्रमाणाभिः तच्चित्रमिति कथ्यते ॥
शिलागताया यस्यास्तु पृष्ठभागो न दृश्यते । मानप्रमाणसंयुक्ता सार्धचित्रमिति स्मृतम् ॥
या स्थितालेख्यरूपेण विचितामपि शिल्पिभिः । मानप्रमाणसंयुक्ता तच्चित्राभासमुच्यते ॥
उत्तमं तु फले चित्रं मध्यमं चार्धचित्रकम् । आलेख्यमधमं प्रोक्तं प्रतिमाकर्मणि क्रमात् * ॥
फलकाया पटे कुर्याद् विचितानां तु लक्षणम् । कर्मार्चालक्षणं यद्वत् उक्तं तद्वत्प्रमाणकम् ॥

Mārkaṇḍeya IX : 23–28

§ 16

मूलबेरादिबिम्बानां स्वरूपं मुनिसत्तम । अष्टबाहुं चतुर्बाहुं द्विबाहुं वाथ नारद ॥
यजमानेच्छया कार्या मूलबेरादयस्त्विति । स्थानयानासनं वापि शयनं वा प्रकल्पयेत् ॥
अत्र किंचिद्विशेषोऽस्ति शयने मुनिसत्तम । अनिरुद्धं तथा पद्मनाभमूर्तिमथापि वा ॥
संज्ञात्वा लक्षणोपेतं शाययेद् विधिचोदितम् । यत् कृत्वा मूलबेरं तु द्विभुजं चेद् द्विजोत्तम ॥
कर्मार्चनादिबिम्बानां लक्षणं वा चतुर्भुजम् । मूलबेरं तु कर्मार्चा द्विभुजं चेन्मुनीश्वर ॥
बालादीनां तु बिम्बानां लक्षणं वा चतुर्भुजम् । महोत्सवस्य बिम्बस्य द्विभुजं वा चतुर्भुजम् ॥
शयानस्य मया प्रोक्तं विशेषं मुनिसत्तम । एवमुक्तप्रकारेण प्रतिमां कारयेत् क्रमात् ॥
मूलार्चा चाष्टबाहुश्चेत् कर्मार्चादि चतुर्भुजम् । द्विभुजं यदि चेत् तत्र सर्वसंहारकारणम् ॥
तस्मात् सर्वप्रयत्नेन द्विभुजं न प्रकल्पयेत् । तथा मत्स्यादिमूर्तीनां शयनं तु न कारयेत् ॥

* * *

अष्टबाहोस्तु बिम्बस्य शयनं न प्रकल्पयेत् । . . . .

* * *

. . . आत्मार्थयजनं वक्ष्ये शृणु नारद तत्त्वतः ॥
षोडशाङ्गुलमुत्सेधमुत्तमं संप्रचक्षते । मध्यमं तु तदर्धं स्यात् द्व्यङ्गुलं तु कनीयसम् ॥

Viṣvaksena X : 100–108, 110*a*, 117*b*–118

---

* Mārkaṇḍeya IX : 23–28 || Vasiṣṭha IV : 46–50

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 17

मूर्तीनां तु प्रवक्ष्यामि प्रासादादीनि पूर्ववत् । परमात्मादिमूर्तीनां पूजाभेदविशेषकम् ॥
शयने सति मूलार्चा कर्मार्चा चासनं भवेत् । स्थानकं वापि कुर्वीत तद्वेरं तु चतुर्भुजम् ॥
बलिबेरं तथा कुर्यादुत्सवे स्नपने तथा । यानकस्यैवमेव स्याद्यानकं वापि कारयेत् ॥
आसीने तु महाबेरे सर्वमासीनमेव वा । स्थानकं वापि कुर्वीत सर्वमासीनमेव वा ॥
मत्स्यादिदशमूर्तीनां पूजाबिम्बं चतुर्मुखम् । मूलबेरं तु यत् प्रोक्तं तथैव मुनिसत्तम ॥

Viṣvaksena XI : 307–311

§ 18

. . . आसीनं वा शयानं वा तिष्ठन्तं वा यथारुचि ॥
आरूढं पक्षिराजे वा कल्पयेद् विष्णुविग्रहम् । एवं गर्भगृहे देवं ब्रह्मस्थाने निवेशयेत् ॥
यद्वा दिव्ये मानुषे वा द्वारसूत्रे निवेशयेत् । एवं संस्थापयेद्देवं प्रतिष्ठासमये सुधीः ॥
अष्टौ देवीः श्रियाद्याश्च पार्श्वयोर्विनिवेशयेत् । . . . .

Bhārgava Tantra IV : 88*b*–91*a*

§ 19

स्वस्य देहं त्रिवलयं कृत्वा सिंहासनं भवेत् । दीर्घमानेन कथितं द्वात्रिंशल्लक्षयोजनम् ॥
उन्नतं दशलक्षेण विंशल्लक्षेण विस्तृतम् । सहस्रसूर्यसंकाशं फणामणिविराजितम् ॥
तस्योपरि महाश्चर्यः सर्वकारणकारणम् । भूत्वा समाप्तिकामोऽपि संस्थितो रमया सह ॥
दक्षिणे च महालक्ष्मीस्तस्याः पार्श्वद्वयेऽपि च । भूनीले संस्थिते देवस्तत्र तत्र विराजितः ॥
वात्सल्यजलधिः श्रीमान् कल्याणादिगुणान्वितः । नियोजयति चानेतुं मुक्तात्मानं स्वपार्षदान् ॥
सेनापतिं नित्यवर्गं सायुधावरणान्वितम् । तथा च परिवारं स्वं लक्ष्मीदेवी न्यवेदयत् ॥

Bṛhadbrahma III : vi : 9–14

§ 20

. . . शयितुर्मूलबेरस्य शयनं तु चतुर्विधम् ॥
भोगं योगं च संहारं सृष्टिसंज्ञं चतुर्मुख । अनन्तभोगशयने द्विभुजो वा चतुर्भुजः ॥
श्रीवत्साङ्कः प्रसन्नोऽस्य श्रीधरण्योः श्रियोऽथवा । विन्यस्योत्सङ्गयोः पादौ सुखं शेतेऽथवा स्वयम् ॥
श्रीमह्यवयवा सा श्रीर्बाहुमूलं समाश्रिता । देवस्य शेषशय्यायामर्चनापीठपार्श्वयोः ॥
ब्राह्माद्या भित्तिदेशे वा गन्धर्वा देवयोषितः । देवस्य भोगशयनमिदं योगाह्वयं शृणु ॥
शेषे शयानो देवेशो द्विभुजो वा चतुर्भुजः । श्रीवत्साङ्कः प्रसन्नास्यो योगमेकस्समास्थितः ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

श्रीमह्यवयवा लक्ष्मीरर्चनापीठपार्श्वयोः । बद्धाञ्जलिः खगेशश्च ब्रह्माद्याश्च तपोधनाः ॥
परितः खलु सेवन्ते शयनं योगसंज्ञितम् । अनन्तभोगशयने बहुमस्तकमण्डिते ॥
चतुर्हस्तोऽष्टहस्तो वा भ्रुकुटीकुटिलाननः । दंष्ट्राकरालवदनश्चक्राद्यायुधलाञ्छितः ॥
एक एव स्वयं शेते शयनेऽतिभयङ्करः । अर्चनापीठिकापार्श्वे श्रीर्वा लक्ष्मीखगेश्वरौ ॥
कृताञ्जलिपुटौ प्रह्वौ संहारशयनाह्वयम् । सृष्ट्याख्यशयनं वक्ष्ये शृणु तत् कमलासन ॥
शेषेऽश्वत्थदले यद्वा बालभूषणभूषितः । अलकैस्सुप्रसन्नास्यो बालो नीलाम्बुजप्रभः ॥
पीयूषसागरे रम्ये सुखं शेते जगत्पतिः । सनालनाभीकमले ब्रह्मा बद्धाञ्जलिर्भवेत् ॥

Viṣṇutilaka VI : 412*b*–424

§ 21

ततः शयनदेशे तु पश्चिमे हेमविष्टरे । निवेश्य प्राङ्मुखीं मूर्तिं यदा गर्भगृहे तदा ॥
निवेश्य द्वाराभिमुखीं स्वयं समुपविश्य तु । पञ्चगव्येन चाभ्युक्ष्य ततः शय्यास्थलं द्विज ॥
कुङ्कुमागरुकर्पूरैरुपलिप्य च चन्दनैः । तस्मिन् मध्ये शुभं कुर्यात् स्वस्तिकं सूक्ष्मलक्षणम् ॥
शुक्लारुणैस्तथा पीतैर्धातुभिश्चासितैर्मुने । चतुर्विधेन रजसा कुर्याद् रत्नोद्भवेन वा ॥
मूर्धोपधानसंयुक्तं मसूरकवरान्वितम् । गण्डोपधानसंयुक्तं चरणाधारसंयुतम् ॥
ज्योत्स्नावितानसदृशप्रच्छादनपटान्वितम् । सुधूपितं च शयनं संस्थाप्य च तथोपरि ॥
प्रागुत्तरशिरश्शुभ्रं प्राक्शिरस्त्वथवा द्विज । मूलबिम्बे शयनगे स्थाप्यं तदनुरूपतः ॥

Pārameśvara XIII : 60–66

§ 22

अथातस्संप्रवक्ष्यामि बेराणां लक्षणं शृणु । मूलबेरं तु कर्मार्चा नित्योत्सवमितः परम् ॥
महोत्सवं तु तीर्थार्थं बिम्बं षष्ठं विधीयते । इत्यमीषां प्रमाणानि शृणु राजन् कुलोद्भव ॥
षण्णवत्यङ्गुलायामं उत्तमस्योच्छ्रयं भवेत् । इतः पक्षांगुलीहीनं मध्यमस्योच्छ्रयं भवेत् ॥
एकपञ्चाशदित्युक्तमधमस्योभयं ततः । इत्युत्तमादिबेराणामुत्सेधं त्रिविधं त्विति ॥
एकबेरप्रतिष्ठायामधमं बेरमुच्यते । कर्मार्चाबेरतन्मान उक्तं तन्मात्रतो भवेत् ॥
बहुबेरविधं वक्ष्ये शृणुष्व नृपसत्तम । पीठिके दैविकादीनि स्थापयेद् देविभिस्सह ॥
मत्स्यादिलोकपालानि निर्मितं प्रियया सह । बहुबेरमिति ज्ञेयं एकत्वे तु विधिं शृणु ॥
चतुर्भुजं शङ्खचक्रं मध्यस्थानैश्च बेरकम् । न प्रभा नावतारादि न कर्मार्चा न चासती ॥
वीरलक्ष्मी तु श्रीवत्समेकबेरमिति स्मृतम् । बहुबेरविधानेन कर्मार्चायां समाचरेत् ॥
एकबेरविधानेन स्नानं कुर्याद् दिने दिने । दैविकं बहुबेरं च एकबेरं च मानुषम् ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

Digitized by Google

Original from
UNIVERSITY OF MICHIGAN

BHAKTA

(*To face entry* § 25, *p.* 12)

Digitized by Google

Original from
UNIVERSITY OF MICHIGAN

तत्तत्कर्मानुगुण्येन दैविकं मानुषं क्रमात् । बेरं च त्रिविधं प्रोक्तं बाल्यौवनवार्धकम् ॥
बेरं च यौवनं प्रोक्तं शय्याबेरं च बाल्यकम् । भोगबेरं तु वृद्धं स्याद् बेरभेदं यथाक्रमम् ॥
राजसं चोद्धतं मूर्तिमासीनं तामसं स्मृतम् । शयने सात्त्विकं कुर्यादिति मूर्तिर्विधीयते ॥
मोक्षार्थे यौवनस्यापि काम्यं चैव तु बाल्यकम् । रक्षणार्थं तु वार्धक्यं तत्तत्कर्मानुसारतः ॥
स्थूलसूक्ष्मपरं चैव त्रिविधं बिम्बमीरितम् । स्थूलमष्टगजं प्रोक्तं षोडशं वा तथैव च ॥
चक्रं शङ्खं च परशुं शूलबाणानथाङ्कुशम् । वज्रं च दक्षिणभुजे प्रदेशेष्वितरेष्वपि ॥
शङ्खशक्तिगदाचक्रशार्ङ्गं पाशं च तोमरम् । शिष्टौ करौ यथापूर्वं स्थूलनाममिति स्मृतः ॥
चक्रं खड्गं च पाशं च अभयं दक्षिणे भुजे । पाञ्चजन्यं गदा शार्ङ्गं महाबाहुचतुष्टयम् ॥
जानूपरि तथावायं हस्तमेकं प्रसारयेत् । यद्वा भुजयुगं जानुद्वयस्योपरि निक्षिपेत् ॥
अथवा षोडशभुजं स्थूलमूर्त्यभिधीयते । चतुर्भुजं सुसूक्ष्मं तु परं तु द्विभुजं ततः ॥
लिङ्गं बेरं च बिम्बं च प्रतिमा च चतुष्टयम् । बेरं स्थापितमूर्तिः स्यात् अरूपं बिम्बमुच्यते ॥
बिम्बं च लोहरूपं स्यात् प्रतिमा कृतकं भवेत् । त्रिविधं प्रतिमाकर्म शास्त्रज्ञास्संप्रचक्षते ॥

Mārkaṇḍeya IX : 1–22

§ 23

. . . रत्नं लोहं च पाषाणं दारु वा मृन्मयं तु वा ॥
एकबेरं बहुबेरं स्वतन्त्रं परतन्त्रकम् । आश्रितं योगकं चैव भोगं योगं तथापरम् ॥
ब्रह्मस्थाने स्थितं बेरमेकबेरमुदाहृतम् । दिव्यभागे स्थितं बेरं बहुबेरमिति स्मृतम् ॥
स्वतन्त्रं ग्रामतः पूर्वं परतन्त्रं तु पश्चिमम् । आलये भित्तिपार्श्वे तु स्थापितं चाश्रितं भवेत् ॥
श्रीभूमिसहितं वापि रहितं योगकं स्मृतम् । श्रीकरं भोगमित्युक्तं योगं वश्यकरं भवेत् ॥
अयादिभिस्समोपेतं दशतालेन कारयेत् । तालं शताङ्गुलीकृत्य चतुर्विंशोत्तरं भवेत् ॥
नवतालप्रमाणेन देवीकर्मार्चनादिकम् । षट्कौतुकसमोपेतं बहुबेरमुदाहृतम् ॥
एकबेरं तथा प्रोक्तं शिलार्चेति द्वयं विना । कर्मार्चा स्नपनं चैव स्थापने कर्मकौतुकम् ॥
आत्मार्थं च परार्थं च द्विविधं स्थापनं भवेत् । गृहेषु स्थापितं पूर्वमालये चापरं भवेत् ॥
आत्मार्थं गृहरक्षा स्यादालयं ग्रामरक्षकम् । मुख्यस्थाने स्थितो देवो राजराष्ट्रस्य रक्षकः ॥
अन्योन्यसङ्गतौ स्यात् तु राट्क्षोभो यथारुचि । कर्मार्चा चोत्सवार्चा च बल्यर्चा च तथैव च ॥
स्नानतीर्थोभयार्चा च स्वापोत्थानार्चया सह । प्रतिमा षड्विधा प्रोक्ता उत्तमा समुदाहृता ॥
त्रिभिश्च मध्यमा प्रोक्ता एका च चरमा भवेत् । कृष्णराघवसंयुक्तं सिंहवाराहकेन च ॥
सौदर्शनसमायुक्तं लक्ष्मीबेरसमन्वितम् । आलये स्थापितं बिम्बं द्विभुजं वा चतुर्भुजम् ॥
यद्वाष्टभुजकं वापि यथारुचि समाचरेत् । शयने द्विभुजं मुख्यं कृष्णो रामो भवेत् तदा ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

वाराहवामनौ चैव तथा त्रैविक्रमो भवेत् । लक्ष्मीनृसिंहं वाराहं लक्ष्मीनारायणं तु वा ॥
श्रीकरं विजयं प्रोक्तं नगरग्रामपत्तने । एवं बिम्बगणान् कुर्यात् प्रतिष्ठां सम्यगाचरेत् ॥

Aniruddha XII : 96–25

Icons depicting great devotees of the past

In addition to the divine depictions found in temples, there are in many places images of human beings to be found. These are installed there to serve as a source of inspiration for other devotees who resort to the temple to worship the Lord, and they also serve as a link between the strictly human plane of existence and the transcendent divine plane of being—for here are figures who have won beatitude and serve as 'teachers' to those who still aspire to higher things.

The passages below give instructions for fashioning the images to these *bhakta*-devotees, for honoring them in cycles of worship, for understanding their saintly status, and in certain cases for furnishing them with their own separate shrines. (*See* §24, §25, §26, §27 and §28.)

§ 24

. . . भक्तबिम्बप्रतिष्ठां तु शृणुष्व कमलासन ॥
सिंहदिङ्मूर्तिरहितं मन्दिरं कल्पयेत् पुरा । नोपकुम्भाष्टकं ब्रह्मन् नैव शय्याधिवासनम् ॥

Viṣṇutilaka VIII : 683b–684

§ 25

. . . भक्तानां मानमुच्यते । सौवर्णं राजतं वापि ताम्रजं रत्नजं तु वा ॥
दारु मृण्मयशैलं वा यथाचित्तानुसारतः । उत्तमश्चाष्टतालेन मानुषे चोच्यतेऽधुना ॥
उष्णीषात् पादपर्यन्तं गृहीत्वोदयमानकम् । उष्णीषमङ्गुलं प्रोक्तं मुखमानं त्रिधा भवेत् ॥
नेत्रान्तं च पुटान्तं च गलान्तं चार्धत्र्यङ्गुलम् । गलमर्धाङ्गुलं वापि मूर्धाकश्रं(?)षडङ्गुलम् ॥
हिक्कास्तनानां रुद्रांशं तावन्नाभ्यन्तमेव च । ङ्गमेढ्रान्तं च तथा कुर्यात् ऊरू द्वाविंशकाङ्गुलम् ॥
जानु त्र्यङ्गुलं प्रोक्तं जङ्घा चोरुसमा भवेत् । चरणं द्व्यङ्गुलं प्रोक्तं पादश्च द्वादशाङ्गुलम् ॥
अङ्गुष्ठं त्र्यङ्गुलं प्रोक्तं प्रादेशिन्यास्तथैव च । न द्व्यङ्गुलं तथा ह्रासं न तत् षोडशहीनकम् ॥
बाह्वोरायाममङ्गुल्यं चत्वारिंशद्विगोत्तरा । मणिबन्धमध्यकान्तं च षोडशाङ्गुलिभिस्तथा ॥
महामानमिति प्रोक्तं एवमेतेन कारयेत् । उन्मानं चोपमानं च शिल्पशास्त्रोक्तमेव च ॥
आसनं स्थानकं वापि शायनं तु न कारयेत् । हस्तयोरुभयोः कुर्यात् दक्षिणे ज्ञानमुद्रिका ॥
तत्त्वमुद्रामथा वापि वामे मेढ्रोपरि न्यसेत् । कृताञ्जलिपुटं वापि हस्तमुद्राविधिक्रमात् ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

Digitized by Google

Original from
UNIVERSITY OF MICHIGAN

BHAKTA

(*To face entry § 27, p. 13*)

Digitized by Google

Original from
UNIVERSITY OF MICHIGAN

स्थानके तु विशेषेण वामहस्तं कटिं न्यसेत् । दक्षिणे ज्ञानमुद्रा वा सर्वे चाञ्जलिमेव च ॥
सर्वाभरणसंयुक्तान् सर्वावयवशोभितान् । एवं लक्षणमेवोक्तं प्रतिष्ठाकाल उच्यते ॥

Viṣṇutattva XIII : 4–16

§ 26

भक्तप्रतिष्ठां वक्ष्येऽहं विस्तरेण महामुने । दारुलोहशिलादीनि निर्मितानि यथाक्रमम् ॥
प्रतिष्ठायां विशेषेण भक्तानां च यथाक्रमम् । मण्डपं कल्पयित्वा तु देवाग्रे तु विशेषतः ॥
यथाभिमतदेशेषु मण्डपं कल्पयेत् पुरा । . . . .

Aniruddha XXXIV : 1–3*a*

§ 27

भगवन्मन्दिरे विष्णोः स्थापिता लोकपूजिताः । विष्णुभक्ताः कथं पूज्यास्तद्विधानं वदस्व नः ॥
. . . एकान्तिनो महाभागाः शठकोपपुरस्सराः ॥
क्षोण्यां कृतावतारा ये लोकोज्जीवनहेतुना । शाण्डिल्याद्याश्च ये चान्ये पाञ्चरात्रप्रवर्तकाः ॥
प्रह्लादश्चैव सुग्रीवो वायुसूनुर्विभीषणः । ये चान्ये सनकाद्याश्च पञ्चकालपरायणाः ॥
भक्तोत्तमास्ते विज्ञेयास्तान् दिव्यायतनादिषु । चरस्थिरविभागेन लोहैर्वा शिलयापि वा ॥
स्वस्ववर्णाश्रमाचारसदृशाकृतिचेष्टितान् । लाञ्छितान् चक्रशङ्खाभ्यां भुजयोर्दक्षिणादितः ॥
पद्मविष्टरमध्ये तु स्वासीनान् वाथ सुस्थितान् । ऋजुस्थितान् यथाशोभं पैशाचस्थानकेऽथवा ॥
निर्माय च विधानेन प्राङ्गणे मण्टपेऽथवा । प्रासादेष्वनुरूपेषु कल्पितेष्वग्रतो विभोः ॥
यथावकाशं वामे वा दक्षिणे वाथ पश्चिमे । स्वस्वमन्त्रैः प्रतिष्ठाप्य विधिवच्छ्रद्धयार्चयेत् ॥

* * *

ततो ध्यायेद् विष्णुभक्तं सर्वलक्षणसंयुतम् । स्वस्ववर्णाश्रमाचारसदृशाकृतिचेष्टितम् ॥
बद्धाञ्जलिपुटं वाथ व्याख्यामुद्रासमन्वितम् । पद्मविष्टरमध्ये तु स्वासीनं वाथ सुस्थितम् ॥
ललाटादिषु चाङ्गेषु ह्यूर्ध्वपुण्ड्रैरलंकृतम् । लाञ्छितं चक्रशङ्खाभ्यां भुजयोर्दक्षिणादितः ॥
तुलसीनलिनाक्षाणां मालाद्वितयभूषितम् । एवं ध्यात्वा विष्णुभक्तं हृदयादींश्च पूर्ववत् ॥

Īśvara[1] VIII : 174–182, 209–212

§ 28

अथ वक्ष्ये विशेषेण भक्तानां स्थापनं तथा । देवालयात् तथेशाने प्रत्येकं मण्डपं क्रमात् ॥
चतुस्तालं प्रकुर्वीत एकतालमथापि वा । देवस्याभिमुखं कृत्वा सर्वलक्षणसंयुतम् ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

तद्गेहस्थापनं कुर्याद् यथाविधिमनुक्रमात् । विग्रहं द्वादशं चैव सर्वावयवशोभितम् ॥
तदङ्गेन च कर्तव्यं बिम्बरूपं सलक्षणम् । चतुर्युगक्रमेणैव त्रीणि त्रीणि च कारयेत् ॥
सौवर्णं राजतं ताम्रं शैलजं दारुजं तु वा । तद्रूपं कारयेद् धीमान् यथावित्तानुसारतः ॥
भूताख्यं च सरोजातं महदाख्यं च भट्टकम् । भक्तिसारसमाख्यं च कुलशेखरनामकम् ॥
योगिवाहाख्यकं चैव भक्ताङ्घ्रे रेणुमेव च । परकालं च मिश्रं च पराङ्कुशमुनिं तथा ॥
इत्येवं नामधेयानि कथितानि क्रमेण वै । एषां जन्मक्रमं वक्ष्ये वर्षमासर्क्षलग्नकम् ॥
संवत्सरे तु विभवे नभसि श्रवणर्क्षके । लग्ने तु मकरे चैव सरस्यां जायते तथा ॥
बद्धपद्मासनं तस्य मुद्रामञ्जलिमेव च । वत्सरे प्रभवे चैव मासे भाद्रपदे तथा ॥
त्वष्टं चैककन्यायां जातो मेव च (?)... । मुद्रा सविधिवत् तस्य पूर्ववत् कमलासन ॥
युवसंवत्सराषाढमासे लग्ने तुलांशके । पद्मासनाञ्जलिं मुद्रां पद्मासनयुतं वरान् ॥
एते कृतयुगे जातास्त्रेतायामधुनोच्यते । श्रीमुखे शरदि ज्येष्ठे चित्रायां कन्यकांशके ॥
भट्टनाथाख्यकं चैव शिखायज्ञोपवीतिमान् । भवसंवत्सरे पुष्ये मासे वै पैतृभे तथा ॥
सिंहलग्नेऽञ्जलिं मुद्रां पद्मासनयुतं वरम् । बद्धकेशं पाशहस्तं भक्तिसाराख्यमेव च ॥
धातुसंवत्सरे मासे पुष्ये भे कर्कटांशके । वृश्चिके चैव लग्ने तु जातो भक्ताङ्घ्रिरेणुकः ॥
पद्मासनाञ्जलिं मुद्रां सदा धारयति ध्रुवम् । विकाराख्ये तु रोहिण्यां कार्तिके वृषभे तथा ॥
तिष्ठन्तं तालहस्तं तु गायकेति च नामतः । श्रीमुखे कार्तिके मासि तुलालग्ने तु पद्मज ॥
स्थितरूपं खड्गहस्तं वामहस्ते तु खेटकम् । बद्धोर्ध्वकेशं च.....परकालाख्यमेव च ॥
एते च द्वापरयुगे जाताश्च पुरुषोत्तमाः । वैशाखे तु विशाखे च जयसंवत्सरे तुला ॥
परोपदेशमुद्रां च ज्ञानपद्मासनं तथा । पराङ्कुश इति ख्यातो ततो वक्ष्ये शृणु त्विह ॥
वर्षे साधारणे ज्येष्ठे रिक्तायां मिथुनांशके । पद्मासनं कण्ठभूतं जातो दण्डेन मुद्रया ॥
मधुरकवीति नाम्ना च वनमालां यथाक्रमम् । आषाढे यमनक्षत्रे मेषे कीलकवत्सरे ॥
पद्मासनं त्रिदण्डं च यज्ञसूत्रं शिखां ततः । काषायवस्त्रधारी च यतिराज इति स्मृतः ॥
एते कलियुगे जाता भगवद्भक्तितत्पराः । मूर्तिभेदान् विशेषेण तत्तल्लाञ्छनसंयुताः ॥

Viṣṇu Tantra (Adyar *ms.*) XIX : 1–25

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN



PARAKĀLA

(*To face entry* § *28, p. 14*)

Digitized by Google

Original from
UNIVERSITY OF MICHIGAN

Digitized by Google

Original from
UNIVERSITY OF MICHIGAN

CHAPTER TWO

MATERIALS USED

The theological and practical explanations of the phenomenon of image-worship having been collated in the preceding chapter, we turn in this section to considerations relating to construction of icons. Generally speaking, icons are fashioned from wood, sculpted from stone, molded out of metal, or shaped from clay—and these are the major divisions of this chapter. To be sure, other materials may also be employed to present a likeness of the Lord—gems, sandalpaste, flowers, drawings and paintings—and a few excerpts are given over to these matters. The determining factors regarding choice of material to be used in constructing an icon depend upon the following : availability of materials, the caste-affiliation of the sponsoring *yajamāna*-patron, the special effects desired by instituting worship to this proposed form of the Lord, the intended function to which the icon will be assigned, and—not the least important—the funds available for the undertaking. *See* §29–§33.

Digitized by Google

Original from
UNIVERSITY OF MICHIGAN

The bulk of the passages in this chapter have to do not with icons for use in private (*svārtha*) devotions but with images for use in public, temple worship (*parārtha*) routines.

§ 29

रत्नजं शैलजं बिम्बं दारुजं लोहजं तथा । मृत्त्रैवस्तुकयोर्बिम्बं चित्रजं चेति सप्तधा ॥

Bhārgava Tantra IV : 7

§ 30

प्रतिमालक्षणं वक्ष्ये तदिहैकमनाः शृणु । मृण्मयी दारुघटिता लोहजा रत्नजा तथा ॥
शैलजा गन्धजा चैव कौसुमी सप्तधा स्मृता । कौसुमी गन्धजा चैव मृण्मयी प्रतिमा हृता ॥
तत्कालपूजिताश्चैताः सर्वकामफलप्रदाः । . . . .

Hayaśīrṣa 'Ādi' XV : 1–3*a*

§ 31

अथातः संप्रवक्ष्यामि प्रतिमाविधिमुत्तमम् । शिलामयी लोहमयी तथा रत्नमयीति च ॥
तथा काष्ठमयी चेति मृण्मयी चेति पञ्चधा । . . . .

Sanatkumāra 'Br.' VII : 1–2*a*

§ 32

बिम्बस्य लक्षणं वक्ष्ये द्रव्यसंग्रहसंयुतम् । मणिजं लोहजं शैलं त्रिविधं बिम्बमुत्तमम् ॥
वज्रं च पद्मरागं च वालवायोद्भवं तथा । ताम्रजं पैत्तलं चैव लोहान्येतानि सुव्रत ॥

Viśvāmitra XXII : 1–2

§ 33

इत ऊर्ध्वं प्रवक्ष्यामि स्वार्थार्चायास्तु लक्षणम् । लोहजा मणिजा वापि राजता ताम्रनिर्मिता ॥
एते प्रशस्ता विप्राणां क्षत्रियस्य सुवर्णजा । राजता वापि वैश्यस्य राजता ताम्रका शुभा ॥
शूद्रस्य ताम्रकैर्वा स्यात् सर्वेषां वापि ताम्रता । लोहजाः प्रतिमाः प्रोक्ताः निर्दोषाः समुदाहृताः ॥
रत्नजास्त्रिविधाः प्रोक्ताः सौम्याग्नेयी समेति च । शशिकान्तमयी सौम्या सूर्यकान्तमयी परा ॥
स्फटिकेति समा प्रोक्ता पूर्वा पूर्वोक्तमानतः । द्व्यङ्गुलं तु यदुत्सेधमथवा चतुरङ्गुलम् ॥
अङ्गुलित्रयमानेन मणिबिम्बमिहोच्यते । एवमात्मात्मबिम्बानां लक्षणं विधिपूर्वकम् ॥
एवं कर्मार्चनादीनामुत्तमादित्रिभेदतः । उक्तं हि लक्षणं तेन चात्मार्थेऽपि भवेद् विधिः ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

फलकायां पटे कुड्ये लिखितानां तु लक्षणम् । कर्माचालिक्षणं यत् तत् तद्वदुक्तं प्रमाणकम् ॥
अत्र किंचिद्विशेषोऽस्ति कनकाद्येन वा पुनः । पलाशेन तु बिल्वेन खादिरेण तु वा पुनः ॥
उदुम्बरेण वा पश्चाद् वकुलेन महामुने । पनसेन द्रुमेष्वेषु लब्धेन तु विशेषतः ॥
द्व्यङ्गुलं तु घनं चैव चतुरङ्गुलमायतम् । चतुरश्रं तु वा वृत्तं मेखलात्रयसंवृतम् ॥
तस्योपरि लिखेदब्जमष्टपत्रं तु वा पुनः । दलैर्द्वादशभिर्युक्तं सर्वशोभासमन्वितम् ॥
कर्णिकायां न्यसेत् तस्य नवरत्नं विशेषतः । तस्मिन् वा कर्णिकाग्रं वा फलकादिषु कर्णिका ॥
आवाह्य पूजयेद्देवमात्मार्थयजनं त्विति । मूलबेरादिबिम्बानां स्थानभेदं मुने शृणु ॥
प्रासादस्य तु गर्भांशं सप्तभागं कृते मुने । . . . .

Viṣvaksena X : 54–68*a*

Selecting Timber for Wooden Icons

दारुसंग्रहः

(*Dārusaṁgraha*)

The selection of the raw materials here, as in the selection of materials in every other case that follows, is done with great care and attention to detail. Nothing must escape attention : it is clear that the undertaking to provide a holy object suitable for receiving and reflecting the Lord's Presence is significant in every detail. First, an auspicious time must be selected for the party—including the directing *ācārya*, the *takṣaka*-carpenter and other artisans—to go forth on its 'pilgrimage' in search of acceptable timber. Presumably the best time is after the rainy season, when trees are verdant and pliable. The favored season according to the available texts seems to be sometime after mid-November (*Kārtika*-month). *See* §34–§37.

Having settled upon the time to seek the wood, the *ācārya*-director and his colleagues together go out with an ax, measuring strings and other necessary instruments (§38). In their search they take pains to avoid certain trees—*see* §39–§41—because those trees grow in unfavorable locations (burial grounds, swamps, *etc.*), or because they are sanctuaries for birds, or because they are defective (brittle, puny, knotty, split by lightning, *etc.*). Good sources of timber for icons, for pedestals, and for other holy objects to be fashioned from wood are listed—*see* §45–§52. Directions are also given for selecting the best parts of acceptable trees and for making these ready for cutting.

Digitized by Google Original from UNIVERSITY OF MICHIGAN

Prior to actual cutting a prayer is enjoined—*see* §53–§55—in which the petitioner seeks forgiveness from the tree for injuring it, praising it at the same time for the future role it will hereafter take in the form of an icon to be adored by all the world. The actual cutting—*see* §56–§59—is to be done with dispatch and care.

Once cut, the timber is ceremoniously taken back by the *ācārya* and *rathakāra*-carpenter to the place where it will be fashioned after appropriate seasoning—*see* §60 and §61.

§ 34

कार्तिकाद्यष्टमासेषु प्रशस्तो दारुसंग्रहः । प्रशस्तं पक्षनक्षत्रं योगयुक्ते शुभे दिने ॥

Puruṣottama VI : 4

§ 35

कार्तिकाद्यष्टमासेषु प्रशस्तो दारुसंग्रहः । . . . .

Pādma 'kr.' XI : 86*a*

§ 36

कार्तिकाद्यष्टमासेषु प्रशस्तो दारुसंग्रहः । . . . .

Kapiñjala XI : 12*a*

§ 37

कार्तिक्याद्यष्टमासेषु दारुसंग्रहमुत्तमम् । . . . .

Viṣvaksena III : 7*a*

§ 38

अथातः संप्रवक्ष्यामि दारुसंग्रहणं परम् । ब्राह्मणान् भोजयित्वा तु आचार्यः शुद्धमानसः ॥
आचार्यं समलङ्कृत्य नववस्त्राङ्गुलीयकैः । यजमानः शचीनाथ शुद्धान्तःकरणः शुचिः ॥
शिल्पिनं पूजयित्वा तु गन्धपुष्पाक्षताम्बुभिः । वैष्णवान् समलङ्कृत्य भोजनाच्छादनादिभिः ॥
कुठारादि (च) संगृह्य वैष्णवैः सह मन्त्रवित् । शुचिर्नवाम्बरधरः सोत्तर्योष्णीषवान् क्रमात् ॥
निर्गच्छेद् वृक्षमासाद्य शिल्पिना सह साधकः । अष्टाक्षरं महामन्त्रं जप्त्वा चाष्टोत्तरं शतम् ॥
कुशहस्तः प्रणम्याथ दारुं पश्येत् समाहितम् । . . . .

Viṣvaksena III : 1–6*a*

§ 39

. . . वर्जनीयानपि तरूनभिधास्यामि तान् शृणु ॥
स्वयं शुष्काश्च ये वृक्षाः स्वयं भग्ना हतत्वचः । वक्रार्किणः क्षताश्चैव कोटरव्रणसंयुताः ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

चतुष्पथस्थिता ये च ये च पुत्रकवृक्षकाः । न देवायतनस्थाश्च न च वल्मीकसंभवाः ॥
संप्राप्तभूता ये वृक्षाः श्मशानस्थाश्रया द्रुमाः । पक्षिणां निलया ये च शुष्काग्रा ये च पादपाः ॥
निस्त्राणितानलहताः कुञ्जराशनिदूषिताः । पशुभिः सेविता ये च छायादा ये महापथि ॥
एकशाखा द्विशाखाश्च त्रिशाखाश्च विवर्जिताः । चण्डालाद्यधमैः शश्वत् सेविताः प्रतिलोमजैः ॥
शीर्णपर्णाश्च मार्गस्था अन्यवृक्षसमावृताः । कूपस्थाश्च तटाकस्थाः विक्रीताश्च* विवर्जयेत् ॥
वर्जितैस्तरुभिः कुर्यात् प्रतिमाश्च प्रमादतः । कर्ता कारयिता चोभौ सान्ववायौ विनश्यतः ॥

Puruṣottama VI : 8*b*–15

§ 40

. . . दक्षिणप्रवणः शुष्को दग्धः पक्षिगृहाश्रयः ॥
पतितश्चैत्यवल्मीकचितादिस्थश्च नेष्यते । . . . .

Viṣṇu XIV : 50*b*–51*a*

§ 41

शिलानामिव वृक्षाणां भूमिभागो विधीयते । कटुकण्टकिनो वृक्षा वर्जनीयाः प्रयत्नतः ॥
भुग्ना भग्नाः प्रभिन्नाश्च भिन्नशाखा गतत्वचः । शुष्का दग्धाः क्षता घुष्टा दक्षिणाप्रवणास्तथा ॥
उत्कीर्णाः कृमिदुष्टाश्च सङ्कीर्णाः पक्षिसेविताः । ग्रामे चैत्ये च जाता ये वर्जनीयास्त्वनेकशः ॥

Sanatkumāra 'Br.' VII : 87–89

§ 42

. . . दग्धोऽग्निना स्वयं शुष्कः पतितो भिन्न एव च ॥
तथा चाशनिना दग्धः पतितश्च स्वयं तथा । दक्षिणाप्रवणश्चैव वर्जिता अन्त्यदेशजाः ॥
सङ्कल्प्य प्रतिमामेकां शिलायां वृक्ष एव वा । क्रमेण परिगृह्णीयात् कर्तव्यैकैवमत्र तु ॥
नान्यत्र प्रतिमां कुर्यात् क्रिया भवति निष्फला । . . . .

Viṣvaksena III : 12*b*–15*a*

§ 43

वर्जनीयानपि तरूनभिधास्यामि तान् शृणु । स्वयं शुष्काश्च दग्धाश्च स्वयं भग्ना हतत्वचः ॥
वक्रा घुणक्षताश्चैव कोटराः पक्षिसेविताः । चण्डालाद्यधमैः शश्वत् सेविताः प्रतिलोमजैः ॥
न वासवृक्षाश्चैत्यस्थाः देवताधिष्ठितास्तथा । श्मशानस्थाश्च मार्गस्था देवालयसमीपगाः ॥

* *cf.* Pādma-saṃhitā 'kr.' XI : 96*a* reads 'vikṛta' which means 'ill-shaped' rather than 'already sold.'

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

कूपस्थाश्च तटाकस्था विकृताश्चैव वर्जिताः । वर्जितैस्तरुभिः कुर्यात् प्रतिमां चेत् प्रमादतः ॥
कर्ता कारयिता चोभौ सान्ववायौ विनश्यतः । . . . .

Īśvara[1] XI : 93–97*a*

§ 44

असारा दुष्टदेशस्था दूषिताश्चापि न द्रुमाः । कटुकण्टकिपैशाचक्षुद्रचैत्यादयस्तथा ॥

Viṣṇu XIII : 83

§ 45

. . . आदाय लक्षणोपेतं उपलं वै सितादिकम् ॥
सुस्निग्धं सुस्वनं शुद्धं दोषैर्हीनं स्फुटादिकैः । वृक्षं वा लक्षणोपेतमक्षतं सरलं दृढम् ॥
फलपुष्पप्रदं स्थूलं सक्षीरं वा तदुज्झितम् । नानाजातिं च कर्मण्यं यज्ञाङ्गानां गुणावहम् ॥
सत्त्वाद्यं तदधिष्ठातृबलिदानपुरःसरम् । कृत्वा विसर्जनं चैव मध्वाज्याक्तेन देशिकः ॥
शस्त्रेण प्रहरं दद्याच्छेत्तव्यं शिल्पिना ततः । चन्दनं स्यन्दनं तत्र तथा सुरभि चन्दनम् ॥
अगरुं कर्णिकारं च काश्मर्यं रक्तचन्दनम् । बिल्वामलकचूताश्च तालवर्णकसिंहकाः ॥
श्रीपर्णी नालिकेरं च नागमातृकपीनकम् । गव्यं कपित्थं च तथा हिमतालतमालकम् ॥
बदरं खदिरं फल्गु मधूकं किंशुकद्रुमम् । फालवेतं च खर्जूरं नीपनारङ्गशिंशुपम् ॥
पिप्पलं वृक्षमश्वत्थं पिप्पलीविटपं महत् । सुरदारु हरीतक्यं बकुलं चाप्युदुम्बरम् ॥
कालाख्यं पुष्पकूलं च वैरं चान्यत् फलद्रुमम् । फालस्यं भूर्जवृक्षं च पलाशं कृतमर्दकम् ॥
तिन्दुकं बीजसारं च मातुलुङ्गद्रुमं महत् । राजवृक्षं कोहितकं सुनाभिकुटकार्जुनम् ॥
सरलं कुटजः शाकः शमीश्रीवेष्टकेतकाः । असनस्पन्दनाख्यं च स्तबछ(?)स्तबकेति च ॥
सारवन्तो मखीया ये सुसिद्धा लोकपूजिताः । ग्राह्यास्तरूत्तमाः सर्वे कर्मणि स्थापनादिके ॥
एकैकतालवृद्ध्या तु द्वादशान्तकरावधि । द्विरष्टकं तु बिम्बानामेवं स्यादपरं तु वै ॥
प्रयोजनवशेनैव तरवो बिम्बकर्मणि । विहिताः क्रमशस्त्वेते स्वल्पानामादिनां महत् ॥
केचित् फलवशेनैव विहिताश्च फलार्थिनाम् । निष्कामानां च विहिताः सर्वे सर्वफलप्रदाः ॥
एतैः पूर्वोदिताः कार्याः सप्ताङ्गैस्तोरणाः शुभाः । अग्निकार्योपयोग्यानि स्रुवादीन्युदितानि वै ॥
अग्नाविन्धनकाष्ठानि समित्परिधयस्तथा । आराधनार्थं मन्त्राणां भद्रपीठानि पुष्कर ॥
मन्त्रबिम्बान्यशेषाणि तत्पीठानि तथैव च । प्रासादादीनि चित्राणि प्राकारसहितानि च ॥
शयनान्यासनादीनि देवोपकरणानि च । रथादिरथ यात्रार्थं वैष्णवेषूत्सवेषु च ॥
केतुदण्डानि दीर्घाणि शिखराणां शिरोपरि । आहरेत यथाशास्त्रं छायाशुष्ककृतानि च ॥
भङ्गभेदकृमिच्छिद्रसिंहऋक्षनखक्षतैः । दोषैरशनिपाताद्यैः नाहरेद् दूषितानि वै ॥

Pauṣkara XL : 13*b*–34

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 46

चन्दनश्चागुरुश्चैव काश्मर्यो हरिचन्दनः । केसरः खदिरश्चैव कुरवश्चासनस्तथा ॥
मधुको देवदारुश्च जातिर्बिल्वः शमी तथा । शाकश्च पनसश्चैव कदम्बस्तिलकस्तथा ॥
नमेरुः फलिनी चैव सुरभिश्चम्पकस्तथा । शिंशुपा क्षीरिका सालो बीजकः कुरुविन्दकः ॥
तिनिशश्चन्दनश्चूतः तमालः सरलोऽर्जुनः । कुटजः करकेली च सप्तपर्णो मधुष्ठिलः ॥
वरणो निचुलश्चैव पुन्नागः खदिरस्तथा । राजवृक्षश्च इत्येते प्रतिमार्थमुदाहृताः ॥
सारवन्तो घनोपेताः सर्वदोषविवर्जिताः । एतैः कार्या प्रतिकृतिर्वर्जितैर्न कदाचन ॥

* * *

कुर्याद् बिम्बं प्रकाण्डेन शाखया चानुरूपया । कुम्भोदकेन तं सिञ्चेद् ध्यात्वा तत्र स्थितं हरिम् ॥
मूलमन्त्रेण परितः सिञ्चेद् करकवारिणा । गुरवे दक्षिणां दद्यात् पूर्ववत् कमलासन ॥

Pādma 'kr.' XI : 87–92, 107–108

§ 47

. . . दारुग्रहणमुच्यते । आपर्वतान्तःसञ्चारो निर्व्रणं सरलं बृहत् ॥
रोगमुक्तं न सिंहाद्यैः प्राङ्नखैः सक्षतीकृतम् । नानिलाशनिदावाग्निहतवीर्यं न वाह्यकम् ॥
सलक्षणे तु सुस्निग्धे भूभागे चोन्नते स्थितम् । . . . .

Īśvara[1] XVII : 82–84*a*

§ 48

खादिरं पनसश्चैव मधुकं चन्दनद्वयम् । सरलो देवदारुश्च जातिर्बिल्वं शमी तथा ॥
कदम्बः कुटजश्चैव असनश्चागरुस्तथा । तिमीलः सालशाखश्च पिचुमन्दस्तथैव च ॥
काश्मीरस्तिलकश्चैव तमालो वेत्रमेव च । फलिनी चम्पकश्चैव स्तम्भकः शिंशुपा तथा ॥
पाटलो राजवृक्षश्च इत्येते वृक्षजातयः । . . . .

Kapiñjala[2] V : 7–10*a*

§ 49

. . . उक्तकाले महाप्राज्ञो निरीक्ष्य शुभवृक्षकम् ॥
कण्टकान् खादिरं ग्राह्यमसारं परिवर्जयेत् । वृक्षानुक्रमणं वक्ष्ये संक्षेपात् सारमुत्तमम् ॥
खादिरो देवदारुश्च बदरिश्चन्दनद्वयम् । शिंशपा राजवृक्षश्च बिल्वश्च श्रावणस्तथा ॥
मधुको लोहितश्चैव स्यन्दनः स्पन्दकस्तथा । चम्पकं चैव शाल्मल्यं सालवृक्षस्तथैव च ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

असन्नो बकुलश्चैव शिरीषामलकस्तथा । सर्वे च याज्ञिका वृक्षाः प्रतिमार्थमुदाहृताः ॥
सारवन्तश्च ये चान्ये कृमिचित्रविवर्जिताः । . . . .

Viṣvaksena III : 7*b*–12*a*

§ 50

चन्दनश्चागरुश्चैव सालः खदिर एव च । मधूको देवदारुश्च तमालः पनसस्तथा ॥
लिकुचश्चैव शाकश्च काश्मर्यो हरिचन्दनः । कदम्बस्तिलको बिल्वो नमेरुः फलिनी तथा ॥
सुरभिश्चैव नागश्च चम्पकः स्तबकस्तथा । शिंशुपा च तथा श्यामा बीजकः कुरुविन्दकः ॥
केसरः कुरवश्चैव कुटजश्चासनस्तथा । राजादनः शिरीषश्च प्रतिमार्थमुदाहृताः ॥
सारवन्तस्तु संग्राह्या ये चान्ये दोषवर्जिताः । शिलायामिव वृक्षेषु गर्भाः प्रोक्ता यथाविधि ॥
चित्रं चाप्यर्धचित्रं च वृक्षे कुर्यान्न चापरम् । सर्वासामपि चैतासां पादपद्मं तु पूर्ववत् ॥

Sanatkumāra ' Br.' VII : 90–95

§ 51

अगुरुर्देवदारुश्च राजवृक्षश्च चन्दनम् । बिल्वकाम्रो नमेरुश्च बिम्बः खदिर एव च ॥
शिरीषः पनसश्चैव वकुलः कुटजोऽर्जुनः । शिंशुपश्च कदम्बश्च शिरीषश्चम्पकस्तथा ॥
काश्मर्यो मधुकः सालः शमी पुन्नाग एव च । रक्तचन्दनमित्येते प्रतिमार्थमुदाहृतम् ॥
एतैः कार्याः प्रतिकृतीः वर्जितैर्न कदाचन । . . . .

Puruṣottama VI : 5–8*a*

§ 52

शिलायामिव संस्कारः कर्तव्यो दारुकर्मणि । दारुचन्दनशम्पाकमधूकासनबिल्वकाः ॥
सरलः स्पन्दनः सालः स्तनकः स्तम्भकस्तिमिः । वरुणस्तिन्दुकाशोकपर्णीपनसशिंशपाः ॥
अन्येऽपि याज्ञिका वृक्षाः सारवन्तश्च शोभनाः । ऋजुः स्निग्धः समोऽशाखः शुभदेशोद्भवो घनः ॥
अगर्भव्रणरन्ध्रादिर्दृढमूलः शुभो मतः । . . . .

Viṣṇu XIV : 47–50*a*

§ 53

. . . वृक्षलोकस्य शान्त्यर्थं गच्छ देवालयं शुभम् ॥
देवत्वं यास्यसे तत्र दाहच्छेदविवर्जितम् । जलपुष्पप्रदानेन सधूपैर्बलिभिस्तदा ॥
लोकास्त्वां पूजयिष्यन्ति ततो यास्यसि निर्वृतिम् । गन्धपुष्पैश्च संपूज्य बलिं दत्त्वा च पूर्ववत् ॥

Viṣṇu XIV : 54*b*–56

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 54

. . . उपतिष्ठेत भूरुहम् । कर्मणा पूर्ववृत्तेन स्थावराकारमाश्रितम् ॥
वृणोमि विष्णोर्बिम्बार्थं सर्वसंपत्करं तव । स्थावरत्वादितो गच्छ दिव्यं रूपमनुत्तमम् ॥
भुङ्क्ष्व भोगांश्च विपुलान् वासुदेवप्रसादतः । हिनस्मि नाहं वृक्ष त्वां किंतु मुञ्चामि जन्मतः ॥
इत्युपस्थाय मन्त्रेण रक्षासूत्रेण वेष्टयेत् । अनुक्तमन्यत् कर्तव्यं शिलाग्रहणवन्निशि ॥

Pādma " kr." XI : 101-104

§ 55

. . . प्राञ्जलिः प्रयतो भूत्वा इमं मन्त्रमुदीरयेत् ॥
कर्मणा पूर्ववृत्तेन स्थावराकारमाश्रितम् । वृणोमि विष्णुबिम्बार्थं सर्वसंपत्करं तव ॥
स्थावरत्वादितो गच्छ दिव्यं रूपमनुत्तमम् । भुङ्क्ष्व भोगांश्च विपुलान् वासुदेवप्रसादतः ॥
हिनस्मि नाहं वृक्ष त्वां किंतु मुञ्चामि जन्मतः । वृक्षशोकस्य शान्त्यर्थं प्राप्य देवालयं शुभम् ॥
देवत्वं यास्यसे तत्र दाहच्छेदविवर्जितम् । जलपुष्पप्रदानेन सधूपैर्बलिभिस्तथा ॥
लोकास्त्वां पूजयिष्यन्ति ततो यास्यसि निर्वृतिम् । . . . .

Puruṣottama VI : 22*b*-27*a*

§ 56

पूर्णाहुतिं ततो हुत्वा वह्निमुद्वासयेद् गुरुः । प्रभाते देशिकः स्नात्वा मुहूर्ते शोभने शुचिः ॥
पूर्ववद् गन्धपुष्पाद्यैः पूजयेद् वृक्षमुत्तमम् । तद् वृक्षं तु कुठारेण प्राङ्मुखः प्रयतः शुचिः ॥
रथकारस्ततो वृक्षं छेदयेद् गुर्वनुज्ञया । प्राच्यामुदीच्यां पतितः कर्तुरभ्युदयावहम् ॥
नैर्ऋत्याग्नेययाम्यादिदिक्षु पातो न शोभनः । वायव्यवारुणीभ्यां तु दिक्प्रपातो न शोभनः ॥
यस्य बाह्यस्थिता शाखा दिक्चतुष्टासु समन्ततः । पूर्वमेव तु तान् छित्त्वा पश्चाद् वृक्षं तु मन्त्रवित् ॥
यथा शिलायां गर्भास्तु तथा वृक्षेषु चैव हि । कुम्भोदकेन संसिञ्चेत् ध्यात्वा तत्र स्थितं हरिम् ॥
गुरवे दक्षिणां दद्यात् पूर्ववत् कमलासन । देवालयं द्रुमं नीत्वा रथकारेण कारयेत् ॥

Puruṣottama VI : 28–34

§ 57

प्रभाते देशिकः स्नात्वा मुहूर्ते शोभने शुचिः । छिन्द्याद् वृक्षं कुठारेण प्राङ्मुखः पुरुषात्मना ॥
रथकारस्ततो वृक्षं छेदयेद् गुर्वनुज्ञया । प्राच्यामुदीच्यां पतितस्तरुरभ्युदयावहः ॥

Pādma ' kr.' XI : 105–106

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 58

स्वप्नं दृष्ट्वा द्विजायोक्त्वा शोभनान्यभिधाय च । पूर्वोत्तरमुखो मन्त्री जप्त्वेदं 'विष्णु'रित्यृचम् ॥
मध्वाज्याक्तकुठारेण स्मृत्वास्त्रं छेत्तुमारभेत् । 'दिवा वारेभिरे'त्येवं पातं तस्य समुद्धरेत् ॥
सोमेन्द्रेशेषु तत्पातः शुभोऽन्यत्र न शस्यते । भग्नेऽस्मिन् कारयेच्छान्ति महाव्याहृतिहोमतः ॥
'अग्न आयाहि'मन्त्रेण पतितं शोधयेद् द्रुमम् । चतुरश्रं ततः कृत्वा रथेनाश्मवदानयेत् ॥
Viṣṇu XIV : 57–60

§ 59

प्रभाते पूजयेद् वृक्षं पुण्याहं वाचयेत् ततः । अष्टदिक्ष्वष्टशाखा वै छित्त्वा पूर्वं द्विजोत्तम ॥
वृक्षमूले कुठारेण प्राङ्मुखः छेदनं कुरु । निर्दोषपतनादीनि दारुसंग्रहणे शुभम् ॥
Kapiñjala XI : 18–19

§ 60

देवालये द्रुमं नीत्वा रथकारेण कारयेत् । बिम्बमत्यद्भुताकारं धाममानानुसारतः ॥
आलये चाधिवासादि स्थापयित्वा द्रुमं भुवि । कुर्याद् बहिर्वने यद्वत् सर्वं तद्वद् यथाविधि ॥
असंस्कृतेन तरुणा यथोक्तविधिना यदि । कुर्यात् प्रतिकृतिं मोहात् तदनर्थाय केवलम् ॥
तस्माद् यथोक्ततरुणा कृतमभ्युदयावहम् । . . . .
Pādma 'kr.' XI : 109–112*a*

§ 61

. . . निर्गच्छेद् वनमासाद्य वृक्षं छित्त्वा हरिं स्मरन् ॥
तद्वृक्षं शिरसि स्थाप्य स्मरन् नारायणं प्रभुम् । ततो यागगृहं गच्छेत् शङ्खतूर्यादिभिस्सह ॥
मूलालयस्य पूर्वे तु पूर्णकुम्भं निधापयेत् । निर्गच्छेद् वनमासाद्य वृक्षं हित्वा हरिं स्मरन् ॥
अश्वत्थपल्लवैर्युक्तं सापिधानं सहस्रकम् । सतोयं रत्नसंयुक्तं स्थापयेद् धान्यराशिषु ॥

* * *

गर्भगेहे तु संस्थाप्य कवाटं बन्धयेत् पुनः । त्रिरात्रं पञ्चरात्रं वा सप्तरात्रमथापि वा ॥
नवरात्रं तु वा चास्मिन् कवाटं न विमोचयेत् । अङ्कुरार्पणमारभ्य तद्रात्रेण शचीपते ॥
आलये वामभागे तु दक्षिणे चोत्तरेऽपि वा । मण्डपं वाथ कूटं वा प्रपां वाकल्प्य साधकः ॥
वितानवस्त्रसञ्छन्नमलङ्कारैरलङ्कृतम् । नालिकेरफलैर्युक्तं चामरैरुपशोभितम् ॥
एवंलक्षणसंयुक्तं मण्डपे छादयेत् तरुम् । अपराह्णे शचीनाथ वैष्णवैस्सह मन्त्रवित् ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

शङ्खतूर्यादिसंयुक्तं नृत्तगेयसमन्वितम् । गर्भगेहं समासाद्य कवाटं प्रविमोचयेत् ॥
दारुमभ्यर्च्य गन्धाद्यैर्मूलमन्त्रमनुस्मरन् । संप्रोक्ष्य गन्धतोयेन पुण्याहं कारयेत् क्रमात् ॥
मण्डपे मध्यभागे तु खानयेदवटं क्रमात् । द्विहस्तं वा तदर्धं वा तस्यार्धं वा शचीपते ॥
प्रधानतरुमादाय मन्त्रेणास्त्रेण साधकः । स्थापयेन्मूलमन्त्रेण दक्षिणे तु श्रियं न्यसेत् ॥
उत्तरे तु न्यसेत् पुष्टिं तत्तन्मूलं यथाक्रमम् । संवत्सरसहस्रायुर्गतं स्मृत्यन्तरं परम् ॥
तन्मूले सलिलं न्यस्य पुण्डरीकाक्षविद्यया । तत्तन्मूलेन वा पश्चाज्जलदानं यथारुचि ॥

Viṣvaksena III : 51b-54, 67-77

Choosing Stone for Sculpting Images

शिलासंग्रहः

(*Śilāsaṁgraha*)

The selection and quarrying of the stone from which icons sculpted in rock are made is to be done with attention to a number of different kinds of details. The excerpts in this section deal with the entire cycle of going out in search of the raw stones, the bases of selection once a quarrying site has been located, the rituals connected with the undertaking at the site, actual digging and cutting, and then bringing the rock back to the place where it will be worked on. Thus the excerpts fall into certain groupings.

The first excerpt, §62, indicates that the going forth in search either of wood or of stones for divine icons is a holy enterprise, hence a '*yātrā*'-pilgrimage. As in any *yātrā*, all details are important; here the stress is upon omens that may be noted at the commencement of the undertaking and during the actual journey to the site where materials are to be collected. Then follow some excerpts, §63–§69, concerning places to go for acceptable stone—certain mountains, holy places, fields and places having subterranean deposits. The next grouping of excerpts, §70 through §88, takes up matters of rejecting for use certain kinds of stones—defects (*doṣas*) arising from their original location, internal defects, and former usage as well as from an assessment of their color, smell, sound when thumped, *etc.* Particular stress seems to be placed on avoiding stones having internal cavities (*garbha-doṣa*). It is reiterated that nothing but disastrous consequences will result if defective stones are used.

In regard to the desirable kinds of stones to seek, a number of seemingly curious considerations are to be taken into account—but all are aimed at getting flawless, attractive and workable material for the divine image. In this regard in the next four groupings of

Digitized by Google Original from UNIVERSITY OF MICHIGAN

excerpts—§89–§93, §94–§104, §105–§111 and §112–§120—we see taken up such qualifications as where and under what conditions one comes upon the stones; the "gender" (male, female, or neuter) assignable to a deposit; the vibrancy (sound when tapped) and "age" (texture, temperature, taste, *etc.*); and the "caste" and color. Having found stones that satisfy all the prerequisites, then, on an auspicious day, quarrying can commence—*see* §121–§136. The area is plotted with pegs-and-strings and, before actual digging starts, certain rites are attended to in order to disperse the field spirits (*bhūtas*) hovering about the place. The *devatā*-spirit residing in the rock is also addressed but asked to remain, and the exposed stone is then washed and worshipped, taken up, and finally carried away in a cart to a place where the sculptors will work on it to fashion from it the Lord's likeness.

§ 62

सच्छैलदारुग्रहणे विशेषस्त्वधुनोच्यते । सर्वत्रारम्भकाले तु निमित्तमुपलक्ष्य च ॥
विशेषार्चनयात्रायां तच्छुभेन शुभोदयः । अशुभेन निमित्तेन यात्रा विघ्नवती भवेत् ॥
विरामेण तु जप्येन शान्तिः स्वस्त्ययनादिना । निवर्तनेन तद्वन्याद्दहते शुभकृ(द्य)त्यतः ॥
मन्त्रमभ्यर्थ्य यात्रायामभ्यर्थ्याज्ञां विनन्द्य च । नैवेद्यशेषभुग्वामचारस्थः संयतेन्द्रियः ॥
प्राङ्मुखः संस्मरेन्मन्त्रं समुत्थायामृतोदये । परिज्ञाय परां मूर्तिं तन्मूर्त्यन्तरमेव वा ॥
यायात् तदीयं दिग्भागं तदभावात्तु चान्यदिक् । सहायैरप्रमत्तैस्तु शिल्पिभिः सह संवृतः ॥
लाजदध्यक्षतैः कुम्भैर्यायात् पुष्पपुरःसरैः । सौमनस्यं महोत्साहस्त्वङ्गस्पन्दस्तु दाक्षिणः ॥
शुभा वाणी ध्वजः शङ्खस्तन्त्रीवाद्यफलादयः । गोगजाश्वद्विजाः कन्या नवभाण्डं च मृद्दधि ॥
आर्द्रमांसान्यलङ्कारो मदिराग्निर्घृतं पयः । सिद्धान्नशालिबीजादि दर्भाः सद्द्रुममञ्जरी ॥
छत्रं वस्त्रं ध्वजो यानं रोचना कुङ्कुमं मधु । दर्पणं चामरो हारो धातवः शस्त्रवर्जिताः ॥
रत्नानि वैबुधं बिम्बं मधुमत्तो ह्यकातरः । जीवन्मत्स्या निमित्तं च मनसो यदखेददम् ॥
तत्सर्वं दर्शने श्रेष्ठं तत्खेददमशोभनम् । स्वगृहद्वारदेशाच्च पथि सप्तपदावधि ॥
क्रममाणे निमित्तं च फलं यच्छति तेन हि । निर्गत्य नगराद् ग्रामात् क्रोशार्धं क्रोशमेव वा ॥
गृह्णीयाच्छकुनं चिह्नं नकुलादिमयं त्वतः । पूर्णात् सार्धाधिकात् क्रोशात् हितकृन्मृगदर्शनम् ॥
दिङ्मुखे निर्मले सिद्धिर्व्रजेद् यत्र विशेषतः । सिद्धिकृच्चाम्बरं स्वच्छं सुदीप्ता भास्करादयः ॥
मरुत् सुखावहः स्निग्धप्रदक्षिणगतिः स्थिरः । दिव्याद्युत्पातनिर्मुक्तः स कालः सिद्धिसूचकः ॥
हंसः शुको भरद्वाजः कोकिलः खञ्जरीटकः । मयूरो भ्रमरश्चक्रवाकाद्याः खेचराः शुभाः ॥
भूचरा नकुलाः सौम्याः सितोऽहिर्गृहगोधिका । गन्धाखुर्जम्बुकश्चैव सर्वेषां दर्शनं शुभम् ॥
मृगाणां हरिणः सिंहः व्याघ्रः शशकचित्रकाः । सिद्धिसंसूचनाः सर्वे सर्वेषां विहितं तु वै ॥
प्रदक्षिणं विशेषेण व्यत्यये जम्बुकः शुभः । द्विजादीनां रुतं स्निग्धं सिद्धिकृत् तच्च सौख्यदम् ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

समुत्पन्ने निमित्ते तु धातुसंक्षेपकर्मणि । प्रतीक्षितुं न युज्येत यदा शान्ति तदाचरेत् ॥
पूर्वोक्तां चित्तशुद्ध्यर्थं सविशेषां सदक्षिणाम् । प्रविश्य विधिवत् क्षेत्रं निरीक्षेत स्वतेजसा ॥

Īśvara[1] XVII : 31–52

§ 63

प्रथमं तु शिलां वक्ष्ये येषु शैलेषु दृश्यते । हेमकूटश्च निषधो हिमवन्नीलपर्वतः ॥
मन्दरो माल्यवांश्चैव त्रिकूटो मलयाचलः । गन्धमादनमेरुश्च दशैते पर्वतोत्तमाः ॥
एतेषु प्रतिमा ग्राह्या तदलाभे शिलां शृणु । भूगता या शिला ग्राह्या तदलाभे शिलां शृणु ॥
गिरौ च चित्रकूटाख्ये रैवताख्ये महागिरौ । सिंहाचले चित्रकूटे वेङ्कटे दर्दुरे तथा ॥
तथा श्वेतगिरौ ग्राह्या . . . .

Puruṣottama V : 8–12*a*

§ 64

. . . अथ शैलमयीं वक्ष्ये शिला यत्र च गृह्यते ॥
सुमेरुहिमकूटे च निषधे नीलपर्वते । चित्रकूटे मन्दरे च शङ्करश्वशुरे गिरौ ॥
माल्यवत्पर्वते चैव मलये गन्धमादने । दशैतेषु शिला ग्राह्या ह्यलाभे ह्यपरां शृणु ॥
श्रीगिरौ श्रीकुटे चैव किष्किन्धे चैव पर्वते । चित्रकूटे तथा श्वेते दर्दुरे सह्यपर्वते ॥
एतेष्वपि शिला ग्राह्या पुण्येष्वन्येष्वपि द्विज । पर्वतानामलाभे तु गृह्णीयाद् भूगतां शिलाम् ॥

Hayaśīrṣa 'Ādi' XV : 2*b*–7

§ 65

पर्वते तु शिला ग्राह्या तदलाभे तु भूतले* । शुभवृक्षसमाकीर्णे बहूदकतृणान्विते ॥
पद्मोत्पलवनाकीर्णे व्रीहिक्षेत्रसमावृते । हिन्तालतालन्यग्रोधनालिकेरसमावृते ॥
पलाशक्रमुकाश्वत्थपिप्पलोदुम्बराकुले । कुशदर्भसमाकीर्णे देशे ग्राह्याः सदा शिलाः ॥

Sanatkumāra 'Br.' VII : 4–6

§ 66

अतः परं प्रवक्ष्यामि शिलाग्रहणमुत्तमम् । द्विविधा तु शिला ग्राह्या पर्वतेषु धरासु च ॥
पर्वतान् प्रथमं वक्ष्ये येषु शैलेषु गृह्यते । त्रिकूटो हेमकूटश्च कैलासो गिरिसत्तमः ॥
मन्दरो माल्यवांश्चैव निषधो नीलपर्वतः । मेरुस्सह्यश्च विन्ध्यश्च किष्किन्धो गिरिसत्तमः ॥

* The same is recommended in Vasiṣṭha IV : 4*a*

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

वेङ्कटो दर्दुरश्चैव श्रीगिरिश्चित्रकूटकः । एवंभूतान् समावीक्ष्य पुरतः प्रणमेत् सदा ॥
सपत्रं पुष्पमादाय निक्षिपेद् गिरिसन्निधौ । नमस्कृत्य हरिं ध्यात्वा पर्वतं पापनाशनम् ॥
अधिवासनानि सर्वाण्यस्मिन् पूर्ववदाचरेत् । भूगता या शिला प्रोक्ता सारं लक्षणमुच्यते ॥
या पुष्पवनसङ्कीर्णा जलाशयसमायुता । सा क्षितिर्वारुणी ज्ञेया शिला तत्र तु वारुणी ॥
यस्याश्चोत्तरसंस्थायां व्रीहिक्षेत्रं तु दक्षिणे । पश्चिमे क्षीरवृक्षाश्च सा माहेन्द्री प्रकीर्तिता ॥
पलाशाः खदिरा वृक्षाः काष्पर्यः पुष्पदक्षिणे । तैत्तिर्यश्च कपोताश्च गृध्राश्चैव वसाशनम् ॥
भ्रमराश्च वराहाश्च दृश्यन्ते यत्र संततः । तोयमन्तर्गतं बाष्पं तामाग्नेयीं प्रचक्षते ॥

Viṣvaksena IV : 1–10

§ 67

पुण्यसिन्धूद्भवा ग्राह्या पुण्यतीर्थोद्भवा च या । नदीपर्वतसंलग्नवृक्षच्छायासमावृता ॥
निमग्ना भूतले या च अस्पृष्टा सूर्यरश्मिभिः । अन्तर्जलोषिता नद्यामेकवर्णा मनोरमा ॥

Hayaśirṣa 'Ādi' XV : 23-24

§ 68

. . . पुण्यक्षेत्रे शुभे देशे ब्रह्मवृक्षनिरन्तरे ॥
कुशकाशोदकयुते मृगैः कृष्णैर्निषेविते । पद्मोत्पलसमाकीर्णे व्रीहिक्षेत्रनिरन्तरे ॥
हिन्तालपूगपुन्नागनालिकेरनिरन्तरे । तपस्विजनसंबाधे देशे ग्राह्या शिला भवेत् ॥

Pādma 'kr.' XI : 44b-46

§ 69

. . . भूगता याः शिलाः प्रोक्तास्तासां वक्ष्यामि लक्षणम् ॥
वारुणी चैव माहेन्द्री आग्नेयी वायवी तथा । चतस्रस्तु शिलाः प्रोक्तास्तासां लक्षणमुच्यते ॥
या पुष्पवनसङ्कीर्णा जलाशयसमावृता । सा क्षितिर्वारुणी ज्ञेया तत्रत्या कामदा शिला ॥
यस्यां चोत्तरतस्तोयं व्रीहिक्षेत्रं तु दक्षिणे । पश्चिमे क्षीरवृक्षाश्च सा माहेन्द्रीति कीर्तिता ॥
पालाशखदिराश्वत्थकाश्मीरः पूर्वदक्षिणः । तित्त्रिण्याश्च कपोताश्च गृध्राश्चैव तु वायसाः ॥
बलाहका बकाश्चैव दृश्यन्ते यत्र संततम् । आग्नेयी सा क्षितिर्ज्ञेया तत्रजाः कामदाः शिलाः ॥

Puruṣottama V : 12b–17

§ 70

वृद्धां बालां च चण्डालीं गर्भिणीं दुष्टभूमिजाम् । शिलां त्यक्त्वा शुभामन्यां गृह्णीयाद् वर्णयोगतः॥

* * *

न जीर्णैरुपयुक्तैर्वा शिलाद्यैर्वैष्णवं गृहम् । कारयेत् पीठिकां वार्चामभिचारोऽन्यथा भवेत् ॥

Viṣṇu XIII : 78, 81

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 71

. . . तत्र चैव शिलादोषाः प्रवक्ष्यन्ते यथाविधि ॥
सिराश्च विवराश्चैव आवर्ता ग्रन्थयस्तथा । मण्डलानि तथा गर्भा रूक्षताश्चेति सप्त वै ॥
शिलादोषाः समाख्याताः सर्वसंपद्विनाशनाः । अधिकं चैव हीनं च स्फुटितं वक्रमेव च ॥
स्थूलं चैव कृशं चैव सुषिरं चेति सप्त वै । वदन्ति प्रतिमादोषांश्छास्त्रेऽस्मिंस्तन्त्रवित्तमाः ॥
अत्र दोषफलं वक्ष्ये शिलासु प्रतिमासु च । सिरायां संपदां नाशो विवरे राष्ट्रविग्रहः ॥
आवर्ते चापि दुर्भिक्षं ग्रन्थौ स्याद् राष्ट्रविप्लवः । मण्डले सर्वदोषास्तु गर्भे सर्वजनक्षयः ॥
रूक्षतायां धनापायः कर्तुः कारयितुर्भवेत् । अधिके तु भवेद् व्याधिर्हीने चैव धनक्षयः ॥
स्फुटिते प्राणनाशस्तु कर्तुः कारयितुर्भवेत् । वक्रे तु सर्वसंपातः स्थूले व्याधिर्भविष्यति ॥
कृशेऽपि च कृशं द्रव्यं सुषिरे स्वामिनाशनम् । . . . .

Sanatkumāra 'Br.' VII : 51*b*–59*a*

§ 72

अत्र चैतान् शिलादोषान् प्रवक्ष्यामि यथाविधि । शिलाश्च विविधाश्चापि आवर्तग्रन्थयस्तथा ॥
मण्डलानि तथा गर्भा रूक्षताश्चेति सप्त वै । शिलादोषाः समाख्याताः सर्वसंपद्विनाशनाः ॥
अधिकं चैव हीनं तु स्फुटितं वक्रमेव च । स्थूलं वापि कृशं वापि प्रणीतं चेति सप्त वै ॥
चपलं चपलास्तत्र पार्श्वस्थं चोन्नतं ततः । प्राचीदृष्टिमधोदृष्टिं पार्श्वदृष्टिं तथैव च ॥
अन्तरालान्तरं चैव आधानान्तरमेव च । एतानि दश दोषाणि कीर्तितानि च साम्प्रतम् ॥
वदन्ति प्रतिमादोषान् शास्त्रेऽस्मिन् तन्त्रवित्तमाः । अत्र दोषफलं वक्ष्ये शिलासु प्रतिमासु च ॥
शिला (या?)श्च धनारोग्यं विवर्णे राष्ट्रविभ्रमः । आवर्ते चापि दुर्भिक्षे ग्रन्थौ स्याद् राष्ट्रविग्रहः ॥
मण्डले दोषवर्णस्तु गर्भे सर्वजनक्षयः । रूक्षतायां धनापायः कर्तुः कारयितुर्भवेत् ॥
अधिकोऽथ भवेत् तत्तु हीने चैव जनक्षयः । स्फुटिते प्राणिनाशः स्यात् वक्रे सन्ताप एव च ॥
अतिस्थूले कृशे नाशः प्रणीते स्वामिनाशनः । एतानि दशदोषाणि अभिचारकराणि वै ॥
कर्तुः कारयितुर्दोषो भवत्येव न संशयः । . . . .

Vasiṣṭha IV : 58–68*a*

§ 73

. . . झिल्लिका टिट्टिभा गृध्रवराहश्वापदादयः ॥
तोयमन्तर्गतं स्वल्पं यत्राग्नेयी भवेदियम् । शिला तत्रोद्भवा स्वल्पविभवा तदसंमता ॥
विभीतकादयो वृक्षा मृगा हिंस्राश्च सन्ततम् । यत्र त्यक्तोदकतृणा कण्टकद्रुमसंवृता ॥
या च सा वायवी भूमिः तस्यां शून्यप्रदा शिला । . . . .

Pādma 'kr.' XI : 38*b*–41*a*

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 74

तोयमन्तर्गतं स्वल्पं खनने यत्र दृश्यते । पिलुश्लेष्मात्मकाकीर्णस्नुद्विभीतकसंयुता ॥
तृणोदकविहीना च शर्करोत्करसंयुता । शृगाला यत्र दृश्यन्ते तथैव मृगतृष्णकाः ॥
वायवी सा क्षितिर्ज्ञेया शिला तत्र तु वर्जिता । . . . .

Puruṣottama V : 18–20*a*

§ 75

बिल्वश्लेष्मातकाकीर्णा तथा स्नुहिविभीतकैः । शृगाला यत्र दृश्यन्ते तथैव मृगतृष्णिका ॥
तृणोदकविहीना च शर्करोषरसंयुता । वायवी सा क्षितिः प्रोक्ता शिलां तत्र तु वर्जयेत् ॥

Viśvāmitra IV : 11–12*

§ 76

नदीतीरे ह्रदतटे ग्राममध्ये चतुष्पथे । भूतिभूमौ श्मशाने च चण्डालशबरोषिते ॥
वातातपाग्नितप्ते च तथा च जनदूषिते । शर्करोत्करसंयुक्ते निस्तृणे जलवर्जिते ॥
मरुप्रायेषु देशेषु कण्टकिद्रुमसङ्कुले । गोमायुवृकभूयिष्ठे गृध्रर्क्षश्येनसङ्कुले ॥
पक्षिसर्पसमाकीर्णे म्लेच्छदेशे च भीषणे । ग्रामोपान्ते च वल्मीके वर्जनीयाः शिलाः सदा ॥

Sanatkumāra 'Br.' VII : 7–10

§ 77

. . . नदीतटे ह्रदतटे भूतिभूमौ चतुष्पथे ॥
ग्रामे श्मशाने वल्मीके लवणोदकपीडिते । अमेध्यभूमौ शबरचण्डालादिनिषेविते ॥
शर्करोत्करसंबाधे निस्तृणे जलवर्जिते । देवालयसमीपे च तप्ते वातातपाग्निभिः ॥
देशे वर्ज्याः शिलाः सर्वा गृहीताश्चेदनर्थदाः । . . . .

Pādma 'kr.' XI : 41*b*–44*a*

§ 78

. . . नदीतीरे कूपतटे पूतिभूमौ चतुष्पथे ॥
वल्मीके पितृभूमौ च लवणोदकसङ्कुले । अमेध्यभूमौ शबरचण्डालादिनिषेविते ॥
देवालयसमीपे च तप्ते वातातपादिभिः । देशे वर्ज्याः शिला : सर्वाः गृहीताश्चेदनर्थता ॥

Puruṣottama V : 20*b*–22

---

* For parallel text, though with slightly different wording, *see* Hayaśīrṣa 'Ādi' XV : 11–13*a*

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 79

नदीतीरे ह्रदतटे लवणोदपरिप्लुते । ग्राममध्ये श्मशाने च तथाने(?)च चतुष्पथे ॥
अमेध्यभूमौ वल्मीके ऊषरे शवदूषिते । वायुसूर्याग्निदग्धे च न ग्राह्यास्तु शिलाः सदा ॥
वर्जिताभिः शिलाभिर्यः प्रतिमां लोहमोहितः । . . . .

Viṣvaksena IV : 13–15a

§ 80

क्षीराम्बुसेविता या तु नदीतत्तीरसंभवा। पुरमध्ये स्थिता या च तथा पितृवने स्थिता ॥
चतुष्पथे स्थिता या च म्लेच्छानां पक्कणे तथा । ऊषरे च तथा मध्ये वल्मीके वापि या स्थिता ॥
सूर्यरश्मिप्रदीप्ता या या च दग्धा दवाग्निना । अन्यकर्मोपयुक्ता च अन्यदेवार्थनिर्मिता ॥
क्रव्यादाद्यैरपहृता वर्ज्या यत्नेन वै शिला । विवर्णा बहुवर्णा च ऋक्षवर्णा च वर्जिता ॥
सभाचत्वरसंस्था च अयत्नोपहृता शिला । येन केनचिदानीता वर्जनीया तथा शिला ॥

Hayaśirṣa 'Adi' XV : 18–22

§ 81

. . . नदीतीरे ह्रदतटे लवणोदपरिप्लुते ॥
ऊषरे रावसङ्कीर्णे ग्राममध्ये चतुष्पथे । भूमिभूम्या श्मशाने च चण्डालशवदूषिते ॥
शङ्करोषितसङ्कीर्णे निस्त्र ..... लवर्जिते । मरुप्रायप्रदेशेषु कण्टकद्रुमसङ्कुले ॥
क्षुद्रसत्त्वसमाकीर्णे गोमायुमृगसङ्कुले । गृध्रक्षीव्येन संकीर्णे म्लेच्छदेशे च दूषिते ॥
ग्रामोपान्ते च वल्मीके वर्जनीया शिला सदा । . . . .

Vasiṣṭha IV : 4b–8a

§ 82

. . . चण्डाली शुल्किनी वा स्याद् यस्यां न रमते मनः ॥
सा हि मण्डूकखण्डा च वृद्धा रूक्षातिजर्जरा । बहुवर्णातिनीला च धूम्रा च स्थूलरोमिका ॥
हीनस्वना च निन्द्याङ्गी सोष्णा चण्डालिका स्मृता । वल्मीकवृक्षसंलग्ना वह्निवातातपाहता ॥
चितिचैत्यसमीपस्था बाह्यालीढान्त्यसेविता । ग्रहजुष्टा विवर्णा च चत्वरान्तर्जलोषिता ॥
कल्पितान्यत्र शिष्टा च संस्कृता येन केनचित् । सगर्भमण्डलच्छिद्रसन्धिक्रीलकजालका ॥
स्फोटावर्तसिराग्रन्थिभेदयुक्ता च वर्जिता । . . . .

Viṣṇu XIV : 11b–16a

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 83

. . . उत्पाट्यमाने दृश्यन्ते स्फुलिङ्गा यत्र चाग्निवत् ॥
नादश्च कांस्यघण्टा च एतच्चिह्नानि वर्जयेत् । . . . .

Puruṣottama V : 58*b*–59*a*

§ 84

. . . गर्भयुक्ता शिला वर्ज्या गर्भाच्चान्तर्व्यवस्थिता ॥
तस्माद् गर्भं परीक्षेत छेदने भेदनेऽपि वा । नवनीतं महिषजं शृङ्गमेषस्य चूर्णितम् ॥
चूर्णं च कुरविन्दस्य संपेष्य पयसा गवाम् । शिलायां सर्वतो लिम्पेद् गर्भव्यक्तिस्ततो भवेत् ॥
मण्डला यत्र दृश्यन्ते तत्र गर्भं विनिर्दिशेत् । माञ्जिष्ठवर्णसदृशे मण्डले दर्दुरो भवेत् ॥
पीतके मण्डले गोधा कृष्णे कृष्णाहिरेव च । कपिले मूषिका प्रोक्ता कृकलासस्तु वारुणे ॥
गुडवर्णे तु पाषाणः तण्डुले गृहगौलिका । अंभः कृपाणसदृशे वालुका पद्मसन्निभे ॥
विचित्रे वृश्चिको ज्ञेयः नीले पीते पतङ्गकः । मधुवर्णे तु खद्योतो मण्डले निर्दिशेद् बुधः ॥
दर्दुरे स्यादनारोग्यं गोधायां दुर्भगो भवेत् । विषेण म्रियते सर्पे अनपत्यस्तु मूषके ॥
कृकलासे तु चाल्पायुः पाषाणेऽशनिना हतः । गौलिकायां धनापायो जले वै गर्भनाशनम् ॥
सिकते तु जलापायः वृश्चिके कलहस्तथा । शलभे राष्ट्रनाशः स्यात् खद्योते तु कुलक्षयम् ॥
तस्माद् यत्नात् परीक्षेत गर्भं नित्यमतन्द्रितः । गर्भयुक्तां शिलां मोहात् प्रतिमां क्रियते यदि ॥
तन्मण्डलाधिपो राजा कारकः स्थापकस्तथा । निमीलिता भवन्त्येते तस्माद् गर्भं परीक्षयेत् ॥

Puruṣottama V : 62*b*–73

§ 85

तत्र गर्भं परीक्षेत छेदने भेदनेऽपि वा । मण्डला यत्र दृश्यन्ते तत्र गर्भं विनिर्दिशेत् ॥
मञ्जिष्ठवर्णसदृशे दर्दुरस्तत्र सम्भवेत् । पीतके मण्डले गोधा कृष्णे कृष्णाहिरेव च ॥
कपिले मूषिकः प्रोक्तः कृकलासस्तथारुणे । गुलवर्णे तु पाषाणं कर्बुरे गृहगौलिका ॥
अम्भः कृपाणसदृशे वालुकाः पद्मसन्निभे । विचित्रे वृश्चिको ज्ञेयो नीलपीते पतङ्गकः ॥
मधुवर्णे तु खद्योतं मण्डले निर्दिशेद् बुधः । गर्भदर्शनदोषांस्तु पुनर्वक्ष्ये यथातथम् ॥
दर्दुरे स्यादनारोग्यं गोधायां दुर्गतो भवेत् । विषेण म्रियते सर्पे अनपत्यस्तु मूषिके ॥
कृकलासे तथाल्पायुः पाषाणेऽशनिना भयम् । गौलिकायां धनापायो जले वै गर्भनाशनम् ॥
सिकतासु जलापायो वृश्चिके कलहस्तथा । शलभे राष्ट्रनाशः स्यात् खद्योते च कुलक्षयम् ॥
तस्माद् यत्नात् परीक्ष्यैतन्नित्यं गर्भानतन्द्रितः । गर्भेण सहितां लोभात् प्रतिमां कुरुते यदि ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

तन्मण्डलाधिपो राजा कारकः स्थापकस्तथा । उन्मूलिता भवन्त्येते तस्माद् गर्भं विशोधयेत् ॥
मणिजा लोहजाश्चैव दारुजा वा शचीपते । गर्भा गर्भमवेक्षेत नित्यं वृद्धिशुभप्रदा ॥

Viṣvaksena IV : 26–36

§ 86

छेदने भेदने चाथ शिलागर्भं समापयेत् । दृश्यन्ते च मला यस्यां सगर्भां तां विनिर्दिशेत् ॥
मण्डूको मण्डले तु स्यात् लोहिते नात्र संशयः । हरिद्राभे भवेद् गोधा कृष्णसर्पस्तथाऽसिते ॥
निस्त्रिंशसदृशे तोयं गृहगोधा तु कर्बुरे । आखुः पिङ्गलवर्णे स्यात् अरुणे सरटस्तथा ॥
पिङ्गवर्णे तु पाषाणः पद्माभे सिकता भवेत् । वृश्चिकः सार्धचित्रे च पत्रनीले पतङ्गकः ॥
पारावताभे खद्योतं मण्डले तु विनिर्दिशेत् । . . . .
अकल्यता तु मण्डूके दौर्भाग्यं गोधया भवेत् । सर्पे विषेण मरणं अनावृष्टिस्तथा जले ॥
धनहानिस्तु गोधायां आखुना निष्प्रजो भवेत् । अल्पायुषस्तु सरटे पाषाणे विद्युता वधः ॥
वालुकायामनावृष्टिः कलहो वृश्चिके भवेत् । राष्ट्रोच्छित्तिस्तु शलभे खद्योते गोत्रसंक्षयः ॥
तस्मात् परीक्ष्य यत्नेन शिलां गृह्णीत देशिकाः । सगर्भया तु शिलया रूपकं क्रियते यदि ॥
तद्देश्यो म्रियते राजा यजमानोऽथ देशिकाः । शिलायामथ वृक्षेषु यत्नाद् गर्भं परीक्षयेत् ॥

Hayaśīrṣa 'Ādi' XV : 39–48

§ 87

गर्भेणान्तर्गतेनैव तस्माद् गर्भं वदामि वः । शिलायां यत्र दृश्यन्ते मण्डलानि यथाक्रमम् ॥
तानि द्विविधवर्णानि तत्र गर्भं विनिर्दिशेत् । मण्डले रक्तवर्णे तु रक्तपांसुं विनिर्दिशेत् ॥
श्वेतपद्मसमे चैव श्वेतपांसुं विनिर्दिशेत् । स्निग्धे तु कपिले कूर्मं रूक्षे फेनकमेव च ॥
कपोतसदृशे वर्णे निर्दिशेद् गृहगोधिकाम् । मञ्जिष्ठसदृशे वर्णे निर्दिशेद् रक्तदर्दुरम् ॥
शुकपिञ्जरवर्णे तु रक्तपीते च कच्छपः । कुसुम्भपीतवर्णे तु तत्र स्यात् पीतदर्दुरः ॥
शुक्लपीतनिभे वर्णे तत्र स्यात् कृकलासकः । अपां सदृशवर्णे तु गोधां तत्र विनिर्दिशेत् ॥
गुडवर्णे तु पाषाणः खद्योतो मधुवर्णके । सारङ्गसदृशे वर्णे वृश्चिकं तु विनिर्दिशेत् ॥
निस्त्रिंशवर्णे सलिलं नीले तु शकलं तथा । रूक्षे तु मूषिको ज्ञेयः कृष्णे कृष्णाहिरेव च ॥
शष्पश्यामे तथा मत्स्यमिन्द्रगोपं मधुप्रभे । शान्तिहोमं ततः कुर्याद् गर्भाणां दर्शने तदा ॥
न कुर्याद् गर्भसंयुक्तां प्रतिमां लोभमोहतः । क्रियते यदि वा मोहाज्जगन्नाशयतेऽखिलम् ॥

Sanatkumāra 'Br.' VII : 66–75

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 88

गर्भमन्तर्गतेनैव तस्माद् गर्भं वदामि ते । शिलायां यत्र दृश्यन्ते मण्डलानीतराणि तु ॥
दृष्ट.....तरवर्णानि तत्र गर्भं विनिर्दिशेत् । मण्डले रक्तवर्णे तु रक्तपांसून् विनिर्दिशेत् ॥
श्वेतपद्मसमे चैव श्वेतपांसून् विनिर्दिशेत् । स्निग्धे तु कपिले कूर्म रूक्षे फेनकमेव च ॥
कुसुम्भपीतवर्णे तु तत्र स्यात् पीतदर्दुरः । शुक्लहेमनिभे वर्णे निर्दिशेत् क्षुद्रपक्षिणः ॥
अपांसदृशवर्णे तु गोधां तत्र विनिर्दिशेत् । गुडवर्णे तु पक्षाणां खद्योतः स्यान्मधुप्रभे ॥
सारङ्गे सदृशे वर्णे वृश्चिकं तत्र निर्दिशेत् । निस्त्रिंशवर्णे सलिलं नीले तु शलभं तथा ॥
कपिला मूषिका ज्ञेया (कृष्णे) कृष्णाहिरेव च । शष्पश्यामे तथा मत्स्यं मण्डले निर्दिशेद् बुधः ॥
शान्तिहोमं ततः कुर्याद् गर्भदोषोऽपि वर्जयेत् । न कुर्याद् गर्भसंयुक्तां प्रतिमां लोभमोहतः ॥
क्रियते यदि सम्मोहात् तद्राष्ट्रं च विनश्यति । . . . .

Vasiṣṭha IV : 75–83*a*

§ 89

पश्येच्छिलां गुणवतीं तरुं वा कर्मणि क्षमम् । वर्जयेदतिवृद्धां च परिक्षीणत्वचं तथा ॥
सभङ्गां दावदग्धां च निश्शब्दां रूक्षविग्रहाम् । सवालुकां च सच्छिद्रां बिन्दुयुक्तां पुटोद्वहाम् ॥
आखुदर्दुरमीनाहिमार्जारशशकोपमाम् । सवर्णपरवर्णोत्थसिराजालेन सन्ततम् ॥
प्रागुक्तरूपस्याभावादमीषां ग्रहणं हितम् । पारावतशुकाब्जाभा मधुमाञ्जिष्ठमाषभा ॥
गुर्वी हृद्या शुभा स्निग्धा अतो वान्याभिशस्यते । सुहृद्ये भूतले मग्ना जलाशयतलस्थिता ॥
छन्ना तरुवरेणैव वनराजिष्ववस्थिता । वेष्टिता वल्लिबृन्देन तथैवौषधिभिर्वृता ॥
ऊर्ध्वगा जानुदेशाच्च एकपिण्डीकृता मृदुः । मोक्षदा च खवक्त्रा वै भोगदा सुतलानना ॥
दिङ्मुखी चोभयकरी प्राङ्मूर्धा भूतिरायुषे । अतोऽन्यमस्तका कीर्तियशोवृद्धिकरी मता ॥
वंशवृद्धिदमारोग्यशान्तिकृत्कं यदाप्यदिक् । पुष्टिमुन्नतिसन्मेधां यच्छत्युत्तरमस्तका ॥
एवं पुरा परिज्ञाय पृष्ठोरुचरणं शिरः । बलात्मना सवीर्येण प्रोद्धृत्य सह शिल्पिभिः ॥

Īśvara[1] XVII : 53-62 ; same as Sāttvata XXIV : 55–64

§ 90

तपस्यन्ति द्विजा यत्र यत्र सिद्धा महर्षयः । यत्र चण्डालपतितप्रतिलोमादयो नराः ॥
न सन्ति क्षुद्रकर्माणस्तत्र ग्राह्या शिला विधे । . . . .

Viṣṇutilaka VI : 350–351*a*

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 91

पुण्यक्षेत्रे शुभे देशे ब्रह्मवृक्षनिरन्तरे । कुशकाशोदकयुते मृगैः कृष्णैर्निषेविते ॥
पद्मोत्पलसमाकीर्णव्रीहिक्षेत्रनिरन्तरे । हिन्तालपूगपुन्नागनारिकेलसमन्विते ॥
तपस्विजनसम्बन्धे दश ग्राह्याः शिलाः सदा । वर्जनीयं विदित्वैवं गुणदोषौ निरूप्य च ॥
देशभेदांश्च भूभेदान् लिङ्गभेदांस्तथैव च । ज्ञात्वैवं लक्षणैर्युक्तां गृह्णीयात् शुभदां शिलाम् ॥

Puruṣottama V : 23–26

§ 92

. . . शुभवृक्षसमाकीर्णे तले बहुतृणावृते ॥
पद्मोत्पलवनाकीर्णे व्रीहिक्षेत्रसमाकुले । हिन्तालतालन्यग्रोधनालिकेरसमाकुले ॥
कदलीवनसङ्कीर्णे पनसाम्ररसालकैः । समन्विते च पुन्नागैः कीर्णे गन्धसमन्विते ॥
कुशदर्भसमाकीर्णे देशे ग्राह्या शिला सदा । . . . .

Vasiṣṭha IV : 8*b*–11*a*

§ 93

आग्नेयी वायवी चैव माहेन्द्री वारुणी तथा । ततस्ता भूमयः प्रोक्ताः तासां वक्ष्यामि लक्षणम् ॥
ब्रह्मवृक्षैस्सकाश्मर्यैः खदिरैर्वेणुभिस्तथा । तोयं च स्वल्पगं यस्यां पतङ्गैरलिभिर्युता ॥
मयूरैस्तित्तिरैर्गृध्रैः सारसैर्या समाकुला । आग्नेयी सा क्षितिः प्रोक्ता कठिना तत्र या शिला ॥

* * *

. . . व्रीहिक्षेत्रं स्थितं यस्यां दक्षिणे सुमनोहरम् ॥
क्षीरिणः फलिनो वृक्षाः गुपुष्पा यत्र पश्चिमे । जलाशयं शरालीनं यस्यामुत्तरतः स्थितम् ॥
माहेन्द्री सा क्षितिश्शस्ता शिला तत्रोद्भवा च या । जलाशयैः पद्मषण्डैर्मण्डिता सा समन्ततः ॥
कीर्णा पुष्पवनैर्या च वारुणी सा क्षितिर्मता । तत्रोद्धृता शिला या तु सा शस्ता सुरसत्तम ॥
आग्नेयी गुर्जराद्येषु वायवी मरुषु स्थिता । माहेन्द्री मध्यदेशेषु अनूपेषु तु वारुणी ॥

Hayaśīrṣa 'Ādi' XV : 8–10, 13*b*–17

§ 94

शिलाश्च त्रिविधाः प्रोक्ताः ताश्च स्त्रीपुंनपुंसकाः । विवरावर्तरहिता याः स्निग्धा ग्रन्थिवर्जिताः ॥
व्यक्तिशब्दैकवर्णाश्च सा पुमानिति कीर्तिता । यरवर्णा लघुस्निग्धा स्वच्छा चैव मृदुस्वना ॥
अविशाला शिला प्रोक्ता स्त्रीति तत्र विचक्षणैः । सिरामण्डलसंयुक्ता शरावोदरकर्कशा ॥
शब्दहीना च मन्दा च सा नपुंसकसंज्ञिता । या पुंलिङ्गशिला प्रोक्ता तथा च प्रतिमा भवेत् ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

स्त्रीलिङ्गेन च या प्रोक्ता सा भवेत् पादिकोऽपि वा । शिला नपुंसका ख्याता कारयेत् प्रतिमां ततः ॥
कांस्यघण्टाध्वनिर्यत्र तच्छिलायाः शिरोयुतम् । कृ.....द्धवनं कुर्यात् नवकांस्यस्य तालवत् ॥
ध्वनिर्यत्र शिलायास्तु साऽऽनीया इति कीर्तिता । कांस्यध्वनिविभिन्ना तु अच्छिद्रावध्वनिर्भवेत् ॥
सा शिला स्त्रीति विख्याता तद्ध्वना तन्नपुंसका । प्रसादे प्राङ्मुखे स्थाप्या प्राग्ग्रीवा प्रतिमा ततः ॥
तथैव दक्षिणे प्रोक्ता दक्षिणद्वारवेश्मनि । तथैव चोत्तरग्रीवा प्रत्यग्ग्रीवा प्रशस्यते ॥

Vasiṣṭha IV : 25–33 [*sic.*]

§ 95

. . . त्रिविधाश्च शिलाः प्रोक्तास्तन्त्रे पुंस्त्रीनपुंसकाः ॥
विवरावर्तरहिता सुस्निग्धा ग्रन्थिवर्जिता । व्यक्तवर्णैकशब्दा च सा पुमानिति कीर्तिता ॥
वरवर्णा लघुः स्निग्धा स्वच्छा शीता मृजावती । मृदुस्वना शिला प्रोक्ता स्त्रीति तन्त्रविचक्षणैः ॥
सिरामण्डलसंयुक्ता शरावोदरकर्कशा । शब्दहीनातिखर्वा च सा नपुंसकसंज्ञिता ॥
या पुंलिङ्गशिला प्रोक्ता तया तु प्रतिमा भवेत् । अतो नपुंसकाख्यां च रत्नन्यासाय कल्पयेत् ॥
स्त्रीलिङ्गेति च या प्रोक्ता सा भवेत् पादपीठिका । . . . .

Sanatkumāra 'Br.' VII : 22*b*–27*a*

§ 96

. . . कांस्यवन्मध्यभागे तु मूले वै कांस्यताडने ॥
ध्वनिर्यस्याः शिलायास्तु सा पुमानिति कीर्तिता । न्यूनस्तस्माद् ध्वनेः किञ्चिच्छेदने यत्र सा रमा ॥
शिलानादविहीनं तु नपुंसकमुदाहृतम् । पुंलिङ्गे प्रतिमा प्रोक्ता स्त्रीलिङ्गे पादपीठिका ॥
नपुंसकशिलायां तु रत्नन्यासमुदाहृतम् । . . . .

* * *

देवीनां च रमादीनां निर्माणे स्त्रीशिला वरा । पुंशिला पादपीठं स्याद् रत्नन्यासे नपुंसके ॥
देवीबिम्बविनिर्माणे कुम्भमध्ये विचक्षणः । आवाह्य मूलमन्त्रेण श्रियं त्रैलोक्यमातरम् ॥
होमादि पूर्ववत् कुर्यात् श्रीसूक्तेन तु साधकः । अस्त्रिया शिलया देवी निर्मिता चेत् प्रमादतः ॥
लोभयुक्तेन मनसा स नाशमधिगच्छति । तत्रैव देशे संग्राह्याः परिवारशिलाः शुभाः ॥
शिलासंग्रहणं तेषां कुर्यान्मन्त्रैर्यथाक्रमम् । आचार्यदक्षिणां दद्याद् यथाविभवविस्तरम् ॥

Puruṣottama V : 59*b*–62*a*, 74–78

§ 97

. . . स्त्रीपुंनपुंसकं तच्चैव लक्षणेनैव लक्षयेत् ॥
उत्पाट्यमाने दृश्यन्ते तिन्दुकालातवज्ज्वलाः । स्फुलिङ्गाः श्रूयते नादः कांस्यघण्टानिनादवत् ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

मूले मध्ये तथाग्रे च पुंल्लिङ्गेति समा स्मृता । तदेव लक्षणं यत्र मन्दं मन्दं प्रतीयते ॥
स्त्रीलिङ्गेति मता सा च भिन्नकांस्यध्वनिस्तु या । नपुंसकेति सा ज्ञेया न यत्रैतद् द्वयं भवेत् ॥
पुंल्लिङ्गेऽर्चा तु कर्तव्या स्त्रीलिङ्गे पादपीठिका । पिण्डिकार्थं तु सा ग्राह्या दृष्टा या षण्डलक्षणा ॥
लिङ्गानां तु विपर्यासे पूर्वोक्तं होममाचरेत् । . . . .

Hayaśirṣa 'Ādi' XV : 34b–39a

§ 98

. . . या हताऽनलबिन्दून् वै सनादमभिमुञ्चति ॥
पुमानिति शिला सा वै निस्तेजाः सस्वनाऽबला । आदिमध्यावसानेषु नाग्निर्यस्या न च ध्वनिः ॥
नपुंसकेति सा ज्ञेया स्वपदस्था फलप्रदा । ज्ञात्वैवं देवदेवस्य लक्ष्म्यादीनां तथैव च ॥
सर्वेषां परिवाराणां पीठादीनां तथैव च । प्रासादादेः शिलाश्चैव तत्तन्मन्त्रैर्यथाक्रमम् ॥

Īśvara[1] XVIII : 77b–80

§ 99

. . . पुंस्त्रीनपुंसकाख्या च शिला च त्रिविधा मता ॥
पुंलिङ्गेन तथा बेरं स्त्रिया वै पीठिका भवेत् । इत्येवं बिम्बक्लृप्तिः स्याद् यत्नैरपि च कारयेत् ॥

Viśvāmitra XXII : 19b–20

§ 100

पुंलिङ्गेन तथा बेरं स्त्रीशिला पीठिका भवेत् । इत्येवं कारयेद् बिम्बं रत्नार्थमितरद् भवेत् ॥

Kapiñjala XI : 37

§ 101

पुंलिङ्गे प्रतिमा प्रोक्ता स्त्रीलिङ्गे पीठिका स्मृता ।। रत्नन्यासादधस्तात्तु नपुंसकशिलेष्यते ॥

Viṣṇu XIII : 79

§ 102

. . . विशाला नातिबहला छिद्रवन्मधुरस्वरा ॥
रम्भादलाकृतिः स्त्री स्याच्छीतला च मनोरमा । गम्भीरनिनदा गुर्वी सुदृढा विस्फुलिङ्गिनी ॥
अश्वत्थवटपत्राभा विशाला बहला पुमान् । नपुंसकं द्वयाकारा तद्धीना या सपर्पटा ॥

Viṣṇu XIV : 7b–9

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 103

. . . या हताऽनलबिन्दून् वै सनादमभिमुञ्चति ॥
पुमानिति शिला सा वै निस्तेजास्सस्वनाऽबला । आदिमध्यावसानेषु नाग्निर्यस्या न च ध्वनिः ॥
नपुंसकेति सा ज्ञेया स्वपदस्था फलप्रदा । . . . .

Sāttvata XXIV : 79*b*–81*a*

§ 104

कांस्यवन्मध्यभागे तु मूले वै कांस्यघण्टवत् । ध्वनिर्यस्याः शिलायास्तु सा पुमानिति कीर्तिता ॥
तस्मात् किञ्चिद्विहीना तु छिद्रं यस्याः ध्वनिर्भवेत् । सा शिला स्त्रीति विज्ञेया तद्धीना स्यान्नपुंसका ॥

Viṣvaksena IV : 23–24

§ 105

घण्टानादं च बिम्बानां पीठानां वेणुनादकम् । तालं देवालयानां च शिलासु क्रम ईरितः ॥

Puruṣottama IV : 7

§ 106

ध्वनिर्घण्टानिभो यत्र स्फुलिङ्गाश्छेदने सदा । दृश्यन्ते तच्छिरस्तस्याः पृष्ठमूर्ध्वमधोमुखम् ॥
द्विजो वा शिल्पिना कन्या यद् ब्रूयादधिवासिता । तच्छिरः स्यात् ततो वक्त्रं कल्पयेदविकल्पितम् ॥

Viṣṇu XIV : 27–28

§ 107

. . . शिलायाश्च शिरो ज्ञात्वा कारयेत् प्रतिमां ततः ॥
कांस्यघण्टाध्वनिर्यत्र तच्छिलायाः शिरो भवेत् । . . . .

Sanatkumāra 'Br.' 27*b*–28*a*

§ 108

उत्पाट्यमाने दृश्यन्ते स्फुलिङ्गा यत्र चाग्निवत् । नादाश्च कांस्यघण्टावच्छिलायाश्च शिरो मतम् ॥

Viṣvaksena IV : 22

§ 109

. . . युवा मध्या भवेद् ग्राह्या बाला वृद्धा च गर्हिता ॥
सुगन्धा निबिडा स्निग्धा तथा गम्भीरनिस्वना । शीतला या च तोयाढ्या युवेति प्रोच्यते शिला ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

तद्वद् या मध्यमा ख्याता कलशा कठिना भवेत् । अतिमृद्वी भवेद् बाला वृद्धाऽतिकठिना भवेत् ॥
टङ्कघातासहा बाला वृद्धा लोहक्षयंकरी । . . . .

Hayaśirṣa 'Ādi' XV : 31*b*–34*a*

§ 110

निबिडावयवा स्निग्धा धीरशब्दा सुशीतला । सुगन्धरसरूपाढ्या युवतिः सा सुशोभना ॥
बाला शस्त्रासहा मृद्वी पिच्छिला पल्लवास्थिरा । . . . .

Viṣṇu XIV : 10–11*a*

§ 111

. . . प्रतिमा द्विविधा प्रोक्ता सौम्याग्नेयीति संज्ञिता ॥
सौम्यायां तु भवेत् प्रीतिः प्रतिमा श्रीविवर्धिनी । आग्नेय्यां तु भवेदुष्णं सा दारिद्र्यविवर्धिनी ॥
सौम्या तु वैष्णवी ज्ञेया आग्नेयी शाङ्करी मता । तस्मात् सौम्यैव कर्तव्या आग्नेयी न कदाचन ॥

Vasiṣṭha IV : 59*b*–61

§ 112

. . . शिला चतुर्विधा ज्ञेया वर्णयोगाद् विशेषतः ॥

Kapiñjala V : 4*b*

§ 113

. . . चतुर्वर्णा शिला प्रोक्ता चतुर्वर्णक्रमेण तु ॥
ब्राह्मणस्य सिता चैव रक्ता वै क्षत्रियस्य तु । वैश्यस्य पीता संप्रोक्ता कृष्णा शूद्रस्य चोच्यते ॥
पर्वतेषु शिला ग्राह्या तदभावे तु भूगता । . . . .

Vasiṣṭha IV : 2*b*–4*a*
(*cf.* Sanatkumāra 'Br.' VII : 2*b*–3)

§ 114

शिलाश्चतुर्विधा ब्रह्मन् वर्णभेदैः शिलादिभिः । ब्राह्मणस्य शिला शुभ्रा क्षत्रियस्य तु पाटला ॥
पीता वैश्यस्य शूद्रस्य कृष्णा मुख्या यथोदिता । ब्राह्मणस्य शिलास्तिस्रः तिस्रो राज्ञस्तथैव च ॥
वैश्यस्य द्वे च विज्ञेये शूद्रस्यैका प्रकीर्तिता । . . . .

Puruṣottama V : 28–30*a*

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 115

श्वेतं द्विजातिवर्णश्च रक्तं क्षत्रियवर्णकम् । पीतं वैश्यमिदं वर्णमितरान् शूद्रवर्णकान् ॥
संगृह्य तु शिलासूक्ताः शिल्पिनं पूजयेत् सुधीः । . . . .

Puruṣottama IV : 8-9a

§ 116

. . . श्वेताब्जाभा मृगे ग्राह्या सौम्या विप्रस्य सा शिला ॥
ऐन्द्री रक्ता कुलुत्थाभा ज्येष्ठायां क्षत्रियस्य तु । फल्गुन्यां भगदेवत्या पीता वा हरिता विशः ॥
कृष्णा मुद्गनिभाश्विन्यां शूद्रस्यैवाश्विदेवता । . . . .

Viṣṇu XIV : 5b–7a

§ 117

बहुदोषा शिला सा तु पुण्यशैलोद्भवेष्यते । वारुण्यैन्द्री तथाग्नेयी वायवी भूश्चतुर्विधा ॥
आद्ययोर्या शिला सैषा निर्दोषापि तु नान्ययोः । निमग्ना भुवि या रम्या स्निग्धार्ककिरणोज्झिता ॥
एकवर्णा सुवर्णा च सवर्णा चातिशोभना । . . . .

Viṣṇu XIV : 3–5a

§ 118

विशुद्धा चापि सङ्कीर्णे न्यस्तापि प्रतिमाद्वयम् । एकवर्णा विशुद्धिः स्यात् सङ्कीर्णा विस्तृतामयी ॥
शुद्धैव प्रतिमा ग्राह्या सङ्कीर्णा तदलाभतः । अनुलोमं तु गृह्णीयात् प्रतिलोमं तु वर्जयेत् ॥
शुद्धे रत्नं तु गृह्णीयाद् रत्ने पीतं तथैव च । पीते चैव कृष्णे.....कृष्णे सर्वाणि वर्जयेत् ॥
चत्वारो यत्र वर्णाः स्युः ताः शिलाः प्रतिवर्जयेत् । बहिर्दृष्ट्वा परिक्षेत्रं शक्नुवन्त्येवमर्हति ॥

Vasiṣṭha IV : 71–74

§ 119

पाण्डरा चारुणा पीता कृष्णा शस्ता तु वर्णिनाम् । लक्षवाल्लभ्यते सम्यग्वर्णिनां वर्णतः शिला ॥
वर्णाद्यापादनं तत्र जुहुयात् सिंहविद्यया । कृते वर्णादिजनने तस्य वर्णस्य सा शुभा ॥
श्रेष्ठवर्णा स्ववर्णा च रेखा सर्वस्य शस्यते । अपरस्य तु वर्णस्य श्रेष्ठा या न प्रशस्यते ॥
वर्णानामिह सर्वेषां कृष्णरेखा न शस्यते । शिलानामिह सर्वासां शुक्लरेखा प्रशस्यते ॥
रेखानामिह सर्वासां व्यत्यासाद् होममाचरेत् । पातालनरसिंहेन सहस्रं देशिकोत्तमः ॥
तर्पिते मन्त्रराजे तु ततः सा शुभदा नृणाम् । विपरीते तु विमले हीनके बिन्दुके तथा ॥
इममेव विधिं कुर्यादन्यस्मिन्नपि गर्हिते । . . . .

Hayaśīrṣa 'Ādi' XV : 25–31a

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 120

. . . बहुवर्णातिनीला च धूम्रा च स्थूलरोमिका ॥
हीनस्वना च निन्द्याङ्गी सोष्णा चण्डालिका स्मृता । . . . .

* * *

. . . हीनरेखोत्तमा हीना हीना रेखोत्तमोत्तमा ॥
शिलासवर्णा रेखाः स्युः सुवर्णाश्चातिशोभनाः । इन्द्रायुधपताकोर्मिकलशाभा मनोरमा ॥
सदा वृद्धिकरी ज्ञेया गोब्राह्मणहितावहा । श्रीवत्सशङ्खचक्राब्जनन्द्यावर्तप्रदक्षिणा ॥
तोरणच्छत्रवस्त्रोक्षकन्यास्रक्कुसुमोपमा । प्रासादस्वस्तिकाश्वेभवर्धिनी शफरोपमा ॥
रथेक्षणाङ्गुलीकूर्मचामराङ्कुशकेसरी । रत्नाभरणगोवृक्षपत्रचन्द्रार्कतारकाः ॥
पवित्रकुण्डकादर्शमृगहंसादयः शुभाः । . . . .

Viṣṇu XIV : 12*b*–13*a*, 16*b*–21*a*

§ 121

. . . सुमुहूर्ते शिलां वीक्ष्य सिद्धार्थाश्चक्रविद्यया ॥
यक्षाः पिशाचा नागाश्च येऽत्र तिष्ठन्ति नित्यशः । सर्वे तेऽप्यपगच्छन्तु सन्निधत्तां सदा हरिः ॥
विकीर्य चेति मन्त्रेण पुनः सर्वास्त्रविद्यया । दद्याद् बलिं प्रतिदिशं भूतेभ्यः कमलासन ॥
पुण्याहं वाचयित्वाथ प्रोक्ष्य पूरुषविद्यया । शिलां स्पृष्ट्वाथ मूलेन दत्वार्घ्यं कमलासन ॥
अष्टोत्तरशतं कुर्यान्मूलमन्त्रजपं गुरुः । प्रासादानुगुणं कुर्यात् सूत्रपातं चतुर्मुखः ॥
शिलां छिन्द्युः स्थपतयो रथकारैः समन्विताः । छिन्ना विनिपतेद् भूमौ कोणेषु यदि तां शिलाम् ॥
वर्जयेद् यदि सान्यत्र ग्राह्या साऽऽलोक्य मन्दिरम् । निपतेद् यदि सा ग्राह्या तामुद्धृत्य गुरुः स्वयम् ॥
महाकुम्भाम्बुभिः प्रोक्ष्य ततः करकवारिणा । परिषिच्य ततो बिम्बं कल्पयेत् कमलासन ॥
देवीनां च श्रियादीनां ब्रह्मादीनां तथैव च । सर्वेषामितरेषां च शिलासङ्ग्रहमाचरेत् ॥

Viṣṇutilaka VI : 364*b*–372 (*cf.* VI : 349–356 . . same, less detail)

§ 122

. . . शिल्पिभिः खानयेद् भुवम् । सर्वेण च बलिं दत्त्वा स्पृशेत् पुंसां ततः शिलाम् ॥
सूत्रपातं ततः कुर्याद् ग्राहयेच्छिल्पिभिः शिलाम् । . . . .

Sanatkumāra 'Br.' VII : 21–22*a*

§ 123

. . . पुण्ये च तिथिनक्षत्रे शकुनाद्यानुकूलितः ॥
आचार्यः शिल्पिभिः सार्धं नवाम्बरधरः शुचिः । प्रतिमार्थं तु निर्गच्छेत् प्राङ्मुखो वाप्युदङ्मुखः ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

सशिलां स तु संपश्येद् भूतानां शुभलक्षणम् । दक्षिणोत्तरमायामां प्रत्यक् प्रागायतां तु वा ॥
पुण्याहं वाचयित्वा तु परिक्रम्य प्रदक्षिणम् । प्राङ्मुखस्तु ततः कुर्यात् ततः श्रीवत्समुद्रया ॥
पूर्णकुम्भं समभ्यर्च्य स्थापयेत् परमेष्ठिना । तस्यां तु दिक्षु वै दद्याद् अक्षतं पुरुषात्मना ॥
ततो विश्वात्मबीजेन रत्नाद्यं तन्निवेशयेत् । ततो निवृत्तिबीजेन परिषेकं समाचरेत् ॥
मुद्रिकायां सदाभद्रां ततः सर्वात्मना न्यसेत् । दर्शयित्वा महामुद्रां प्रणम्याञ्जलिमुद्रया ॥
पश्चिमे दर्भशय्यायां आसीनोऽधिवसेत् गुरुः । अष्टदिक्षु पताकाश्च स्थापयित्वा प्रदक्षिणम् ॥
अपनीय जनान् सर्वान् इमं मन्त्रमुदीरयेत् । यक्षरक्षःपिशाचा ये ह्यत्र तिष्ठन्ति नित्यशः ॥
व्यपगच्छन्तु ते सर्वे सन्निधिः स्यात् हरेस्सदा । इत्युक्त्वा स्वप्नमाकाङ्क्षन् संविशेत् दक्षिणाशिराः ॥
विष्णुरूपाणि दृश्योच्चैः ततः स्वप्नं शुभं भवेत् । अश्वत्थो ब्राह्मणो राजा ये चात्र शुभलक्षणाः ॥
दृश्यन्ते यत्र तत्राग्रौ तां शिलां ग्राहयेत् सुधीः । विरूपाण्डानुरूपाणां दृश्यते तत्र सर्वदा ॥
न गृह्णीयात् शिलानां तु देशिकः सर्वकर्मसु । अष्ठशनेति(?)गृह्णीयात् अस्वप्ने तु तदा शिला ॥
आचार्यः प्रातरुत्थाय खातयेच्छिल्पिभिस्सह । सर्वेण च बलिं दद्यात् स्पृशेद्वासा ततश्शिलाम् ॥

Vasiṣṭha IV : 11b–24

§ 124

स्थण्डिले देवमिष्ट्वादौ ब्राह्मणैः स्वस्ति वाचयेत् । सुदिने प्राश्य दध्यन्नं रक्षामङ्गलपूर्वकम् ॥
शस्त्राण्यस्त्रेण संपूज्य शोभनान्यभिधाय च । अयःकूटादि संगृह्य प्राङ्मुखो वाप्युदङ्मुखः ॥
मङ्गलानि च सन्दृश्य निमित्तानि परीक्ष्य च । प्रतिमार्थं तु निर्गच्छेदाचार्यः शिल्पिभिः सहः ॥
विद्याराज्ञीं सदा ध्यायन्नग्रतोऽर्घ्यकरः स्थितः । निमित्तैश्शोभनैर्गच्छेत् कृत्वैवं पुनरन्यथा ॥
निर्गतस्तु शिलां पश्येत्तदाप्रभृति नित्यशः । प्रतिमां कारयेत्कर्ता तत्कर्मान्तं हविष्यभुक् ॥
सोमेशेन्द्रेषु न स्याच्चेत्तादृशी शोभना शिला । सिद्धं शिलाकरं गच्छेत् कृत्वा दिग्यजनं पुनः ॥
दिशो विरोच्य चास्त्रेण रक्षामङ्गलपूर्वकम् । तत्राधिवासनं कुर्यादाचार्यः प्रयतो निशि ॥
शिलाया मण्डपं कृत्वा परिश्रित्य समन्ततः । चतुर्दिक्षु पताकाभिश्चतुर्वर्णाभिरन्वितम् ॥
इष्ट्वा हरिं च दिग्देवान् भूतक्रूरबलिं हरेत् । देवाग्रे दर्भशय्यायामुपोष्य नियतेन्द्रियः ॥
आचार्यः सुस्थितो विष्णुं ध्यात्वा मन्त्रमुदीरयेत् । नमस्सकललोकाय विष्णवे प्रभविष्णवे ॥
विश्वाय विश्वरूपाय स्वप्नाधिपतये नमः । तेनाष्टशतजप्तेन ततः स्वप्नं स पश्यति ॥
शोभनं स्याच्छुभे स्वप्ने कर्तव्या शान्तिरन्यथा । शोभनां तु शिलां ज्ञात्वा वर्णं लिङ्गं शिरस्तथा ॥
उद्बुद्ध्यस्वेति मन्त्रेण लाञ्छयेत्तत्र तत्र तु । आचार्योऽस्त्रेण कृत्वैवं शिल्पिभिर्ग्राहयेत्ततः ॥
देवमिष्ट्वा बलिं दत्वा कृत्वाथ स्वस्तिवाचनम् । . . . .

Viṣṇu XIV : 30–43a

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 125

प्राग्वत्तमधिवास्यादौ परेऽह्न्यर्चयेत्ततः । तदाश्रितामविज्ञातस्वरूपां देवतां पठन् ॥
इहाश्रितात्मने तुभ्यं नमस्सर्वेश्वराय च । क्षमस्वावतरान्यत्र सन्तिष्ठात्र चिदात्मना ॥
अथास्त्रोदकशुद्धेन विलिप्तेन घृतादिना । जपन् मन्त्रवरं वौषट् छिन्द्याद्वै ककचादिना ॥
प्राच्यामुदीच्यामैशान्यां पतत्यभिमुखं यदि । परिज्ञेयं शुभं कुर्यादन्यपातेऽर्चनादिकम् ॥

Sāttvata XXIV : 84–87

§ 126

. . . विशेषं कथयामि ते । शिल्पिभिश्च भुवं खात्वा शिलां पश्येत्समाहितः ॥
दक्षिणोत्तरमायामं तथा वै पूर्वपश्चिमम् । शान्तिदा दक्षिणग्रीवा पूर्वग्रीवा जयप्रदा ॥
श्रीकरी पश्चिमग्रीवा कर्तुर्भवति नित्यदा । पुष्टिदा चोत्तरग्रीवा कोणन्तु परिवर्जयेत् ॥

Viṣvaksena IV : 19–21

§ 127

शान्तिदा दक्षिणशिरा प्राक्शिरा जयदायिनी । श्रीकरी पश्चिमशिरा पुष्टिं दद्यादुदक्शिरा ॥
वर्जयेत्कोणशिरसं यदि कुर्यात्कुलक्षयः । . . . .

Pādma "kr." XI : 73–74a

§ 128

. . . दक्षिणोत्तरमायामं तथा वै पूर्वपश्चिमम् ॥
उत्तरे दक्षिणग्रीवा पूर्वग्रीवा जयप्रदा । श्रीकरी पश्चिमग्रीवा कर्तुर्भवति नित्यशः ॥
पुष्टिदा चोत्तरग्रीवा कोणग्रीवा तु वर्जिता । मूलभागशिला या तु उपरिष्टाद्भवेत्सदा ॥
अधस्ताच्चेच्छिरोभागो विपदो नेत्रदंष्ट्रयोः । . . . .

Puruṣottama V : 54b–57a

§ 129

प्राक्पश्चिमशिरा ग्राह्या प्राक्प्रत्यग्द्वारवेश्मनोः । अलाभे याम्यसोम्याग्रा कोणाग्रा तु न शस्यते ॥

Viṣṇu XIV : 29

§ 130

उक्तलक्षणसंयुक्तां शिलां संगृह्य बुद्धिमान् । अन्यांश्च वर्जयेच्छैलान् काश्यप द्विजपुङ्गव ॥
शिलामुत्पाटयेद् विद्वान् लक्षणादीन् परीक्षयेत् । कलशैरभिषिच्याथ स्नापयेत्कुम्भवारिणा ॥
गन्धपुष्पाक्षतैः पूज्य वस्त्रेणाच्छादयेद् द्विज । मूलमन्त्रेण मन्त्रज्ञः ऋत्विग्भिः स्वस्तिवाचकैः ॥

Kapiñjala XI : 33–35

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 131

सशस्त्रमथ चादाय मुद्गरं चास्त्रमन्त्रितम् । प्राङ्मुखश्चतुरो 'वारांस्ताडयेन्मस्तकावधेः ॥
पाददेशाच्च वा मध्यादवेक्ष्य च फलं पुरा । चतुरश्रायतां कृत्वा भिन्नां पीठेन यन्त्रगाम् ॥
आनाय्य वा पृथक्पीठां छन्नां कर्मालयं शुभम् । विन्यस्य वै पुरा तेन विधिना चोद्धरेच्छिलाम् ॥
Sāttvata XXIV : 72-74

§ 132

. . . उत्पाद्य चैवं मतिमान् कुम्भैः समभिषिच्य च ॥
कलशैश्च ततः स्नाप्य वस्त्रैरावेष्ट्य तत्र च । अभ्यर्च्य मूलमन्त्रेण गन्धपुष्पादिभिः क्रमात् ॥
गृहीत्वा लक्षणोपेतां शिलां होमं प्रकल्पयेत् । . . . .
Viśvāmitra XXII : 17*b*-19*a*

§ 133

शिलां गृहीत्वा तां यत्नादारोप्य शकटादिषु । नीत्वा धाम्नि स्थपतयो रथकारमतानुगाः ॥
कुर्युरर्चां यथाशास्त्रं चोदितैर्लक्षणैर्युतम् । . . . .
Puruṣottama V : 79-80*a* (*cf.* Īśvara[1] XVII : 81)

§ 134

. . . शिलां रथे समारोप्य प्रयत्नादानयेत्ततः ॥
रथशिल्पिविकारादौ शतमस्त्रेण होमयेत् । ध्वजादिघोषैः पर्येत्य शालायामुत्तरे न्यसेत् ॥
सङ्कल्प्य प्रतिमामेकां शिलायां वृक्ष एव वा । नान्यां तु प्रतिमां कुर्यात् कृता भवति निष्फला ॥
स्वयमुत्पादिता मुख्या क्रीता द्रव्यैस्तु मध्यमा । विदितावयवैः शुद्धा या ह्रदादिषु साऽधमा ॥
Viṣṇu XIV : 43*b*-46

§ 135

. . . प्रासादे प्राङ्मुखी स्थाप्या प्राक्शिराः प्रतिमा ततः ॥
तथैव दक्षिणग्रीवा दक्षिणद्वारवेश्मनि । तथैव पश्चिमग्रीवा पश्चिमद्वारवेश्मनि ॥
तथैव चोत्तरग्रीवा उत्तरद्वारवेश्मनि । प्राग्द्वारे दक्षिणग्रीवा प्रासादे प्रतिमा भवेत् ॥
तथैव चोत्तरग्रीवा प्रत्यग्द्वारे च शस्यते । प्रासादयुक्त्या प्रतिमा कर्तव्या तन्त्रवित्तमैः ॥
प्रतियातनयुक्त्या वा प्रासादं तु समारभेत् । . . . .
Sanatkumāra "Br." VII : 28*b*-32*a*

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

. . यस्यां दिशि मुखं धाम्नस्तस्यां प्रतिकृतेः शिरः ॥
व्यत्यासे यजमानस्य राज्ञो राष्ट्रस्य वास्तुतः । आलयस्य च सर्वेषामचिरात्कल्पते विपत् ॥
मूलभागः शिलानां चेदुपरिष्टाद्भवेत्तथा । अधस्ताच्चेच्छिरोभागो विपत्स्याद्राजराष्ट्रयोः ॥
महाकुम्भस्थतोयेन स्नापयेदुद्धृतां शिलाम् । विष्ण्वादिकुम्भतोयैश्च पौरुषं सूक्तमुच्चरन् ॥
परिषिञ्चेच्छिलां भूयो वर्द्धनीस्थेन वारिणा । देवीनां बिम्बशुध्यर्थं पृथगेवाधिवासयेत् ॥
मध्यकुम्भेऽर्चयेद्देवीं श्रियं त्रैलोक्यमातरम् । अष्टकुम्भेषु संपूज्य देव्यश्चाष्टौ यथाक्रमम् ॥
होमादि पूर्ववत्कृत्वा बिम्बार्था स्त्रीशिला भवेत् । अस्त्रिया शिलया देव्यो विहिताश्चेत्प्रमादतः ॥
लोभेन महता युक्ता हन्युः स्वविषयाः प्रजाः । तस्मिन्नैव क्षणे ग्राह्याः परिवारशिलाः शुभाः ॥
शिलासङ्ग्रहणं कुर्यात्तेषां मन्त्रैर्यथाक्रमम् । शिलां गृहीत्वा तां सम्यगारोप्य शकटादिषु ॥
नीत्वा धाम्नि स्थपतयो रथकारमतानुगाः । कुर्युरर्चां यथाशास्त्रं चोदितैर्लक्षणैर्युताम् ॥
शिलासङ्ग्रहणे कर्म यदुक्तं बहिरालयात् । तत्सर्वमथवा कुर्यादङ्कुरादिकमालये ॥
शिलां गृहीत्वा विधिवत्त्यक्तां कर्तुमशक्तितः । अन्यार्थमपि तां विद्धि शुद्धां भूयोऽधिवासनात् ॥

Pādma "kr." XI : 74b-85

Choosing Metal for Casting Icons

लोहसंग्रहः

(lohasaṅgraha)

Passages relating to the famous Indian "lost-wax" method of casting metal icons are not found in abundance in the *Pāñcarātrāgama* literature. The two excerpts here concern themselves with materials to be employed and methodology respectively. In §137, three options are given in regard to acceptable metals to be sought—gold, silver and copper—the guiding factors in their selection including financial feasibility, purity of the ore available, and caste-affiliation of the person financing the enterprise. It may be worth noting that copper is favored above other metals or alloys by reason of its economy and workability. In any case, metal icons are considered the "best" of all other kinds of icons.

In regard to the methodology outlined in §138, beeswax (*madhūcchiṣṭa*) is softened and from it an icon is modelled—during which process the *ācārya*-director attends to certain ritual

Digitized by Google Original from UNIVERSITY OF MICHIGAN

details—ghee is applied to the figure, measurements are checked, and the metals to be used in the casting are melted. At this point it is still possible to attend to certain alterations in the figure. Once the model is packed in plaster and the beeswax melted away, then the molten metal is poured into the cast and, after a suitable waiting time, the plaster is chipped away to reveal the rough-metal image. In the " finishing " stages details are articulated and the icon is made ready for use. It is pointed out in the passage that when an icon is made out of metal its *āsana*-base as well as its encircling *prabhā*-arc must also be made of the same kind of metal.

§ 137

. . . लोहं तु त्रिविधं प्रोक्तं तन्त्रेऽस्मिन् प्रतिमाविधौ ॥
सुवर्णं रजतं ताम्रं यथावित्तानुसारतः । सुवर्णं द्विविधं प्रोक्तं जातरूपं च हाटकम् ॥
जातरूपं प्रधानं स्यात् तदलाभे तु हाटकम् । रूप्यं च द्विविधं प्रोक्तं रूप्यं रजतमेव च ॥
रूप्यमत्र प्रशस्तं स्यात्तदलाभे तु राजतम् । ताम्रं च द्विविधं प्रोक्तं ताम्रमौदुम्बरं तथा ॥
ताम्रमत्र प्रशस्तं स्यादौदुम्बरमलाभतः । अत्र च द्विविधं प्रोक्तं शुद्धं मिश्रितमेव च ॥
शुद्धमेतत् प्रशस्तं स्यात् मिश्रितं तु विवर्जयेत् । अर्धचित्रं तथालेख्यं लोहैः कुर्यात् कदाचन ॥
सुवर्णं रजतं ताम्रं ब्राह्मणानां विशेषतः । सुवर्णं रजतं चैव क्षत्रियस्य विशेषतः ॥
रजतं चापि ताम्रं च वैश्यस्य च विशेषतः* । ताम्रमेव तु शूद्राणां सर्वेषां ताम्रमेव वा ॥
लोहजाः प्रतिमाः सर्वा निर्दोषास्समुदाहृताः । . . . .

Vasiṣṭha IV : 83*b*–91*a*

§ 138

. . . बिम्बं प्रभामासनं वा लोहजं परिकल्पयेत् ॥
द्रावयित्वा मधूच्छिष्टं प्रतिमां तेन कल्पयेत् । धान्यराशिं विनिक्षिप्य तदूर्ध्वे तिलतण्डुलम् ॥
चक्राब्जं तु लिखेत्तस्मिन् प्रागग्रान्निक्षिपेत्कुशान् । वस्त्रं च नूतनं तस्मिन् विस्तीर्य प्रतिमां क्षिपेत् ॥
प्राचीनशिरसं पश्चाज्जुहुयादनले गुरुः । पुष्पैः समिद्भिर्लाजैश्च सर्पिषाष्टोत्तरं शतम् ॥
जुहुयान्मूलमन्त्रेण नृसूक्तेन चरुं पुनः । हुत्वैवं विधिनाचार्यः स्रग्वी कनकभूषणः ॥
संपाताज्येन संसिञ्चेत्प्रतिमां तत्त्वपद्धतिम् । ध्यायेत्तत्र शुभे लग्ने पूजयेन्मूलविद्यया ॥
यजमानो गुरुं पूज्य बहुभिस्तोषयेद्धनैः । ब्राह्मणान् विदुषो वित्तैर्बहुभिः परितोषयेत् ॥
स्थपतिः प्रतिमां कुर्याद्रथकाराभ्यनुज्ञया । मानोन्मानप्रमाणैस्तां प्रतिमां कारयेच्छुभाम् ॥
मृदालेपं ततः कुर्याच्छिल्पशास्त्रानुसारतः । सुवर्णं रजतं ताम्रं विशुद्धं लोहमुत्तमम् ॥

* *cf.* Sanatkumāra-saṃhitā "Br." VII : 83*a* allows silver and copper to be used for both kṣatriyas and vaiśyas.

Digitized by Google Original from UNIVERSITY OF MICHIGAN

आदाय धान्यराश्यां तु पूर्ववन्न्यासकल्पनम् । पूर्ववच्चैव जुहुयादाचार्यश्चोदितक्रमात् ॥
द्रावयित्वा ततः शुद्धं लोहं न्यायसमार्जितम् । स्थपतिः प्रतिमां तेन कुर्याच्छास्त्रोक्तवर्त्मना ॥
लोहजां प्रतिमां चैवं कल्पयेत्परमात्मनः । स याति परमं स्थानं पुनरावृत्तिवर्जितम् ॥
प्रतिमाहस्तपादादिवैकल्ये शान्तिमाचरेत् । आचार्यो देवहोमाद्यैस्ततः शान्तिर्भविष्यति ॥
समादध्यादवयवान् विकलान् स्थपतिः पुनः । . . . .

Pādma "kr." XIX : 33b–46a

Preparing Plaster Images

मृत्संग्रहः

(*mṛtsaṅgraha*)

In this section we have brought together passages relating not only to the choice of clays to be taken for mixture in making a plaster image, but also the texts expounding on matters concerned with the "symbolism" of the wooden frame (*śūla*) used as the inner structure of the image and the coloring to be applied to the finished figure. Indeed, according to §139, there are twelve separate steps to be completed within one year of initiation of the task in preparing a plaster figure. These are: (1) selecting good wood for the *śūla*-frame; (2) binding that frame with strings; (3) smearing these with clay; (4) molding the *nāḍī*-nerves and the joints in their proper anatomical locations; (5) winding the frame once again with coconut fibres; (6) once again applying a layer of clay; (7) rewinding with strings yet again; (8) smearing the whole with a sandy substance; (9) wrapping the figure with strips of cloth; (10) indenting certain areas for later application of ornaments and decorations; (11) applying a final coat of fine white plaster; and (12) painting the figure with appropriate colors. §140 expands upon this, stressing the analogy of the *śūla*-frame to the human body. (*See* §145, §146, §147 and §148 for details or construction of these wooden frames.)

The choice of clays to be used in the production of a plaster figure depends upon considerations of whether or not it comes from a "holy place," its color in regard to the caste-affiliation of the *yajamāna*-patron, and other similar details. Once secured, the clay is mixed with certain powders and oils, juices of flowers and saps of trees, and "cured" for a period before it is applied to the frame. The figure may be fired, but preference is clearly stated for "unbaked" plaster images. *See* §141, §142 and §144. §143 has to do with plastering of *citra*-bas-reliefs on the walls of the inner shrine chamber.

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

Turning to the matter of coloring, §149 points out that not only plaster figures but also images sculpted from stone are to be painted. Our main concern here, however, is with the injunctions for applying pigments to plaster figures. According to §150 some scope is given for variation in the rules of coloring, since colors appropriate to given images differ in any case from community to community and from age to age. According to §151, however, there are specific colors to be adhered to in painting specific aspects of the Lord — these colors all being derivatives from the five basic ones, namely white, yellow, red, green and black (*kṛṣṇa*).

The following are the colors prescribed in §151 for the various modes, forms, incarnations and aspects of the Lord : Vāsudeva's color varies from age to age, but the three other *Vyūhas* maintain their color consistently through the ages—Saṅkarṣaṇa, red ; Pradyumna, golden ; Aniruddha, black. The following are prescribed for the 12 *mūrti*-aspects : golden (Keśava), white (Nārāyaṇa), dark blue (Mādhava), crystal (Govinda), pollen-color (Viṣṇu), red (Madhusūdana), fire-colored (Trivikrama), the color of the rising sun (Vāmana), white (Śrīdhara), the color of a blaze of lightning (Hṛṣikeśa), dark blue (Padmanābha) and red (Dāmodara). *Avatāras* will generally take the same color as their corresponding " *mūla* "-form.

As for other aspects of the Lord, these, too, are mentioned with their corresponding color assignment : Puruṣottama (crystal), Adhokṣaja (dark blue), Nṛsiṁha (golden), Acyuta (yellow), Janārdana (dark red), Upendra (dark blue), Hari (yellow) and Kṛṣṇa (black). Also : Śrī (golden), Bhū (dark blue), Sarasvatī (white), Prīti (red or dark blue), Kīrti (red), Śānti (crystal), Tuṣṭi (yellow) and Puṣṭi (dark blue). In addition : Matsya (crystal), Kūrma (golden), Varāha (dark blue or pearl), Nṛsiṁha (moon-colored), Prahlāda (golden), Vāmana (dark blue), Mahābali (black), Jāmadagni (golden), Rāghava (dark blue), [Bharata (dark blue), Lakṣmaṇa (golden), Śatrughna (red), Sītā (golden), Māṇḍavī (red), Ūrmilā (dark blue), Śrutakīrti (white), Hanumān (golden), Aṅgada (red), Sugrīva (golden and tawny), Guha (blue), Vibhīṣaṇa (black), Nīlā (blue), Jāmbavān (golden)], Balarāma (milky white), Revatī (red), Kṛṣṇa (dark blue), Rukmiṇī (golden), Satyabhāmā (dark blue) and Kalkin (red).

Further : Ananta (milk white or golden), Garuḍa (golden), Brahmā (golden), Viṣṇu (dark blue), Rudra (blood-red), Hayagrīva (pearl white), Senānin (=Viṣvaksena) (dark blue), Caṇḍa (red), Pracaṇḍa (white), Jaya (yellow), Vijaya (dark blue), Padmī (lot s-colored), Gadādhara (golden), Khaḍgadhara (dark or black), Śārṅgadhārī (golden), Vajradhara (white), Musaladhārī (dark blue), Pāśadhṛk (golden), and Aṅkuśadhara (black). Also : Dhātā (red and yellow mixture), Vidhātā (white), Bhadra and Subhadra (both red), Kṛtānta (dark blue), Suravidhvaṁsana (red), Kuberākṣa (yellow), Kubera (red), Durjaya (black), Prabhava (white), Viśvabhāvana (red), Puṣkara (white), Saṁbhava (dark blue), Prabhava (red), Suśobhana (dark blue), Subhadra (dark blue), Kumuda (white), Kumudākṣa (fire-red), Puṇḍarika (white), Vāmana (dark blue), Śaṅkukarṇa (red), Sarvanetra (black), Sumukha (dark blue), Supratiṣṭhita (red). And : Sūrya (red), Candra (white), Bhauma (red), Budha (white), Bṛhaspati (golden), Śukra (white), Śanaiścara (black), Rāhu (copper-colored), Ketu (black), Kāma (red), Hastivaktra (=Gaṇeśa ; white), Ṣaḍānana (red), Durgā (dark blue), Dhanada (golden), Brāhmī (blue or yellow), Māheśvarī (red), Kaumārī (red), Vaiṣṇavī (dark blue), Vārāhī (dark blue),

Digitized by Google Original from UNIVERSITY OF MICHIGAN

Indrāṇī (dark blue), Cāmuṇḍā (red), Vīrabhadra (red), Jyeṣṭhā (blue), Indra (dark blue). In addition: Agni (red), Yama (black), Nirṛti (blue), Pracetas (dark blue), Vāyu (ash-color), Indu (white), Rudra (red), Puruṣa (dark blue), Acyuta (golden), Dharā and Vasu(s) (white, red, yellow, dark blue, red, reddish brown), the Pitṛ(s) (red, white, yellow, dark blue, red, dark brown), the seven Maruts (smoke-colored, red, yellow, dark blue, white, pink, black), the seven Sages (golden, dark blue, yellow, black, red, white, gray), Viśva, *et.al.* (red, yellow, white, dark blue, orange, gray), Apsaras (white, golden, dark blue, red, black, yellow), the twelve Ādityas (red, yellow, pink, dark blue, white, reddish brown, variegated, green, white, blood red, jasmine white, *varṇaka*, the eleven Rudras (blood red, green, blue, white, dark blue, yellow, black, reddish brown, *varṇaka*, pink, gray), the Aśvins (either red or yellow). Finally: Mārkaṇḍeya (red or yellow), Nārada (crystal), Bhṛgu (yellow), Dakṣa (gray), Manu (red), Sananda (dark blue), Sanaka (yellow), Sanatkumāra (red), Hāhā (yellow), Hūhū (red), Tumburu (dark blue), Kinnara (parrot green), Kimpuruṣa (red), Citrasena (dark blue), Viśvāvasu (yellow), Madhu (honey-colored), Kaiṭabha (dark blue).

§ 139

मुख्यमूर्तिश्शिलाभिर्वा लोहैर्वा दारुभिश्च वा । सुधाभिर्वा प्रयत्नेन मृदाभिर्वापि कल्पयेत् ॥
मुख्यमूर्तिर्मृत्तिकया कर्तुमिच्छति चेद्रमे । आरभ्य वत्सरान्तेन कुर्यात्ताः शाश्वतीः समाः ॥
तिष्ठेयुर्नात्र सन्देहो रचना तु तथाविधा । यद्यत्क्रमेण कर्तव्यं मूर्तीनां वस्तुलेपनम् ॥
तत्प्रकारं प्रवक्ष्यामि शृणुष्व कमलालये । *प्रथमं दारुसंघातो द्वितीयं रज्जुवेष्टनम् ॥
मृदालेपस्तृतीयस्तु तुरीयो नाडिबन्धनम् । पञ्चमो रज्जुवेष्टस्स्यान्नालिकेरत्वचा पुनः ॥
मिश्रिता मृत्तिका षष्ठी सप्तमं रज्जुवेष्टनम् । अष्टमश्शर्करालेपो नवमं पटयोजनम् ॥
भूषणं दशमं विद्धि शुक्लालेपमतः परम् । द्वादशो वर्णलेपः स्यात्तत्तन्मूर्त्यनुसारतः ॥
वर्णलेपविधानं तु मूलमूर्तेर्विना भवेत् । चन्दनागरुतैलाद्यैर्मूलबिम्बानुलेपनम् ॥

Śripraśna XIII : 1–8

§ 140

शूलमस्थि सिरा रज्जुर्मृण्मांसं त्वक् पटं भवेत् । द्वाभ्यां द्वाभ्यां तु रज्जुभ्यां बद्ध्वा बद्ध्वा तु वेष्टयेत्॥
आलोड्य त्रिफलातोये नालिकेरफलान्विते । नालिकेररसं सारं सारयित्वा मृदं शनैः ॥
श्लेषयेत् स्थूलबन्धेषु सर्वाङ्गेषु शनैः शनैः । त्रिरेव रज्जुबन्धं च त्रिशुष्कं चापि दापयेत् ॥
अत ऊर्ध्वं न रज्जुं च न शुष्कं चापि कारयेत् । मृदा चैव शनैर्ज्ञात्वा शुष्काशुष्कं विचक्षणः ॥
कुर्याच्छिरीरसंवेष्टं मेदच्छिद्रविवर्जितम् । हस्तेनैव मृदं दद्यात् कूर्चेन कटुशर्कराम् ॥
पिष्ट्वा तु त्रिफलातोये शर्कराकल्कमेव च । कार्पासमूलसंयुक्तं सम्यक् कृत्वा विचक्षणः ॥

* Śripraśna XIII : 4b–7. || Pādma "kr." XIV : 63–66.

Digitized by Google Original from UNIVERSITY OF MICHIGAN

कूर्चेनैव तु तत्कल्कं शनैरेव परामृजेत् । ततः करण्डिकाग्रेण लिप्ताङ्गानि च लेपयेत् ॥
लिप्तेष्वङ्गेषु सर्वेषु पटेनाच्छाद्य बुद्धिमान् । शुक्तिकादिक्रियास्तत्र सर्ववर्णाश्च कारयेत् ॥
वर्णयोगविधिं पश्चात् प्रकुर्वीत विचक्षणः । किरीटं मुखतोऽप्यर्धं तदर्धं फालपट्टकम् ॥
मानोन्मानप्रमाणानि सर्वाण्येव सविस्तरम् । चित्राध्याये प्रवक्ष्यन्ते इन्द्ररात्रे यथाविधि ॥

Sanatkumāra " Br." VII : 178-187

§ 141

मृत्संस्कारमथो वक्ष्ये शृणुष्वैकमनाऽधुना । पक्वापक्वे द्विधा प्रोक्ता भूसुरादीननुक्रमात् ॥
न सर्वलोकाश्शंसन्ति प्रतिमां दग्धमृण्मयीम् । अपक्वा प्रतिमा शस्ता सैव कार्या विचक्षणैः ॥
सुधया नैव कुर्याद्वा नाश्मचूर्णैः कदाचन । मृदैव मृण्मयं कुर्याद्यथावर्णानुरूपतः ॥
ब्राह्मणस्य सिता मृद्वै क्षत्रियस्यारुणा स्मृता । विशां पीता भवेन्मृद्वै कृष्णा शूद्रस्य कीर्तिता ॥
मृदा वर्णानुपूर्व्येण गृह्णीयात् क्षत्त्रसम्भवाम् । दधिसर्पिःपयोभिश्च अतसीस्नेहसंयुतैः ॥
शर्करालोहपाषाणैश्चूर्णं कृत्वा तु पूर्वशः । समभागानि चूर्णानि मृत्तिकायां नियोजयेत् ॥
खादिरेण कषायेण अञ्जनेन च वेष्टयेत् । श्रीवेष्टकं खज्जिरसं कुङ्कुमं कोष्ठमेव च ॥
कुन्दरक्षरसा ह्येते सर्वे सार्वरसान्विताः । नदीसङ्गमतीरेषु पुण्योद्यानेषु वै पुनः ॥
आदाय मृत्तिकां तत्र स्नेहचूर्णसमायुतम् । मासं पर्युषितं कृत्वा कारयेत् प्रतिमां ततः ॥
त्रिरात्रपोषिता सा तु शिलामयसमा भवेत् । मृत्संस्कारं मया प्रोक्तं तेनैव प्रतिमां क्रमात् ॥

Viṣvaksena VI : 1–10

§ 142

मृण्मयीं प्रतिमां वक्ष्ये सर्वसंपत्प्रसाधिनीम् । शुक्ला रक्ता च पीता च कृष्णा चेति चतुर्विधा ॥
शूद्रस्योक्ता तु कृष्णैव कृष्णा पीता विशस्तथा । कृष्णा पीता च रक्ता च क्षत्त्रियस्य प्रकीर्तिता ॥
कृष्णा पीता च रक्ता च शुक्ला स्याद्विप्रजन्मनः । अनुलोमं तु गृह्णीयात् प्रतिलोमं विवर्जयेत् ॥
मिश्रितं वर्जयेच्चैव वर्णसङ्करदूषितम् । नदीसङ्गमतीर्थेषु देवतायतनेषु च ॥
क्षेत्रे च पर्वताग्रे च मृदं गृह्य यथाविधि । गर्तं कृत्वा निखातेषु स्थापयेत् तत्र मृत्तिकाम् ॥
लोहपाषाणचूर्णं तु शर्कराचूर्णमेव च । मृत्तिकायाश्चतुर्थांशं क्षिपेद्भागक्रमेण तु ॥
खादिरं चार्जुनं चैव कषायं तत्र सेचयेत् । कषाये सर्वमालोड्य मासं तत्रैव वासयेत् ॥
कुङ्कुमं चैव कुष्ठं च श्रीबेरं कटुकत्रयम् । मृत्तिकायां यथालाभं श्लक्ष्णं चूर्णीकृतं न्यसेत् ॥

Sanatkumāra " Br." VII : 97–104

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 143

किंपुनर्यो फलाकाङ्क्षी भक्तिश्रद्धापरस्सदा । बुद्ध्वैवं चित्रबिम्बार्थी यत्नेनेदं समाचरेत् ॥
गुह्यकान् गृहदेवांस्तु हृदार्च्यार्घ्यादिना पुरा । मलभस्मतुषाङ्गारकेशकीटनखास्तृणम् ॥
मूलकण्टकचर्मास्थि सामान्येऽश्माद्रिभित्तिका । भवत्यनर्थदावश्यमतः प्राक् चतुरङ्गुलम् ॥
विहाय मृद्दलं भित्तेरीषद् बिम्बात्तु चाधिकम् । उक्तदोषविमुक्ताथ पञ्चगव्येन साम्भसा ॥
मर्दितव्या मृदा भूयस्तद्भित्त्यंशं प्रपूर्य च । शस्त्रेण काष्ठफलकां मृगचर्मसमां पुरा ॥
छविं विहाय शुद्ध्यर्थं तुरीमुक्तं तु वै घटम् । प्रक्षाल्य सलिलेनैव त्वस्त्रजप्तेन सप्तधा ॥
हृन्मन्त्रेण तु सास्त्रेण मूर्तिमन्त्राञ्चितेन च । तीर्थोद्देशान्नदीतीरात्पुण्यक्षेत्राच्च पर्वतात् ॥
अपास्य दोषसङ्कीर्णामूर्ध्वादादाय मृत्तिकाम् । सावचूर्ण्याथ संशोष्या सूपलिप्ते धरातले ॥
शाणमौर्णं च कार्पासं सूत्रं चालसि[ससूत्रं चावि]जं तथा । कृत्वा पाषणभिन्नं प्राग्योज्यं तत्र सवालुकम् ॥
ईषद्गोमययुक्तेन भूरिक्षीरघृतादिना । भावयेत्पञ्चगव्येन खादिरेण कषेण च ॥
सिद्धार्थकालसिस्नेहतिलोत्थेन च वै सह । क्लेदयेच्च त्रिसप्ताहं भाण्डे कृत्वायसादिके ॥
मारुतानलसूर्येन्दुदर्शनेन विनैव हि । तया समाप्यं तद्बिम्बं शुभकाष्ठान्तरीकृतम् ॥
वस्त्रवच्चैव लोहानां कृत्वा प्रक्षालनं ततः । मार्जनं भूतिना भूयस्तथा तन्मन्त्रितेन च ॥
भक्त्या प्रवर्तमानस्तु बिम्बसाधनकर्मणि । सर्वत्र चास्त्रमन्त्रस्य कुर्यान्निर्विघ्नशान्तये ॥
पूजनं हवनं भूतबलिदानं सदक्षिणम् । सम्यग्ग्र(न्मृद्ग्र)हणकाले तु एतत्सामान्यमेव हि ॥

Sāttvata XXIV : 18–32

§ 144

मृत्तिकाप्येवमानेया सवर्णा दोषवर्जिता । पुण्यादायतनाद्रम्यादुद्धृतासीति चाहृता ॥
अपक्वं पार्थिवं शस्तं पक्वमत्र विगर्हितम् । कपिलाज्यातसीतैलकषायैश्चूर्णसंयुताम् ॥
श्रीवेष्टकादिसंयुक्तां पेषयित्वा पुनः पुनः । मासपक्षोषितां कृत्वा कारयेत् प्रतिमां ततः ॥
संस्कृतं प्रतिमाशूलमधिवास्याग्रमण्डपे । रत्नन्यासं पुरा कृत्वा मुहूर्ते स्थापयेद् गुरुः ॥

Viṣṇu XIV : 61–64

§ 145

खदिराद्यास्तु संप्रोक्ताः सारवन्तस्तु ये द्रुमाः । तान् निर्दोषान् समानीय कृत्वा च स्वस्तिवाचनम् ॥
शिल्पिभिः तक्षयित्वा च असारं व्यपनीय तु । ततस्तु कारयेच्छूलं यथाप्रोक्तप्रमाणतः ॥
द्वादशाङ्गुलमायामं मुखं प्रोक्तं च साधकैः । उष्णीषमङ्गुलं चापि मूर्धायामङ्गुलत्रयम् ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

भागः कण्ठस्य चायामः सोष्णीषं मुखमेव हृत् । नाभेरूर्ध्वं तथा तालं तावन्नाभेरधस्तथा ॥
पञ्चविंशाङ्गुलायाममूरुदण्डं प्रचक्षते । पञ्चाङ्गुलं ततो जानु जङ्घा चोरुसमा भवेत् ॥
जानुमानं च पादान्तं दशतालक्रमस्त्वयम् । नवतालादिशेषं तु त्रितालान्तं वदाम्यतः ॥
मुखमासप्ततालं तु मुखमेव प्रमाणतः । शेषाङ्गानां प्रमाणानि कथयामि यथातथम् ॥
उष्णीषमङ्गुलं प्रोक्तं मूर्धा गोलकमेव च । अध्यर्धगोलकं कण्ठं हृदयं मुखमुच्यते ॥
नाभेरूर्ध्वं तथा तावत् तावन्नाभेरधोऽपि च । मुखद्वयं भवेदूरु जानु कण्ठसमं भवेत् ॥
जङ्घा चोरुसमा ज्ञेया पादान्तं जानुसंमितम् । नवकालक्रमश्चायमष्टतालमथोच्यते ॥
गोलकं च भवेत्कण्ठं वृत्तमेकादशाङ्गुलम् । नाभेरूर्ध्वं तथा तावत् तावन्नाभेरधोऽपि च ॥
अङ्गुलेन भवेन्मूर्धा न चोष्णीषं तु मानुषे । द्वाविंशाङ्गुलमूरुं च जघनं च प्रचक्षते ॥
गोलकं जानुपादान्तमष्टताले त्वयं क्रमः । कण्ठमङ्गुलमुद्दिष्टं हृदयं तु द्वादशाङ्गुलम् ॥
तावती च भवेन्नाभिरधस्ताच्च नवाङ्गुलम् । विंशत्यङ्गुलमूरुः स्यात् जङ्घा तावत् प्रकीर्तिता ॥
अङ्गुलं जानुपादान्तं सप्तताले त्वयं क्रमः । पादान्तं जानुकण्ठानां नाभिमानमतः परम् ॥
एवं दशाङ्गुलं प्रोक्तं प्रतितालं मुखेऽपि च । मुखे हीनं शरीरे तु प्रक्षिपेच्च विचक्षणः ॥
पञ्चविंशाङ्गुलं कायं मुखमेकादशाङ्गुलम् । अष्टादशाङ्गुलावूरु जङ्घे तावत् प्रकल्पयेत् ॥
शरीरगोलकं गृह्य कुब्जपादे नियोजयेत् । यथायोगं तु शेषाणां वामने विपरीतकम् ॥
पादमानं तु वा काये कायमानं तु पादयोः । कुब्जवामनकौ प्रोक्तौ पादतालक्रमेषु वै ॥
सप्ततालेऽपि केचित्तु कुब्जमाहुर्मनीषिणः । पञ्चताले प्रवक्ष्यामि प्रमाणं तदनन्तरम् ॥
दशाङ्गुलं मुखं प्रोक्तं कायं तद्द्विगुणं भवेत् । ऊरुश्चापि तथा जङ्घा स्यातां पञ्चदशाङ्गुलम् ॥
वामने कायमानं तु पादयोः प्रक्षिपेत् बुधः । पादमानं तथा काये शेषाणां स्याद्यथाविधि ॥
चतुस्ताले क्रमश्चोक्तस्त्रिताले कथयामि वः । अष्टाङ्गुलं मुखं प्रोक्तं कायं चापि दशाङ्गुलम् ॥
नवाङ्गुलौ भवेदूरू जङ्घे वै तावदेव तु । शूलप्रमाणमित्युक्तं शूलसंख्यां वदामि वः ॥
वंशदण्डः कटीदण्डो वक्षोदण्डस्तथैव च । बाहुदण्डाश्च चत्वारः प्रकोष्ठस्तावदेव तु ॥
पाददण्डौ च इत्येते शूलदण्डास्त्रयोदश । वक्षोदण्डस्य चायामं प्रवदन्ति मुखद्वयम् ॥
कटिदण्डस्य चायामो भागयुक्तं मुखं तथा । बाहुदण्डस्य चायामं ऊरुदण्डसमो भवेत् ॥
प्रकोष्ठबन्धस्तावांस्तु मणिबन्धकमङ्गुलम् । विंशत्यङ्गुलमायाममुरो बाह्वोर्वदन्ति च ॥
श्लेषयेत् तांश्च मतिमान् सुषिरं तु न कारयेत् । न कीलकं कदाचित्तु दातव्यं शूलकर्मणि ॥
द्विशिखं त्रिशिखं वापि तथैकशिखमेव वा । दण्डं कृत्वा च निम्नं च श्लेषयेच्च पृथक् पृथक् ॥
वक्षोदण्डस्य मध्ये तु निम्नं कुर्याद्विचक्षणः । तथा चैव कटीदण्डे मध्ये निम्नं न कारयेत् ॥
वंशदण्डं तयोः सम्यङ् निश्छिद्रं निम्नयोः क्षिपेत् । वंशदण्डं मुखं प्राहुः सकिरीटं च केचन ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

मूर्धान्तमेव केचित्तु उभयं तु मतं मम । वक्षोदण्डं ततः कुर्यात् त्रिशिखाग्रं विचक्षणः ॥
ततश्च बाहुमूलानि विशिखान्येव कारयेत् । तथोपबाहुमूलानि अन्तं चैकशिखं पृथक् ॥
द्विशिखं च प्रकोष्ठादि कुर्यात् तत् कूर्परं विदुः । दण्डान् सर्वांस्तथैवं तु श्लेषयेन्मतिमान् नरः ॥
श्लेषितं श्लेषितं सन्धि ताम्रपट्टेन वेष्टयेत् । यथा दाढर्यं भवेत् संधेस्तथा सम्यक् तु वेष्टयेत् ॥
कृत्वा चैकशिखं पश्चात् कटिदण्डं च तन्त्रवित् । द्विशिखं चोरुमूलं च श्लेषयित्वा तु वेष्टयेत् ॥
न जानुसंधिश्चात्रोक्ता दाढर्यार्थं स्नानकर्मणि । प्रतिमासंमितायामं शूलकं वृत्तमेव च ॥

Sanatkumāra "Br." VII : 127–64 = Agastya[1] IV : 10–47 [*ms.*]

§ 146

अथातः संप्रवक्ष्यामि शूलस्थापनमुत्तमम् । स्थापयेत्प्रतिमां शूलां रत्नन्यासस्य चोपरि ॥
खादिरादीन्निगृह्णीयाद्याज्ञिकानि विशेषतः । तल्लक्षणं प्रवक्ष्यामि शृणु पूर्वं शचीपते ॥
पञ्चोत्तरद्विपञ्चाशत्सपादं शूलमुच्यते । रहितं वृक्षदोषैस्तु मितमङ्गुलिभिः क्रमात् ॥
द्विषट्कं द्व्यङ्गुलयुतं मुखं प्रोक्तं प्रमाणतः । भागस्सपादकं वा स्यादधस्तात्सप्तविंशतिः ॥
नाभेरधोमुखं प्रोक्तं अर्धाङ्गुलिसमायुतम् । ऊरुदण्डस्य चायामः पञ्चविंशाङ्गुलो भवेत् ॥
भागस्सपादजानुस्स्याज्जङ्घा चोरुसमा युता । गोलकद्वयमुद्दिष्टमधस्ताद् द्व्यन्तरं तथा ॥
वक्षोदण्डस्य विस्तारः पञ्चविंशाङ्गुलो भवेत् । कटिदण्डस्य विस्तारं षोडशाङ्गुलमुच्यते ॥
आयामो बाहुदण्डस्य पञ्चविंशाङ्गुलो भवेत् । आयामो परबाह्वोस्तु भवेत्सप्तदशाङ्गुलम् ॥
मणिबन्धः कलायामो बन्धकान्प्रतिमस्करम् । आयामो मध्यमाङ्गुल्यं पञ्चाङ्गुल इति स्मृतः ॥
ऊरुप्रमाणश्शूलं स्यादुक्तमन्यं निरीक्ष्यते । देवीनान्तु शचीनाथ शूलानुक्तान् प्रयोजयेत् ॥
शिल्पशास्त्रानुसारेण कारयेच्छूललक्षणम् । . . . .

* * *

कारयेत्प्रतिमां तत्र स्थापयेच्छूलवत्पुरा । सास्त्रं तत्र नवं स्निग्धं नीलरोमादिवर्जितम् ॥
संगृह्य प्रणवेनैव सादयेत्प्रतिमोपरि । वर्णं तत्कारयेद्विद्वान्यथापूजानुरूपतः ॥
पुनस्संस्थापनं कृत्वा स्थापना शास्त्रतः क्रमात् । शूलमस्थि भवेत्तस्मिन् रज्जुस्तत्र सिरा भवेत् ॥
मृण्मांसं त्वक्पटं तत्र शरीरवदिदं स्मृतम् । यथाशरीरं सङ्कल्प्य चतुष्षष्टिसिरास्तथा ॥
नालिकेरत्वचो सारं गृह्णीयाद्रज्जुकर्मणि । शूले पाशाः प्रकर्तव्यास्तत्कर्मकुशलैश्शुभैः ॥
एवं रज्जुमयं कृत्वा सर्वाङ्गेषु सुवेष्टयेत् । संक्षेपात्कथितं रज्जुबन्धं तु परमं शुभम् ॥

Viṣvaksena V : 1–11*a*. 73–78

§ 147

अथातः संप्रवक्ष्यामि शूलस्य स्थापनाविधिम् । स्थिराणि चन्दनादीनि दारूणि घनवन्ति च ॥
अधिवास्य यथापूर्वं गृह्णीयाद्देशिकोत्तमः । वृक्षजातीयया व्यक्त्या शूलं यद्येकया भवेत् ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

उत्तमं तद्विजानीयात् पर्वभिर्यदि मध्यमम् । नानाजातीयया तच्चेदधमं कमलासन ॥
शिल्पिभिस्तक्षयित्वा तु असारं व्यपनीय तु । सारेण कारयेच्छूलं प्रमाणं तस्य कथ्यते ॥
अङ्गुलीनां चतुर्विंशच्छतं कौतुकमुन्नतम् । द्वयधिका षष्टिरायामो वंशदण्डस्य कथ्यते ॥
तस्य मूलाग्रमध्यानि विस्तीर्णानि यथाक्रमम् । चत्वार्यङ्गुलमानानि सार्धानि त्रीणि तानि च ॥
यवाः षट् च तथा नाहः षोडशाङ्गुलसम्मितः । मूलस्य स्यात्तथा मध्ये नाहः पञ्चदशाङ्गुलः ॥
चतुर्दशाङ्गुलो नाहः तदग्रे कमलासन । वक्षोदण्डश्चतुस्त्रिंशदङ्गुलः स्यात्समायतः ॥
चतुरङ्गुलविस्तारः षोडशाङ्गुलमानतः । द्विशिखं त्रिशिखं वापि शिखा किंशुककुड्मलः ॥
आयामो बाहुदण्डस्य पञ्चविंशाङ्गुलो भवेत् । सार्धं त्र्यङ्गुलकं मूलं विस्तीर्णं तस्य मध्यमम् ॥
द्व्यङ्गुलं त्र्यङ्गुलं सार्धं अग्रं तस्य चतुर्मुख । प्रकोष्ठमायतं विंशत्यङ्गुलं द्वियवाधिकम् ॥
मूलमध्याग्रविस्तारः द्व्यङ्गुलस्त्र्यङ्गुलोऽपि वा । सार्धस्तथाङ्गुलानि स्युस्त्रीणि विद्याद्यथाक्रमम् ॥
सुषिरं बाहुमूलं स्यादग्रं बाहुप्रकोष्ठयोः । मिथुनं कल्पनीयं स्यान्नीचबाहुरपीदृशः ॥
आयामः कल्पदण्डस्य षोडशाङ्गुलसंमितः । विस्तारस्तस्य मध्ये स्याच्चतुरङ्गुलसंमितः ॥
षोडशाङ्गुलनाहश्च तस्य मध्यः प्रकीर्तितः । आयामः पार्श्वदण्डस्य कार्यो द्वात्रिंशदङ्गुलः ॥
पार्श्वदण्डपरीणाहश्चतुरङ्गुलसंमितः । द्विशिखश्च कटीदण्डो वक्षोदण्डो नियोगतः ॥
दण्डयोः पार्श्वयोः सम्यगूर्ध्वदण्डस्य चायतिः । एकविंशाङ्गुलो दण्डो जङ्घादण्डसमो भवेत् ॥
मध्याग्रमूलविस्तारः क्रमेण परिपठ्यते । त्र्यङ्गुलोऽर्धाधिकः सार्धो द्व्यङ्गुलश्चतुरङ्गुलः ॥
जङ्घायास्त्र्यङ्गुलं मूलं सार्धद्व्यङ्गुलमन्तरम् । अर्धं च द्व्यङ्गुलं तत्र त्रिगुणं नहनं मतम् ॥
ऊरुमूलं च सुषिरं द्व्यङ्गुलं षड्यवाधिकम् । ऊरुजङ्घाग्रयोरन्ते मिथुनं परिकल्पयेत् ॥
वंशदण्डमुरः कट्याः मध्ये निम्ने निवेशयेत् । शूलप्रमाणमुदितं शूलसंख्याधुनोच्यते ॥
वंशदण्डः कटीदण्डो वक्षोदण्डस्तथैव च । बाहुदण्डश्च चत्वारः प्रकोष्ठेन तथाविधः ॥
जङ्घादण्डश्च इत्येते शूलदण्डास्त्रयोदश । . . . .

Pā lma "kr." XIII : 1–23*a*

§ 148

उपशूलं प्रकुर्वीत प्रतिमास्थितये पुनः । विष्णुब्रह्मशिवानां तु दशतालं प्रचक्षते ॥
शेषाणामथ देवानां नवतालं प्रशस्यते । अष्टतालं मनुष्याणां स्त्रीणां चैव प्रशस्यते ॥
दशतालं च संप्रोक्तं तद्विंशतिशताङ्गुलम् । नवतालं च संप्रोक्तं ततश्चाष्टशताङ्गुलम् ॥
षण्णवत्यङ्गुलं प्रोक्तमष्टतालं मनीषिभिः । आसने जानुसंधौ च शयने चापि कारयेत् ॥
तत्र पञ्चदश प्रोक्ताः शूलदण्डाः पृथक् पृथक् । केचिच्चरणमूलं च पार्श्वमूलं च कुर्वते ॥
चतुरः श्लेषयेद् दण्डान् विशिखानेव तान् पुनः । दण्डाः सप्तदशैते तु स्थाने प्रोक्ता विचक्षणैः ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

एवं शूलं क्रमात् कृत्वा स्थापयेत् परमेष्ठिना । आसने स्थापयेत् पुंसा तत्र स्याज्जानुसंहितम् ॥
जङ्घादिद्विशिखं कुर्यादूरुमेकशिखं तथा । एकोनविंशतिर्ज्ञेयाः शूलदण्डास्तथा खलु ॥
शयने च तथा दण्डास्तत ऊर्ध्वं न कारयेत् । न च पादशिलादीनि शयने कारयेद् बुधः ॥
विश्वेन शूलं शयने स्थापयेत् तन्त्रवित्तमः । नालिकेरत्वचां सारं गृह्णीयाद्रज्जुकर्मणि ॥
समवृत्ता यथा रज्जुर्नातिस्थूला न वा कृशा । शलाकामात्रनाभिश्च शूलग्रन्थिविवर्जिता ॥
न चैवातिदृढा कार्या नातिमृद्वी कदाचन । एवं रज्जुमयं कृत्वा सर्वेष्वङ्गेषु वेष्टयेत् ॥
यथा शरीरे सर्वेषां चतुःषष्टिः सिराः स्मृताः । शूले तथैव पाशास्तु कर्तव्यास्तन्त्रकोविदैः ॥

Sanatkumāra "Br." VII : 165–177

§ 149

मृण्मयप्रतिमा कार्या शूलदण्डास्त्रयोदश । श्यामादिसर्ववर्णैस्तु लेपयेत् साधकोत्तमः ॥
शिलायामपि कर्तव्यं वर्णालङ्कारलेपनम् । ग्रामेषु मृण्मयं श्रेष्ठं प्रजावृद्धिकरं शुभम् ॥
सर्वभोगप्रदं नित्यं मृण्मयं सर्वकामदम् । . . . .

Kapiñjala XI : 63–65a

§ 150

. . . अत्र वर्णविशेषं तु प्रवक्ष्यामि यथाक्रमम् ॥
आसने रक्तवर्णो वा पीतो वा विष्णुरव्ययः । शयने श्यामलो वापि हरितो वा हरिः स्वयम् ॥
याने हरित एव स्यान्महाविष्णुः कृते युगे । श्याम एव तु शूद्राणां शेषाणां च कृते युगे ॥
विप्रक्षत्त्रिययोः पीतहरितश्यामलास्त्रयः । वर्णा विष्णोः समुद्दिष्टास्त्रेतायां वर्णकर्मणि ॥
वैश्यस्य हरितः श्यामो श्यामः शूद्रस्य वै भवेत् । द्वापरे तु द्विजातीनां पीतश्यामौ प्रकीर्तितौ ॥
कलौ युगे तु सर्वेषां श्यामवर्णः प्रशस्यते । एष एव क्रमः प्रोक्तो विपरीतोऽन्य उच्यते ॥

Sanatkumāra "Śiva" I : 276b–281

§ 151

वर्णलेपं ततः कुर्याच्छिल्पशास्त्रविचक्षणैः । श्वेतं पीतं तथा रक्तं हरितं कृष्णमेव च ॥
पञ्चवर्णं पृथिव्यादि वर्णानामधिदेवताः । उत्तमा धातवः प्रोक्ताः मध्यमा वृक्षसंभवाः ॥
संयोगजाः स्युरधमास्त्रैविध्यमपरं शृणु । वर्णं चाप्यनुवर्णं च संस्कारं च तथैव च ॥
त्रिविधो वर्णसंयोगः शास्त्रेषु समुदीरितः । वर्ण इत्युच्यते शुद्धो राजवत्तानि कारयेत् ॥
अनुकारे च ये वर्णाः प्रायशः शुद्धिवर्जिताः । अनुवर्णा इमे प्रोक्ताः सङ्कीर्णान् कथयामि ते ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

शुक्लो रक्तश्च पीतश्च कृष्णश्चैव चतुर्विधः । सङ्करास्ते च चत्वारः प्रत्येकं द्विविधाः स्मृताः ॥
शुक्लश्चैव वलर्क्षश्च श्वेतो द्विविध उच्यते । शङ्खगोक्षीरकुन्दाभः शुक्ल इत्यभिसंज्ञितः ॥
मुक्तास्फटिकचन्द्राभो वलर्क्ष इति संज्ञितः । रक्तश्चाप्यरुणः शोण इति भेदेन कथ्यते ॥
जपाशोणितसङ्काशो रक्तवर्णोऽरुणो मतः । किंशुकाशोकसङ्काशः शोण इत्यभिधीयते ॥
हरितश्चैव पीतश्च पीतवर्णो द्विधा भवेत् । मनःशिलाहरीतालनिभो हरित उच्यते ॥
हरिद्राकुङ्कुमाभस्तु पीत इत्यभिसंज्ञितः । श्यामश्च कृष्णवर्णश्च कृष्णवर्णो द्विधा भवेत् ॥
दूर्वामरकताभश्च श्याम इत्यभिसंज्ञितः । इन्द्रनीलनिभः कृष्णः कृष्णवर्णः प्रकीर्तितः ॥
शुक्लेन मिश्रितो रक्तो बभ्रुरित्यभिधीयते । शुक्लेन मिश्रितः काषो वर्णकः परिकीर्तितः ॥
पीतेन मिश्रितः कृष्णः काल इत्यभिधीयते । पीतकृष्णयुतः शुक्लः कर्बुरः समुदाहृतः ॥
एवं सङ्करजान् वर्णानूहापोहेन योजयेत् । उक्तोऽयं वर्णसंक्षेपस्तैः कुर्याच्चोदितैः क्रमात् ॥*

* * *

मूर्तीनां युगभेदेन वर्णभेदो विधीयते । कृते वलर्क्षस्त्रेतायां अरुणो द्वापरे पुनः ॥
पीतः कलौ घनश्यामः वासुदेवः परः पुमान् । रक्तः सङ्कर्षणो देवः प्रद्युम्नः कनकप्रभः ॥
श्यामोऽनिरुद्धः कथितः कृतादिषु चतुर्ष्वपि । केशवः कनकप्रख्यः स्यादर्जुनसमाकृतिः ॥†
नारायणः श्यामवर्णो माधवः स्फटिकप्रभः । गोविन्दः पद्मकिञ्जल्कनिभो विष्णुरुदाहृतः ॥
अरुणाम्बुजसङ्काशो मधुसूदन उच्यते । त्रिविक्रमः शिखिनिभो वामनो बालसूर्यवत् ॥
श्रीधरः सितपद्माभो हृषीकेशस्तटित्प्रभः । पद्मनाभः श्यामवर्णो बन्धूककुसुमच्छविः ॥
दामोदरो द्वादशैते कथिताः केशवादयः । वासुदेवादिमूर्तीनां यो वर्णः पूर्वमीरितः ॥
स एव वासुदेवादिचतुर्णां तद्भुवामपि । शुद्धस्फटिकसङ्काशो विज्ञेयः पुरुषोत्तमः ॥
अधोक्षजः श्यामवर्णो नृसिंहो हेमसन्निभः । पीतवर्णोऽच्युतोऽतीव रक्तवर्णो जनार्दनः ॥
उपेन्द्रः श्यामलः प्रोक्तो हरिः पीतनिभः स्मृतः । कृष्णः कृष्णाम्बुदप्रख्यः चतुर्विंशतिमूर्तयः ॥
सुवर्णनिकषाभा श्रीः श्यामा भूरर्जुनच्छविः । सरस्वती सिता रक्ता प्रीतिः श्यामनिभाकृतिः ॥
कीर्ती रक्ता भवेच्छान्तिः स्फटिकाभा समीरिता । तुष्टिः पीता भवेत्पुष्टिः श्यामा देव्यः स्मृतास्तु ताः ॥
मत्स्यः स्फटिकसङ्काशः कूर्मः काञ्चनसन्निभः । वराहः श्यामलनिभः वलर्क्षाकृतिरेव वा ॥
नृसिंहश्चन्द्रवर्णाभः प्रह्लादः काञ्चनप्रभः । वामनः श्यामलनिभः कालवर्णो महाबलिः ॥
जामदग्न्यः सुवर्णाभः राघवः श्यामलाकृतिः । भरतः श्यामलो वर्णो लक्ष्मणः कनकप्रभः ॥
शत्रुघ्नो रत्नवर्णाभः सीता हेमनिभाकृतिः । माण्डवी रक्तवर्णाभा ऊर्मिला श्यामलप्रभा ॥

---

* *cf.* Viṣvaksena VI : 11–27*a* for parallel treatment.

† *cf.* Śrīpraśna IX : 68–95 for parallel list of deities' colors.

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

श्रुतकीर्तिः सिताङ्गी च हनूमान् कनकप्रभः । अङ्गदो रक्तवर्णाभः सुग्रीवो हेमपिङ्गलः ॥
गुहश्च नीलवर्णाभः कालवर्णो विभीषणः । नीलो नीलनिभः प्रोक्तो जाम्बवान् कनकप्रभः ॥
बलः क्षीरनिभश्चैव रक्तवर्णा च रेवती । मेघश्यामो भवेत्कृष्णो रुक्मिणी कनकप्रभा ॥
सत्यभामा भवेत् श्यामा कल्की रक्तनिभः स्मृतः । अनन्तः क्षीरसङ्काशो यद्वा हेमसमाकृतिः ॥
गरुडः कनकप्रख्यो ब्रह्मा कनकसन्निभः । विष्णुः श्यामनिभः प्रोक्तो रुद्रः शोणितसन्निभः ॥
हयग्रीवो वलक्षः स्यात्सेनानी श्यामलाकृतिः । रक्तवर्णो भवेच्चण्डः प्रचण्डः श्वेतसन्निभः ॥
जयः पीतस्ततः श्यामो विजयः पद्मसन्निभः । पद्मी गदाधरो हेमः कृष्णः खड्गधरो भवेत् ॥
शार्ङ्गधारी हेमनिभः श्वेतो वज्रधरो मतः । श्यामो मुसलधारी स्यात्पाशधृक्कनकप्रभः ॥
कृष्णोऽङ्कुशधरो धाता रक्तपीतवपुर्धरः । विधाता धवलो भद्रः सुभद्रो ह्यरुणच्छविः ॥
कृतान्तः श्यामलो रक्तः सुरविध्वंसनः स्मृतः । कुबेराक्षो भवेत्पीतः कुबेरो रक्तदेहभृत् ॥
दुर्जयः कृष्णवर्णाभः प्रभवः श्वेतसन्निभः । स्याद्विश्वभावनो रक्तः पुष्करः श्वेतदेहभृत् ॥
सम्भवः श्यामलः प्रोक्तः प्रभवो रक्तसन्निभः । सुशोभनो भवेत् श्यामः सुभद्रः श्यामवर्णभाक् ॥
कुमुदः श्वेतवर्णाभः कुमुदाक्षोऽग्निसन्निभः । पुण्डरीकः सितः प्रोक्तो वामनः श्यामलाकृतिः ॥
रक्तो भवेत् शङ्कुकर्णः सर्वनेत्रोऽसितप्रभः । सुमुखः श्यामलः प्रोक्तो रक्ताभः सुप्रतिष्ठितः ॥
रक्तः सूर्यः सितश्चन्द्रो भौमो रक्तः सितो बुधः । बृहस्पतिः सुवर्णाभः शुक्रः शुक्लश्शनैश्चरः ॥
कृष्णस्ताम्रस्तथा राहुः केतुः कृष्ण उदाहृतः । कामी रक्तः सितो हस्तिवक्त्रो रक्तः षडाननः ॥
दुर्गा श्यामा सुवर्णाभः धनदः क्षेत्रपालकः । नीलो ब्राह्मी सुवर्णाभा रक्ता माहेश्वरी भवेत् ॥
कौमारी रक्तवर्णाभा वैष्णवी श्यामलप्रभा । वाराही श्यामवर्णाभा इन्द्राणी श्यामलाकृतिः ॥
चामुण्डा रक्तवर्णाभा वीरभद्रोऽरुणद्युतिः । ज्येष्ठा नीला भवेदिन्द्रः श्यामोऽग्निररुणप्रभः ॥
यमः कालोऽथ निर्ऋतिर्नीलः श्यामः प्रचेतसः । वायुर्धूम्रः सितश्चेन्दुः रक्तो रुद्र उदाहृतः ॥
पुरुषः श्यामलो हेमद्युतिः स्यादच्युतः स्मृतः । सितो रक्तस्तथा पीतः श्यामो रक्तः सितप्रभः ॥
बभ्रुः पीतो धरादीनां वसूनां वर्णसङ्ग्रहः । रक्तः श्वेतः प्रभा पीतः श्यामः श्वेतोऽरुणप्रभः ॥
बभ्रुः पितॄणां वर्णोऽयं क्रमेण समुदाहृतः । धूम्रो रक्तस्तथा पीतः श्यामः श्वेतोऽरुणोऽसितः ॥
वर्णोऽयं मरुतामुक्तः सप्तानामानुपूर्वशः । कनकः श्यामलः पीतः कृष्णो रक्तः सितोऽसितः ॥
वर्णः क्रमेण सप्तानामृषीणां समुदाहृतः । रक्तः पीतः सितः श्यामो रक्तपीतः सितासितः ॥
विश्वादिपरिवाराणां वर्णानुक्रमणं कृतम् । श्वेताभा कनकाभा च श्यामा च कनकप्रभा ॥
रक्ता कृष्णा च पीता च रूपमप्सरसां मतम् । रक्तः पीतोऽरुणः श्यामः श्वेतो बभ्रुश्च कर्बुरः ॥
वर्णतो हरितः श्वेतः शोणः कुन्दनिभस्तथा । आदित्यानामयं वर्णो द्वादशानां क्रमात् स्मृतः ॥
शोणश्च हरितो नीलः श्वेतः श्यामलदीधितिः । पीतः कालस्तथा बभ्रुः वर्णकः पाटलोऽसितः ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

एकादशानां रुद्राणां वर्णोऽयं समुदीरितः । अश्विनौ चारुणौ पीतौ मार्कण्डेयस्तथा भवेत् ॥
नारदः स्फटिकः पीतो भृगुर्दक्षस्तथाऽसितः । रक्तो मनुः सनन्दश्च श्यामलः कनकस्तथा ॥
पीतः सनत्कुमारश्च रक्तो हाहा च पीतलः । हूहू रक्तस्तथा श्यामः तुम्बुरुः किन्नरः शुकः ॥
रक्तः किंपुरुषः श्यामः चित्रसेनस्तथा भवेत् । पीतो विश्वावसुः प्रोक्तो मधुश्च मधुवर्णकः ॥
कैटभः श्यामलः प्रोक्तो वर्णोऽनुक्तोऽवगम्यताम् । . . . .

Pādma "kr." XIV : 48–62, 68–117*a*

Other materials used for iconographic representations

In addition to the substances already discussed—timber, rock and wood—iconic representations can be made for worship on cloth or on a flat wall-surface (in both cases, "paintings"), or in certain instances fashioned out of precious and semi-precious gems. In §152 we are given certain measurements for a piece of cloth to be used when one intends to draw on it a likeness of the Lord ; so also certain details, but with more options given, in §153 and §154. In fact, the latter passage also gives directions for washing the cloth beforehand as well as for measurements of the representations used thereon in the cases of either public or private worship.

Icons made out of precious or semi-precious gems must, of necessity, be smaller in size than other icons. In §155 and §156 some options are given both for various sizes that the images may take and for the stones that may be used in fashioning them.

§ 152

पटे बिम्बविधानं तु सांप्रतं शृणु नारद । सर्वसिद्धिकरं रम्यं निर्दोषं नातिविस्तरम् ॥
द्विहस्तं चतुरस्रं तु हस्तमात्रं तु वा पटम् । कार्पासमथवा क्षौमं नवं शुक्लमनाहतम् ॥

Jayākhya XX : 2–3

§ 153

अत्र चित्रमयं विद्धि भित्तिकाष्ठाम्बराश्रितम् । पुनर्वर्णक्रमेणैव चतुर्धा चाम्बरोत्थितम् ॥
तच्च कार्पासकौशेयक्षौमशाणमयं तु वै । . . . .

Īśvara[1] XVII : 3–4*a*

§ 154

. . . चित्रज्ञं स्नाप्य वै द्विज । दाहोत्पादनयुक्त्याऽथ सपटं संस्मरेच्च तम् ॥
संसूत्र्य कमलं तत्र अष्टपत्रं सकर्णिकम् । कर्णिकामध्यसंस्थं तु प्रोच्छ्रायं द्वादशाङ्गुलम् ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

त्रिविंशत्यङ्गुलान्तं च बिम्बं लिख्य सुलक्षणम् । लक्ष्म्यादिपरिवाराढ्यं लोकेशास्त्रसमावृतम् ॥
संगृह्याद्यजनार्थं तु तत्प्रमाणं द्विजोर्ध्वतः । मानं कुर्याद् गृहाद् बाह्ये स्थाने प्रासादपूर्वके ॥
हस्ताधिकेऽपि च कृते चित्रबिम्बे गृहस्थिते । न दोषः साधकानां तु दारुमृच्छैलजैर्विना ॥

Jayākhya XX : 5–9

§ 155

. . . *त्रिविधा मणिजा प्रोक्ता सौम्याग्नेयी तथा समा ॥
चन्द्रकान्तमयी सौम्या चाग्नेयी सूर्यकान्तजा । समा स्फटिकजा प्रोक्ता पूर्वा पूर्वा गरीयसी ॥
चित्रं चाप्यर्धचित्रं च चित्राभासं तथैव च । तृतीयं मणिना कुर्यात्फलं पूर्वोक्तमेव तु ॥
षडङ्गुलं वा चोत्सेधं चतुरङ्गुलमेव च । त्र्यङ्गुलं वापि कुर्वन् तं मणिजं तु मनोहरम् ॥
बहुबेरे तु कर्तव्यं कर्मार्चा तु(...)राजतम् । कर्मार्चालक्षणं वक्ष्ये कौबेरस्य च साम्प्रतम् ॥
शुद्धलोहेन कर्तव्यं नान्येन तु कदाचन । येन कौतुकप . . . योजयेत् ॥

Vasiṣṭha IV : 91b–96

§ 156

सरत्नानां च धातूनां सम्बन्धेर्केन्दुपावकान् । रत्नाश्रयेण धातूत्थे[त्वर्थे]नार्च्याऽऽदेशेन वै विना ॥
तथार्चनासनेनैव चक्रपद्ममयादिना । न रत्नी प्रतिमा शस्ता ध्यायिनां ध्यानसिद्धये ॥
केवला लघुमाना च प्रमाणावयवोज्झिता । वर्णाश्रमगुरुत्वाच्च स्वामित्वादखिलस्य च ॥
भूतादिदेवरूपत्वात् उत्तमाद्येषु वस्तुषु । नृपश्चार्हति वै नित्यं सविशेषपदे स्थितः ॥

Sāttvata XXIV : 14–17

We close this chapter on materials used by citation of two passages—the first of which, §157, lists the specific benefits (*phala*) to be appreciated by those who conscientiously use one or another substance for an icon, the second of which, §158, in addition to listing similar rewards also gives a resumé of the processes we have been reviewing throughout this Chapter Two. That excerpt from *Viṣvaksena-saṃhitā* ends, and with it we end this chapter, by saying that above all, icons are to be made attractive so that *bhakta*-devotees, when they behold an icon, may have a vision of the Lord in all His majesty, beauty and splendor.

* Vasiṣṭha IV : 91b–93. || Sanatkumāra "Br." VII : 84b–86.

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 157

सौभाग्यदा शैलजा स्यात् स्वर्णजा पुष्टिदा भवेत् । सुखप्रदा स्यान्मणिजा राजती कीर्तिदा भवेत् ॥
ताम्रजा धनदा प्रोक्ता श्रीप्रदा वृक्षजा मता । कौसुमी सुखदा प्रोक्ता गन्धजा भोगदा मता ॥
प्रत्यग्रस्थापिता वापि मृण्मयी सर्वकामदा । वृक्षादीनाञ्च भेदेन कामभेदेन वा नृणाम् ॥
भिद्यते बहुधार्चा वै ज्ञात्वा कुर्यात्तु तद्विधैः ।

Hayaśirṣa "Ādi" XV : 49–52a [Adyar ms.]

§ 158

षोडशाङ्गुलमुत्सेधमुत्तमं संप्रचक्षते । मध्यमं तु तदर्धं स्याद् द्व्यङ्गुलं तु कनीयसम् ॥
सुवर्णादिकृतानाञ्च लेख्यानां फलकादिषु । मानमेवं विजानाति आत्मार्थमिति कीर्तितम् ॥
उक्तोत्सेधानुरूपेण कार्यं विस्तारलक्षणम् । सुवर्णादींश्च वस्त्राणि शृणुष्वेषां फलानि च ॥
हेमं रूप्यञ्च ताम्रञ्च रीतिशैलञ्च धातवः । दारुश्च मृत्प्रशस्तानि प्रतिमाप्रतिपादने ॥
दद्यात्सुवर्णजाप्यासां पुष्टिकीर्तिसुखं नृणाम् । रौप्यलोहमयी सा च सुखं सर्वत्र यच्छति ॥
ताम्रजा प्रतिमा दद्यात्पुत्रपौत्रधनं तु वै । रीतिजाखिलपापानि क्लेशदुःखानि निर्दहेत् ॥
शैलजा प्रतिमा साक्षात्सौभाग्यायुस्सुखानि च । दारुजा प्रतिमा दद्याद्बलारोग्ययशांसि च ॥
मृण्मयी सर्वकामानां फलदात्र विशेषतः । इति भेदानि वस्त्राणि फलान्येषां च नारद ॥
प्रतिमाकरणे प्रोक्तं तव स्नेहान्महामुने । इत ऊर्ध्वं प्रवक्ष्यामि शिलासङ्ग्रहणं तव ॥
दारुसङ्ग्रहणं चैव शूलस्य स्नपनान्मुने । मृत्संस्कारादिवत्सर्वमेवमाद्यं महामुने ॥
पूर्वभागे यथेष्टं वा तथा वै पञ्च कारयेत् । अथवा मुनिशार्दूल शृणुष्व प्रतिमाविधिम् ॥
पद्मोद्भवपुराणोक्तविधानेन शिलाग्रहः । शिलाग्रहणपूर्वं यन्मृत्संस्कारान्तमेव तम् ॥
विश्वकर्मविधानोक्तं शिल्पलक्षणलक्षितम् । साधकस्याज्ञया शिल्पी कर्म कुर्यात्समाहितः ॥
सर्वलक्षणसंयुक्तं सर्वावयवशोभितम् । सर्वावयवसंयुक्तं प्रभामण्डलमण्डितम् ॥
पादाङ्गुल्यादिसंयुक्तं भूषणैर्मकुटेन च । विराजमानं कुर्वीत साधकश्शिल्पिना सुधीः ॥
क्रियते दर्शनार्थं यद्भक्तानां बिम्बमुत्तमम् । तत्तस्य लक्षणं ब्रूहि वक्तुं सर्वं न शक्यते ॥

Viṣvaksena X : 119–134

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

CHAPTER THREE

ICONOMETRY

Once the material out of which the proposed icon is to be fashioned has been secured, then it is time to turn to technical matters of construction. One of the fundamental concerns of a practicing artisan about to commence his work of making an icon is the determination of the standard of measurement he will use. A chief factor here is whether the icon he is about to make is intended for use in an existing temple structure—in which case its measurements are determined by calculating proportionately to the size of the existing *sanctum sanctorum*, or to the sanctuary doors, or to the *gopura*-tower, or to some other element of the building that will house it—or whether the icon he is about to make is being fashioned first and a temple, as it were, is to be constructed around it later. If this latter is the case, then he has considerable freedom to select a standard of measurement. For example, he may take as one standard of measurement the height of the *yajamāna*-patron, using units of measurement for the icon in proportion to this; or

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

he may use as a basic unit the length of the middle joint of the middle finger of the right hand of the *ācārya*-director of the project; or he may employ certain units calculated on some other, more abstract principle. In any case, as he plans out the figure he will use as model for the proposed icon, he must take great care to apply these standards of measurement in accordance with traditional usages.

In this chapter we present excerpts in five groupings. The first group has to do with general definitions of and ways to determine basic units of measurement such as "*aṅgula*" and "*tāla*". The second group gives data on how these and other units are to be employed when there are such considerations to be taken into account as the form or aspect of the Lord being portrayed, and/or the caste-affiliation of the person eventually to use the icon in worship is a factor. The third group presents passages relating to the measurements used when an icon is to "fit" into an existing temple structure and must therefore be made in proportion to some part of that structure. The fourth group of excerpts brings together data on how the various *karmabimba*-icons* are themselves to be made in proportion to the main icon. And finally, in the fifth group, we find several lengthy passages giving explicit instructions for measuring limb-by-limb and detail-by-detail various kinds of deities in their iconic forms.

Basic units of measurement defined

The first thing to be said about the following excerpts is that there is no unanimity in the texts of the *Pañcarātrāgama* in regard to the basic definitions of measuring units. Even in describing the '*aṅgula*'—a basic unit approximating an inch—we find different calculations. Hence, larger units based on multiples of the *aṅgula*-unit, such as the '*tāla*' and the '*hasta*', will also reveal a certain amount of fluctuation depending on the text read.

According to which text we read, then, there are three, four or five ways of determining the *aṅgula*-unit—*see* §159, §160, §162, §164, and §165. For example, according to the last-named excerpt in which five types of *aṅgula* units are named, the '*mānāṅgula*' is calculated to be comprised of 8 *yavas*, in turn comprised of 8 *yūkās*, in turn comprised of 8 *likṣās*, in turn comprised of 8 *keśas*, in turn comprised of 8 *paramāṇus* (a '*paramāṇu*' is more or less equivalent

* *See* §7, §8, §22, §23 above.

Digitized by Google Original from UNIVERSITY OF MICHIGAN

to a visible particle of dust, also called '*reṇu*'); the '*mānāntarāṅgula*' is also comprised of 8 *yavas* (or 3 '*śālīs*'), but its use seems to be reserved for only certain horizontal or vertical applications; the '*mātrāṅgula*' is based on the length of the middle joint of the middle finger of the right hand of the *ācārya* directing the project; the '*muṣṭyaṅgula*' is also calculated on the middle finger of the *ācārya*'s right hand, but taking the entire finger as a unit to be divided by four; the '*dehāṅgula*' is simply mentioned. According to §164, this latter measure is calculated by taking an icon, dividing it into ten parts, then dividing one of these ten parts into twelve units—which unit is called '*dehalabdhāṅgula*'.

Obviously, from what can be gleaned from the texts, there is considerable scope for variation in the basic units. Thus when it comes to calculating larger units based on the *aṅgula*-unit, it can be imagined how a '*tāla*' (=12 *aṅgulas*) and a '*hasta*' (=2 *tālas*) may range in size! *See* §161, §166, §167 and §163. The practical solution among *sthapati*-artisans seems to be to follow the dictates of one text only, thus avoiding conflicting and confusing testimonies coming from other texts.

§ 159

त्रिविधं तु समाख्यातमङ्गुलस्य प्रमाणतः । मानाङ्गुलं तु प्रथमं मात्राङ्गुलामतः परम् ॥
तृतीयं तु समाख्यातं देहलब्धप्रमाणतः । परमाणुभिरष्टाभिः रेणुरष्टाभिवालुकः ॥
वालुकाष्टाभिरक्षं च रक्षाष्टमथ यूकशः । यूकाष्टौ तु तिलं चैव यवं चैव तु कीर्तितम् ॥
यवोदराणि चाष्टाभिर्मानाङ्गुलमिति स्मृतम् । मध्यमाङ्गुलिमध्यं तु पर्वमात्राङ्गुलं स्मृतम् ॥
प्रतिमायां विभागेन तालगण्येन भाजितम् ॥ अङ्गुलं तु समाख्यातं देहलब्धप्रमाणतः ॥

Kapiñjala X : 53–57

§ 160

तत्राङ्गुलिविधिं वक्ष्ये यथा तदवधारय । पञ्चधाङ्गुलिराख्याता उच्यन्ते ता विधाः क्रमात् ॥
मानं मानान्तरं मात्रा मुष्टिर्देहस्तथैव च । वक्ष्यमाणक्रमेणैषां भेदानां लक्षणं शृणु ॥
वातायनपथं प्राप्य ये यान्ति रविरश्मयः । तेषु सूक्ष्मा विसर्पन्ति रेणवः परमाणवः ॥
तेऽष्टौ केशाह्वयास्तेऽष्टौ लीक्षो यूकस्तदष्टकम् । तदष्टकं यवास्तेऽष्टावङ्गुलिः समुदाहृता ॥
तदुत्तमाङ्गुलिः सप्त यवास्तेन तु मध्यमा । यवाः षडधमा प्रोक्ता मानाङ्गुलमिदं भवेत् ॥
विन्यस्तैस्तिर्यगष्टाभिर्यवैर्मानान्तराङ्गुलम् । शालीभिर्वा ऋजुन्यस्तैस्त्रिभिर्मानान्तरं भवेत् ॥
आचार्यदक्षिणकरे मध्यमाङ्गुलिमध्यमे । पर्वणोरन्तरं दीर्घं मात्राङ्गुलमुदाहृतम् ॥
चतुर्धा विभजेदेको भागो मुष्ट्यङ्गुलिः स्मृता । . . . .

Pādma "kr." XII : 25–32a

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 161

मध्यमाङ्गुलिमध्यं च अङ्गुष्ठवलयार्धकम् ॥
यवत्रयाणां मानं च अङ्गुलस्य प्रमाणतः । अङ्गुलैः द्वादशैर्युक्तः ताल इत्यभिधीयते ॥
इदमेनेन तालेन द्विगुणं ह्यस्तमुच्यते ।

Puruṣottama IV : 9b–11a

§ 162

अतः परं प्रवक्ष्यामि अङ्गुलस्य प्रमाणकम् । अणुरेणुभिरष्टैश्च सर्षपं स विधीयते ॥
सर्षपैरष्टभिश्चैव तिलमेकं विधीयते । तिलाष्टभिर्यवं प्रोक्तं यवाष्टैस्तिर्यगङ्गुलम् ॥
इति मानाङ्गुलं प्रोक्तं मात्राङ्गुलमिदं शृणु । मध्यमाङ्गुलिमध्यस्य ऊर्ध्वं पर्वस्य तिर्यगम् ॥
मात्राङ्गुलं च द्विविधं देहलब्धाङ्गुलं ततः । अङ्गुष्ठवलयार्धं च अष्टार्धं च तथोन्नतम् ॥
इदं च द्विविधं प्रोक्तं सर्वशास्त्रेषु निश्चितम् । मानाङ्गुलप्रमाणेन आलयादि विधीयते ॥
मात्राङ्गुलप्रमाणेन कुन्दं कूर्चं स्रुचं स्रुवम् । इध्माद्यनलपात्राणि कुर्यात्सर्वाणि देशिकः ॥
देहलब्धाङ्गुलेनैव प्रकुर्यात्सर्वदेवताः । आलयस्य वशेनैव तथा द्वारवशेन च ॥
यजमानवशेनैव मूर्तिं कुर्यात्त्रिधा ततः । तद्बिम्बसव्यहस्तस्य देहलब्धाङ्गुलेन च ॥
पादादिकेशपर्यन्तं तथा चाष्टोत्तरं शतम् । द्वादशाङ्गुलमानेन नवतालानि गण्यते ॥

Puruṣottama VIII : 7–15

§ 163

जालान्तरगते सूर्ये भाति रेणुगणश्च यः । स एष परमाणुः स्यादष्टाभिस्तैरणुः स्मृतः ॥
अणुभिः कमलोद्भूत तैस्तु लिक्षाऽष्टभिर्भवत् । ताभिर्लिक्षाष्टकैर्यूकां विद्धि यूकाष्टकं यवम् ॥
अष्टाभिस्तु प्रमाणोत्थैरङ्गुलं च यवोदरैः । गोलकं हि कलश्चैव नाम स्याद् द्व्यङ्गुलस्य च ॥
षट्कलं च स्मृतं तालमध्वनीनवकर्मणि । चतुर्विंशतिभिर्ब्रह्मन् हस्तस्तैरङ्गुलैर्भवेत् ॥
तेनैव हस्तमानेन गुरुशिष्योत्थितेन च । मण्डलादौ तु सर्वत्र निदध्यादात्मकल्पना ॥
भिन्नप्रमाणयागानामस्त्रभूमैकजोत्तमम् । आद्यद्वादशभिर्मानमङ्गुलैः परिकीर्तितम् ॥

Pauṣkara IV : 5–10

§ 164

कथं वा वासुदेवस्य निर्मेया प्रतिमा हरेः । कति भेदानि बिम्बानां ब्रूहि मे कृपया प्रभो ॥
वातायनपथं प्राप्य ये भान्ति रविरश्मयः । तेषु सूक्ष्माभिसर्पन्ति रेणवः परमाणवः ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

परमाणुरजः केशलिक्षयूकयवाष्टकैः । लब्धं मानाङ्गुलं शालि त्रिभिर्मानान्तराङ्गुलम् ॥
आचार्यदक्षिणकरे मध्यमाङ्गुलिमध्यमे । पर्वणोरन्तरं दीर्घं मात्राङ्गुलमुदाहृतम् ॥
विनाङ्गुष्ठेन शेषाभिर्मुष्टिमङ्गुलिभिः कृतम् । चतुर्धा विभजेदेको भागो मुष्ट्यङ्गुलिः स्मृता ॥
यत्किञ्चित्प्रतिमामानं विभज्य दशधा पुनः । एकं द्वादशधा लब्धं देहलब्धाङ्गुलं भवेत् ॥

Bhārgava Tantra IV : 1–6

§ 165

तुषहीनैरनुत्तानैरष्टभिर्मध्यमैर्यवैः । उत्तमं सप्तभिर्मध्यमधमं षड्भिरङ्गुलम् ॥

Viṣṇu XIII : 75

§ 166

क्रियादिभेदमेवं स्याद्वक्ष्याम्यङ्गुलिमानकम् । जालान्तरगतोऽर्कांशुज्योत्स्नायामुत दृश्यते ॥
ज्योत्स्ना...थ रेणुस्स्याद्रेणोरष्ट तिलं स्मृतम् । तिलाष्टकं यवः प्रोक्तो यवाष्टौ द्व्यङ्गुलिस्स्मृता ॥
व्रीहित्रयोच्छ्रितं वापि यवाष्टौ तिर्यगेव वा । अथवाङ्गुलमानन्तु शृणु मे तत्तपोधन ॥
देशिकाङ्गुलमध्यस्य मध्या रेखा समा मुने । मध्ये मध्ये करस्याथ करमध्याङ्गुलैः स्वतः ॥
मध्या पर्वसमावृत्तिः मुने मात्राङ्गुलं त्विदम् । इति क्रियाङ्गुलिः प्रोक्ता तास्विष्टाङ्गुलिना मुने ॥
विमानस्यापि बेरस्य मानं कार्यं तवाधुना । अथाष्टमङ्गुलानां स्रुक्स्रुवयोस्तोरणस्य वा ॥
वेद्या मण्टपकुण्डस्य विधाने समिधश्च वै । . . . .

* * *

अथवावैहि देवर्षे मानमार्गं विधानतः । अष्टमङ्गुलकादीनां मानार्थं वदतो मुने ॥
आचार्यहस्तस्य कनिष्ठिकाद्यैः चतुर्भिरेवाङ्गुलिभिर्महर्षे ।
मध्याङ्गुलैर्मध्यमपूर्वभागे तिर्यग्विसर्पद्भिरिहैव मेयम् ॥
द्वादशाङ्गुलमानं हि ताल इत्यभिधीयते । तालद्वयं भवेद्धस्तमिति मानविदो विदुः ॥
इत्युक्तं त्रिविधं मानमङ्गुलीनां प्रभेदतः । . . . .

Viṣvaksena X : 12–18*a*, 20–23*a*

§ 167

मानोन्मानविभागार्थमङ्गुलं हस्तलक्षणम् । सर्वकर्मप्रधानत्वात्प्रोच्यमानं मया शृणु ॥
परमाण्वष्टकेनैव त्रसरेणुः प्रकीर्तितः । त्रसरेण्वष्टकेनैव रथरेणुः प्रकीर्त्यते ॥
तैरष्टाभिस्तु वालाग्रं लिक्षा तैरष्टभिर्मता । ताभिर्यूकाऽष्टभिः ख्याता ताश्चाष्टौ यवमध्यकम् ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

यवाष्टकैरङ्गुलं स्यात् चतुर्विशाङ्गुलः करः । चतुर्विशाङ्गुलश्चान्यः स्वाङ्गुष्ठेन तु सम्मितः ॥
चतुरङ्गुलसंयुक्तः स्वहस्तः पद्महस्तकः । एभिर्हस्तैस्तु कुर्वीत प्रासादं यज्ञमण्टपम् ॥
प्रतिमां पिण्डिकाश्चापि कुण्डं मण्डलमेव च । तोरणञ्च ध्वजंचैव स्रुगाद्यं पात्रमेव च ॥
मानहीनं न कर्तव्यं फलप्राप्त्यर्थिभिस्सदा । . . . .

Hayaśirṣa "Ādi" VII : 1–7*a* [Adyar *ms.*]

Application of units of measurement to types of icons

The four excerpts here concern themselves with various ways of determining which units of measurement are to be used in particular circumstances. In §168 we see that, depending on what is being depicted by the icon, it will be comprised of a certain number of units ('*tālas*'), the number of *aṅgulas* in each *tāla*-division calculable on an optional basis of "good", "better" and "best" multiples. In the preferable ("best") unit, called '*dāśatāla*', there are 2,400 *aṅgulas*. According to this excerpt from the influential and popular *Pādma-saṁhitā*, icons depicting Vāsudeva should be divisible into ten *tālas*—all lesser beings made of a measure different from this [Brahmā or Śiva icons are 9½ *tālas*, other gods are of the '*navatāla*'-division, sentinel and guardian icons of the '*aṣṭārdhatāla*'-division, human representations in units of eight *tāla*-divisions, spirits and demons of seven, dawrf-forms of six and five, demigods of four, *kinnaras* of three, fish-form (*matsya*) of two, serpents of but one]. These '*tāla*'-divisions, it should be noted, have in this case very little to do with actual size or height of one icon in relation to another; rather the divisions are made so that various segments of any icon being fashioned may be given over to the face, the thighs, the chest, *etc.*, in a consistent proportion to the rest of the icon's parts.

In §169 icons for use in domestic worship are discussed, the standards of measurement differing somewhat according to the substance out of which the icon is fashioned and in relation to the caste-affiliation of the person in whose home the icon will eventually be used.

In §170 we see that the main '*mūlabera*'-icon in a temple is to be used as a standard of measurement by which are determined the proportionate sizes of the various surrounding '*parivāradevatā*'-likenesses. While various options are given, the overriding consideration seems to be to preserve the prominent place among the surrounding retinue of the main and central iconic representation of the Lord.

Finally, in §171, it is pointed out certain types of measurements are to be used for temples and their structural parts, for holy instruments of worship, and for icons—in each case the unit being different.

§ 168

. . . अतः परं प्रवक्ष्यामि प्रतिमामानलक्षणम् ॥
एकादिदशपर्यन्तं संख्ययोपेयुषां भिदाम् । तालानामुत्तमादीनां रूपाविष्कृतिपूर्वकम् ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

Digitized by Google

Original from
UNIVERSITY OF MICHIGAN



UTTAMADAŚATĀLA—MEASUREMENT

(*To face entry § 168, p. 67*)

Digitized by Google

Original from
UNIVERSITY OF MICHIGAN

यत्किञ्चित् प्रतिमामानं विभज्य दशधा पुनः । एकं द्वादशधा भङ्क्त्वा तत्रैकांशोऽङ्गुलः स्मृतः ॥
अङ्गुलं चाष्टधा कृत्वा तत्रैकांशो यवः स्मृतः । तेनैवाङ्गुलमानेन अङ्गप्रत्यङ्गकल्पना ॥
द्वादशाङ्गुलकं मानं तालाख्यमिह कथ्यते । द्वादशाङ्गुलकस्तालो मुख्यश्चेति प्रकीर्तितः ॥
द्व्यङ्गुलं गोलकं ज्ञेयं कलेति व्यपदिश्यते । एकाङ्गुलं भवेन्मात्रा भागो मात्राचतुष्टयम् ॥
उत्तमाधममध्यानि तालानि कमलासन । एकादिदशपर्यन्तं संख्यया छेदयन्ति च ॥
मीयते दशतालेन वासुदेवः सनातनः । नवार्धतालौ ब्रह्मेशौ नवतालेन देवताः ॥
अष्टार्धतालौ द्वारस्थाः कुमुदादिगणास्तथा । अष्टतालांश्च मनुजान् पिशाचादींश्च सप्तकान् ॥
षट्तालान् कुब्जकान् विद्धि पञ्चतालांस्तु वामनान् । चतुस्तालानि भूतानि त्रिताला: किन्नरास्तथा ॥
मत्स्या द्वितालका ज्ञेयास्तालेनैकेन पन्नगाः । दशतालं चतुर्विंशदङ्गुलीनां शतं भवेत् ॥
उत्तमं मध्यमं विंशत्कनिष्ठं षोडश स्मृतम् । नवतालं तु तच्छ्रेष्ठं यच्छतं द्वादशाधिकम् ॥
अष्टाधिकं शतं मध्यं कनीयश्चतुरुत्तमम् । अष्टतालं शतं श्रेष्ठं मध्यमं षण्णवत्यपि ॥
चतुर्थहीनमधममष्टतालं प्रकीर्तितम् । उत्तमादिक्रमोऽन्येषु सप्ततालादिषूह्यते ॥
चतुश्चतुर्विहीनं चेत्क्रमादङ्गुलिभिर्भवेत् । पूर्वं पूर्वं यथोक्तं तत् त्रैविध्यमवगम्यताम् ॥
त्रयोदशार्धाङ्गुलिकं दशतालोत्तमे मुखम् । अर्धेनाङ्गुलिना हीनं मध्यमं संप्रचक्षते ॥
अर्धेनाङ्गुलिना हीनमेकैकमितरेष्वपि । ध्रुवायामुत्तमं तालमर्चायां मध्यमं भवेत् ॥
अधमं परिवाराणां सर्वेषां कमलासन । . . . .

Pādma "kr." XIX : 51*b*–68*a* [*sic.*]

§ 169

मात्राङ्गुलिवशेनैव गृहार्चामानकल्पनम् । नाधिकं हस्तमानाच्च न न्यूनं द्वादशाङ्गुलात् ॥
अङ्गुलैः प्रतिमामानं वर्णानामुच्यते क्रमात् । हस्तमानमितार्चा स्याद्भवने पूर्वजन्मनः ॥
अङ्गुलैरेकविंशत्या प्रतिमा वसुधापतेः । विशामेकोनविंशत्या द्वाभ्यां शूद्रस्य हीनया ॥
अर्धचित्रं तदाभासं भवने भुक्तिवर्धनम् । द्वादशाङ्गुलमानार्चा लोहजा पूर्वजन्मनः ॥
नवाङ्गुला क्षत्रियस्य विशः सप्ताङ्गुला मता । पञ्चाङ्गुला चतुर्थस्य प्रतिमा भवने भवेत् ॥

Pādma "kr." XXXII : 28–32

§ 170

उच्छ्रयं मूलबेरस्य चतुर्धा विभजेत्ततः । तत्रैकभागमुच्छ्रायं परिवारेषु कल्पयेत् ॥
मानाङ्गुलेन वा यद्वा देहलब्धाङ्गुलेन वा । अष्टाङ्गुलसमुच्छ्रायं द्वादशाङ्गुलमेव वा ॥
द्विगुणं वा यथायोगमुच्छ्रायं परिकल्पयेत् । स्थाने मूलप्रतिकृतेः परिवाराश्च ते स्थिताः ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

आसीनाश्चासने तस्य शय्यायां शयनं विना । आसीना वा स्थिता वाऽपि कामचाराश्चतुर्मुख ॥
प्रलम्बफलकायामघनविस्तारनिर्णयम् । कथ्यते पञ्चतालस्स्यादायामो घनमङ्गुलम् ॥
अर्धायामं च विस्तारं कुर्यात्तत्सुकृतं यथा । प्रतिमायास्तदङ्गानां कौटिल्यार्जवसिद्धये ॥
लम्बमानं यदुच्छिष्टं तदर्धं कमलासन । शिखामण्यादिसुषिरं अनेकं तत्र कल्पयेत् ॥
सूत्राणि सुषिरैस्तैस्तैः लम्बयेच्च पृथक् स्वयम् । जानीयादार्जवं तेन प्रत्यङ्गमविचारयन् ॥
Pādma "kr." XXII : 65–72

§ 171

प्रासादमण्टपानां च मानाङ्गुलविधानतः । यागोपकरणानां तु मात्राङ्गुलविधानतः ॥
देहलब्धप्रमाणेन प्रतिमां कारयेद्बुधः । अङ्गुलैर्निष्कुरित्युक्तं चतुर्विंशतिभिस्तथा ॥
पञ्चविंशतिभिश्चैव प्राजापत्यमुदाहृतम् । षड्विंशतिधनुर्मुष्टिः सप्तविंशद्धनुर्गृहम् ॥
Kapiñjala X : 58-60

Measurements of icons prepared for existing temples

The main point to be gleaned from the following eight excerpts, §172-§179, is that when an icon is to be fashioned for a temple already standing, it is to be made in proportion to that structure which will thereafter house it—either in a measurement appropriate to the inner sanctuary itself, or to the doors leading into it, the *vimāna*-building, its foundations, pillars or some other structural element. In §174, it may also be noted, counsel is given that the *pīṭha*-pedestal for the icon, the *āsana*-seat used for it, the *śayana*-couch and other appointments, too, should be in a measure in keeping with the size of the chamber in which they are to go.

§ 172

प्रतिमालक्षणं वक्ष्ये शृणुष्वावहितस्सदा । बेरमानं विमानाद्वा द्वारमानेन वा पुनः ॥
गर्भमानेन वा ज्ञेया मूलबेरप्रमाणतः । मूलप्रासादविस्तारं यद्वाह्येषु प्रमाणतः ॥
तस्यार्धं श्रेष्ठमित्युक्तं तदर्धं मध्यमं स्मृतम् । तदर्धमधमं प्राहुः प्रतिमोत्सेधमत्र वै ॥
एवं प्रासादमानन्तु द्वारमानमतः शृणु । द्वारात्पदाधिकं श्रेष्ठं द्वारमानन्तु मध्यमम् ॥
द्वारस्य पादहीनं यदधमं प्रतिमोच्छ्रयम् । गर्भमानं प्रवक्ष्यामि शृणु नारद तत्त्वतः ॥
त्रिपादद्वयदीर्घं वा प्रतिमा सोत्तमा स्मृता । पञ्चभागसमोत्तुङ्गं प्रतिमा मध्यमा तु सा ॥
गर्भगेहार्धतुङ्गा या सा वरा प्रतिमोच्छ्रया । गर्भमानमिति प्रोक्तं चित्रं चाप्यर्धचित्रकम् ॥
चित्राभासविधिश्चेति शृणु नारद सांप्रतम् । कालयोगप्रमाणेन कर्तव्या प्रतिमा शुभा ॥
त्रिविधं प्रतिमाकर्म शास्त्रज्ञास्स्संप्रचक्षते । चित्रं चाप्यर्धचित्रं च चित्राभासं तथैव च ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

दृश्यन्तेऽवयवा यत्र प्रतिमायां समन्ततः । मानोन्मानप्रमाणाभिस्तच्चित्रमिति पठ्यते ॥
शिलागतायां यस्यां तु पृष्ठभागो न दृश्यते । मानप्रमाणसंयुक्ता सा चित्राभास उच्यते ॥
उत्तमं तु फलं चित्रं मध्यमं चार्धचन्द्र(चित्र)कम् । आलेख्यमधमं प्रोक्तं प्रतिष्ठाकर्मणि क्रमात् ॥

Viṣvaksena X : 23–34

§ 173

. . . अत्र तु प्रतिमायामः पञ्चधा परिकीर्तितः ॥
प्रासादगर्भभागार्धसमायामा समा भवेत् । पञ्चभागीकृते तत्र त्रिभागैर्मध्यमा भवेत् ॥
त्रिभागीकृतगर्भे तु द्विभागा चोत्तमा भवेत् । प्रासादायामश्च कर्तव्यो द्वारायामस्तथैव च ॥
प्रतिमा नवहस्तान्ता त्वेकहस्तादिरुच्यते । अत ऊर्ध्वं न कुर्वीत हीनां वापि कदाचन ॥
कालयोगप्रमाणेन कर्तव्या प्रतिमा तथा । त्रिविधं प्रतिमाकर्म शास्त्रज्ञाः संप्रचक्षते ॥
चित्रं चाप्यर्धचित्रं च चित्राभासं तथैव च । दृश्यन्तेऽवयवा यस्याः प्रतिमायाः समन्ततः ॥
मानोन्मानप्रमाणा हि सा चित्रमिति कीर्तिता । शिलागताया यस्यास्तु पृष्ठभागो न दृश्यते ॥
मानप्रमाणसंयुक्ता सार्धचित्रमिति स्मृता । या स्थितालेख्यरूपेण लिखिता वापि शिल्पिभिः ॥
मानप्रमाणसंयुक्ता सा चित्राभासमुच्यते । उत्तमं तु फलं चित्रे मध्यमं चार्धचित्रके ॥
आलेख्ये त्वधमं प्रोक्तं प्रतिमाकर्मणि क्रमात् । चतुर्विधं किरीटाख्यमस्मिंस्तन्त्रे मया श्रुतम् ॥
छत्राण्डपद्मकूर्माणां कुर्यादाकारमन्ततः । शान्तिदं पद्मसंकाशं कूर्माकारं शुभप्रदम् ॥
छत्राकारं तु वा कुर्यादथवा कुक्कुटाण्डवत् । श्रीकारं छत्रसंकाशमण्डाकारं सुखप्रदम् ॥
पद्माकारं तु वा केचित् कूर्माकारं तु वा पुनः । प्रवदन्ति किरीटान्तं शेषमन्यद् विवर्जयेत् ॥
प्रणीते तु महान् दोषः कर्तुः कारयितुर्भवेत् । पदपद्मं भवेत् फुल्लमष्टपर्णं सकर्णिकम् ॥
द्वाराष्टभागविस्तारं तावदुत्सेधसंयुतम् । तस्य नालं तु वृत्तं वा चतुरश्रं तु वा भवेत् ॥
वृत्तं शिलात्मकं प्रोक्तं ब्राह्मं स्याच्चतुरश्रकम् । आयामोऽत्र तु यावान् स्यात् तावांश्चात्र प्रशस्यते ॥
रत्नन्यासस्पृगेव स्यान्नान्यथा नालमिष्यते । ततः पादशिलायाश्च छिद्रं तन्नाभिमानतः ॥
चतुरश्रं तु वा वृत्तं तद्युक्तां कारयेद् बुधः । स्थाने चैष विधिः प्रोक्त आसीने कथयामि वः ॥
गर्भागारचतुर्भागः पादपद्मस्य चोच्छ्रयः । तावदायामविस्तारः शेषं सर्वं तु पूर्ववत् ॥
न चैष शयने याने विधिरुक्तः कदाचन । . . . .

Sanatkumāra "Br." VII : 32*b*–51*a* [*sic.*]

§ 174

बिम्बनिर्माणमधुना वदामि कमलेक्षणे । गर्भविस्तारमानं वा द्वारदैर्घ्यमथापि वा ॥
प्रासादपादमानं वा हस्तमानेन वा रमे । मूलप्रतिकृतिं कुर्याज्जन्मसर्वार्थसिद्धिदाम् ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

प्रतिमा गर्भविस्तारा श्रेष्ठा स्यात्कमलोद्भवे । नवभागैकहीना तु मध्या प्रतिकृतिर्भवेत् ॥
कनीयसी पञ्चभागेष्वेका हीना न संशयः । चतुर्भुजं वा द्विभुजं यजमानेच्छया भवेत् ॥
आसीनं वा शयानं वा स्थितं यानगतं तु वा । त्रिविक्रमं विश्वरूपं कल्पयेयुर्यथाविधि ॥
शयानस्याथ वक्ष्यामि प्रमाणं जलजोद्भवे । आयामं गर्भगेहस्य भङ्क्त्वा भागं पुरा रमे ॥
अष्टादशाद्भागमेकं त्यजेत् पादे शिरस्स्थले । शेषस्य भागमेकं स्यात् किरीटस्य द्विभागकम् ॥
किरीटशेषयोर्मध्ये भागमेकं परित्यजेत् । अवशिष्टेन भागेन मूलमूर्तिं प्रकल्पयेत् ॥
उत्तमोत्तममेतत्स्यादुत्तमं तूच्यतेऽधुना । गर्भगेहान्तरायामं भङ्क्त्वा षोडशधा पुरा ॥
मूर्ध्नस्स्थाने चतुर्भागं पादस्थाने द्वयं त्यजेत् । अवशिष्टैर्दशांशैः स्याच्छयनस्योत्तमो विधिः ॥
मूर्ध्नि पञ्च परित्यज्य पादयोस्त्रीन् त्यजेद्यदि । अवशिष्टैश्च शयनं मध्यमं समुदाहृतम् ॥
षड्भिर्मूर्ध्नि तथा पादे वर्जयेच्चतुरो यदि । अवशिष्टषडंशैस्तु कृता मूर्तिः कनीयसी ॥
स्थितस्य मूलबिम्बस्य शृणु मानं जलोद्भवे । गर्भद्वारसमं बिम्बमुत्तमोत्तममिष्यते ॥
उत्तमं त्वेकभागेन हीनं द्वारस्य वै रमे । त्रिभागहीनं मध्यं स्यात्त्वधमं त्वर्धमानकम् ॥
आसीनस्याथ वक्ष्यामि बिम्बस्य कमलासने । गर्भद्वारं चतुर्धा तु भङ्क्त्वा भागेन वर्धयेत् ॥
भागत्रयेण संयुक्तां बिम्बप्रकृतिमुत्तमाम् । मध्यमस्य द्वयोर्भागः कनीयानेकभागकः ॥
गर्भगेहोन्नतिर्यावत्तदर्धा यानमुच्यते । गर्भद्वारोन्नतेरर्धं बिम्बं यानगलोपरि ॥
यानारूढोन्नतिः पूर्णा तत् त्रिभागेन मध्यमा । अधमा स्यात्तदर्धेन विश्वरूपविधिं शृणु ॥
उन्नतिं गर्भगेहस्य भङ्क्त्वा द्वादशधोपरि । भागमेकं परित्यज्य पीठे भागद्वयं तथा ॥
उत्तमो विश्वरूपस्य मध्यमोन्नतिरुच्यते । ऊर्ध्वे भागद्वयं त्यक्त्वा भागत्रयमधस्तथा ॥
शिष्टैस्तु सप्तभिर्भागैर्विश्वरूपस्य चोन्नतिः । उपरिष्टादधस्ताच्च परित्यज्य त्रिभागकम् ॥
अवशिष्टैस्तु षड्भागैः कृता मूर्तिः कनीयसी । लोकाक्रमणबिम्बस्य चैवमुन्नतिरिष्यते ॥
स्थिते देवे तथा देव्यः आसीनास्ते तथैव ताः । स्थितस्य देव्य आसीना असीनस्य स्थितापि वा ॥
शयानेषु च देवेषु आसीना वा स्थितापि वा । परतन्त्रश्रियादीनामित्थं सृष्टिरुदाहृता ॥
यानारूढे देववरे देवोत्सङ्गगता यदि । तस्य बिम्बस्य सा देवी नान्या पार्श्वे विधीयते ॥
परतन्त्रास्तु या देव्यः सौम्यवक्त्रा द्विबाहवः । परतन्त्रे कल्पनीया देवस्कन्धसमुन्नताः ॥
तावत्येवोन्नतिर्भेदे स्वतन्त्रे देवयोषिताम् । यानस्कन्धसमारूढां शयानां वा स्थितां तथा ॥
चतुर्भुजां द्विहस्तां वा स्वातन्त्र्ये परिकल्पयेत् । शयितुर्मूलबिम्बस्य शयनं पञ्चधा स्मृतम् ॥
उद्योगो योगभोगौ च सृष्टिः संहार एव च । अनन्तभोगशयने मृद्वास्तरणकल्पिते ॥
सोपधानशिरःपार्श्वे न्यस्तहस्तश्च दक्षिणः । वामबाहूपरिन्यस्तवामजानूपलक्षितः ॥
किरीटहारकेयूरवनमालाविभूषितः । श्रीवत्साङ्कः प्रसन्नास्यः ईषदुत्थितकन्धरः ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

एवं प्रकल्प्य शयनं तन्मानस्याङ्गुलेः पुरा । भागं त्रयोदशं नीत्वा तन्मानस्याष्टसंख्यया ॥
श्रीभूम्योर्बिम्बकरणं कुर्यात्कमलसंभवे । अर्चापीठशिरःपार्श्वे प्राञ्जलिं स्वस्तिकासनाम् ॥
द्विभुजां तु श्रियं देवीं पादपीठे धरामपि । देवस्य मौलिपार्श्वस्थभित्तौ स्युः सनकादयः ॥
पृष्ठभित्तौ तु देवस्य स्वलक्षणशिरोऽन्वितान् । द्विहस्तान्पुरुषाकारांश्चक्रादीनायुधांस्तथा ॥
पादकुड्ये विधात्रादीन् देवानञ्जलिसंयुतान् । कल्पयेद्यत्र शयनं तद्विदुश्चोत्तमोत्तमम् ॥
अनन्तभोगशयने द्विभुजो वा चतुर्भुजः । श्रीवत्साङ्कः प्रसन्नास्यो योगमेकः समास्थितः ॥
शेषे शयानो द्विभुजश्चतुर्हस्तोऽथवा भवेत् । श्रीमह्यवयवा लक्ष्मीरर्चनापीठपार्श्वयोः ॥
बद्धाञ्जलिः खगेशश्च ब्रह्माद्याश्च तपोधनाः । परितः खलु सेवन्ते योगं तमपरं विदुः ॥
शेषे शयानो द्विभुजश्चतुर्हस्तोऽथवा भवेत् । श्रीवत्साङ्कः प्रसन्नास्यः श्रीधरण्योः श्रियोऽथवा ॥
विन्यस्योत्सङ्गयोः पादौ सुखं शेतेऽथवा स्वयम् । श्रीमह्यवयवा सा श्रीर्बाहुमूलं समाश्रिता ॥
देवस्य पादशय्याया अर्चनापीठपार्श्वयोः । ब्रह्माद्या भित्तिदेशे वा गन्धर्वा देवयोषितः ॥
देवस्य भोगशयनं सेवन्ते नित्यशः किल । सृष्ट्याख्यशयनं वक्ष्ये वासुदेवस्य वै रमे ॥
शेषेऽश्वत्थदले वा स्याद्बालभूषणभूषितः । अलकैः सुप्रसन्नास्यो बालो नीलाब्जकान्तिमान् ॥
अमृताब्धौ सुखं शेते ब्रह्मा तस्य जगत्पतेः । नाभीकमलमाश्रित्य बद्धाञ्जलिपुटः स्थितः ॥
एतत् स्यात् सृष्टिशयनं संहारं शृणु पद्मजे । अनन्तभोगशयने सहस्रफणशोभिते ॥
चतुर्हस्तोऽष्टहस्तो वा भ्रुकुटीकुटिलाननः । दंष्ट्राकरालवदनश्चक्राद्यायुधभूषितः ॥
एक एव स्वयं शेते शयनेऽतिभयङ्करः । अर्चनापीठिकापार्श्वे श्रीर्वा लक्ष्मीः खगेश्वरः ॥
कृताञ्जलिपुटौ स्यातां त्रिविक्रममथो शृणु । द्विभुजो वा चतुर्बाहुर्भुजाष्टकयुतोऽपिवा ॥
सव्यं पादं भुवि न्यस्य तदन्यं व्योम्नि विक्षिपेत् । तृतीयपदविन्यासस्थानं देहीति दानवम् ॥
पाणिना याचमानस्तु कल्पनीयश्च शिल्पिभिः । तमेव वैनतेयस्य स्कन्धोपरि हरिं प्रभुम् ॥
उदितं विक्रमं विद्धि विश्वरूपमतः शृणु । द्विहस्तमेककण्ठं च प्रागादिषु यथाक्रमम् ॥
वासुदेवादिवदनं वनमालाविभूषितम् । वासुदेवाननादूर्ध्वं देवानां वदनान्यपि ॥
ऋषीणां वदनानि स्युः सङ्कर्षणमुखोपरि । प्रद्युम्नवदनादूर्ध्वं दैत्यरक्षोमुखान्यपि ॥
अनिरुद्धमुखान्नागगन्धर्वाणां मुखान्यपि । तत्तन्मुखानामुपरि विविधान्याननान्यपि ॥
पिशाचाजगरव्याघ्रनरपक्षिमुखान्यपि । क्रमेण कल्पनीयानि तत्तदूर्ध्वं पुनः पुनः ॥
कण्ठाधोदेशमारभ्य पादान्तं पुरुषाकृतिः । विश्वमूर्तेर्भगवतश्चैवं रूपं प्रकल्पयेत् ॥
आलयादिषु निर्माय पूजनं त्वतिसाहसम् । तस्मान्न कल्प्या सर्वत्र जगतः क्षेममिच्छता ॥

Śripraśna XII : 1–58

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

अथातः संप्रवक्ष्यामि मूलबेरसमुच्छ्रयम् । गर्भविस्तारमानं वा द्वारदैर्घ्यमथापि वा ॥
प्रासादपादमानं वा हस्तमानमथापि वा । यजमानप्रमाणं वा स्तम्भमानमथापि वा ॥
कुर्याद् ध्रुवप्रतिकृतिं ग्रामादेरनुकूलिकाम् । प्रतिमा गर्भविस्तारतुल्या श्रेष्ठा चतुर्मुख ॥
नवभागैकहीना तु प्रतिमा मध्यमा भवेत् । पञ्चभागैकहीना तु जघन्या परिकीर्तिता ॥
सप्तधा गर्भविस्तारं विभज्य द्वौ विवर्जयेत् । शिष्टभागसमुच्छ्राया श्रेष्ठा स्यादथवाऽब्जज ॥
मध्यमा पञ्चसूत्र्यंशैः त्रिभिर्द्वाभ्यां कनीयसी । द्वाराध्यर्धसमुच्छ्राया श्रेष्ठा पादाधिका पुनः ॥
मध्यमा द्वारमात्रा तु कनिष्ठा मध्यमा भवेत् । द्वारं षोडशधा कृत्वा न्यूनैकद्वित्रिभिः क्रमात् ॥
श्रेष्ठा मध्या कनिष्ठा स्यादित्थं पादादिषु क्रमात् । उत्तमा पञ्चभिर्हस्तैः त्रिभिरेकेन चेतरे ॥
स्थितस्य कौतुकस्यायमुच्छ्रयः समुदीरितः । गर्भगेहस्य विस्तारं त्रिधा भङ्क्त्वा द्वयी भवेत् ॥
उत्तमा पञ्चधा त्र्यंशैः मध्यमार्धकनीयसी । आसीना चाथवा श्रेष्ठा गर्भविस्तारसंमिता ॥
नवभागैकहीना तु मध्यमा पञ्चधा कृते । एकोना चरमा प्रोक्ता सप्तधा षड्भिरुत्तमा ॥
सप्तधैव त्रिभिर्मध्या त्रिधा द्वाभ्यां कनीयसी । द्वारादिषु स्थितस्यैव समासीनोन्नतिः क्रमात् ॥
हस्तैः सप्तभिरासीना श्रेष्ठा मध्या तु पञ्चभिः । त्रिभिर्जघन्या वक्ष्यामि शयनस्यापिचोन्नतिम् ॥
आयामं गर्भगेहस्य भङ्क्त्वा षोडशधा पुनः । चतुरो मूर्ध्नि सन्त्यज्य भागौ द्वौ पादतस्तथा ॥
अवशिष्टदशांशेन शयितस्योत्तमोन्नतिः । आयाममष्टधा कृत्वा हित्वा द्वौ मूर्ध्नि पार्श्वतः ॥
एकमंशं चरणतः शिष्टांशेनैव मध्यमा । आयामं सप्तधा कृत्वा मूर्ध्नि द्वावेकमङ्घ्रितः ॥
हित्वा कनिष्ठाशेषेण शयानस्याकृतिर्भवेत् । विस्तारे वा चतुर्धा तु कृते तेष्वेकमुद्धरेत् ॥
शिष्टेन द्विगुणेन स्याच्छयनस्योत्तमोन्नतिः । कृत्वैवं पञ्चभागेन स्याच्छयानस्य मध्यमा ॥
गर्भविस्तारमानेन शयानस्याधमा भवेत् । द्विगुणा द्वारमानेन शयानस्योत्तमोन्नतिः ॥
अध्यर्धमानैर्मध्या स्यात्सपादा चरमा भवेत् । उत्तमादिक्रमो यादृग् द्वारमाश्रित्य कीर्तितः ॥
ध्रुवबेरस्य यादृक् स्यात् स्तम्भाद्याश्रयणेऽपि च । सप्तभिः पञ्चभिर्हस्तैः त्रिभिः श्रेष्ठा यथाक्रमम् ॥
यानेऽप्यासनवन्मानं विश्वरूपं स्थितं यथा । गर्भगेहं त्रिधा कृत्वा द्विभागं चोत्तमं भवेत् ॥
पञ्चधा तु कृते तस्मिन् त्रिभागो मध्यमो भवेत् । गर्भार्धमधमं धाम्ना सर्वसाधारणो विधिः ॥
यजमानाद्यनुगुणो विधिरद्याभिधीयते । लब्धांशमङ्गुलीकुर्यात् प्रासादस्य चतुर्मुख ॥

* * *

. . . यत्किञ्चित्कौतुकायामं विभज्य दशधा पुनः ॥
एकं द्वादशधा भागं कृत्वा तेष्वेकमङ्गुलम् । उच्छ्रायः प्रतिमायाः स्यान्महामानाङ्गुलाश्रयः ॥
प्रासादादींश्च तेनैव कुर्यान्मानान्तरेण वा । वेदिका पीठशिबिका रथादीनां विधिः पुनः ॥
मानान्तराङ्गुलेनैव भवेन्नान्येन केनचित् । यागोपकरणानां च कुर्यान्मात्राङ्गुलेन च ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

होमाङ्गानि स्रुवादीनि कुणमुष्ट्यङ्गुलाश्रयः । देहलब्धाङ्गुलेनैव प्रतिमाङ्गानि कल्पयेत् ॥
यैर्यावद्भिर्विभागांशैरर्च्य(र्चा?)मानमुदाहृतम् । मानाङ्गुलेन तन्मानमङ्गुलीकृत्य तत्पुनः ॥
आयव्ययादौ संयोज्य ग्रामादेर्यच्छुभं भवेत् । तत्तथा वक्ष्यते ब्रह्मन् इदानीमवधार्यताम् ॥
लब्धांशमङ्गुलीकृत्य तदङ्गुलमथाष्टभिः । वर्धयेद् ह्रासयेच्चैव पुनर्द्वादशसंख्यया ॥
आयं शिष्टाङ्गुलं ज्ञेयं व्ययैर्नवभिरेधयेत् । दशभिः क्षपयेच्छिष्टमङ्गुलं व्ययसंज्ञितम् ॥
आयः समग्रशुभदो व्ययः स्वल्पशुभावहः । प्रतिकूले विपर्यासे ग्रामादेः कमलासन ॥
त्रिभिर्वृद्धौ क्षयोऽष्टाभिः शिष्टं योनिरुदाहृता । ध्वजो धूमस्तथा सिंहः श्वा वृषो गर्दभः करी ॥
काक इत्युच्यते योनिः सा शुभा शुभलक्षणा । ध्वजः सिंहो गजोऽनड्वान् शुभयोनिः शुभावहः ॥
धूमध्वांक्षखरश्वानः प्रतिकूला वियोनयः । अष्टाभिर्वर्धते हानौ सप्तविंशतिसंख्यया ॥
शिष्टमृक्षमिति प्रोक्तं ग्रामादेस्तच्छुभं भवेत् । नवभिर्वर्धते हानौ सप्तभिः शिष्टमङ्गुलम् ॥
वारान्ते शुभदाः सौम्याः क्रूराः स्युर्भयदायिनः । वृद्धौ चतुर्भिर्नवभिः शिष्टं हानावथांशकम् ॥
तस्करो भुक्तिशक्तिश्च धन्यो नरपतिः क्लिबः । सुनीतिः प्रीतिरायुष्मान् एतेंऽशाः समुदीरिताः ॥
मानाङ्गुलैर्द्वादशभिः मानं तालाह्वयं मतम् । द्वौ तालौ कथितो हस्तस्तेह्यष्टौ धनुरुच्यते ॥
स एव दण्डः सयुगः क्रोशस्तैः पञ्चभिः शतैः । क्रोशैश्चतुर्भिर्गोपानं योजनं तच्चतुर्गुणम् ॥
ग्रामस्य यजमानस्य राज्ञो जनपदस्य च । आयादिरनुकूलश्चेत्प्रतिमाः सर्वसिद्धिदाः ॥
आयादिरेष विज्ञेयो मूलबेरसमाश्रयः । न तदङ्गेषु बिम्बेषु लोहजेष्वितरेषु वा ॥
श्रद्धाबिम्बेषु विज्ञेयः तथा भवनकौतुके । . . . .

Pādma "kr." XII : 1–24, 32*b*–52*a*

§ 176

प्रतिमायां प्रवक्ष्यामि प्रमाणं सविशेषतः । गेहश्च बिम्बानुगुणं विदध्यात्तन्त्रवित्तमः ॥
यजमानानुरूपं स्यात्प्रमाणं तत्र काश्यप । चतुरङ्गुलमारभ्य चतुरङ्गुलवृद्धितः ॥
यावदष्टोत्तरशतं अङ्गुलीनां भवेद् द्विज । बिम्बं सौवर्णकं कार्यमत ऊर्ध्वं न कारयेत् ॥
रूप्यं ताम्रशिलाबिम्बं यत्तद्धाम श्रियं भवेत् । गर्भगेहप्रमाणाथ प्रतिमा सोत्तमा भवेत् ॥
नवभागादेकहीना मध्यमा प्रतिमा द्विज । पञ्चभागादेकहीना अधमा विद्धि काश्यप ॥
गर्भविस्तारमाने तु सर्वदा विजितेन्द्रियः । गृहीत्वा पञ्चभागे तु पञ्चभागात् त्रिभागकम् ॥
त्रिभागेभ्यो द्विभागं वा श्रेष्ठं मध्याधमं विदुः । द्वारप्रमाणमुदितं पादार्थाधिकमेव वा ॥
उत्तमाधममध्यानां प्रमाणमिति कीर्तितम् । . . . .

Viśvāmitra XXII : 21–28*a*

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 177

कार्या गृहानुरूपार्चा गृहं वार्चानुरूपतः । न्यायोऽयं पीठिकादीनामपि ज्ञेयो विचक्षणैः ॥

Viṣṇu XII : 80

§ 178

प्रासादयुक्ता प्रतिमा कर्तव्या तन्त्रवित्तमैः । प्रतिमायुतं वा तत्र प्रासादं तु समाहरेत् ॥
अत्र तु प्रतिमाधाम बहुधा विनिकीर्तितम् । प्रासादगर्भगार्हस्थ्यं आयामस्त्वधमो भवेत् ॥
पञ्चभागे कृते तस्मिन् गृहगो मध्यमो भवेत् । त्रिभागीकृतगर्भे तु द्विभागं चोत्तमं भवेत् ॥
पादायामश्च कर्तव्यो द्वारायामस्तथैव च । प्रतिमा नवहस्तान्ता एकहस्तादिरुच्यते ॥
अत ऊर्ध्वं न कुर्वीत हीनं वापि कदाचन । अतोऽन्यं संप्रवक्ष्यामि प्रतिमोच्छ्रयविस्तरम् ॥
उद्देशद्वारतुल्यं वा स्तम्भमानमथापि वा । शुद्धद्वारसमं वापि द्वारात् पादाधिकं तु वा ॥
द्वादशान्यर्धमुत्सेधं त्रिविधं प्रतिमोच्छ्रयम् । द्वारषोडशभागैकं हीनं वा प्रतिमोच्छ्रयम् ॥
तस्माद् द्विभागहीनं वा त्रिभागानां तु वा पुनः । स्थानकस्य प्रमाणं हि आसनस्योच्यतेऽधुना ॥
द्वारात् पादाधिकं वापि द्वाराध्यर्धमथापि वा । आसनस्य प्रमाणं हि शयनस्य तथोच्यते ॥
ततो द्वारद्वयं वापि तद्द्वारादर्धकं तु वा । शयनस्य प्रमाणं हि न च न्यूनाधिकं भवेत् ॥
उत्तानां तु यथाकामं आयामस्य प्रकीर्तितम् । शैलं च प्रतिमां तत्र कदाचिदपि शाययेत् ॥
स्थानकं तु प्रशस्तं स्यात् शैलस्य तु विशेषतः । कालयोगप्रमाणेन कर्तव्या प्रतिमा शुभा ॥

* * *

दशतालक्रमेणैव कौतुकं कारयेद्बुधः । ध्रुवं यत्स्थानकं यद्वन्मूलबेरं यथाक्रमम् ॥
तथैव कुर्यात्कर्मार्चा जङ्गमन्तु चतुर्विधम् । अतीव रूपसंपन्नं प्रथमे वयसि स्थितम् ॥
भक्तानां दर्शनार्थाय क्रियते तन्मनोहरम् । देवबिम्बमुपादेयं शङ्खाद्यायुधभूषितम् ॥
सर्वाभरणसंयुक्तं सर्वलक्षणलक्षितम् । शङ्खं चक्रं गदा पद्मं धारयन्तं चतुर्भुजम् ॥
सृष्टिबीजं तथा पद्मं चक्रस्थितिनिबन्धनम् । कटिकालम्बितं वामं भावितस्य विशेषतः ॥
वामहस्ते तदा तस्य गदां चैव तु कारयेत् । दक्षिणोर्ध्व(र्ध्वेन)हस्तेन धारयेच्चक्रमुत्तमम् ॥
अष्टारं द्वादशारं वा चतुर्विंशदरं तु वा । नेमिं तु मध्यमे चैव ज्वालाषड्भिः समन्वितम् ॥
विष्कुम्भषट्कोपेतं च सुवृत्तं च सुशोभनम् । धारयेच्चक्रराजानं वामोर्ध्वेन करेण च ॥
शङ्खायामं तथा तालं ज्वालायुक्तं सितप्रभम् । तर्जनीमध्यमाभ्यां तु शङ्खं चक्रं च धारयेत् ॥
तद्धारणकराग्रेण बाहुसीमान्तमेव च । कर्णान्तं वा ललाटान्तं ज्वालान्तं शङ्खचक्रयोः ॥
दक्षिणाभयहस्ते तु धारयेत्पद्मकुड्मलम् । अङ्गुष्ठतर्जनीमध्ये अङ्गुष्ठाच्चोत्थितं शुभम् ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

तले विकसितं हस्ते लिखेत्पद्मं सुशोभितम् । अधोमुखे वामहस्ते चतुस्तालं गदां न्यसेत् ॥
गुल्फान्तं पीतवस्त्रेण छादयेत्कौतुकं हरेः । ललाटान्तं शिरःपृष्ठे शिरश्चक्रं तु कारयेत् ॥
तन्मध्ये चक्रनालं स्याच्चक्रजालां विना क्रमात् । कुर्याद्वै चक्रवृत्तं तु प्रभासहितमेव च ॥
एवं चतुर्भुजानां तु बेराणां शयनं तथा । एवं चतुर्भुजं कुर्यात्कर्मार्चा पार्थिवेन च ॥
महाबेरत्रिभागैकं चतुर्भागैकमेव वा । उत्थाय प्रतिमा प्रोक्ता स्नपनार्थं तथैव च ॥
तत्त्रिभागैकभागं वा चतुर्भागैकभागतः । द्वादशाष्टाङ्गुलं वापि बलिबिम्बस्य लक्षणम् ॥
तीर्थकं तत्समा चैव बालज्ञानस्य तत्समा । शङ्खचक्रगदापद्मैः चतुर्भिः कृतलक्षणम् ॥
पीताम्बरधरं देवं चतुर्बाहुं किरीटिनम् । स्थानके स्थानकं कुर्यात्कर्मार्चाबेरमुत्तमम् ॥
आसीने चासनं वापि स्थानकं वापि कारयेत् । महाबेरं तु शयने आसनं स्थानकं तु वा ॥
यानके तु महाबेरे यानकं स्थानकं तु वा । लोकाक्रान्तस्य यो नित्यं विश्वरूपस्य वा पुनः ॥
स्थानकं तु प्रकुर्वीत सर्वत्रैव चतुर्भुजः । हरेरंशावताराणां सर्वेषां च यथाक्रमम् ॥
चतुर्भुजं तु कुर्वीत कर्मार्चा जङ्गमं बुधः । इति संक्षेपतः प्रोक्तं प्रतिमालक्षणं शुभम् ॥

Vasiṣṭha IV : 34–45, 100–122

§ 179

प्रमाणं संप्रवक्ष्यामि प्रतिमायां विशेषतः । कौतुकस्य वशं देहं कुर्यात्तन्त्रविचक्षणः ॥
तत्प्रमाणं प्रवक्ष्यामि यजमानानुरूपतः । हाटकं राजतं रूपं कांस्यं रजतमुच्यते ॥
ताम्रं दारु शिलाश्चैव लोहं षड्विधमुच्यते । मात्रादिका समारभ्या उच्छ्रयं चतुरङ्गुलम् ॥
षडङ्गुलं वा कर्तव्यं मणिजं बिम्बमुच्यते । चतुरष्टाङ्गुलां वापि द्विषट्काङ्गुलमेव च ॥
चतुर्दशाङ्गुलं वापि द्वात्रिंशाङ्गुलमेव वा । चतुरष्टमशीतिर्वा शतमष्टोत्तरं तु वा ॥
एवं सौवर्णकं विद्धि अत ऊर्ध्वं न कारयेत् । कांस्यं ताम्रं शिला दारु प्रतिमां कारयेत्सुधीः ॥
एकहस्तादिनारभ्य यावत्काम्यं च कारयेत् । केचित् षडङ्गुलं विप्र लोहदारुमयानि च ॥
तदूर्ध्वमितिकर्तव्यमिति गार्ग्येण भाषितम् । मात्रप्रमाणमारभ्य द्विगुणं त्रिगुणं तु वा ॥
मुने पञ्चदश प्रोक्ता कनिष्ठानामनुक्रमात् । प्रासादद्वादशाद्बिम्बं प्रवक्ष्यामि समासतः ॥
गर्भमानप्रमाणेन प्रतिमा चोत्तमा भवेत् । नवभागविहीनं तु मध्यमं बिम्बमुच्यते ॥
पञ्चभागैकहीनं तु अधमं परिचक्षते । गर्भविस्तारमानं तु सप्तभागं विभाजयेत् ॥
पञ्चभागं गृहीत्वा तु पञ्चभागत्रिभागकम् । त्रिभागस्य द्विभागं वा उत्तमाधममध्यमम् ॥
उत्तमं द्वारतुल्यं वा पादाधिकमथापि वा । अध्यर्धमपि वा कुर्यादुत्तमाधममध्यमम् ॥
शुद्धद्वारसमं वापि पादाधिक्यं द्विजोत्तम । द्वारं तदर्धमित्युक्तमुत्तमाधममध्यमम् ॥
शुद्धद्वारं द्विजश्रेष्ठ षोडशेनैव भाजयेत् । एकद्वित्रिविहीने तु श्रेष्ठं मध्ये कनिष्ठकम् ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

स्तम्भमानप्रमाणेन अथवा कारयेद् द्विज । स्तम्भं तदर्धमानं वा प्रतिमां कारयेत् सुधीः ॥
द्वारमानसमं वापि नवभागैकहीनकम् । पञ्चभागैकहीनं वा स्थानकोच्छ्रयमुच्यते ॥
द्वारं तदर्धमित्युक्तमासनस्य विशेषतः । पादाधिक्यं द्विजश्रेष्ठ शयनं च निबोधत ॥
द्वारस्य द्विगुणं वापि अध्यर्धं कारयेद् बुधः । न्यूनाधिक्यं न कर्तव्यं शयनस्य विशेषतः ॥
आसनस्थानयानानि यथाकारं प्रकल्पयेत् । मूलबेरानुरूपेण कर्मार्चां कारयेत् सुधीः ॥
द्वादशाष्टाङ्गुलं वापि कर्मार्चां लक्षणान्विताम् । बलिबेरं तु कर्तव्यं यात्राबेरं तथैव च ॥
अष्टाङ्गुलप्रमाणेन कृत्रिमालयकौतुकम् । चतुस्तालं त्रितालं वा कारयेद्यागकौतुकम् ॥
स्नानबिम्बं द्वितालेन कल्पयेत्तन्त्रवित्तमः । शङ्खचक्रगदापद्मैः चतुर्भिः कृतलक्षणैः ॥
पीठिकोपरि विन्यस्य यथालक्षणसंयुतम् । सर्वासामेव मूर्तीनां कर्मार्चाथ चतुर्भुजम् ॥
प्रसन्नं संस्थितं बिम्बं सा पूजार्हं समुच्यते । शयनासनयानेषु कर्मार्चा स्थानकं भवेत् ॥

Kapiñjala XI : 38-62

Comparative measurements of main and functional icons

As already pointed out in Chapter One (*see* §7–§23), most temples have, in addition to the main, immovable icon, several other images of it for use in certain practical routines. These functional figures (*karmabimba*) are of different types, depending on the particular use to which they are put—bathing, processions, *etc.* In the following eight passages, §180–§187, we learn that in all cases these are to be smaller than the *mūlabera* in the main shrine, and a number of options for selecting the proportionate measurements of these functional images to the central icon are given. The first selection, §180, is a miscellany of considerations for icon measurements, but after that we find, in the following passages, a straightforward presentation.

§ 180

बिम्बमानमथो वक्ष्ये शृणु गुह्यं महामुने । आसनं शयनं वापि यानारूढं स्थितं तु वा ॥
वासुदेवादिकं वापि केशवादीनथापि वा । मत्स्यादीन्वा विशेषेण यजमानो गुरुस्तथा ॥
यजमानोदयाद्वापि गर्भद्वारवशात्तु वा । पादाधिष्ठानमानं वा हस्तमानमथापि वा ॥
तालमानमथो वापि यद्वाङ्गुलवशात्तु वा । अङ्गुलं त्रितयं प्रोक्तं मात्रं मध्यं च मुष्टिकम् ॥
मानप्रमाणमुन्मानपरिमाणोपमानकम् । लम्बमानं षडेतानि मानानि कथयाम्यहम् ॥
उत्तुङ्गं मानमित्युक्तमुन्मानं विस्तृतं भवेत् । नाभिर्मानं प्रमाणं स्यादन्तरं चोपमानकम् ॥
सूत्रं च लम्बमानं स्यादेतैर्मानैः समायुतम् । षण्मानं च तथैवोक्तमन्यथा दोषकृद्भवेत् ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

चित्रं वाप्यर्धचित्रं वा चित्राभासमथापि वा । चित्रं सर्वाङ्गदृष्टं स्यादर्धचित्रं तु सार्धकम् ॥
आभासं पटभित्तिस्थं त्रिविधं परिकीर्तितम् । . . . .

Aniruddha XII : 1–9*a*

§ 181

. . . ध्रुवबेरसमुच्छ्राये विभक्ते दशधा रमे ॥
भागद्वयेन कर्मार्चामौत्सवं तु वरानने । बिम्बमेकादशांशेन दशांशैश्शयनं भवेत् ॥
बलिबिम्बं नवांशेन तैर्थबिम्बमथाष्टकः(म्) । षडंशैस्स्नपनं बेरमित्थमुच्छ्रायकल्पनम् ॥
मूलबेराङ्गुलं यद्वा गृहीत्वा प्रथमं रमे । कर्मबेरो यथोच्छ्रायं षड्विंशाङ्गुलिभिर्भवेत् ॥
चतुर्विंशाङ्गुलं यद्वा भवेदष्टादशाङ्गुलम् । षोडशाङ्गुलमानं वा द्वादशाष्टाङ्गुलं तु वा ॥
षडङ्गुलं वा कल्याणि चतुरङ्गुलमेव वा । पूर्वोक्ताङ्गुलमानेषु कर्तव्यं बिम्बमुत्तमम् ॥
बहुबेरे विधिरयं कथितः कमलासने । एकबेरेऽप्येष एव विधिः कल्प्यो मनीषिभिः ॥
आसीनं वा शयानं वा यानगं मौलकौतुकम् । तेषां समं वा कुर्वीत तिष्ठेयुर्वा यथारुचि ॥
नित्योत्सवार्थबिम्बस्य सर्वत्रैव स्थितिर्भवेत् । . . . .

Śrīpraśna XIV : 5*b*–13*a*

§ 182

कर्मबेरं विदध्याच्च विधिबेरं तथैव च । तत्प्रमाणं विदध्याच्च यात्रायां द्विजसत्तम ॥
मूलबेरस्यानुगुणं कर्मार्चां विदधीत च । द्वादशाङ्गुलमानं वा न्यूनं वा चतुरङ्गुलैः ॥
कर्मबेरं विदध्याच्च यात्रायां द्विजसत्तम । कृत्रिमालयबिम्बस्स्यादष्टाङ्गुलमितिर्द्विज ॥
यागबेरं चतुर्भागं त्रिभागं वापि कारयेत् । कल्पयेत् स्थानबिम्बं च द्वितालोच्छ्रायसंयुतम् ॥
शङ्खचक्रगदापद्मं चतुर्लक्षणलक्षितम् । यथालक्षणसंयुक्तं पीठिकोपरि विन्यसेत् ॥
मूर्तीनामेव सर्वासां कर्मार्चा स्याच्चतुर्भुजम् । बिम्बं सुशोभनं चैव प्रसन्नं पूज्यमेव च ॥
ध्रुवबेरसमुच्छ्रायं त्रिधा भुक्त्वाऽथवा द्विज । चतुर्धा वा मुनिश्रेष्ठ तेष्वेकोच्छ्रायकं भवेत् ॥
कल्याणकौतुकस्यैवमुत्सवार्चाप्रमाणतः । तृतीयांशेन वा कुर्याच्चतुर्थांशेन वा पुनः ॥
कर्मार्चा बहुबेरस्य क्रमोऽयं परिकीर्तितः । एकबेरे तदर्धा तु तत्तुर्यांशाधिकापि वा ॥
उत्सवार्चा तृतीयांशसमुच्छ्रायं त्रिधा भवेत् । शय्यासनस्थानविधौ ध्रुवार्चा विहिता यथा ॥
तथाविधानि कार्याणि कर्मार्चाप्रभृतीन्यपि । शयाने ध्रुवबेरे तु स्थितं वासीनमेव वा ॥
कर्मादिकौतुकं कुर्यान्नित्यकल्याणकौतुकम् । सर्वत्रैव स्थितं कुर्यात् पीठकल्पिं मुने शृणु ॥

Viśvāmitra XXII : 36–47

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 183

मूलबिम्बतृतीयांशसममुत्सवकौतुकम् । स्नपनप्रतिमा चापि तदुत्सेधा प्रकीर्तिता ॥
बलिबिम्बप्रतिकृतिः शयनोत्थानकौतुकम् । कर्मबिम्बश्च निर्मेयं मूलतालप्रमाणतः ॥
ब्राह्मे भागे ध्रुवे न्यस्ते नैवाङ्गपरिकल्पना । लौकिकेनैव बिम्बेन कुर्यान्नैमित्तिकं बुधः ॥
ध्रुवबेरार्धमानेन कौतुकं लोहनिर्मितम् । लौकिकं तेन कुर्वीत सर्वां देवक्रियां सुधीः ॥
चक्रेण बलिदानं स्यात् तथा तीर्थावगाहनम् । कूर्चेन शयनं कार्यं ब्राह्ममूलार्चनाविधौ ॥
देवे वा मानुषे स्थाप्ये ब्राह्मे कर्माणि विन्यसेत् । नित्यं नैमित्तिकं काम्यं सर्वं तैरेव पूर्यते ॥
स्थानयानासनविधौ ध्रुवबिम्बं यथाक्रमम् । कर्मार्चादीनि तद्वत् स्यात् ध्रुवे तु शयिते पुनः ॥
तिष्ठेद्वासीत वा कामं कर्माद्यर्चा यथामति । नित्योत्सवप्रतिकृतिः सर्वत्रैव स्थिता भवेत् ॥
कर्मादिबिम्बषट्कश्च श्रीभूमिसहितं भवेत् । यद्वा श्रीभूमिसहितमेकं वा मुखकौतुकम् ॥

Bhārgava Tantra IV : 102–110

§ 184

कर्मार्चादिप्रकृतिप्रकारः कथ्यतेऽधुना । कर्मार्चा चोत्सवार्चा च बल्यर्चा च तथैव च ॥
स्नानतीर्थोभयार्चा च स्वापोत्थानार्चया सह। प्रतिमाः षड् विधातव्याः पूजायामुत्तमा भवेत् ॥
तिसृभिर्मध्यमा ज्ञेया आद्या या चरमा भवेत् । बहुबेरे विधिरयं कथितः कमलासन ॥
एकबेरे तु कर्मार्चा स्नपनार्चा च नेष्यते । ध्रुवबेरसमुच्छ्राये विभक्ते दशधा सति ॥
एकांशेन प्रतिकृतेः कर्मार्चायाः समुच्छ्रयः । द्वादशांशेन यद्वा स्यात् षोडशांशेन वा भवेत् ॥
यद्वाऽष्टादशभागेन चतुर्विंशांशमेव वा । महाबेराङ्गुलापेक्षा यद्वा तस्याः समुन्नतिः ॥
चतुर्विंशाङ्गुला यद्वा भवेदष्टादशाङ्गुला । षोडशाङ्गुलमाना वा यद्वा स्याद् द्वादशाङ्गुला ॥
अष्टाङ्गुलाऽथवा यद्वा षडङ्गुलसमुच्छ्रया । चतुरङ्गुलमाना वा यद्वा मानाङ्गुलेन तु ॥
पूर्वोक्ताङ्गुलमानानि कर्तव्यानि यथारुचि । बलितीर्थप्रतिकृतिः शयनोत्थानकौतुकम् ॥
कर्मार्चासंमितोत्सेधः कथितः कमलासन । कर्मबिम्बसमुत्सेधस्त्रिगुणः परिशिष्टयोः ॥
स्नपनोत्सवकार्यार्थं बिम्बयोरुभयोरपि । भङ्क्त्वा त्रिधा चतुर्धा वा ध्रुवबेरसमुच्छ्रयम् ॥
एकभागे नलोत्सेधं कुर्यादुत्सवकौतुके । उत्सवार्चातृतीयांशं तुर्यांशं वाम्बुजासन ॥
कर्मकौतुकमानं स्याद् बह्वर्चादिरयं क्रमः । एकबेरे तदर्धा तु तत्तुर्यांशकमेव वा ॥
उत्सवार्चा तृतीयांशमुत्सेधोऽथवा भवेत् । स्थानयानासनविधी ध्रुवबिम्बं यथाकृतम् ॥
कर्मार्चादीनि तद्वत्स्यात् ध्रुवे तु शयिते पुनः । तिष्ठेद्वासीत वा कामं कर्माद्यर्चा चतुर्मुख ॥
नित्योत्सवप्रतिकृतिः सर्वत्रैव स्थिता भवेत् । . . . .

Pādma "kr." XIX : 1–16a

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 185

. . . इत ऊर्ध्वं प्रवक्ष्यामि कर्मार्चायास्तु लक्षणम् ॥
मूलबेरस्य दीर्घस्य त्रिभागैकं तु कौतुकम् । वेदभागैकभागं वा भूतभागैकभागिकम् ॥
श्रेष्ठं मध्यमहीनं तु त्रिविधं कौतुकं भवेत् । मूलबेरायतार्धेषु भूतभागैकभागिकम् ॥
उत्सवप्रतिमायामं स्नपनस्य तथा भवेत् । तद्गुणांश्चैकभागं तु बलिबेरोच्छ्रयं भवेत् ॥
कर्मार्चायाः प्रमाणं वा कुर्याद्वा लक्षणं भवेत् । अथ वा कुरु कर्मार्चां मूलबेरस्य सांप्रतम् ॥
उक्तैर्लोहैः कृता पुण्या नोक्तैर्लोहैः कृता शुभा । त्रिगुणाष्टाङ्गुलोत्सेधं अथवाऽष्टादशाङ्गुलम् ॥
षोडशाङ्गुलकं वापि द्वादशाङ्गुलमेव वा । अथ वाष्टाङ्गुलोत्सेधं बलिबिम्बमथोच्यते ॥
पादाधिकदशैकं तु अङ्गुष्ठाङ्गुलिना मुने । बलिं बिम्बोच्छ्रयं कृत्वा चोत्तमं परिकीर्तितम् ॥
एकादशाङ्गुलोत्सेधं बलिं मध्यमकौतुकम् । अष्टाङ्गुलं वा कुर्वीत बलिबिम्बाधमं स्मृतम् ॥
तीर्थबिम्बं तथैव स्यादिति शास्त्रस्य निश्चयम् । हीनमानं तु कर्तव्यं मूलबिम्बात्कदाचन ॥
षडङ्गुलायता चैव नैव कार्या विजानता । मूलबेरं त्रिभागैकमुत्सवप्रतिमा मता ॥
उत्सवप्रतिमायामं स्नपनार्चात्तु कारयेत् । इति कर्मार्चनादीनां विविधं मानमीरितम् ॥
विध्याचारविधानेन यथायोगं समाचरेत् । . . . .

Viṣvaksena X : 42b–54a

§ 186

इत्यमीषां प्रमाणानि शृणु नारद सांप्रतम् । षण्णवत्यङ्गुलायाममुक्तमस्योच्छ्रयं भवेत् ॥
इतः पक्षाङ्गुलैर्हीनं मध्यमस्योच्छ्रयं भवेत् । एकपञ्चाशदित्युक्तमधमस्योच्छ्रयं भवेत् ॥
इत्युक्तमादिबेराणामुत्सेधं त्रिविधं त्विति । एकबेरप्रतिष्ठायां अधमं बेरमुच्यते ॥
कर्मार्चा नोत्तमं मानमुक्तं तन्मात्रतो भवेत् । इति शैलमयी यत्र स्थाप्यते प्रतिमा मुने ॥
एकबेरविधानेन तत्रायं विधिरुच्यते । इत्येकं बहुबेराणामुक्तमुत्सेधलक्षणम् ॥
उत्सेधस्यानुरूपेण कार्यं विस्तारकं मुने । बहुबेरप्रतिष्ठायां देवीनां लक्षणं शृणु ॥
देवस्य बाहुमूलान्तं देवीनामिति चोच्छ्रयम् । स्तनान्तं वा मुनिश्रेष्ठ चोच्छ्रयं परिपठ्यते ॥
देवीनां दक्षिणे हस्ते पद्मं मुकुलकं न्यसेत् । पद्मं तु वामहस्ते स्यान्महद्भयमवाप्नुयात् ॥
राजा कलहमाप्नोति तस्माद्यत्नेन वर्जयेत् । इत ऊर्ध्वं प्रवक्ष्यामि कर्मार्चादिरथोच्छ्रयम् ॥
चतुर्विंशतिमानन्तु उत्तमं नारदावधि । द्वादशाङ्गुलमायामं मध्यमं बेरमेव वै ॥
अष्टाङ्गुलायतं यत्तदधमं परिकीर्तितम् । नित्योत्सवस्य बिम्बस्य द्वादशाङ्गुलमायतम् ॥
अष्टाङ्गुलमथा वापि चतुरङ्गुलमेव वा । एवं ज्ञात्वा मुनिश्रेष्ठ कारयेद्बलिकौतुकम् ॥
महोत्सवस्य द्वाविंशच्चैकं वा दीर्घमुच्यते । अध्यर्धाङ्गुलहीनं वा अङ्गुलद्वयहीनकम् ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

त्रयाङ्गुलविहीनं वा चोत्सवस्य महामुने । तीर्थार्थं स्नपनस्यार्थमुत्सवार्थं तथैव च ॥
मूर्त्यभावे मुनिश्रेष्ठ बिम्बमेकेन चाप्यलम् । अस्य बिम्बस्य वक्ष्यामि लक्षणं शृणु नारद ॥
विंशत्यङ्गुलमानं यदुत्तमं बेरमुच्यते । द्वादशाङ्गुलमानं यन्मध्यमं बेरमुच्यते ॥
अष्टसप्ताङ्गुलिर्वापि चतुरङ्गुलिरेव वा । कारयेल्लक्षणोपेतमधमं परिचक्षते ॥
मूलबेरादिबिम्बानामित्युक्तं लक्षणं मुने । इत ऊर्ध्वं प्रवक्ष्यामि शृणु नारद सांप्रतम् ॥
Viṣvaksena X : 82–99

§ 187

कर्मार्चादिषु बेरेषु तत्सर्वं कारयेत्तथा । न विधिः शयितस्यैष स्थापनादि प्रकीर्तितम् ॥
शयितस्य तु कर्मार्चा स्थानकं त्वासनं तु वा । संस्थाप्य वासुदेवाख्यं न सङ्कर्षणमिष्यते ॥
तथा सङ्कर्षणं प्राप्य प्रद्युम्नं नार्चयेद्बुधः । प्रद्युम्नस्थापनार्चायां कर्मार्चा नानिरुद्धिका ॥
कर्मार्चा सर्वथा कार्या मूलबिम्बानुसारिणी । विशेषमन्त्रसंप्रोक्तं शेषं पूर्ववदाचरेत् ॥
एवं संक्षेपतः प्रोक्तं जङ्गमस्थापने मुने । धन्यं यशस्यमायुष्यं सर्वकामप्रदं सदा ॥
Viṣvaksena XVII : 9–13

Detailed measurements for specific parts of icons

In the following nine excerpts detailed measurements are given for use in planning out how to fashion an icon. Here is the very heart of iconometry. The illustration accompanying this chapter is, in fact, drawn from data found in §194.

In the first selection, §188, we find detailed but brief measurements to be used in making icons—with specifics given for the head, eyes, nostrils, chin, thighs, *etc.* In §189, some over-all measurements from top to toe are given, with a "good" and a "best" option offered for dividing this length into smaller units. Girth-measurements are also given, as are specifics for limbs such as hands, the thumbs, the finger-nails, and even the palm-lines. §190 speaks of three types of measurements—'*māna*' referring to height, '*pramāṇa*', referring to thickness, and '*unmāna*', referring to width. Specifics are given for the head, hair, ears, eyes, hands, feet, nails and palm-lines. Introduced here are instructions for showing icons with (and without) *bhaṅga*-bends in their stance—the term '*abhaṅga*' meaning a figure that stands straight, the top-knot, nose, chin, navel and mid-points between the knees and ankles all along one plumb-line; the term '*samabhaṅga*' referring to figures that "bend" at the hips, neck, *etc.*; and the term '*atibhaṅga*' used for icons (such as Rāma, Viṣṇu recumbent and Kṛṣṇa crawling or lying) that have a number of "curves" shown in their bodies—the main object being to suggest where these *bhaṅga*-bends come in relation to the proportions given for the entire body.

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

In the fourth selection, §191, with increasing detail, specific measurements are given for icons—even for the teeth and the hairs on the body! This text, one that is found repeated *verbatim* in three very popular *saṃhitās*, closes with the counsel that, above all, an icon is to be made beautiful and attractive to devotees.

In §192 we have measurements given for icons made of different materials, and in §193 we have yet another passage giving specific measurements for various parts of an icon.

In both §194 and §195 we have specifics given for iconometry of female forms—even to such details as the diameter of the nipples, how far apart they are from center to center, the depth of the cleavage, *etc.*

The final excerpt in this chapter, §196, has to do with the measurements applicable to the wings of winged creatures—presumably Garuḍa, *gandharvas*, *kinnaras*, *etc.*

§ 188

प्रतिमामानमधुना शृणु काश्यप सुव्रत । एकाङ्गुलं स्यादुष्णीषं केशान्तस्याथ त्र्यङ्गुलम् ॥
ततः प्रभृति षट्त्रिंशद्यवमानं भवेद् द्विज । दृक्सूत्रं तन्तु तद्वत् स्यान्नासापुटयुगान्तिमम् ॥
चुबुकान्तं च तद्वत्स्यात्केशान्तादि द्विजोत्तम । चुबुकान्तं वक्त्रमानमष्टोत्तरशतं यवम् ॥
आद्याङ्गुलं स्यात् त्रिस्थानमूरुमानं द्विजोत्तम । षड्विंशत्यङ्गुलोच्छ्रायस्तद्वज्जङ्घोच्छ्रयं भवेत् ॥
अवशिष्टांशमानं स्यादुक्त(मान?)मथो शृणु । दशतालेऽधमे वक्त्रं मतं शतयवं द्विज ॥
तद्वदेव भवेत् स्थानं त्रयमूनशतद्वयम् । यवानां कथितं जङ्घा तावदुच्छ्रायसंयुता ॥
.....कथितं द्विजपुङ्गव । असुवाहत्वात्सूक्ष्मन्ते मया चाभिहितं द्विज ॥

Viśvāmitra XXII : 61–67

§ 189

उत्सेधमानं मूर्धादिपादान्तमनुपूर्वशः । लब्धानां देहतस्तावदङ्गुलीनां शतेन च ॥
चतुर्विंशतिमानेन प्रतिमां परिकल्पयेत् । उष्णीषमङ्गुलमितं केशान्तं त्र्यङ्गुलं मतम् ॥
दृक्सूत्रान्तं तदारभ्य षट्त्रिंशद्यवसम्मितम् । तद्वन्नासापुटान्तं स्यात्तद्वच्च चुबुकावधि ॥
तेन केशान्तमारभ्य मुखमानं मुनीश्वर । अष्टोत्तरं यवशतं चिबुकावयवावधि ॥
गलमर्धाङ्गुलं सार्धं त्र्यङ्गुलं कण्ठमिष्यते । हिक्कासूत्रं समारभ्य हृदयान्तं मुखेरितम् ॥
ततः प्रभृति नाभ्यन्तं सार्धं सत्रिदशाङ्गुलम् । ततः प्रभृति मेढ्रान्तं तद्वदुत्सेधमिष्यते ॥
तन्मूलज्ञानपर्यन्तं त्रिन्यूनं त्रिदशाङ्गुलम् । चतुरङ्गुलमुत्सेधं जानुमण्डलमिष्यते ॥
जानोरधस्तादक्षान्तमूरुमानमुदीरितम् । ततस्तालान्तमुत्सेधं चतुरङ्गुलसम्मितम् ॥
देहलब्धानि यावन्ति दशतालेऽभिपूजिते । विभज्य तावदुक्तानि मध्यमे प्रतिमाविधौ ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

त्र्योदशाङ्गुलं वक्त्रं त्रिस्थानं चतुरङ्गुलम् । षड्विंशत्यङ्गुलोत्सेधमूरुमानमुदाहृतम् ॥
. . . तद्वज्जङ्घासमुत्सेधमुत्तरेणेतरत्समम् ॥
अधमे दशताले तु मुखं शतयवं मतम् । त्रिस्थानं तावदेवास्यादूरुर्यवशतद्वयम् ॥
जङ्घा च तत्समोत्सेधा मुख्येनान्यसमं स्मृतम् । विंशद्यवशतं पादं द्राघिमा कमलापतेः ॥
अङ्गुष्ठं वेदमानं स्यात्तथायामा च तर्जनी । एकत्रिंशद्यवायामा मध्यमाङ्गुलिरिष्यते ॥
त्रिंशद्यवानामिका स्यात्कनिष्ठा त्र्यङ्गुलापि च । यवैश्च पञ्चभिर्युक्ता पार्ष्णी च चतुरङ्गुला ॥
हिक्कान्तयोरधो बाहुरङ्गुलीस्सप्तविंशतिः । ततश्च मणिबन्धान्तं षड्विंशत्यङ्गुलायतम् ॥
यवद्वयेन च युतं मणिबन्धात्तलं पुनः । मध्यमाङ्गुलिपर्यन्तं अङ्गुलं सप्त कथ्यते ॥
पञ्चाङ्गुलमथाङ्गुष्ठं तर्जनी तद्वदायता । षड्यवैश्चाधिकायामा मध्यमा तु षडङ्गुला ॥
अथवा षड्यवाश्चापि तर्जन्यानामिका समा । कनिष्ठाङ्गुष्ठतुलिता मांसलग्नं नखं स्मृतम् ॥
एकाङ्गुला नखायामा शिष्टा षड्यवसम्मिता । बाहुवच्चोपबाहुस्स्याच्चतुरङ्गुलमायतम् ॥
चतुर्यवं चोर्ध्वकर्णं नालं पञ्चाङ्गुलायतम् । लिङ्गं पञ्चाङ्गुलायामं मुष्कं तु चतुरङ्गुलम् ॥
सार्धाष्टाङ्गुलविस्तारं ललाटं तदनन्तरम् । द्वादशाङ्गुलविस्तारं बालचन्द्रसमाकृति ॥
ततस्तु कर्णयोर्मध्यं सार्धं सत्रिदशाङ्गुलम् । दशाङ्गुलमधस्तस्य विस्तारं चुबुकस्य तु ॥
सपादं द्व्यङ्गुलं पूर्णं चापतुल्याकृतिर्भवेत् । मूलमध्याग्रविस्तारो ग्रीवायाः क्रमशो भवेत् ॥
नवाङ्गुलं तथैकोनं सार्धं सप्ताङ्गुलं तथा । हिक्कान्तयोरधो बाहुर्मूलयोरन्तरं भवेत् ॥
यवैश्चतुर्भिर्विस्तीर्णं सचत्वारिंशदङ्गुलम् । कक्षयोर्मध्यविस्तारः त्र्यंगुलस्सार्धविंशतिः ॥
अष्टादशाङ्गुलं मानं स्तनयोरपि चान्तरम् । षोडशाङ्गुलविस्तारं तुन्दमध्यमुदाहृतम् ॥
अङ्गुलं चाङ्गुलं सार्धं द्व्यङ्गुलं सचतुर्भुजम् । अङ्गुलेनोन्नतं मूलं तेन सार्धेन मध्यमम् ॥
द्वाभ्यां यवाभ्यां मूलेन द्व्यङ्गुलेनाग्रमुन्नतम् । षड्यवं सुषिरं तस्य पुटमध्यं चतुर्यवम् ॥
पुटपार्श्वस्य विस्तारो द्वियवः परिकीर्तितः । उत्सेधोऽर्धाङ्गुलस्तस्य नासिका तिलपुष्पवत् ॥
उत्तरोष्ठायतं सार्धं चतुरङ्गुलमिष्यते । विस्तारोऽर्धाङ्गुलस्तस्य परं सार्धाङ्गुलायतम् ॥
विस्तीर्णमङ्गुलं तस्य पाली चैकयवायता । चिबुकोऽष्टादशयवः विस्तारो यवसम्मितः ॥
गुल्फं पादाङ्गुलोत्सेधं दर्पणोदरसन्निभम् । विस्तीर्णावयवौ तुल्यौ राजदन्तौ चतुर्यवौ ॥
द्वात्रिंशद्दशनाः कल्प्या यथाशास्त्रं विचक्षणैः । जिह्वा षडङ्गुलायामा विस्तीर्णा त्र्यङ्गुलैर्भवेत् ॥
रेखात्रयाङ्कितग्रीवा हिक्कासूत्रात् स्तनस्थितिः । एकादशाङ्गुलं वृत्तं द्व्यङ्गुलं स्तनमण्डलम् ॥
चतुर्यवं चूचुकं स्यात् स्तनमण्डलमध्यगम् । चतुर्यवं नाभिगर्तं दक्षिणावर्तमिष्यते ॥
अत्यर्धमङ्गुलं वृत्तमक्षमर्धाङ्गुलोन्नतम् । उष्णीषात् पृष्ठके शान्तमेकाधिकदशाङ्गुलम् ॥
उष्णीषात् पार्श्वके शान्तं द्वादशाङ्गुलमानकम् । कर्णयोरन्तरं विद्यात् सार्धं सत्रिदशाङ्गुलम् ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

मूलमध्याग्रभागेषु पृष्ठग्रीवा यथाक्रमम् । विस्तीर्णा नवभिस्सार्धैरङ्गुलैर्नवभिस्तथा ॥
मध्ये करतले रेखा मध्यमा मूलमास्थिता । कनिष्ठामूलमारभ्य रेखा मध्यमगा भवेत् ॥
मध्यमाङ्गुलितर्जन्यो निर्मातव्या विचक्षणैः । अङ्गुष्ठमूलमारभ्य तर्जन्यन्तश्च मध्यमा ॥
तयोश्च रेखयोर्मध्ये तर्जनीमूलगामिनी । रेखा कल्प्या यथाशास्त्रं शात्राभिज्ञेन शिल्पिना ॥
ललाटस्य च विस्तारस्सपादत्र्यङ्गुलो भवेत् । तस्याधस्ताद् भ्रुवौ कल्प्यौ चत्वारिंशद्यवायतौ ॥
मध्ये यवेन विस्तीर्णे यूकाग्रे चापसन्निभे । तयोर्मध्येऽनवयवं अष्टादशयवायतम् ॥
चक्षुः कनीनिकायामो विस्तारश्च यवः स्मृतः । अङ्गुलं श्वेतबिम्बस्य विस्तारं कृष्णमण्डलम् ॥
यवोनमङ्गुलं ज्योतिस्तन्मध्ये यवसम्मितम् । यूकमानन्तु तन्मध्ये दृष्टिः पक्ष्मावली पुनः ॥
अशीतिः पक्ष्मरोमाणि वक्राग्राण्यसितानि च । द्व्यङ्गुलं चक्षुषोर्मध्यं मध्यश्च श्रुत्यपाङ्गयोः ॥
चत्वारिंशद्यवं कर्णविस्तारो द्व्यङ्गुलो भवेत् । ऊर्ध्वकर्णस्य चायामस्सहार्धश्चतुरङ्गुलः ॥
नालं पञ्चाङ्गुलमितं विस्तारः षड्यवं पुनः । पश्चाच्चतुर्यवा नाली नालतुल्यं प्रकल्पयेत् ॥
श्रवणस्य च पिप्पल्या मध्यगर्तं चतुर्यवम् । त्रिवक्त्रकर्णपिप्पल्या गल्लपात्रमिव स्थितम् ॥
बन्धनं त्र्यङ्गुलं रन्ध्रं नेत्रसूत्रसमुन्नतम् । नासिकामूलमध्याग्रविस्तारः कथ्यते क्रमात् ॥
अष्टादशाङ्गुलाश्राणि अधरोदरमिष्यते । कटिप्रदेशविस्तारस्त्र्यङ्गुलस्सार्धविंशतिः ॥
ऊरुमूलस्य विस्तारस्सार्धं सत्रिदशाङ्गुलम् । अग्रमेकाङ्गुलं सार्धद्व्यङ्गुलं मध्यमिष्यते ॥
द्व्यङ्गुलो मूलविस्तारो लिङ्गस्य समुदाहृतम् । विस्तीर्णं त्र्यङ्गुलं मूलं मध्यमर्धाधिकं पुनः ॥
विस्तीर्णमग्रं मुष्कस्य द्वात्रिंशद्यवसम्मितम् । विस्तीर्णमेकादशभिरङ्गुलैरूरुमध्यमम् ॥
अग्रं दशभिरेव स्याद्विस्तीर्णं कलशोद्भव । नवाङ्गुलं जानुचक्रं सार्धमर्धेन्दुसन्निभम् ॥
मूलं नवाष्टौ मध्ये स्याज्जङ्घाग्रं सार्धसप्तकम् । विस्तीर्णो नलकाभागस्सार्धैश्च चतुरङ्गुलैः ॥
अङ्घ्रिमूलस्य विस्तारः त्र्यङ्गुलस्सचतुर्यवः । सार्धपञ्चाङ्गुलं मध्यं अग्रं सार्धषडङ्गुलम् ॥
सार्धमष्टाङ्गुलं मूलं बाहू सप्ताङ्गुलैः पुनः । मध्येऽग्रे तुल्यविस्तारे प्रकोष्ठावयवं पुनः ॥
सार्धेन सप्तभिर्मूले विस्तीर्णं सार्धपञ्चभिः । मध्ये चतुर्भिरग्रे स्यान्मणिबन्धस्य तूच्यते ॥
पञ्चाङ्गुलार्धसहितस्तद्वत्करतलं स्मृतम् । अङ्गुष्ठे मूलविस्तारो द्व्यङ्गुलो मध्यमाङ्गुलम् ॥
सषड्यवं तु मुष्ट्यग्रमङ्गुलेनैव सम्मतम् । तर्जन्या मूलविस्तारो नवभिस्सम्मितो यवैः ॥
मध्यमेकाङ्गुलं सप्तयवमग्रमुदाहृतम् । मूलं दशयवं मध्यं मध्यमायाथवा नव ॥
अग्रमेकाङ्गुलं प्रोक्तमितरा तर्जनी समा । मूलमष्टौ कनिष्ठाया यवास्सप्तैव मध्यमे ॥
अष्टभिश्च भवेत्तस्या अधस्तात्ककुदस्थितिः । आयामोत्सेधविस्तारैः ककुदं तच्चतुर्यवम् ॥
षट्त्रिंशदङ्गुलं बाह्वोर्मध्यं विस्तारपृष्ठतः । षड्विंशतिश्चाङ्गुलानां कक्षयोरन्तरं भवेत् ॥
पृष्ठमध्यस्य विस्तारो ब्रह्मन् सप्तदशाङ्गुलः । विस्तीर्णः पञ्चविंशत्या श्रोणीपार्श्वैस्तथाङ्गुलैः ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

कटिप्रदेशविस्तारः षड्विंशत्यङ्गुलो भवेत् । षट्त्रिंशदङ्गुलं मध्ये ककुदस्य कटेस्तथा ॥
द्व्यङ्गुलोन्नतिरेतस्य स्फीतौ तन्मध्यमाङ्गुलम् । अष्टाङ्गुलं स्तने मूलं मध्यं सप्ताङ्गुलं भवेत् ॥
अग्र्यं त्र्यङ्गुलविस्तारमूर्वोर्मूलादिषु त्रिषु । भवेत्क्रमेण विस्तारस्सार्धस्सत्रिदशाङ्गुलः ॥
द्वादशाङ्गुलयुक्तः स्यात्तथैव द्वादशाङ्गुलः । जान्वष्टाङ्गुलविस्तारं सार्धमष्टाङ्गुलो भवेत् ॥
जङ्घामध्यस्य विस्तारो नलका चतुरङ्गुलम् । चतुर्यवाधिका चैव गुल्फश्च चतुरङ्गुलः ॥
विस्तारयामं त्रिगुणं सर्वेषां नहनं मतम् । अभीतिदेवा वरदो मुख्यो वामेतरः करः ॥
स्तनसूत्रसमं कार्यमङ्गुलाग्रं करस्य तु । तयोर्भवेदन्तरालं द्वादशाङ्गुलमानकम् ॥
अङ्गुष्ठतर्जनीमध्ये सनालं कमलं भवेत् । वरदे कमलाकारं लिखेत्करतलोदरे ॥
अधोमुखे वामहस्ते मुख्ये कुर्याद् गदां शुभाम् । जघन्ययोस्सुकरयोः शङ्खं चक्रं निवेशयेत् ॥

Bhārgava Tantra IV : 9–84 [*sic.*]

§ 190

अतः परं प्रवक्ष्यामि प्रतिमामानमुत्तमम् । मानं प्रमाणमुन्मानमिति मानं त्रिधा भवेत् ॥
मानमुत्सेधमानं स्यादुन्मानं नहनं मतम् । मानं च तिर्यगूर्ध्वं यत्तत्प्रमाणमिहोच्यते ॥
तत्र प्रतिकृतेस्तावत्तदङ्गानां च कथ्यते । उत्सेधमानं मूर्धादिपादान्तमनुपूर्वशः ॥
लब्धानां देहतस्तावदङ्गुलीनां शतेन तु । चतुर्विंशतिमानेन प्रतिमां परिकल्पयेत् ॥
उष्णीषमङ्गुलमितं केशान्तं त्र्यङ्गुलं मतम् । दृक्सूत्रान्तं तदारभ्य षट्त्रिंशद्यवसंमितम् ॥
तद्वन्नासापुटान्तं स्यात्तद्वच्च चिबुकावधि । तेन केशान्तमारभ्य मुखमानं चतुर्मुख ॥
अष्टोत्तरं यवशतं चिबुकावयवावधि । गलमर्धाङ्गुलं सार्धं त्र्यङ्गुलं कण्ठमिष्यते ॥
हिक्कासूत्रं समारभ्य हृदयान्तं मुखे स्थितम । ततः प्रभृति नाभ्यन्तं सार्धं सत्रिदशाङ्गुलम् ॥
ततः प्रभृति मेढ्रान्तं तद्वदुत्सेधमिष्यते । तन्मूलाज्जानुपर्यन्तं त्रिन्यूनं त्रिदशाङ्गुलम् ॥
चतुरङ्गुलमुत्सेधं जानुमण्डलमिष्यते । अक्षान्तं जानुनोऽधस्तादूरुतुल्यमितीरितम् ॥
ततस्तालान्तमुत्सेधं चतुरङ्गुलसंमितम् । देहाङ्गुलानि यावन्ति दश तालेऽभिपूजिते ॥
विभज्य तावन्त्युक्तानि मध्यमे श्रूयतां क्रमः । त्रयोदशाङ्गुलं वक्त्रं त्रिस्थानं च तदङ्गुलम् ॥
षड्विंशत्यङ्गुलोत्सेधमूरुमानमुदाहृतम् । तद्वज्जङ्घासमुत्सेधमुत्तरेणेतरत्समम् ॥
अधमे दशताले तु मुखं शतयवं मतम् । त्रिस्थानं तावदेव स्यादूरुर्यवशतद्वयम् ॥
जङ्घा च तत्समोत्सेधा मुख्येनान्यत्समं मतम् । विंशद्यवशतं पादद्राघिमा कमलासन ॥
अङ्गुष्ठं वेदमात्रं स्यात्तदायामा च तर्जनी । एकत्रिंशद्यवायामा मध्यमाङ्गुलिरिष्यते ॥
त्रिंशद्यवानामिका स्यात्कनिष्ठा त्र्यङ्गुलापि च । यवैश्च पञ्चभिर्युक्ता पार्ष्णी च चतुरङ्गुला ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

हिक्कातन्तयोरधो बाहुरङ्गुली सप्तविंशतिः । ततश्च मणिबन्धान्तं षड्विंशत्यङ्गुलायतम् ॥
यवद्वयेन च युतं मणिबन्धात्तलं पुनः । मध्यमाङ्गुलिमूलान्तं पञ्चाशद्यवसंमितम् ॥
पञ्चाङ्गुलमथाङ्गुष्ठं तर्जनी तद्वदायता । षड्यवैश्चाधिकायामा मध्यमा तु षडङ्गुला ॥
आयता षडयवैश्चापि तत्समानामिका मता । कनिष्ठाङ्गुष्ठतुलिता मांसलग्ननखावधि ॥
एकाङ्गुला नखायामा शिष्टा षडयवसंमिता । बाहुवच्चोपबाहुः स्याच्चतुरङ्गुलमायतः ॥
चतुर्यवं चोर्ध्वकर्णं नालं पञ्चाङ्गुलायतम् । लिङ्गं पञ्चाङ्गुलायामं मुष्कं तु चतुरङ्गुलम् ॥
सार्धाष्टाङ्गुलिविस्तारं ललाटं तदनन्तरम् । द्वादशाङ्गुलविस्तारं बालचन्द्रसमाकृति ॥
ततस्तु कर्णयोर्मध्यं सार्धं सत्रिदशाङ्गुलम् । दशाङ्गुलमधस्तस्य विस्तारं चिबुकस्य तु ॥
सपादं द्वयङ्गुलं पूर्णं चापतुल्याकृतिर्भवेत् । मूलमध्याग्रविस्तारः ग्रीवायाः क्रमशो भवेत् ॥
नवाङ्गुलं तथैकोनं सार्धं सप्ताङ्गुलिस्तथा । हिक्कान्तयोरधो बाहुमूलयोरन्तरं भवेत् ॥
यवैश्चतुर्भिर्विस्तीर्णं सचत्वारिंशदङ्गुलम् । कक्षयोर्मध्यविस्तारः त्र्यङ्गुलः सार्धविंशतिः ॥
अष्टादशाङ्गुलं मानं स्तनयोरपि चान्तरम् । षोडशाङ्गुलविस्तारं तुन्दमध्यमुदाहृतम् ॥
अष्टादशाङ्गुला श्रोणीरधरोदरमिष्यते । कटिप्रदेशविस्तारः त्र्यङ्गुलः सार्धविंशतिः ॥
ऊरुमूलस्य विस्तारः सार्धं सत्रिदशाङ्गुलम् । अग्रमेकाङ्गुलं सार्धद्वयङ्गुलं मध्यमिष्यते ॥
द्वयङ्गुलो मूलविस्तारो लिङ्गस्य समुदाहृतः । विस्तीर्णं त्र्यङ्गुलं मूलं मध्यमर्धाधिकं पुनः ॥
विस्तीर्णमेकादशभिरङ्गुलैरूरुमध्यमम् । अग्रं दशभिरेतस्य विस्तीर्णं कमलासन ॥
नवाङ्गुलं जानुचक्रं पार्श्वमर्धेन्दुसन्निभम् । मूलं नवाष्टौ मध्यं स्याज्जङ्घाग्रं सार्धसप्तकम् ॥
. . . विस्तीर्णो नलकाभागः सार्धैश्च चतुरङ्गुलैः ॥
अङ्घ्रिमूलस्य विस्तारः त्र्यङ्गुलः सचतुर्यवः । सार्धपञ्चाङ्गुलं मध्यमग्रं सार्धषडङ्गुलम् ॥
सार्धमष्टाङ्गुलं मूलं बाहू सप्ताङ्गुलौ पुनः । मध्याग्रे तुल्यविस्तारे प्रकोष्ठावयवः पुनः ॥
सार्धेन सप्तभिर्मूले विस्तीर्णं सार्धपञ्चभिः । मध्ये चतुर्भिरग्रे स्यान्मणिबन्धस्य तूच्यते ॥
पञ्चाङ्गुलार्धसहितः तद्वत्करतलं स्मृतम् । अङ्गुष्ठे मूलविस्तारो द्वयङ्गुलो मध्यमाङ्गुलिः ॥
सषडयवं तु मुष्ट्यग्रमङ्गुलेनैव संमितम् । तर्जन्या मूलविस्तारो नवभिः संमितो यवैः ॥
मध्यमेकाङ्गुलं सप्तयवमग्रमुदाहृतम् । मूलं दशयवं मध्यं मध्यमाया यवा नव ॥
अग्रमेकाङ्गुलं प्रोक्तमितरा तर्जनीसमा । मूलमष्टौ कनिष्ठाया यवाः सप्तैकमध्यमा ॥
षडयवाङ्गुलमग्रेभ्यः पादोना नखविस्तृतिः । मध्ये करतले रेखा मध्यमा मूलमुत्थिता ॥
कनिष्ठामूलमारभ्य रेखा मध्यमगा भवेत् । मध्यमाङ्गुलितर्जन्योर्निर्मातव्या विचक्षणैः ॥
अङ्गुष्ठमूलमारभ्य तर्जन्यन्तश्च मध्यमा । तयोश्च रेखयोर्मध्ये तर्जनीमूलगामिनी ॥
रेखा कल्प्या यथाशास्त्रं शास्त्राभिज्ञेन शिल्पिना । ललाटस्य च विस्तारः सपादद्वयङ्गुलो भवेत् ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

तस्याधस्ताद् भ्रुवौ कल्प्यौ चत्वारिंशद्यवायतौ । मध्ये यवेन विस्तीर्णे यूकाग्रे चापसन्निभे ॥
तयोर्मध्यं नवयवं अष्टादशयवायतम् । चक्षुः कनीनिकायामो विस्तारश्च यवः स्मृतः ॥
अङ्गुलं श्वेतबिम्बस्य विस्तारं कृष्णमण्डलम् । यवोनमङ्गुलं ज्योतिस्तन्मध्ये यवसंमितम् ॥
यूकामाना तु तन्मध्ये दृष्टिः पक्ष्मावली पुनः । ऊर्ध्वा समन्विता सार्धत्र्यङ्गुला दशभिर्यवैः ॥
विस्तीर्णा तु यवायामा विस्तारस्तु तदर्धकः । अशीतिः पक्ष्मरोमाणि वक्राग्राण्यसितानि च ॥
द्व्यङ्गुलं चक्षुषोर्मध्यं मध्यं च श्रुत्यपाङ्गयोः । चत्वारिंशद्यवं कर्णविस्तारो द्व्यङ्गुलो भवेत् ॥
ऊर्ध्वं कर्णस्य चायामः सहार्धचतुरङ्गुलः । नालं पञ्चाङ्गुलमितं विस्तारः षडयवः पुनः ॥
पश्चाच्चतुर्यवा नाली नालतुल्यं चतुर्मुख । श्रवणस्य च पिप्पल्या मध्यगतं चतुर्यवम् ॥
त्रिवक्त्रकर्णपिप्पल्या गल्लपात्रमिव स्थितम् । बन्धनं त्र्यङ्गुलं रन्ध्रं नेत्रसूत्रसमुन्नतम् ॥
नासिकामूलमध्याग्रविस्तारः कथ्यते क्रमात् । अङ्गुलं चाङ्गुलं सार्धद्व्यङ्गुलं सचतुर्यवम् ॥
अङ्गुलेनोन्नतं मूलं तेन सार्धेन मध्यमम् । द्वाभ्यां यवाभ्यां मूलेन द्व्यङ्गुलेनाग्रमुन्नतम् ॥
षड्यवं सुषिरं तस्य पुटमध्यं चतुर्यवम् । पुटपार्श्वस्य विस्तारो द्वियवः परिकीर्तितः ॥
उत्सेधोऽर्धाङ्गुलस्तस्य नासिका तिलपुष्पवत् । उत्तरोष्ठायतं सार्धं चतुरङ्गुलमिष्यते ॥
विस्तारोऽर्धाङ्गुलस्तस्य परं सार्धाङ्गुलायतम् । विस्तीर्णमङ्गुलं तस्य पाली चैकयवा मता ॥
चिबुकोष्ठौ दशयवौ विस्तरायामसंमितौ । गुल्फं पादाङ्गुलोत्सेधं दर्पणोदरसन्निभम् ॥
विस्तीर्णावयवौ तुल्यौ राजदन्तौ चतुर्यवौ । द्वात्रिंशद्दशनाः कल्प्या यथाशास्त्रोक्तवर्त्मना ॥
जिह्वा षडङ्गुलायामा विस्तीर्णा त्र्यङ्गुला भवेत् । रेखात्रयाङ्किता ग्रीवा हिक्कासूत्रात् स्तनस्थितिः ॥
एकादशाङ्गुलं वृत्तं द्व्यङ्गुलं स्तनमण्डलम् । चतुर्यवं चूचुकं स्यात् स्तनमण्डलमध्यगम् ॥
चतुर्यवं नाभिगतं दक्षिणावर्तमिष्यते । अध्यर्धमङ्गुलं वृत्तमक्षमर्धाङ्गुलोन्नतम् ॥
उष्णीषात्पृष्ठकेशान्तं एकाधिकदशाङ्गुलम् । उष्णीषात्पार्श्वकेशान्तं द्वादशाङ्गुलमानकम् ॥
कर्णयोरन्तरं विद्यात् सार्धं सत्रिदशाङ्गुलम् । मूलमध्याग्रभागेषु पृष्ठग्रीवा यथाक्रमम् ॥
विस्तीर्णा नवभिः सार्धैरङ्गुलैर्नवभिस्तथा । अष्टाभिश्च भवेत्तस्या अधस्तात्ककुदस्थितिः ॥
आयामोत्सेधविस्तारैः ककुदं तच्चतुर्यवम् । षट्त्रिंशदङ्गुलं बाह्वोः मध्यं विस्तारपृष्ठतः ॥
षड्विंशतिश्चाङ्गुलानां कक्षयोरन्तरं भवेत् । पृष्ठमध्यस्य विस्तरो ब्रह्मन् सप्तदशाङ्गुलः ॥
विस्तीर्णा पञ्चविंशत्या श्रोणीपार्श्वौ तथाङ्गुलैः । कटिप्रदेशविस्तारः षड्विंशत्यङ्गुलो भवेत् ॥
षड्विंशदङ्गुलं मध्ये ककुदस्य कटेस्तथा । द्व्यङ्गुलोन्नतमेतस्य स्फिचौ तन्मध्यमङ्गुलम् ॥
अङ्गुलं स्तनयोर्मूलं मध्यं सप्ताङ्गुलं भवेत् । अग्रं त्र्यङ्गुलविस्तारमूर्वोर्मूलादिषु त्रिषु ॥
भवेत्क्रमेण विस्तारः सार्धः सत्रिदशाङ्गुलः । . . . .
द्वादशाङ्गुलयुक्तः स्यात्तथैव द्वादशाङ्गुलः । जान्वष्टाङ्गुलविस्तारं सार्धमष्टाङ्गुलं भवेत् ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

जङ्घामध्यं सुविस्तीर्णं नालिका चतुरङ्गुला । चतुर्यवाधिका चैव गुल्फश्च चतुरङ्गुलः ॥
विस्तारमानं त्रिगुणं सर्वेषां नहनं मतम् । अभीतिदो वा वरदो मुख्यो वामेतरः करः ॥
स्तनसूत्रसमं कार्यं अङ्गुलाग्रं करस्य तु । तयोर्भवेदन्तरालं द्वादशाङ्गुलमब्जज ॥
अङ्गुष्ठतर्जनीमध्ये सनालं कमलं भवेत् । वरदे कमलाकारं लिखेत्करतलोदरे ॥
अधोमुखे वामहस्ते मुख्ये कुर्याद् गदां शुभाम् । चतुस्तालायतां मूले स्थूलामग्रे कृशामृजुम् ॥
त्र्यङ्गुलं मूलनहनमग्रे नहनमङ्गुलम् । द्व्यङ्गुलं सार्धमितरद् गदामध्यं चतुर्मुख ॥
कटिप्रसव्यं करयोरन्तरं द्व्यङ्गुलं भवेत् । कटिस्पृशं करं कुर्यात् प्रसव्यं गदया विना ॥
उद्धरेद्बाहुसीमान्तमूर्ध्वहस्तौ धृतायुधौ । बाहुप्रकोष्ठयोर्मध्यं मूलमष्टाङ्गुलं भवेत् ॥
मध्यं दशाङ्गुलमितमग्रमानं मुखं स्मृतम् । ऊर्ध्वौ हस्तद्वयाङ्गुष्ठौ सहानामिकया नतम् ॥
तर्जनीमध्यमाभ्यां तु धारयन्तं तथाऽम्बुजम् । चक्रं सुदर्शनं वृत्तं द्वादशाङ्गुलमानकम् ॥
अष्टाङ्गुलमरक्षेत्रं द्व्यङ्गुला चक्रपिण्डिका । तद्वत्स्यान्नेमिवलयं चतुर्ज्वालासमन्वितम् ॥
नाभावुभयतो ज्वाला त्रिशिखावर्तशोभिता । अध्यर्धद्व्यङ्गुलोत्सेधा विस्तीर्णार्धाधिकाङ्गुला ॥
अराणि यवतुल्यानि नेत्रतुल्यानि वा पुनः । अष्टौ द्वादश वा षड् वा षड्ज्वालं शङ्खमिष्यते ॥
विस्तरोऽष्टाङ्गुलस्तस्य द्वादशाङ्गुलमायतम् । प्रदक्षिणावर्तयुतं ज्वालाग्रं शङ्खचक्रयोः ॥
केशान्तेन समं यद्वा नेत्रसूत्रेण तत्समम् । सार्धाङ्गुलान्तरादूर्ध्वं जानुनी द्व्यङ्गुलान्तरे ॥
जङ्घयोर्विंशतियवमन्तरालं प्रशस्यते । अक्षयोस्त्र्यङ्गुलं मध्यं तयोः सप्ताङ्गुलं भवेत् ॥
चरणाङ्गुष्ठयोर्मध्यं नवाङ्गुलमुदाहृतम् । ऋजुस्थितस्य चरणं शय्यायां ऋजु दक्षिणम् ॥
इतरत्कुञ्चितं सप्तविंशत्यङ्गुलमन्तरम् । अङ्गुष्ठयोर्गुल्फमध्यं चतुरङ्गुलमिष्यते ॥
जान्वन्तरालमुदितं सार्धं सत्रिदशाङ्गुलम् । सव्येतरकरं मौलेरग्रान्तं विनिवेशयेत् ॥
प्रसारयेद्वामहस्तं आजानु कमलासन । दक्षिणे कमलं वामे गदां हस्ते प्रकल्पयेत् ॥
भिद्यते प्रतिमा भङ्गैस्त्रिभिरेतैश्चतुर्मुख । अभङ्गसमभङ्गाभ्यामतिभङ्गेन चैव हि ॥
शिरोमध्ये नासिकाग्रे आस्यमध्ये गलस्य च । मध्ये च हृदये नाभौ मध्ये लिङ्गस्य वामतः ॥
भागे षडङ्गुले चोरौ वामे मध्ये च गुल्फयोः । लम्बयेत्सूत्रमाभङ्गं भिन्ना च प्रतिमा मता ॥
यथोक्तप्रतिमामानादूना वा त्रिभिरङ्गुलैः । शिखामणिगतं सूत्रं वामपूरिगमध्यगम् ॥
वामे ललाटे मकरे वामे वामे च चक्षुषी । नाभौ मध्ये नलकयोर्मध्ये च यदि लम्बयेत् ॥
समभङ्गविशिष्टा सा न्यूनैषा चतुरङ्गुलैः । मूर्ध्नि वामे ललाटे च वामनेत्रस्य मध्यगम् ॥
आस्यमध्ये तथा नाभौ दक्षिणे गुल्फमध्यगम् । सूत्रं प्रलम्बयेदेवं अतिभङ्गा तु सा मता ॥
न्यूना पञ्चाङ्गुलैरेषा प्रतिमा पूर्वमानतः । अतिभङ्गः शयानायाः प्रशस्तो रामकृष्णयोः ॥

Pādma "kr." XX : 1–101 [*sic.*]

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

तादर्थ्येन तु सामान्यं सौम्यमानं पुरोच्यते । ऋज्वाख्यमविकारं च व्यापकं त्वेकमूर्तिमत् ॥
भूभागं सुसमे श्लक्ष्णे मालमुत्कीर्य तेन वै । निरूप्यावयवानां च लक्ष्म विस्तृतिपूर्वकम् ॥
अष्टाधिकशतांशो यः स्वोन्नतेरङ्गुलं च तत् । द्वे अङ्गुले कला नेत्रं गोलकं भाव एव च ॥
अङ्गुलादष्टभागो यः स यवः परिकीर्तितः । षट्कलं च परिज्ञेयं तालं बिम्बादिकर्मणि ॥
मुखाङ्गनाभिमेढ्रक्ष्मास्तालमानास्त्वथोरुयुक् । द्विकले च तथा जङ्घे गुल्फं जानुर्गलं च कम् ॥
त्र्यङ्गुलं त्र्यंङ्गुलं ज्ञेयमित्युन्मानमुदाहृतम् । जटाधराणां बिम्बानां दीर्घह्रस्ववशेन तु ॥
चतुष्कलं च त्रिकलं मानं मानाद्बहिः क्षिपेत् । त्रिपञ्चसप्तशिखरो मौलिरष्टकलोन्नतः ॥
निर्जटानां ललाटोर्ध्वे मकुटं वा सुशोभनम् । तालेन ह्रासवृद्धी तु कार्ये त्वत्र व्यपेक्षया ॥
यथोदितेषु भागेषु एकैकेनाङ्गुलेन तु । आस्यनासाललाटार्थं वदनांशं भजेत् त्रिधा ॥
ततोऽग्रतः कलामानं घ्राणं स्यात्तिलपुष्पवत् । कलार्धेन तु विस्तारः सोन्नतिस्तत्पुटद्वये ॥
नासाग्रग्रासनिर्मुक्तं गोजीमानं चतुर्यवम् । तच्चतुर्यवमानेन घ्राणाग्रेणान्तरीकृतम् ॥
अर्धाङ्गुलं चोत्तरोष्ठमधरोष्ठं तु चाङ्गुलम् । गोलकं चिबुकं वित्त सृक्किण्यौ चतुरङ्गुले ॥
आद्यस्य नासिकांशस्य मध्यभागसमाश्रिते । कुर्यान्नेत्रश्रुतिच्छिद्रे तत्र नेत्रे कलान्तरे ॥
कलायामसमं दैर्घ्यात्कलार्धेन तु विस्तृतम् । यदुत्पलदलाकारं द्वियवेनाधिकं तु तत् ॥
कुर्यात्पद्मदलाकारं नेत्रार्धं वृत्ततारकम् । तारादैर्घ्यत्रिभागेन त्वाद्यस्यान्यस्य चाधिका ॥
यवेनैकेन सार्धेन ज्योतिस्तत्पञ्चभागिकम् । त्रिभागेनापि विहितं तत्पद्मदललोचन ॥
द्विषड्यवं नेत्रकोशं विस्तारेण यवाधिकम् । सार्धाङ्गुलद्वयं दैर्घ्याद् भ्रूलते द्विकले स्मृते ॥
मध्यतो द्वियवे बालचन्द्रतुल्ये क्रमक्षते । तदन्तरं कलार्धं च तत्कोटी समसूत्रके ॥
श्रोत्रे द्व्यङ्गुलविस्तीर्णे आयामेन द्विगोलके । द्वियवः कण्ठपरिधिः पर्वणी द्वे चतुर्यवे ॥
मध्यं ताभ्यां तथा विद्धि द्रोणी सार्धाङ्गुला तु वै । कलार्धेन तु तच्छिद्रं पाशमानं यथारुचि ॥
अङ्गुलाद् द्विकलान्तं तु वैषम्यमपि तत्र तत् । अन्तच्छिद्रविनिर्मुक्तं तद्विज्ञेयं चतुर्यवम् ॥
सदलङ्करणोपेतमेवं श्रोत्रद्वयं स्मृतम् । चतुष्कलं ललाटं तु शिखरे द्वे द्विगोलके ॥
उच्छ्रयात् त्र्यङ्गुले चैव अग्रतोऽङ्गुलविस्तृते । केशभूमेः समुद्भूतं ललाटोपरि संस्थितम् ॥
कुर्यात्कलार्धमानं तु वक्त्रं चालकसञ्चयम् । कपोलपरिधिं कुर्यात्कर्णात्कण्ठगतं समम् ॥
तन्मध्ये वर्तुलौ गण्डौ परिच्छिन्नौ पुरोदितैः । शिरसः परिणाहं तु वित्त षट्त्रिंशदङ्गुलम् ॥
श्रोत्रकोटिद्वयाच्चैव मस्तकस्य यदन्तरम् । तत् षोडशाङ्गुलं वित्त वर्तिभ्यां पृष्ठतस्तथा ॥
सार्धतालं परिज्ञेयं ललाटात्कगुहान्तरम् । सत्कम्बुसदृशी ग्रीवा मूलमध्याग्रतो हि सा ॥
परिधेर्द्वादशकला एकविंशाङ्गुलाग्रतः । अष्टादशाङ्गुला चैव स्वांशात् त्र्यंशेन विस्तृता ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

तन्मूलं विस्तृतौ स्कन्धौ तुङ्गौ वृत्तायतौ समौ। षडङ्गुलं तद्बाहुल्यं बाहुमानं तथोच्यते ॥
स्कन्धोत्तमाङ्गं त्रिकलं सन्ध्यन्तं षट्कलं स्मृतम्। सन्धेर्वै मणिबन्धान्तं मानं नवकलं स्मृतम् ॥
मणेर्मध्यमशाखान्तो हस्तः सप्ताङ्गुलो मतः। परिज्ञेयं कलाहीनं तन्मानं मध्यमाङ्गुले ॥
तच्चतुर्यवहीनाच्च सनामा तु प्रदेशिनी। द्विकला च परिज्ञेया साङ्गुष्ठा तु कनीयसी ॥
द्विपर्वा च स्मृतोऽङ्गुष्ठः सर्वाश्चाङ्गुलिविस्तृताः। सर्वासां मूलपर्यन्ताद् ह्रासयेच्च यवं यवम् ॥
अग्रपर्वार्धमानेन कार्या लिङ्गोपमा नखाः। मानमङ्गुष्ठमूलस्य परिधेश्चतुरङ्गुलम् ॥
तच्चतुर्यवहीनं च ज्ञेयं त्रिष्वङ्गुलीषु च। न्यूनाङ्गुलेः कला सार्धा प्राग्वद् ह्रासश्च वेष्टनात् ॥
अङ्गुष्ठमङ्गुलं चाग्रात्तिस्रोऽन्याः षडयवाः स्मृताः। अर्धाङ्गुलाग्रतो न्यूना वित्त मध्यं क्रमक्षतम् ॥
न जलक्ष्मो (चलक्षा) चाग्रात्साङ्गुलाद्विकलं करम्। ईषन्निम्नतलं चैव लक्ष्म रेखाविभूषितम् ॥
शाखामूलावधेः पाणी बाहुल्यं द्वे यवेऽङ्गुलम्। चतुर्यवाधिकं चैव मणिबन्धावधेः स्मृतम् ॥
मध्ये कलार्धहीनं तु तद्बाहुल्यमुदाहृतम्। मणिबन्धावधेर्बाहुवेष्टनं षट्कलं स्मृतम् ॥
सन्धेः सप्तकलं वित्त साङ्गुलं त्र्यवमप्युत। हीनमर्धाङ्गुलेनैव मूलाद्वै नवगोलकम् ॥
तथैव सन्धेरूर्ध्वं तु विस्तारः प्राग्वदत्र च। अत्रापि पूर्ववद् दृष्ट्या कार्याऽन्तस्था क्षितिः स्वयम् ॥
तालं गलावधेस्त्यक्त्वा तन्मानेनान्तरीकृते। स्तनद्वयं समं कुर्यात्तद्धारा च समांसला ॥
निम्नं हृद्गोलकार्धेन ऊर्ध्वतो रत्नराड्युतम्। स्तनाभ्यां त्रिकलौ पार्श्वौ त्रियवं स्तनमण्डलम् ॥
यवोन्नतं तथा चाग्रात् विस्तृतं तेन चूचुकम्। लोचनं त्रियवं सार्धं कक्षमानमुदाहृतम् ॥
स्कन्धमानविनिर्मुक्तं पृष्ठमंसावधेः समम्। द्रोणीनिकाशसदृशमध्वराशेः समांसलम् ॥
कक्षान्तर्वेष्टनं वित्त पञ्चतालं सलोचनम्। विनाङ्गुलद्वयेनैव द्वे ताले द्विगुणीकृते ॥
यवत्रयसमायुक्ते वित्त तत्कुक्षिवेष्टनम्। त्रियवोनं कलामानं विज्ञेयं नाभिमण्डलम् ॥
तन्मानं तु त्र्यवोनं तु तन्निम्नत्वं विधीयते। परिधिर्नाभिमध्ये तु त्रिताल: सत्रिलोचनः ॥
षड्गोलकं च तन्मानं परिध्यर्थं कटेः स्मृतम्। करिकुम्भोपमौ पीनौ परितः पञ्चगोलकौ ॥
स्फिचौ कौपीनराजी च द्व्यङ्गुला मूलतः स्मृता। परितोऽङ्गुलमानासौ मेढ्रं तु त्रिकलं स्मृतम् ॥
चतुर्यवं च तत्कोशं वेष्टनं तु षडङ्गुलम्। द्व्यङ्गुलौ वृषणौ दैर्घ्यान्मूलान्तं समविस्तृतौ ॥
परितो द्व्यङ्गुलं वित्त वायुरन्ध्रं सुवर्तुलम्। ऊरुमानं परिज्ञेयं मध्यभूमेर्नवाङ्गुलम् ॥
षट्कलं मूलदेशाच्च अग्रान्तं त्रिकलं स्मृतम्। हीनमेकाङ्गुलेनैव द्विकलं जानुमण्डलम् ॥
विस्तारेणोन्नतत्वेन चतुर्यवसमं तु तत्। जङ्घामूले परिज्ञेये वेष्टनं नवगोलकम् ॥
द्विसप्ताङ्गुलकं मध्ये सार्धपञ्चकलं ततः। अत्रापि वेष्टनाद्वित्त तृतीयांशेन विस्तृतिम् ॥
मध्यमूलावसानेभ्यो विस्तारमनुगुण्यतः। भुजाभ्यां मध्यदेशस्य तथाङ्गुलिगणस्य च ॥
ऊरुयुग्मस्य जङ्घाभ्यामापाद्या द्विपहस्तता। सतालभागमानं च दैर्घ्यं वै चरणं स्मृतम् ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

पार्ष्णी द्विगोलकतले तन्मध्ये साङ्गुले कले । त्रिकलं चाग्रतश्चैव बाहुल्येन कलासमम् ॥
पदमङ्गुष्ठनिकरात् त्रियवोनं प्रकीर्तितम् । बाहुलं च कलामानं गुल्फदेशाच्च साङ्गुलम् ॥
कनीयोऽङ्गुलिमूलाच्च गुल्फान्तं पिण्डिकाङ्गुलम् । जङ्घावसानदेशाच्च वेष्टनं सप्तलोचनम् ॥
कलाहीनं तदैवाग्रात्परिणाहो विधीयते । चरणं विधिना तेन कूर्मपृष्ठं समाप्य च ॥
त्र्यङ्गुलेन च तद्दैर्घ्यादङ्गुष्ठस्य च दीर्घता । पञ्चाङ्गुलः परिज्ञेयः परिधिस्तस्य लाङ्गलिन् ॥
यवद्वयाधिका कार्या तद्दैर्घ्यात्तु प्रदेशिनी । अङ्गुष्ठायामतुल्याथ कार्या वै पदमध्यगा ॥
मध्याङ्गुले द्विरष्टांशहीना तदनु या स्थिता । तद्वत्तदनुगा या च त्रिपर्वास्तास्तु पूर्ववत् ॥
संयुक्ता नखजालेन कूर्मपृष्ठोपमेन च । द्विकलं तु यवार्धोनं पादतर्जनिवेष्टनम् ॥
चतुश्चतुर्यवोनं च तच्छेषाणां प्रकीर्तितम् । त्र्यंशेन वेष्टनाज्ज्ञेयं सर्वासां चैव विस्तृतम् ॥
सर्वे समांसलाः सौम्याः समास्त्ववयवाः शुभाः । दशनावलिबाह्यस्थे दंष्ट्रे सप्तयवोन्नते ॥
यवद्वयोन्नतं मानं मध्यदन्तचतुष्टये । तत्पक्षगानां सर्वेषां मानं वित्त चतुर्यवम् ॥
त्रियवं द्विजविस्तारमग्रान्मूलाद्यवद्वयम् । तत्सार्धं मध्यदेशाच्च सर्वे दन्ता निरन्तराः ॥
लोमप्रदक्षिणावर्तमयुग्जन्मोत्थितं शुभम् । सुनिश्चितं हितं चैतन्मानमव्यभिचारि यत् ॥
मनोहारित्वमेकत्र रूपलावण्यभूषितम् । सर्वदा चानयोर्वित्त अन्योन्यत्वेन संस्थितम् ॥
ससौन्दर्यं तु मानस्य क्वचिदाक्रम्य वर्तते । लावण्यस्य क्वचिन्मानं समाच्छाद्यावतिष्ठते ॥
यथाभिरूपवान् लोके दरिद्रोऽप्येति मान्यताम् । विरूपोऽप्यतिवित्ताढ्यो नारूपो नैव निर्धनः ॥
एवं द्वयोज्झितं बिम्बमनादेयत्वमेति च । आदेयमेकयुक्तं च नित्यं यस्मान्मुनीश्वराः ॥
सम्यङ्मिते च सौन्दर्ये भक्तानुग्रहकाम्यया । मन्त्रसन्निधिशक्तिर्वै सफला ह्यवतिष्ठते ॥
सा सम्यक् प्रतिपन्नस्य बिम्बे दृग्गोचरस्थिते । आमूर्त्याह्लादयत्याशु ज्ञात्वैवं यत्नमाचरेत् ॥
मानोन्मानप्रमाणानामथ सौन्दर्यसिद्धये । ऋजोः सुसमपादस्य त्र्यङ्गुलं चरणान्तरम् ॥
तद्वै विषमपादस्य अग्रात्तालसमं स्मृतम् । तत्पार्ष्णिद्वयमध्यात्तु परिज्ञेयं द्विगोलकम् ॥
स्थित्यर्थं ब्रह्मनाड्या वै तथा मार्गद्वयस्य च । सूत्रेण सुसमे कुर्याद्देहोत्थे दक्षिणोत्तरे ॥
समपादस्य बिम्बस्य ललाटान्मेढ्रमस्तकम् । प्रसार्य सूत्रमाच्छाद्य तेन नाभिहृदन्तरम् ॥
घ्राणाग्रमलकानां च सिद्धिर्यस्तिलकोर्ध्वगः । एवं विषमपादः स्यादक्षाङ्गुष्ठाग्रगं नयेत् ॥
गात्रसाम्यं समापाद्यं क्षेत्रात् क्षेत्रगतेन च । सूत्रेण सर्वबिम्बानां वैषम्यविनिवृत्तये ॥
चतुस्त्रिद्व्यश्रिपरितः परिशुद्धा यतः शुभा । अशुभा परिशुद्धा तु बिम्बोत्थावयवी स्थितिः ॥
ललाटमश्ववक्त्रस्य विस्ताराद् द्वादशाङ्गुलम् । अष्टलोचनमायामादग्रतश्चतुरङ्गुलम् ॥
कलार्धसुषिरे घ्राणरन्ध्रे भागान्तरीकृते । अष्टाङ्गुले तु हनुके सृक्विण्यौ द्वेऽथ तत्समे ॥
मध्यतः श्रोत्रशुक्ती द्वे द्व्यङ्गुले द्विकलोन्नते । द्व्यङ्गुलं घ्राणवंशं तु तदूर्ध्वं द्विकलं स्मृतम् ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

वित्त वक्त्रविकासं च द्वियवं चाग्रतः क्रमात् । तमेव हि यवांशेन हन्वन्तं तनुतां नयेत् ॥
घ्राणवंशस्य पक्षौ द्वौ मध्यभिन्नौ च संहतौ । यवद्वयेन सार्धेन दृग्घ्राणाभ्यां तु चान्तरे ॥
अथो दलं तु दृग्द्रोणेर्यवमानेन सञ्चितम् । ललाटं सालकं प्राग्वद् दृङ्मध्यं साङ्गुला कला ॥

Sāttvata XXIV : 91*b*–180*a* = Īśvara[1] XVII : 92–180 = Śrīpraśna XIII : 10*b*-95

§ 192

अष्टतालाधमा ज्ञेया देव्यस्स्युश्चाष्टतालिकाः । दशधा नवधा चेष्टं मानं कृत्वैकमंशकम् ॥
भङ्क्त्वा द्वादशधा ज्ञेयं स्वाङ्गुलं येन मीयते । ग्रीवाहृन्नाभिमेढ्रान्तं मुखमानेन कल्पयेत् ॥
तद् भङ्क्त्वा मूर्ध्नि कण्ठाङ्घ्रिजानुदेशे समं न्यसेत् । जङ्घोरू द्विगुणौ कार्यौ बाहू चाजानुलम्बिनौ ॥
किञ्चिदूनाः प्रमाणेन ज्ञेयाश्चैवोपबाहवः । किरीटमधिकं कुर्यात् पद्मं नालं च मानतः ॥
तिर्यक् षोडशसूत्राणि सप्तार्धानि च कल्पयेत् । तिर्यगूर्ध्वगतैः सूत्रैर्मुखे द्वादशधा कृते ॥
केशपञ्चमसूत्रस्थं मध्यैकान्तरितं द्वयोः । पदयोरक्षिणी कार्ये पदमानेन विस्तृते ॥
तयोर्मध्ये शुभा नासा कार्याक्षिद्विगुणायता । तारे सृक्वान्तसूत्रस्थे कंबीरौ(?) पुटसंमितौ ॥
कुर्याद् भ्रूसूत्रगौ कर्णौ नेत्रे नेत्रान्तरायते । तारके तत्त्रिभागस्थे ज्योतिषी तत्त्रिभागतः ॥
नेत्रवन्नासिकाग्रोच्चं निम्नं मूलं तदर्धतः । निष्पावाभौ निम्नपुटौ भ्रूमध्यं नेत्रमध्यवत् ॥
अधरस्तत्समोऽन्योष्ठगोजिकामानमर्धतः । कर्णायामस्तु नासावत् विस्तारश्च तदग्रवत् ॥
तुटुकौ नेत्रसूत्रस्थौ तद्विस्तारेण सम्मितौ । ललाटकण्ठविस्तारो नासिकाद्विगुणो मतः ॥
चिबुका कर्णमूलात्तु नासिकाद्विगुणायता । स्तनान्तरं मुखं विद्याद् द्विगुणं चैव कक्षयोः ॥
कण्ठाद् द्विगुण एवेष्टो नाभिदेशे तु विस्तरः । कटौ नेत्राधिकस्त्र्यंशं स्तनकक्षान्तरं विदुः ॥
तावत् कक्षांसमध्यं च कारयेत् स्कन्धमुन्नतम् । कटिवत् सन्धिकक्षान्त्रं प्रकोष्ठं नासिकाधिकम् ॥
तत्र मध्यमयोर्मानं नासिकाधरयोगतः । कल्पयेदर्धपर्वोने तथा तर्जन्यनामिके ॥
तयोरप्यर्धपर्वोने तथाङ्गुष्ठकनिष्ठिके । तले नेत्राधिकायामे मध्यमायामविस्तरे ॥
तत्राङ्गुष्ठप्रदेशिन्योर्नेत्रसंमितमन्तरम् । अन्तरं मध्यमातुल्यं कनिष्ठामणिबन्धयोः ॥
मणिबन्धस्तु नासावत् ततोऽङ्गुष्ठान्तरं तथा । द्विगुणो बाहुविस्तारो नेत्रोनं चैव कोर्परे ॥
सर्वत्र द्विगुणो नाहो बाहू गोपुच्छवच्छुभौ । मध्यमापर्वणी पूर्वे समे शेषं तदर्धकम् ॥
अष्टांशोनानि पर्वाणि ततो देशिन्यनामयोः । पादोनानि कनीयस्या योक्तव्यान्यनुरूपतः ॥
तर्जनी मध्यमापर्वसमे चाङ्गुष्ठपर्वणी । सर्वाङ्गुलीषु कार्याः स्युरग्रपर्वार्धतो नखाः ॥
नाहोऽङ्गुष्ठस्य नासावदष्टांशोनस्ततोऽन्ययोः । ततश्चैवं कनिष्ठायां वृत्ते भुजसमे स्फिजौ ॥
ऊरू मुखवदक्ष्यूनं जानु जङ्घा मुखार्धतः । मुखायततलौ पादौ पुरस्ताज्जङ्घया समौ ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

कूर्मोन्नतौ क्रमोनोच्चौ तत्राङ्गुष्ठौ तदर्धकौ । प्रदेशिन्यौ च तत्तुल्ये हीनाः शेषा नखान्नखम् ॥
अनङ्गुष्ठास्त्रिपर्वाणो नखा रक्तार्धचन्द्रवत् । नाहोऽङ्गुष्ठेऽन्यमध्यावत् तर्जन्यङ्गुष्ठदैर्घ्यवत् ॥
अष्टांशोनाः क्रमादन्याः कारयेदनुरूपतः । कर्णपाशौ च केशाश्च भूषा वस्त्रायुधानि च ॥
सन्निवेशाश्च योक्तव्या यथाशोभं विजानता । विशालधवलाताम्रे पक्ष्मले चैव लोचने ॥
साधारणीव दृष्टिः स्यात् पश्यतां नाध ऊर्ध्वगा । पटे वा लेखयित्वैवं तं पटं साधकः स्वयम् ॥
एकान्ते तु प्रतिष्ठाप्य पूजयेन्नित्यमादरात् । बिम्बोच्चार्धं तु पीठोच्चमायामो बिम्बमानतः ॥
केशान्तमुखमानो वा पद्मतुल्यो जलाश्रयः । नाधिकं पीठमिष्टं तु जङ्घमस्य षडङ्गुलात् ॥

Viṣṇu XIV : 76-105

§ 193

बिम्बमानं तु नवधा प्रोच्छ्रयात् संविभज्य च । भागं भागं तु तं भूयो भजेद् द्वादशधा मुने ॥
तदङ्गुलं तु बिम्बस्य तेनाङ्गावयवास्ततः । दर्शनीयाश्च गुरुणा शिल्पिकस्य समासतः ॥
चिबुकाच्च ललाटान्तं स्याद्वक्त्रं द्वादशाङ्गुलम् । ललाटादूर्ध्वतो विप्र त्र्यङ्गुलेनोन्नतं शिरः ॥
द्वादशाङ्गुलविस्तीर्णं त्रिगुणं परिणाहतः । विस्तारा द्व्यङ्गुलौ कर्णौ तन्मानद्विगुणोच्छ्रितम् ॥
कनिष्ठाग्रसमं विद्धि रन्ध्रं श्रोत्रस्य चान्तरात् । कर्णभागावथोर्ध्वस्थमानेनार्धाङ्गुलौ स्मृतौ ॥
कर्णच्छिद्रात्तु वै बाह्ये कर्णमध्येऽङ्गुलोऽवटः । त्र्यङ्गुलं कर्णपाशाभ्यां व्यासो वा स्यादथेच्छया ॥
भ्रूलता शशिलेखाया(खेव) आयामाच्चतुरङ्गुला । अर्धाङ्गुलेन विस्तीर्णा मध्ये स्थूलाग्रतः कृशा ॥
भ्रूसन्धिरङ्गुलसमो नासा तु चतुरङ्गुला । द्व्यङ्गुलाच्चाग्रतः कार्या तिलपुष्पाकृतिर्यथा ॥
नेत्राभ्यामन्तरं विद्धि द्व्यङ्गुलं नेत्रभूस्तथा । दैर्घ्येण द्व्यङ्गुलं नेत्रं तदायामेन चाङ्गुलम् ॥
त्र्यंशेन तारकं मध्ये ज्योतिस्तत् त्र्यंशसंमितम् । घ्राणाधश्चाङ्गुलेनैव पादहीनेन कल्पयेत् ॥
गोजिका मुनिशार्दूल एकांशेन ततोऽधरः । उत्तराख्यो ह्यधस्स्थं तु प्रमाणेनाङ्गुलः स्मृतः ॥
द्व्यङ्गुलं चिबुकं विप्र उच्छ्रायेण प्रकीर्तितम् । विस्तारद्व्यङ्गुलं विद्धि सृक्वणी चतुरङ्गुले ॥
ईषद् द्विहस्तमाने च कर्णपाल्योः परस्परम् । कपोलमूर्ध्वे शशिवत् तन्मध्ये चतुरङ्गुलौ ॥
मुखगण्डौ समौ कुर्यात् सुसंपूर्णौ मनोहरौ । कर्णोच्छ्रायस्त्र्यङ्गुलस्स्याद्विस्तारात्तच्च नारद ॥
अष्टाङ्गुलं च परिधेस्त्रिगुणं परिकीर्तितम् । कण्ठादधःस्थितं वक्षो यावत् स्पन्दावधि द्विज ॥
उन्नतत्वेन विहितं सदैव द्वादशाङ्गुलम् । द्विगुणं चैव विस्ताराद् द्व्यङ्गुलं स्तनमण्डलम् ॥
एतयोश्चूचुके कुर्यादष्टमांशं स्वकाङ्गुलात् । परस्परं च स्तनयोरन्तरं द्वादशाङ्गुलम् ॥
अष्टाङ्गुलौ स्मृतौ चांसौ विस्तरेण महामते । प्रोन्नतत्वेन वै कुर्यात् स्कन्धमूर्ध्वं षडङ्गुलम् ॥
उच्छ्रायेण तु नाभ्यन्तं स्पन्दाद्वै द्वादशाङ्गुलम् । परिधिं नाभिदेशस्य चत्वारोंऽशास्तु पञ्च वै ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

अङ्गुलं नाभिरन्ध्रं तु क्रमान्निम्नं द्विरङ्गुलम् । कुर्यात् प्रदक्षिणावर्तं नाभिमेढ्रान्तरं मुने ॥
उच्छ्रायेण तु संपाद्यं सुसमं द्वादशाङ्गुलम् । नाभ्यावधेस्तादुदरं संपाद्यं चतुरङ्गुलम् ॥
शेषं तत्कटिभूभागं विस्तारेणोदरं मुने । द्विसप्ताङ्गुलमानं स्यात् परिधेस्त्रिगुणं हि तत् ॥
त्रिषट्काङ्गुलविस्तीर्णं कटिमानं विधीयते । चतुःपञ्चाशदङ्गुल्यः परिधिस्तु कटेः स्मृतः ॥
षट्त्रिंशाङ्गुलमानेन परिधिस्तु कटेः स्मृतः । कुर्यात् प्रजननं विप्र उच्छ्रायेण षडङ्गुलम् ॥
द्व्यङ्गुलेन तु विस्तीर्णं वृषणौ चतुरङ्गुलौ । त्रिचतुर्मुष्कसंपूर्णौ ऊरुदण्डौ ततो द्विज ॥
उच्छ्रायेण प्रकर्तव्यौ चतुर्विंशाङ्गुलौ समौ । पृथुमूलौ क्रमात् क्षामौ संलग्नौ गजपाणिवत् ॥
विस्तारेणाथवा कुर्यादूरुमूलं नवाङ्गुलम् । षट्त्रिंशाङ्गुलमानं स्यादूरुमध्ये तु वेष्टनम् ॥
ऊरुभ्यामवसाने तु वेष्टितं चैकविंशतिः । त्र्यङ्गुलं मुनिशार्दूल परितो जानुमण्डलम् ॥
विस्तारेणोन्नतश्चापि जानुभ्यामथ मे शृणु । द्विद्वादशेनाङ्गुलानां जङ्घोच्छ्राय इहोच्यते ॥
षडङ्गुलेन विस्तीर्णं जङ्घामूलं प्रकीर्तितम् । जङ्घामध्ये तयोर्नाहो . . . .
जङ्घावसाने विस्तारे ज्ञेयः पञ्चाङ्गुलो मुने । तमेव त्रिगुणीकृत्य तस्यैव परिधिर्भवेत् ॥
गुल्फादधस्त्र्यङ्गुलं स्यात्पदोच्छ्रायस्तु नारद । तत्पार्ष्णिपृष्ठतो यावदङ्गुलाग्रं द्विजोत्तम ॥
भवेत्पादस्तु दैर्घ्येण अङ्गुलानां द्विसप्तकम् । षडङ्गुलेन विततः कूर्मपृष्ठोन्नतः क्रमात् ॥
चतुरङ्गुलदैर्घ्येण अङ्गुष्ठं द्व्यङ्गुलं ततः । त्रिगुणं वेष्टनं तस्य दैर्घ्यात्तत्पादतोऽधिका ॥
पादप्रदेशिनी कार्या तत्समीपस्थिताङ्गुलिः । अङ्गुष्ठस्य समा कार्या तत्पादोना त्वनामिका ॥
अनामिकायाः पादेन हीना पादकनीयसी । त्र्यंशेन विद्धि सर्वासां पर्वमानं तु नारद ॥
पर्वार्धेन नखाः कार्या अर्धेन्दुसदृशाः शुभाः । षट्त्रिंशदङ्गुलं मानं पृष्ठमंसावधि स्मृतम् ॥
गोमुखं वा क्रमान्निम्नं यावद्विंशाङ्गुलं भवेत् । मध्यप्रदेशाद्विततः पृष्ठवंशोन्नतः क्रमात् ॥
सुश्लक्ष्णश्चाविभक्तश्च विभक्तश्च यथा मुने । संमीलनं मीनयुक्तं कक्षा पञ्चाङ्गुला स्मृता ॥
सुवर्तुलौ स्फिजौ कार्यौ विस्तारात् षोडशाङ्गुलौ । सुविभक्ते च पीने च करिकुम्भोपमे शुभे ॥
अधस्तात् स्कन्धशीर्षस्य बाहुः स्याद् द्वादशाङ्गुलः । अष्टादशाङ्गुलं विद्धि उपबाहुं द्विजोत्तम ॥
मणिबन्धप्रदेशस्तु तत्र त्र्यङ्गुल उच्यते । मध्यमाङ्गुलिपर्यन्तं मणिबन्धावसानतः ॥
द्वादशाङ्गुलमानं तु स्कन्धं स्यात्परिवर्तुलम् । चतुरङ्गुलविस्तीर्णं परिधेस्त्रिगुणं स्मृतम् ॥
मूलतश्चोपबाहुर्वै पञ्चाङ्गुलमुदाहृतम् । त्रिगुणं च तथा नाहं तं क्रमाद् ह्रासयेन्मुने ॥
गोपुच्छसदृशाकृत्या तथा स्यात् त्र्यङ्गुलं मुने । मणिबन्धप्रदेशस्तु विस्तारेण च वेष्टनात् ॥
नवाङ्गुलप्रमाणेन पाणेर्मानमतः शृणु । मणेरङ्गुलिमूलं तु विद्धि सप्ताङ्गुलं सदा ॥
पञ्चाङ्गुलप्रमाणेन तिर्यग्विस्तरमुच्यते । निम्नं करतलं कुर्याच्छुभरेखाविभूषितम् ॥
तत्र मध्याङ्गुलं विद्धि विप्र पञ्चाङ्गुलं तु वा । तस्या द्वे पार्श्वतोऽङ्गुल्यावूने त्वर्धाङ्गुलेन वै ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

तत्पञ्चमांशहीनां च नित्यं कुर्यात् कनीयसीम्। सार्धत्र्यङ्गुलमङ्गुष्ठं द्विपर्वं परिकीर्तितम् ॥
त्रिपर्वाङ्गुलयः शेषाः पर्वार्धेन नखाः स्मृताः। गोपुच्छसदृशाः कार्या अङ्गुल्योऽङ्गुलमानतः ॥
पादहीना कनिष्ठा स्यात् सपादश्चाङ्गुलोऽङ्गुलाः। स्वप्रमाणस्य विस्तारात् त्रिगुणं विद्धि वेष्टनम् ॥
कूर्मपृष्ठनखाः सर्वे अग्रतश्चार्धचन्द्रवत्। लिङ्गाकृति मूलदेशान्मानमेषामनिश्चितम् ॥
सलोमदन्तकेशानां मानं शोभाविकल्पितम्। केशैरलकजालं तु ललाटोपरि शोभितम् ॥
ललाटोर्ध्वाङ्गुलच्छादि कुर्यात् त्रिवलिसंयुतम्। मनोहरा ह्यवयवाः सर्वे कार्याः सुलक्षणाः ॥
समानविषमा विप्र सक्तासक्ता विशेषतः। मानेनानेन वै कुर्यात् बिम्बं विप्र सुलक्षणम् ॥
शतमष्टोत्तरं पुर्णमङ्गुलानां स्वकाङ्गुलैः। उच्छ्रायेण द्विजश्रेष्ठ मूर्ध्नः पादतलावधि ॥
हारनूपुरकेयूरमेखलामौलिशोभितम्। पीनाङ्गमध्यदेशाच्च समानवलिशोभितम् ॥
शेषं ध्यानोदितं सर्वमुक्तानुक्तं प्रकल्पयेत्। . . . .

Jayākhya XX : 9-66*a*

§ 194

अथ श्रियादिदेवीनां निर्माणविधिरुच्यते। दशतालादिना येन तालमानेन कल्प्यते ॥
देवो देव्यः श्रियाद्यास्तु कल्पनीयाश्चतुर्मुख। तदनन्तरतालेन नाधिकेन समेन वा ॥
यावन्त्यो याश्च यन्मानाः श्रियादेः शूलयष्टयः। तन्मानास्ताश्च तावत्यः कथ्यन्ते संप्रति क्रमात् ॥
पञ्चतालमितायामा वंशयष्टिश्चतुर्मुख। विस्तारस्त्र्यङ्गुलो मूले सह षड्भिर्यवैरपि ॥
पञ्चतालामितायामा वंशयष्टिश्चतुर्मुख। विस्तारस्त्र्यङ्गुलो मूले सह षड्भिर्यवैरपि ॥
मध्यतस्त्र्यङ्गुलः सार्धः त्र्यङ्गुलः पुनरग्रतः। चतुर्दशाङ्गुलो मध्ये मूले पञ्चदशाङ्गुलः ॥
नाहोऽग्रे वंशयष्टेः स्यात्सार्धं सत्रिदशाङ्गुलम्। चतुरश्रः सुवृत्तो वा दण्डः कल्प्यश्च शिल्पिभिः ॥
अङ्गुलैः सप्तविंशत्या वक्षोदण्डः समायतः। विस्तारो मध्यमस्तस्य त्र्यङ्गुलः षडयवाधिकः ॥
अङ्गुलैर्दशभिर्नाहः सह पञ्चभिरङ्गुलैः। किंशुकस्येव मुकुलं तस्याग्रे द्वे प्रकल्पयेत् ॥
बाहुमूलं चतुर्विंशत्यङ्गुलायाममिष्यते। त्र्यङ्गुलार्धाधिको मूलविस्तारस्तस्य कल्प्यते ॥
त्र्यङ्गुलो मध्यविस्तारः तस्याग्रं द्व्यङ्गुलं भवेत्। अष्टादशाङ्गुलायामः प्रकोष्ठस्तस्य मूलतः ॥
विस्तारस्त्र्यङ्गुलो मध्ये द्व्यङ्गुलः सचतुर्यवः। द्व्यङ्गुलोऽग्रे तयोर्मूलशूलयोः सुषिरं भवेत् ॥
आयामः कटिदण्डस्य भवेत्पञ्चदशाङ्गुलः। विस्तारो मध्यमस्तस्य त्र्यङ्गुलः सहषडयवः ॥
नहनं मध्यतस्तस्य भवेत्पञ्चदशाङ्गुलम्। षडङ्गुलः पार्श्वयष्टेः परिणाहः प्रकीर्तितः ॥
पार्श्वदण्डौ कटीवक्षःशूलयोर्विनियोजयेत्। षड्विंशत्यङ्गुलायाममुरःशूलमुदाहृतम् ॥
त्र्यङ्गुलो मूलविस्तारस्तस्याग्रं द्व्यङ्गुलं भवेत्। विस्तीर्णं द्व्यङ्गुलं मध्यं शूलस्य च चतुर्यवम् ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

पुरुशूलसमायामं जङ्घाशूलं प्रकल्पयेत् । सुषिरं च तयोर्मूलमग्रं मिथुनमेतयोः ॥
अनुक्तपरिणाहानां त्रिगुणं नहनं मतम् । त्रयोदशविधं शूलं कृत्वा पूर्वोक्तमानकम् ॥
जलाधिवासाद्यखिलं कुर्याच्छ्रीस्थापने यथा । स्वातन्त्र्ये पारतन्त्र्ये च रत्नन्यासपुरःसरम् ॥
शूलादि स्थापयेद्रज्जुवेष्टनादि यथापुरम् । कुर्यादावर्णलेपान्तं मानाद्यथ निदर्श्यते ॥
उत्सेधमङ्गुलशतं विंशमास्थाय कथ्यते । उष्णीषमङ्गुलमितं त्र्यङ्गुलं च शिरो भवेत् ॥
सार्धं त्रिभिर्यवैरक्षिसूत्रान्तं चतुरङ्गुलम् । सङ्गमात्पुटसूत्रान्तं तद्वदम्भोरुहानन ॥
चिबुकान्तं पुटादर्वाक् सपादचतुरङ्गुलम् । चतुरङ्गुलमाना स्याद् ग्रीवा हिक्कागुणात्ततः ॥
त्रयोदशाङ्गुलमितं स्तनसूत्रान्तमीरितम् । अतो नु नाभिसीमान्तं भवेत्पञ्चदशाङ्गुलम् ॥
श्रोणी षडङ्गुलायामा योनिः सार्धाङ्गुलित्रयम् । कटिमानं भवेत्सार्धं त्र्यङ्गुलं चोरुरायता ॥
अङ्गुलैः पञ्चविंशत्या सार्धैर्जङ्घा च तत्समा । सार्धं च त्र्यङ्गुलं जानुस्तद्वदक्षतलावधि ॥
विस्तारोऽष्टाङ्गुलस्तस्य द्वादशाङ्गुलमायतम् । प्रदक्षिणावर्तयुतं ज्वालाग्रं शङ्खचक्रयोः ॥
केशान्तेन समा यद्वा यद्वा सूत्रेण तत्समम् । सार्धान्तरांशुना पूर्वा गुञ्जानि द्व्यङ्गुलान्तरे ॥
जङ्घयोर्विंशतियवमन्तरालं प्रचक्षते । अक्षयोस्त्र्यङ्गुलं मध्यं स्तनयोः सप्तमाङ्गुलम् ॥
चरणाङ्गुष्ठयोर्मध्यं नवाङ्गुलमुदाहृतम् । अक्षात्परतरं तालमङ्गुष्ठं त्रिभिरङ्गुलैः ॥
अर्धेन चायतं द्वे च तर्जनी स्याद्यवाधिका । यवोना मध्यमान्ये द्वे यवहीने यथाक्रमम् ॥
पार्ष्णिपार्श्वपरिच्छेदो भवेच्च चतुरङ्गुलः । गुल्फं तथा परिमितं तद्विंशत्यङ्गुलायतम् ॥
हिक्कान्तयोरधो बाहुः सहार्धैकोनविंशतिः । अङ्गुलानि प्रकोष्ठं स्यात्तदायामः षडङ्गुलः ॥
तद्वच्च मध्यमा शिष्टा सार्धपञ्चदशाङ्गुला । दशाङ्गुलं शिरोमानं विस्तारोऽष्टाङ्गुलो भवेत् ॥
ललाटस्य पुरोऽनुस्यादशीतियवसंमितम् । अष्टाशीतियवं मानं तदनन्तरमिष्यते ॥
आयामः श्रवणस्य स्याद् द्वात्रिंशद्यवसंमितः । नालायामस्तथाचोर्ध्वं पिप्पल्या द्वियवो मतः ॥
नालस्य मूलविस्तारः षड्यवैस्तुलितो भवेत् । अग्रं चतुर्यवं ग्रीवा मूलं चैव षडङ्गुलम् ॥
सार्धं पञ्चाङ्गुलार्धाग्रं स्कन्धं च द्व्यङ्गुलं भवेत् । हिक्कान्तयोरधो बाह्वोर्मूलं द्वात्रिंशदङ्गुलम् ॥
अष्टादशाङ्गुलमुरस्स्तनयोरपि मण्डलम् । अङ्गुलैः पञ्चदशभिः परिच्छिन्नं यथातथम् ॥
नवाङ्गुलं च विस्तार उत्सेधश्चापि तादृशः । द्वादशाङ्गुलविस्तारः स्तनयोर्मध्यमिष्यते ॥
कृष्णमण्डलविस्तारो द्व्यङ्गुलं चतुरानन । नाहस्तु कुक्षिमध्यस्य स्यात् त्रयस्त्रिंशदङ्गुलः ॥
श्रोणीमध्यपरीणाहाः सप्त पञ्चदशाङ्गुलः । कटिमध्यपरीणाहो विंशत्या सैकयाऽङ्गुलैः ॥
षट्त्रिंशदङ्गुलो नाहस्तथा स्यादूरुमूलयोः । त्रिंशदङ्गुलनाहस्तु भवेदूर्वोस्तु मध्यमः ॥
चतुर्भिः सह विंशत्या जानुनाहस्तथाङ्गुलैः । नहनं जङ्घयोरेकविंशत्यङ्गुलमिष्यते ॥
द्वाविंशत्यङ्गुलः सार्धो नाहमध्ये च जङ्घयोः । नहनं जङ्घयोरग्रं भवेदेकादशाङ्गुलम् ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

एकादशाङ्गुलं चाक्षवृत्तमण्डलनाहनम् । एकाङ्गुलं चाक्षवृत्तं मध्यमं नहनं मतम् ॥
षडङ्गुलं तलाग्रं स्यादुत्सेधश्चतुरङ्गुलः । द्व्यङ्गुलोऽङ्गुष्ठविस्तारस्तर्जन्येकाङ्गुला भवेत् ॥
मध्यमादितराङ्गुल्यो यवहीनाः क्रमात् पुनः । अङ्गुष्ठनखविस्तारस्त्र्यङ्गुलः परिकीर्तितः ॥
तर्जनी पादहीना स्यात्क्रमादन्या यवोन्नताः । अष्टादशाङ्गुलं मध्यं मूलं बाह्वोस्त्रयाधिकम् ॥
प्रकोष्ठमूलनहनं भवेत्पञ्चदशाङ्गुलम् । द्वादशाङ्गुलमध्यान्तं मणिबन्धो नवाङ्गुलः ॥
विस्तीर्णं तालमध्यर्धं चतुरङ्गुलमिष्यते । अङ्गुष्ठमूलमध्यर्धमङ्गुलं नखमङ्गुलम् ॥
निःसृतं त्रियवं प्रोक्तं पर्वद्वयसमन्वितम् । तर्जन्यङ्गुलविस्तारः सहाष्टांशाङ्गुलो भवेत् ॥
सपादाङ्गुलविस्तारा मध्यमाङ्गुलिरिष्यते । अष्टसप्तयवैः शिष्टैस्त्रिपर्वा च चतुष्टयी ॥
पार्श्वकेशान्तमुष्णीषादारभ्य स्याद्दशाङ्गुलम् । आरभ्य पार्श्वकेशान्तात्समासाद् द्व्यङ्गुले भ्रुवौ ॥
षडङ्गुला यथा भ्रूः स्याद्यवमध्याग्रयूकका । अन्तरालं नवयवं भ्रुवोस्त्र्यङ्गुलमीक्षणम् ॥
अङ्गुलायामविस्तारा वेदितव्या कनीनिका । यवोनमङ्गुलं कृष्णज्योतिर्यूकप्रमणकम् ॥
परितः कृष्णबिम्बस्य अङ्गुलं श्वेतमण्डलम् । मध्यतोऽङ्गुलविस्तारं नयनं शूर्पमीनवत् ॥
ऊर्ध्वपक्ष्मायता सार्धत्र्यङ्गुला पादविस्तरा । त्र्यङ्गुलायाममितरद्विस्तारो यवसंमितः ॥
अशीतिः पक्ष्मरोमाणि शतानि कुटिलानि च । द्व्यङ्गुलं चक्षुषोर्मध्यं नासिकामूलमङ्गुलम् ॥
विस्तीर्णमुन्नतं वापि मध्यमध्यर्धमङ्गुलम् । अग्रं द्व्यङ्गुलमध्यर्धं षड्यवं सुषिरं भवेत् ॥
चतुर्यवं तयोर्मध्यं पुटपार्श्वं चतुर्यवम् । अपाङ्गात्कर्णमूलान्तं चत्वारिंशद्यवं मतम् ॥
द्व्यङ्गुलः कर्णविस्तारो विवरं च चतुर्यवम् । चतुरङ्गुलमध्यर्धमोष्ठमुत्तरमायतम् ॥
यवविस्तारमधरमेकाङ्गुलसमायुतम् । द्व्यङ्गुलं चैव विस्तारं चिबुकं द्व्यङ्गुलायतम् ॥
आपीडा नासिका युक्ता करण्डमुकुटान्विता । कर्णिका मणिकेयूरकटकत्रयहारिणी ॥
रत्नकूर्पासरशना पुष्पाम्बरपरिष्कृता । स्तनबन्धतुलाकोटिसर्वाभरणभूषिता ॥
लज्जाभङ्गेन देवस्य पार्श्वे वामेतरे स्थिता । हस्तेन वारिजं फुल्लं वामेन किल बिभ्रती ॥
ऊरुप्रदेशविश्रान्तसव्येतरकराम्बुजा । यद्वान्यथा हस्तयोस्स्याच्चिष्टप्तकनकप्रभा ॥
आसनेऽभयदो हस्तो दक्षिणो वरदोऽपरः । दक्षिणे पद्ममथवा सव्यः कटकमुद्रितः ॥
पारतन्त्र्ये विधिरयं स्वातन्त्र्ये तूच्यते यथा । चतुर्भुजां जघन्याभ्यां हस्ताभ्यामब्जधारिणीम् ॥
शङ्खचक्रधरां वापि मुख्याभ्यां वरदायिनीम् । अभीतिदां च कोटीरधारिणीं भयवर्जिताम् ॥
वसुन्धराह्वयां देवीं द्विहस्तां कनकप्रभाम् । दक्षिणाभयदामन्यहस्तेन वसुदायिनीम् ॥
गृहीतदाडिमफलां यद्वा वामकरेण वा । चिन्तारत्नं धारयन्तीं हेमसिंहासने स्थिताम् ॥
. . . वामपादेन संस्पृष्टनिधिकुम्भामलङ्कृताम् ॥
कल्पकानोकहच्छायां समाश्रित्य स्थितां तथा । वामे पार्श्वे महीं देवीं द्विहस्तां श्यामलप्रभाम् ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

स्तनबन्धविहीनां वा कुण्डलापीडवर्जिताम् । सुस्थितां सव्यपादेन चान्येन स्तोककुञ्चिताम् ॥
पुष्पं दक्षिणहस्तेन धारयन्तीं शुचिस्मिताम् । ऊरुप्रदेशविश्रान्तवामहस्तामलङ्कृताम् ॥
सोत्तरीयां यथायोगं स्वातन्त्र्ये श्रीरुदाहृता । योगलक्ष्मीस्तु श्रीवत्सं भोगलक्ष्मीर्द्विपार्श्वयोः ॥
वीरलक्ष्मीस्तु वै शेषं पृथग्भवनकल्पनम् । रतिः सरस्वती तुष्टिर्देव्यो देवस्य दक्षिणे ॥
रतिः सिन्दूरसङ्काशा स्फटिकाभा सरस्वती । हरितालनिभा तुष्टिः श्रीवदाभरणादयः ॥
पारतन्त्र्ये विधिरयं स्वातन्त्र्ये तूच्यते विधिः । रत्यादयश्चतुर्हस्ता मुख्यौ स्यातां रतेः करौ ॥
वरदाभयदावन्यौ पाशाङ्कुशधरौ पुनः । मुख्यौ हस्तौ सरस्वत्या दक्षिणो ज्ञानमुद्रितः ॥
विज्ञानपुस्तकं वामे जघन्ये दक्षिणे करे । अक्षसूत्रधरं वामे सर्वे वज्रादयः स्थिताः ॥
तुष्टेश्च पूर्ववन्मुख्यौ जघन्यौ शङ्खमम्बुजम् । कीर्तिः प्रीतिश्च शान्तिश्च वामे देवस्य संस्थिताः ॥
वामाङ्घ्रयः सुस्थिताः स्युरीषदन्येन कुञ्चिताः । ऊरुप्रदेशविश्रान्ता वामाः पुष्पधराः परे ॥
कीर्तिः स्फटिकवर्णाभा नीलाभा प्रीतिरिष्यते । शान्तिः श्यामनिभा चैव सर्वालङ्कारशोभिता ॥
पारतन्त्र्ये विधिरयं स्वातन्त्र्ये चापि पूर्ववत् । स्थिते देवे स्थिता देव्य आसीना वा यथारुचि ॥
आसीनेऽपि तथैव स्युः स्वातन्त्र्ये सिंहविष्टरे । पद्मासनस्थाः सर्वास्ताः प्रशस्ताः स्वस्तिकासने ॥
पद्मासना च पद्मा स्यात् श्रीस्तु स्यात् सिंहविष्टरे । पूर्वादौ तु दले पद्मे वासुदेवादिमूर्तयः ॥
आग्नेयादौ दले भूयः चत्वारः श्वेतकुञ्जराः । शङ्खपद्मनिधीशानावधस्तात्पादपार्श्वयोः ॥
अन्योन्यमुखमालोक्य स्थितौ लम्बोदरौ तथा । भूम्यादयो बहिर्देव्यो दिक्ष्वष्टावष्टसु स्थिताः ॥
इन्द्रादयोऽथ दिक्पाला देवीनां च बहिः स्थिताः । वलयेषु चतुर्षु स्युश्चतस्रो वेत्रपाणयः ॥
स्त्रियः स्थिताः परिष्कारैः सर्वैरेव परिष्कृताः । . . . .

Pādma "kr." XXI : 1–90*a* [*sic.*]

§ 195

श्रीर्दक्षिणे धरा वामे देव्यौ देवस्य कल्पयेत् । रतिस्सरस्वती तुष्टिर्देव्यो देवस्य दक्षिणे ॥
कीर्तिः प्रीतिश्च शान्तिश्च वामे देवस्य संस्थिताः । अष्टभिर्वा चतसृभिः द्वाभ्यां यद्वैकयापि वा ॥
विना वा देवदेवेशं सश्रीवत्सं निवेशयेत् । देवीनान्तु श्रियादानां विशेषश्चैष कल्पने ॥
रेखात्रयाङ्किता ग्रीवा हिक्कासूत्रात् स्तनस्थितिः । एकादशाङ्गुलं वृत्तं द्व्यङ्गुलं स्तनमण्डलम् ॥
चतुर्यवं चूचुकं स्यात् स्तनमण्डलमध्यगम् । अष्टादशाङ्गुलमुरः स्तनयोरपि मण्डलम् ॥
अङ्गुलैः पञ्चदशभिः परिच्छिन्नं यथा तथा । नवाङ्गुलश्च विस्तारो उच्छ्रेदश्चापि तादृशः ॥
द्वादशाङ्गुलविस्तारः स्तनयोर्मध्यमिष्यते । कृष्णमण्डलविस्तारो द्व्यङ्गुलं परिकीर्तितम् ॥
श्रोणी षडङ्गुलायामा योनिस्सार्धाङ्गुलत्रयम् । अवलानुगुणैरन्यैरम्बरैरपि भूषणैः ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

भूषयेन्मकुटं यद्वा धम्मिल्लं वा प्रकल्पयेत् । अस्वतन्त्रा यदा देव्यः द्विभुजाः पार्श्वभूमिषु ॥
चतुर्भुजास्ताः स्वातन्त्र्ये द्विभुजा वा यथामति । दक्षिणेतरभागस्था दक्षिणे पुष्पधारिणी ॥
वामेतरस्थिता देवी वामे कमलधारिणी । अन्येन चोरुविश्रान्ताः कल्पयेच्छिल्पतन्त्रवित् ॥

Bhārgava Tantra IV : 91–101

§ 196

कलार्धमानं दीर्घं च तद्वंशं गजपृष्ठवत् । स्वायामदीर्घं तत्पक्षयुगलं कुक्षिदेशगम् ॥
तदेव दैर्घ्यादर्धेन विस्तृतं हंसपक्षवत् । स्वपक्षमानाद् द्विगुणं तत्पुच्छं शतशाखकम् ॥
सपक्षमिममायामं सत्यं त्ववयवान्वितम् । सर्वेषां वित्त सामान्यं विशेषाख्यमथोच्यते ॥
ऊरुद्वयान्नयेद् ह्रासमङ्गुलानां त्रयं तथा । जङ्घाकाण्डोच्छ्रितेः कुर्याज्जङ्घाभ्यां चात्र वेष्टनम् ॥
बिम्बाख्यं मणिबन्धस्य सममूलान्महामते । जालदेशात्तदर्धेन सह चार्धाङ्गुलेन तु ॥
पादे जालं परिज्ञेयं विस्तारेण षडङ्गुलम् । शेषं सत्योदितं सर्वं सर्वेषां वित्त सर्वदा ॥
किं तु पादोज्झितौ पक्षौ दैर्घ्यात्तद्दलविस्तृतौ । एषा चोड्डीयमानानां स्वायामा पक्षविस्तृतिः ॥
पञ्चानां च परिज्ञेया स्थितानामर्धलक्षणा । एतदादाय मानं तु पुच्छभ्रूपक्षवर्जितम् ॥

Sāttvata XXIV : 227*b*–235*a*=Īśvara[1] XVII : 228–235=Śrīpraśna XIII : 143–150

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

CHAPTER FOUR

PEDESTALS

Although this is not the next concern of the *sthapati*-artisan chronologically, we take up in this fourth chapter excerpts dealing with pedestals and bases. Our selections are divided into three topical groupings—although, of course, in the longer passages, there is overlapping—the first of which is concerned with the materials used in making the pedestals upon which icons are placed. The second grouping has to do with the shapes given to pedestals to accord with the posture of the icon supported, as well as sizes in keeping with the height of their icons or in proportion to other elements. The third grouping has to do with certain technical details—decorations, various structural variations, *etc.*—that give rise to different types of pedestals.

A closing section of this chapter concerns the *prabhā*-element, that is, the arc-element that runs up from the pedestal to form a frame around the icon.

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

Concerning materials used in making pedestals

Materials from which a pedestal is made are generally to be selected with an aim to complement in some way the icon which it supports. However, there is no consistency to be found in the texts in regard to the selection of materials for a pedestal. Stone seems to be the favored material; the only base that is prescribed is one studded with or fashioned from gems. *See* §197–§202.

§ 197

प्रतिमानां तु सर्वासां पादाधारं शिलामयम् । रत्नानामपि सर्वासां लोहं कुर्यात्तु पादतः ॥

Vasiṣṭha V : 36

§ 198

लोहस्फटिककाष्ठानां प्रतिमानां यथाविधि । पादपीठं तु शैलं स्याद्रत्नजानां तु लोहजम् ॥

Sanatkumāra "Br." VII : 96

§ 199

सजातीयं हि यत्पीठं बिम्बस्य मुनिसत्तम । तदनन्तफलां विद्धि क्षेमारोग्यसुभिक्षदम् ॥
बिम्बेन सह यत्पीठं भिन्नं तच्छोभनं भवेत् । मोक्षदं कीर्तिदं चापि दद्यात्परिमितं फलम् ॥
राजनं (तं) हेमबिम्बस्य पीठं भवति शोभनम् । ताम्रजं रजतस्योक्तमीरितं तस्य शैलजम् ॥
शैलजं शैलजस्योक्तं दारुजस्यापि दारुजम् । मृण्मयस्य च दारूक्तं शैलजं दारुजस्य च ॥

Jayākhya XX : 89–92

§ 200

*पीठार्थं भिन्नवर्णां च तद्रूपां वा यथेच्छया । अङ्गाङ्गिभावगुणवद् दृषदां तु महामते ॥
काष्ठलोहमणीनां चाप्यलाभे सति वै शुभम् । सति लाभे न वै कुर्याद्वैषम्यं व्यत्ययं च वा ॥
तत्कालमेव चाहृत्य रत्नाधारां शिलां शुभाम् । पुंस्त्रीनपुंसकोत्थाभिश्शिलाभिस्स्यात्तथा (स्त्रितयं) हितम् ॥
बिम्बाख्यं विद्धि चाभावात्सर्वं बिम्बोपलात्तु वै । निषिद्धं भगवद्बिम्बं रत्नपीठमयोपलात् ॥
लक्ष्म्याद्या देवताकारास्स्वोपलाः सर्वसिद्धिदाः । . . . .

Sāttvata XXIV : 75–79*a*

* Sāttvata XXIV : 75*a* = Īśvara[1] XVII : 73*a*.

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 201

प्रतिमा यन्मयी क्लृप्ता प्रभापीठादि तन्मयम् । यद्वा सौवर्णबिम्बस्य राजतं ताम्रमेव वा ॥
लोहेन चेदुत्तमेन प्रतिमा निर्मिता भवेत् । तदनन्तरलोहेन प्रभापीठादि कल्पयेत् ॥
त्रिलोहजायामर्चायां सुवर्णं वा प्रभादिकम् । रत्नस्फटिकजानां तु प्रतिमानां प्रभादिकम् ॥
लोहजं स्मर्यते ब्रह्मन् रहस्यमिदमीरितम् । . . . .

Pādma "kr." XXXII : 33–36a

§ 202

अतो भिन्नासनारूढा स्वाश्रमे स्वाश्रमान्तरे । तस्माच्चलानामर्चानां भिन्नं पीठं शुभप्रदम् ॥
चलस्थिरविभागेन विहितं सर्व एव हि । मृण्मया लेशतः प्रोक्ताः प्रान्तपीडास्तु केवलाः ॥
इदानीं सविशेषेण वक्ष्ये भङ्गासनात्तु वै । सांप्रतं भद्रपीठानां दारुजानां च लक्षणम् ॥
व्यापकं हि यदन्येषां शैलहेमादिकात्मनाम् । द्विषट्काङ्गुलमानाच्च द्विहस्तान्तं महामते ॥
कुर्यादङ्गुलवृद्धया तु भद्रपीठगणं शुभम् । त्रिविधैरङ्गुलैः प्राग्वद्यथाभिमतलक्षणैः ॥
द्विदशाङ्गुलपर्यन्ताः सर्वे संक्षिप्तलक्षणाः । सर्वैकहस्तनिष्ठास्तु मध्यमानाः प्रकीर्तिताः ॥
अत ऊर्ध्वं द्विहस्तान्ता मानतो विततास्मृताः । आद्यार्चा क्रमशो विद्धि प्राधान्यं चोत्तरोत्तरम् ॥
फलाधिक्येन सह वै अर्घ्यपुष्पादिनार्चनात् । सप्रणालाश्चतुष्पादाः सर्वे सद्रचनान्विताः ॥
एकपादाम्बरस्था(न)ये बोद्धव्याः पार्थिवैर्विना । प्रणालरहितास्तेवै पादगात्रविभूषिताः ॥
दर्पणोदरवत्कार्याः परिशिष्टा महामते । मुक्तामालासमोपेतैरर्धचन्द्रैः सदर्पणैः ॥
कणिकाविततोपेतैः कर्णिकाकमलच्छदैः । हंसैर्विद्याधरैश्चापि संयुक्तैरन्तरान्तरा ॥
यथाशोभानुरूपेण एवं संपाद्य सांप्रतम् । बाहुल्यं भद्रपीठीयं प्रणालेनोपशोभितम् ॥
तदाराध्यस्य वै कुर्यादुत्तरेण तु सर्वदा । स्वात्मनो दक्षिणे भागे तल्लक्षणमथोच्यते ॥
विस्तृते भद्रपीठस्य तृतीयांशेन मध्यतः । पूर्वोद्दिष्टेन दैर्घ्येण श्लक्ष्णं वा रचनान्वितम् ॥
प्रोल्लसन्तं यथा भाति स्नानाभं निखनेत्ततः । समांशेनाग्रतो भागैः विभज्य सुसमैस्त्रिभिः ॥
मूलतः कण्ठदेशाद् द्वौ भागौ बाह्याद्विशोध्य च । त्रिधाग्रं मूलतः कृत्वा मध्यमं व्रजनिर्गतम् ॥
जलोपभोगकान्तोऽपि विद्धि भागद्वयोपरि । रचनोपर्यदुद्दिष्टा कार्या कर्माणिनी(?)च या ॥
मकराननरूपा सा त्याज्या कापिललक्षणा । तृतीयांशेन विस्ताराद् भूगतः साङ्घ्रिसन्ततिः ॥
समुद्गता न वै कुर्याद्बाहुल्यरचनान्विता । सर्वतोभद्रबिम्बैव मध्यतो गात्रकान्विता ॥
भूषयेद् गात्रदेशेभ्यः पुष्पैः पत्रैस्तु साङ्कुरैः । भवेच्छशिकलाकारलाञ्छनैः स्वधियाऽथवा ॥
कुर्यात्तदुत्तरे पद्मं सचक्रं केवलं तु वा । आनतं तं बहिः कुर्यादाभोगं वाननं महत् ॥
तदाननं तथेशान्ये भागान्तेन सुसंयुतम् । विधेयं च तथाभोगं दक्षिणावर्तलक्षणम् ॥

Pauṣkara XL : 70–91

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

Shape and proportions for pedestals

In general a pedestal is shaped to accommodate the icon it supports, whether the icon be standing, sitting or lying. Consequently, and in accordance with the icon's posture, one finds square, round, rectangular or oblong pedestal shapes. Should there be more than one icon on a single base, that is a '*bahubera*' group, then of course also the pedestal will be shaped to accommodate the members of the group. Regardless of the general contour of the pedestal, however, such platforms are made to resemble a lotus' pericarp surrounded by petals in full or partial bloom. The number of petals circumscribing any pedestal varies, though the numbers most often given are 8 and 12.

The vertical height of a pedestal is determined in some proportion to the height of the icon it bears. Most generally, the base is one-third the height of the icon. Its thickness, and the area it covers within the sanctuary, is to be determined in proportion to the sanctuary, or to the doors leading into it, or by one or another consideration relative to the icon or to a grid-pattern assigned to the floor-plan of the *sanctum sanctorum*.

§ 203

योनयोन्येव कुर्वीत प्रभापीठयुतान्यपि । अर्चायां तु त्रिधा कृत्वा तत्रैकं पीठमुच्यते ॥
वर्तुलं चतुरश्रं वा पूर्वोक्तं पीठमुच्यते । तथा पादसमं कुर्याद्विस्तारं तु प्रचक्षते ॥
दलं च पादमानेन अत्यर्थं समुदाहृतम् । पीठोत्सेधसमश्चैव विस्तारायाममेव च ॥

Vasiṣṭha IV : 97–99

§ 204

. . . अर्चायामं त्रिधा कृत्वा पद्ममेकेन कल्पयेत् ॥
उपानहादिपञ्चाङ्गयुक्तं वृत्तं सुखावहम् । चतुरश्रं मनोहारि विस्तारतुलितायति ॥
तृतीयभागविहितप्रभाशङ्कुद्वयाङ्कितम् । पीठोत्सेधं त्रिधा कृत्वा पद्ममेकेन कल्पयेत् ॥
दलैर्द्वादशभिर्युक्तमष्टाभिर्वा यथारुचि । तावदूर्ध्वदलोपेतं मध्ये विपुलकर्णिकम् ॥
उपच्छदसमायुक्तमीषत्फुल्लाम्बुजाकृति । पादमानं दलायामं केवलं वा सरोरुहम् ॥
पीठं वा केवलं वापि सुषिरं नैव कारयेत् । स्थितस्य कौतुकस्येदं पीठनिर्माणमीरितम् ॥

Pādma "kr." XIX : 16*b*–21 = Śripraśna XIV : 13*b*–18

§ 205

बिम्बायामे त्रिधा क्लृप्ते कार्यमेकेन पीठिकाम् । उपाहानादिभिर्युक्तं पञ्चांशैर्वर्तुलं शुभम् ॥
विस्तारतुलितायामं चतुरश्रं मनोहरम् । तृतीयांशे तु संकल्पप्रभा शङ्कुद्वयं द्विज ॥
पीठोच्छ्रायं तथा कृत्वा कुर्यादेकेन पङ्कजम् । युक्तं दलैर्द्वादशभिरष्टाभिर्वा यथेच्छया ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

तदुच्छ्रायतलं कुर्यान्मिध्यमे शुभकर्णिकम् । उपच्छन्दयुतं चैव फुल्लपङ्कजसन्निभम् ॥
अङ्गिमानं दलोपेतं केवलं वाथ पङ्कजम् । पीठं वा पद्ममथवा सुषियुक्तन्तु कारयेत् ॥
स्थितार्चा पीठसंक्लृप्तिरुदितेयं द्विजोतम । चतुरश्रयुतं वापि स्याद्वक्तायमथापि वा ॥
प्रतिमानोछ्रयं वापि तत्तृतीयांशमेव वा । आसीनस्य भवेत्पद्मं दलैर्बहुभिरन्वितम् ॥
मनोज्ञया तया युक्तं विपुलं वाथवा द्विज । प्रसव्यांघ्रिन्तु संकुञ्च्य लम्बयित्वेतरं पुनः ॥
यथोक्तमासनं देवं समध्यमितसुस्थितम् । आधारलम्बितस्याग्रे कल्पयेत्पङ्कजं द्विज ॥

Viśvāmitra XXII : 48–56 = Bhārgava Tantra IV : 111–116
= Pādma "kr." XIX : 16*b*–24

§ 206

. . . बेरोच्छ्रायं त्रिधा कृत्वा भागैकं पीठकोच्छ्रयम् ॥
पञ्चभागैकभागन्तु.....स्थानकोच्छयम् । अथवा पीठमेवं वा शृणु नारद सांप्रतम् ॥
पादपद्मं भवेत्फुल्लमष्टपत्रं सकर्णिकम् । द्वारात्पादांशविस्तारं तावदुत्सेधसंयुतम् ॥
तस्य नालं भवेद्वृत्तं चतुरश्रन्तु वा पुनः । वृत्तं शिव इति प्रोक्तं चतुरश्रं पितामहः ॥
हस्तमात्रसमायामं तन्मानं नेह उच्यते । स्थानकस्येदमाख्यातमासनस्योच्यतेऽधुना ॥
गर्भद्वारयुगाङ्गं तु पादपद्मोच्छ्रयं भवेत् । तावदायामविस्तारो पूर्ववत् शेषमुच्यते ॥
एतद्यान न शयने कार्यं नैव कदाचन । इत्युक्तं मूलबेरादिबिम्बानां लक्षणं मुने ॥
लक्षणं चासनस्यापि तवेदानीं प्रदर्शितम् । . . . .

Viṣvaksena X : 35*b*–42*a* ‖ Vasiṣṭha IV : 52–57

§ 207

वृत्तं वा चतुरश्रं वा पादपीठं तु तद्भवेत् । प्रतिमायां शिलामय्यां शिलायां च स्थितिर्भवेत् ॥
स्थाने पादशिलायां च शूलार्थं सुषिरद्वयम् । इष्टकाभिस्तथा कुर्यात्पीठिकां च शिलोपरि ॥
उत्सेधश्चापि चायामो भूमिभागप्रमाणतः । द्वाराष्टभागमथवा पादाष्टकमथापि वा ॥
प्रतिमाष्ठांशमथवा पादपीठप्रमाणकम् । वृत्तं वा चतुरश्रं वा पादपीठं यथा भवेत् ॥
वृत्ते च चतुरश्रे च पद्मं चोपरि कल्पयेत् । स्थानकेषु विधिर्ह्येष आसीने द्विगुणं भवेत् ॥
शयने तावदुत्सेधं प्रतिमायामसंमितम् । पद्मादिपीठमथवा देहलब्धाङ्गुलैः पुनः ॥
कुर्याद् द्वादशभिः प्रांशुं विस्तीर्णं द्विगुणाङ्गुलैः । पञ्चविंशद्दलयुतं यद्वा षोडशभिर्युतम् ॥
दलैर्द्वादशभिर्यद्वा युक्तमष्टभिरेव वा । अङ्गिमानवशेनैव दलानां द्राघिमा भवेत् ॥
ऊर्ध्वच्छदेन संयुक्तं ततोऽल्पदलसंयुतम् । मध्ये कर्णिकया युक्तं किञ्चित्फुल्लाम्बुजाकृतिम् ॥
दिव्ये भागे स्थितस्यैष विष्टरः समुदीरितः . . . .

Pādma "kr." XIII : 59–68*a*

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 208

बिम्बमानाद्यथापीठं कुर्याद्देवस्य तच्छृणु । चतुरश्रं तु तद्विद्धि चतुरश्रायतं तथा ॥
बिम्बोच्छ्रायसमं पीठं परितश्चैव विस्तृतम् । तदर्धेनोच्छ्रितं कुर्यादितत्सामान्यलक्षणम् ॥
चतुरश्रस्य पीठस्य कथितं च महामुने । चतुरश्रायतस्यार्थं प्रमाणमवधारय ॥
बिम्बार्धेन तु विस्तीर्णं तत्प्रमाणेन चोन्नतम् । समं देवस्य दैर्घ्येण चतुरश्रायतं तु तत् ॥
कुर्यात्तुङ्गालयस्थानां देवतानां सदैव हि । चलानां वेश्मसंस्थानां बिम्बानां पीठमन्यथा ॥
कुर्यात् स्कन्धसमं दैर्घ्यात् स्तनमानान्वितं तु वा । आपादाज्जानुपर्यन्तं विस्तारेणोच्छ्रयेण च ॥
ऊ(तद्) र्ध्वेनाथवा कुर्यात् विस्तारं चापि चोन्नतिम् । उक्तोन्नतेर्वा विप्रेन्द्र स्यादर्धेन तु विस्तृतिः ॥
तच्चतुर्भागहीनं तु त्रिभागं चार्धमेव वा । तुङ्गत्वं विहितं पीठे चलबिम्बस्य सर्वदा ॥
धातुद्रव्यस्य चाभावात् स्थिराणामेवमेव हि । कृत्वा तु तदधः कुर्यादुपपीठं प्रमाणतः ॥
त्रिभागेनाथ पीठस्य प्रणालं मध्यतो भवेत् । तन्मानेन तु तद्दीर्घं स्वमानादग्रतः पुनः ॥
त्र्यंशमानेन विस्तर्णं तस्यापि त्र्यंशमन्तरात् । खातव्यमग्रतो मूलात् तत् कुर्यान्मकराननम् ॥
वराहकूर्मवक्त्रं वा सुश्लक्ष्णमथ केवलम् । उच्छ्रायं नवधा युञ्ज्याच्चतुरश्रं तु मण्डलम् ॥
भागद्वयेन भूस्पर्शं कुर्याज्जान्वङ्घ्रिसंज्ञितम् । घण्टा(टा ?)कारं तदूर्ध्वे तु वृत्तं भागद्वयोन्नतम् ॥
वृत्तोपरि ततः कुर्यात्कण्ठभागद्वयोच्छ्रितम् । तं च भागेन भागेन परितः संप्रवेशयेत् ॥
अर्धभागेन निष्क्रान्तमेकांशेन तदूर्ध्वतः । कुर्याद्वै मेखलां विप्र भागेनार्धेन कुम्भवत् ॥
सार्धेनोपरि भागेन चतुरश्रां तु मेखलाम् । जलाधारः स विज्ञेयो द्विगुणं चोर्ध्वविस्तृतम् ॥
तल्यंशेन तुलापीठं निम्नखातेन खातयेत् । तदूर्ध्वे कमलं कुर्यान्नातिनिम्नं च नोन्नतम् ॥
देवतास्तत्र कर्तव्या दलस्थाः पूर्वचोदिताः । तासां वा पूजनार्थं तु केवलं विततच्छदम् ॥
पीठोच्छ्रायात्तु पादेन तदूर्ध्वे कमलोच्छ्रितम् । संभवे सति वै भिन्ना(न्न?)मभिन्नां (न्नं?)सत्यसंभवे ॥

Jayākhya XX : 70–88

Details of construction and decoration of pedestals

There are three excerpts given here. In the first, §209, we learn that when construction of a pedestal within the sanctuary is undertaken a pit is first dug. Into it are placed some gems (*ratnanyāsa*), over which is put a cover that also serves as a foundation for the pedestal. It may be worth noting that the pedestal spoken of here, to be constructed on top of this stone cover, is made of bricks. This passage names as "*siṁhāsana*" that type of pedestal which is decorated with lion-motifs. *Śayana*-couches are also mentioned in the closing lines.

In excerpt §210 what seem to be various options to choose from for decorating the vertical orders of the pedestal are given. All around the base, then, one may have inscribed conch-motifs, or discus-motifs, lines of *haṁsa*-swans, chains of bells, *etc.* The finished pedestal

Digitized by Google Original from UNIVERSITY OF MICHIGAN

is to have various guardian deities invoked in and around its parts ; thus the base for the icon is vibrant with divine powers and presences. The benefits that come to one who chooses certain motifs for a pedestal are alluded to in the closing verses.

In the last excerpt of this section, §211, we find certain technical names given. First is a list of 16 varieties of pedestals, and among those named are " *Anantāsana* ", " *Pakṣamandira* ", " *Kamalāṅka* " and " *Cakrabhūṣita* ". Some of the varieties seem to be combinations and mutations of these. Also found in the latter portion of this passage are names for the vertical orders of pedestals. For the most part these names suggest an analogy to the human anatomy.

§ 209

तदप्यालोड्य मासं तु तत्रैव परिवासयेत् । ततो गर्भगृहे पीठं कुर्याच्छूलसमन्वितम् ॥
हस्तमात्रां भुवं खात्वा पञ्चगव्येन सेचयेत् । नपुंसकशिलायां तु स्थापयेत् परमेष्ठिना ॥
रत्नादि विन्यसेत् तत्र ततः पुंसा पृथक् पृथक् । वज्रमौक्तिकवैडूर्यप्रवालस्फटिकादिकान् ॥
चन्द्रकान्तं महानीलं ब्रह्मरागं तथैव च । पूर्वस्यां दिशि वज्रं तु दक्षिणस्यां तु मौक्तिकम् ॥
पश्चिमायां तु वैडूर्यमुत्तरस्यां तु विद्रुमम् । आग्नेय्यां स्फाटिकं चैव नैर्ऋत्यां पुष्यकं तथा ॥
वायव्यां चन्द्रकान्तं च नीलमीशानगोचरे । मध्यमे ब्रह्मरागं च विन्यस्यैवं प्रदक्षिणम् ॥
विश्वेन प्रोक्षयेत् तोयैस्ततः प्रणवमुद्रया । निवृत्या चाक्षतांस्तत्र यथादिक्षु च विन्यसेत् ॥
तत्र पादशिलां चैव ततः सर्वेण विन्यसेत् । वृत्तं वा चतुरश्रं वा पादपीठं तु तद्भवेत् ॥
प्रतिमायां शिलामय्यां शिलां चैव विनिक्षिपेत् । शिलायामुपरिष्टात्तु शेषाणां पीठकल्पना ॥
भवेत् पादशिलायां तु शूलार्थं सुषिरद्वयम् । इष्टकाभिस्ततः कुर्यात् पीठिकां तु शिलोपरि ॥
उत्सेधश्चापि चायामो भूमिभागप्रमाणतः । द्वाराष्टभागमथवा पादाष्टकमथापि वा ॥
प्रतिमाष्टांशभागं वा पादपीठप्रमाणतः । वृत्तं वा चतुरश्रं वा पादपीठं यथा भवेत् ॥
वृत्ते वा चतुरश्रे वा पद्मं चोपरि कारयेत् । स्थाने तु पीठिका प्रोक्ता आसने द्विगुणा भवेत् ॥
उत्सेधश्चापि चायामस्तत्र पद्मासने समम् । तथानन्तासने चैव वृत्तमेव भविष्यति ॥
पीठिका किञ्चिदायामा चतुरश्रा तथोच्छ्रिता । सिंहासने तु सा प्रोक्ता सिंहैश्च विविधैर्वृता ॥
शयने तावदुत्सेधः प्रतिमायामसंमितः । प्रासादे गर्भभागं तु सप्तधा परिकल्पयेत् ॥
ब्राह्मं तु मध्यमं भागं दैविकं तदनन्तरम् । तृतीयं मानुषं चैव पैशाचं चापरं विदुः ॥
एकबेरविधिः प्रोक्तो दैविके बहुबेरकम् । मानुषं किञ्चिदाश्रित्य आसनं तु विधीयते ॥
दैवमानुषभागाभ्यां शयनं परिकल्पयेत् । केचित्तु नवधा भागं गर्भगेहस्य कुर्वते ॥
तत्रापि मध्यमं ब्राह्मं दैविकं तदनन्तरम् । तृतीयं पैतृकं भागं चतुर्थं मानुषं भवेत् ॥
पञ्चमं चापि पैशाचं भागमाहुर्मनीषिणः । प्रतिष्ठा दैविके चैव परिवारस्तु पैतृके ॥
मानुषे चायुधानि स्युः पैशाचे तु न किञ्चन । त्रिशूलं स्थापयेत् तत्र रत्नस्पृष्टं विचक्षणः ॥

Sanatkumāra " Br." VII : 105–126

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 210

अथ दार्वादिकानां तु धातूत्थानां समाहितः । रचनासन्निवेशं च सस्तम्भानां निबोधतु ॥
तथा स्तम्भविमुक्तानां भूभागाङ्घ्रिनिवेशिनाम् । बाहुल्यं च सविस्तारात्तृतीयांशसमं स्मृतम् ॥
प्रणालं तत्समं दैर्घ्याद्विस्तृतेर्वार्धसंमितम् । विभज्य सुसमैर्भागैरधमं बलवत्पुरा ॥
स्वल्पा द्वादशसंख्यैस्तु मध्यमास्तु द्विसप्तकैः । द्विरष्टसंख्यैर्विततास्तत्राद्यानां तु मध्यतः ॥
विधेयं षड्भिरंशैस्तु पीठं श्लक्ष्णं समं शुभम् । सुवृत्तं चतुरश्रं वा स्वपद्मं केवलं त्वथ ॥
चक्राम्बुरुहयुक्तं वा तदुच्छ्रायं विधीयते । अर्धभागेन बाहुल्यात्तत्सार्धं सकजस्य च ॥
समं सचक्रपद्मस्य तयोः पूर्वोक्तलक्षणम् । विहितं किंतु विप्रेन्द्र चतुरश्रस्य कल्पयेत् ॥
कोणेषु शङ्खनिर्माणं शङ्खाद्यं वा चतुष्टयम् । वर्तुलस्य न ते कार्याः तथैव कमलोद्भव ॥
चक्रपद्मवियुक्तस्य चतुरश्राश्रयस्य च । यदुक्तं चक्रपद्माभ्यां अर्धे तुङ्गत्वमब्जज ॥
न केवलस्य विहितं मन्त्रं मन्त्राः सदस्य च(?) । तदब्जं निखनेन्मध्यात् द्व्यंशं द्व्यंशं समन्ततः ॥
खातं भागं समं चैव सार्धं दैर्घ्याद्विधीयते । जलाश्रयं तु परितः खाताद्भङ्गसमं बहिः ॥
सोपवीतं च विहितं अन्तरेखाश्रयस्थिते । द्वादशांशकृतानां च इत्येषामंशकल्पना ॥
विहिता काष्ठवर्गाणां शैलजानामपि द्विज । भङ्गाद्विभक्तिभिर्भागैर्मान्त्रं यत्कल्पितं पुरा ॥
तन्मध्ये मुनिभिर्भागैः सर्वं पूर्वोक्तमाचरेत् । भागद्वयं द्वयं चैव परितो निखनेत्क्रमात् ॥
जन्माश्रयं तु भागेन सार्धेन परितः स्मृतम् । ततोर्ध्वमुक्तमानं यत्तत्र तद्विहितं तु वै ॥
विभज्य तत् षोडशधा मध्ये भागाष्टकेन वै । विधेयमखिलं प्राग्वत् भागात्पादेन वै सह ॥
परितो निखनेद् द्रोणीं ब्रह्मन् भागद्वयेन तु । जलाश्रयं तु विहितं पादोनेन द्वयेन वा ॥
आपाद्य चक्रं प्रागुक्तं कमलाद्यं यथोदितम् । नवपद्ममयीं कुर्यात् संस्थितं चार्चने विभोः ॥
यथा यथा च विस्तारं समभ्यूह्य तथा तथा । आदाय खातपूर्वेभ्यो मध्यदेशे तु योजयेत् ॥
विभक्तं भवते येन क्षेत्रं चेदम्बुजस्य च । नवानामपि पद्मानामथ मन्त्रवराश्रितम् ॥
पद्मं साधारणाज्जालं युज्यतेऽभ्यर्चितं यथा । इति विस्तीर्णभागानां विभागं हि यथोदितम् ॥
कृत्वाऽथ रचयेद्यत्नाद्बाहुल्यं मेखलादिकैः । जलाश्रयसमेनादौ तदुद्देशात्क्रमेण तु ॥
शोधयित्वानुपादेन बाहुल्यं दिक्चतुष्टयात् । त्रिचतुः पञ्च वा षड् वा ततः पुच्छाश्रितेर्भवेत् ॥
त्रिधा विभक्तं सोष्णीषं सपद्मं मेखलात्रयम् । चतुर्विभक्तेनोष्णीषं मेखलाषट्कमध्यगम् ॥
कुर्याद्वै किङ्किणीजालद्वयेन नलिनीं शुभाम् । मुनिभक्ते तु बाहुल्ये षोढा कमलसम्भव ॥
भागेनोष्णीषवर्गं तु श्लथगाश्रयवद्भवेत् । तदधः शुक्तिकाकारं सूत्रं छिन्नं विधीयते ॥
अधस्ताच्छुक्तिभागस्य वृत्तं कुर्यात्सकर्णिकम् । वृत्तासनं च विहितं चतुरश्रं समन्ततः ॥
तदधस्त्रितयं कुर्यान्मेखलानां सुलक्षणम् । सपादाश्चोक्तपादेभ्यः किञ्चित्किञ्चिद्यथाक्रमम् ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

स्थितिरन्तरसूत्रीया विभागजननी हिता । सन्त्यज्योष्णीषपीठांशं गरुडं च कृताञ्जलिम् ॥
स्ववक्त्रेणापरेणैव युक्तं पाणिद्वयेन तु । कुर्यात्पूर्वापराभ्यां वा मन्ये(ध्ये) भद्रासनस्य च ॥
गङ्गायमुनयोर्मध्ये वरुणं यादसां पतिम् । मध्यतस्तदुदग्भागे भद्रपीठस्य कल्पयेत् ॥
पार्श्वद्वये प्रमाणस्य समुद्रं रत्नपात्रधृत् । विधेयं सौम्यमूर्तिं च दिव्यैर्जलचरैः सह ॥
दिक्चतुष्कमतः शेषमापूर्यं किङ्किणीगणैः । द्रव्यजे चलबिम्बे वा अङ्गुलैः परिनिर्मिते ॥
अतोर्ध्वं तु नृपादीनां हितं नानानिवेशनम् । महाधनानां चान्येषां शुभेप्सूनां च कीर्तये ॥
नानाधर्मप्रतिष्ठानां तत्र तावत् समाचरेत् । राजा वा साधकश्चान्यो लोकदं स्वर्गदं हि यत् ॥
वृषोत्सर्गफलेनाशु निवृत्तिं तस्य कर्मणः । कृत्वा तदनु वै कुर्याद्धरेः संस्थापनं पुनः ॥

Pauṣkara XLI : 3-38

§ 211

*बिम्बानामुपविष्टानां चतुरश्रं तु तद्भवेत् । चतुरश्रायतं चैव प्रोत्थितानां सदैव हि ॥
वृत्तवृत्तायतत्वेन ह्यनयो रूपमन्यथा । याऽङ्गुलैः परमाणूत्थैराराधकमयैस्तु वा ॥
धत्तेऽर्चा तु समायामद्वाराद्वा मन्दिरोत्थितात् । तन्मानेन तु पीठस्य दैर्घ्यमर्धेन विस्तृतिः ॥
द्वारोर्ध्वाच्च त्रिरन्तानि एकपूर्वाणि वै पुरा । सन्त्यज्य द्वादशांशाद्वै अथ पीठोन्नतिस्त्रिभिः ॥
शेषेणात्रांशसङ्ख्येन प्रतिमा चोत्थिता भवेत् । अथ वा वाहनारूढा न्यूना वा मध्यमोत्तमा ॥
चतुर्भिर्द्वादशांशैस्तदुपविष्टस्य चोन्नतिः । विहिता चास्य सर्वत्र प्रतिमार्धेन विस्तृतिः ॥
तत्त्र्यंशकविलुप्ता वा चतुर्थांशोज्झिताऽथवा । परिवारवशेनैव चातुरात्म्यस्य वै पुनः ॥
अलुप्तांशं च विहितपीठायामं च सर्वदिक् । चतुर्दिग्दृग्गतस्यैव एकदिग्दृग्गतस्य च ॥
तदेव दैर्घ्यं द्विगुणं लाञ्छनैरावृतस्य च । सार्धं चानावृतस्यैव तद्बाहुल्यं पुरोदितम् ॥
चतुष्कमेकपीठानां केवलं लक्ष्मवर्जितम् । एकैकं लक्ष्मभेदेन तत्संख्यं वित्त वै पुनः ॥
अनन्तासनमाद्यं च द्वितीयं पक्षमन्दिरम् । कमलाङ्कं तृतीयं तु चतुर्थं चक्रभूषितम् ॥
एवं हि सर्वसामान्यं पीठानां हि द्विरष्टकम् । भेदभिन्नं समासेन पुनरेव निबोधत ॥
दिक्षु लक्ष्माणि पीठानां वित्त कण्ठगतानि च । अन्योन्यसन्निवेशाच्च तेषां बाह्यात्मना पुनः ॥
चक्राम्बुजाभ्यां तत्स्थाभ्यां लुप्ताभ्यामथ तत्स्थितेः । ताभ्यामन्योन्ययोगाच्च दिक्ष्वनन्तखगाश्रयात् ॥
द्विद्व्यात्मना द्व्यात्मना वा बहुत्वमवधार्यताम् । पद्मेनोर्ध्वगतेनैव द्वयं चक्रेण तद्बहिः ॥
एवं ह्यधोगतेनैव परिज्ञेयं द्वयं द्वयम् । उपरिष्टात्तु पद्माभ्यां अधश्चक्रं द्वयं द्वयम् ॥
द्वितयव्यत्ययाच्चान्यत्परिज्ञेयं मुनीश्वराः । अन्तर्बहिः स्थितिवशाच्चक्रपद्मद्वयस्य च ॥
व्यत्ययादनयोर्वित्त ऊर्ध्वभागाच्चतुष्टयम् । अधोभागादेवमेव चतुष्कमपरं तु वै ॥

* Īśvara[1] XVII : 262-299=Sāttvata XXIV : 238-273.

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

पीठानामष्टकमिदमधस्तादूर्ध्वतस्तु वा । युक्तमेकेन वै कुर्याच्चक्रेण कमलेन वा ॥
चक्राकारास्तु विहिता ह्येकभ्रमसमाश्रिताः । बहवोऽपि तलास्तद्वदीषद्वै कर्णिकान्विताः ॥
इति लाञ्छनसञ्चारो बहुधा तन्मयोदितम् । यस्मिन् प्रकृतिभूते तु पीठे तदधुनोच्यते ॥
कृत्वा द्विर्दशधा पीठं पुरायामात्समैः पदैः । एकेन चरणं जङ्घाकलशौ च त्रिभिस्त्रिभिः ॥
कण्ठवीथीमथैकेन षड्भिः कण्ठं तदूर्ध्वतः । भागेन कण्ठसूत्रं तु शुक्तिकांशत्रयेण तु ॥
उष्णीषं च तदूर्ध्वे तु कुर्यादंशद्वयेन वै । निर्गमः स्वदलेनैव विहितश्चरणस्य तु ॥
चतुर्दिक्षु महात्मानः क्षेत्रतो ह्यधिकः स्मृतः । सर्ववृत्तं घटं कुर्यात्पल्लवैर्वारकैर्युतम् ॥
परितोंशद्वयेनैव कर्णपीठं प्रवेशयेत् । अन्तःप्रवेशमेकेन वीथ्यंशेन मलस्य च ॥
कुर्याद् गलप्रवेशस्य समां सूत्रस्य निःसृतिम् । शुक्तेरधः कण्ठसूत्रभागात्पादेन निर्मितम् ॥
वदनान्तं समासेन शक्तेः सङ्कोचमाचरेत् । उष्णीषघटजङ्घानामश्रिसाम्यं यथास्थितम् ॥
घटवद्भूषयेच्छक्तिमरकैर्वाब्जपल्लवैः । तत्रोपरिष्टात्परिधिं चतुरंशकसम्मितम् ॥
सन्त्यज्य निखनेद् द्रोणीमंशनिम्नां समन्ततः । विस्तृतेर्मध्यभागेऽथ स्वभ्यंशेन च निर्गमम् ॥
तन्मानं चतुरश्रं तु पीठक्षेत्राद्विनिर्गतम् । तच्चाग्रतस्त्रिधा कृत्वा पक्षभागौ क्षयं नयेत् ॥
अनुपादेन चामूलात्सम्यक् लाङ्गलवक्त्रवत् । अग्रतो मूलदेशाच्च कृत्वादौ वै त्रिधा त्रिधा ॥
भूयस्तन्निखनेन्मध्याज्जलं याति यथा द्रुतम् । सूकराननतुल्यं तु भवत्येवं मुनीश्वराः ॥
कुर्याद्वै शङ्खसदृशं मकरास्योपमं तु वा । जलनिर्गममेतद्वै पीठेषूदितलक्षणम् ॥
न कुर्यात्कर्मबिम्बानां आशमादिमितात्मनाम् । चित्रमृत्काष्ठजानां तु चलानां तु विशेषतः ॥
तथैव चतुरश्रस्य चतुर्मूर्तिगतस्य च । प्रनालमग्रगं मूर्तेर्यतः संसिद्धिहानिकृत् ॥
प्रयोजनं विना काचित् न क्षतिस्तस्य तद्विना । सामान्यस्य तु वै यस्मादाधारस्य विशेषतः ॥
सप्रणालं भवेत्पीठमासनं च प्रणालकम् । भूरि नीरादिना स्नानं यत्र यच्छति साधकः ॥
प्रत्यहं तद्विना तत्र प्रत्यवायो भवेत्स्फुटम् । एवमेव बृहद्बिम्बं भूषितानां विधीयते ॥
धातुशैलोत्थितानां च निमित्तस्नपनार्थतः । भद्रासनगते कर्मबिम्बे तस्य समाचरेत् ॥
सततं च यथालाभं दधिक्षीरघृतादिना । तोयेन तन्नयेद्यत्नाद्भूभागं वा प्रतिग्रहम् ॥
यथा नाक्रम्यते पादैः जन्तुभिस्तन्महद्भिदम् । अतः प्रनालं विहितं निषिद्धमत एव हि ॥
जन्मान्तं वा जगत्यन्तं कैरवान्तं गलान्तकम् । पट्टिमद्यन्तलं पञ्चभेदं सर्वेषु धामसु ॥
तत्संस्थापनकाले तु देवानां दिग्द्वये हितम् । प्राक्प्रत्यगाननानां च तदुदग्दिग्गतं शुभम् ॥
उदग्दक्षिणवक्त्राणां प्राग्भागे विहितं सदा । तत्पुनर्भद्रपीठीयदेवाद्वामेऽर्थसिद्धिकृत् ॥
सदैवाराधकानां तु विलोमाद्विपरीतदम् । इत्येवं पीठलक्ष्मापि समासात्कथितं मया ॥

Īśvara[1] XVII : 262–307

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

The additional element called the 'Prabhā' or encircling arc

The decorative element that runs up from the base to form a frame around the icons is called a "*prabhā*". The etymology of this word has to do with "light" and "radiance", and so this element must in some sense be analogous to the halo-effect seen in Western religious art. In both excerpts here, §212 and §213, the *prabhā* is described as emitting light, in the first case, and depicted with three or five tongues of flame, in the second case.

As for the shape of this *prabhā* it may describe either a full circle or it may rise up straight from the base and culminate in an arch over the icon's head. Its size is in accordance with the height of the icon or icons it frames, but in every case it is to be made so as to be pleasing and beautiful.

In actual practice we encounter *prabhās* made of cardboard, wood and other foil-covered materials. However, in excerpt §213, it is stipulated—as, indeed, is also found to be the case in temples throughout India—that the *prabhā* be made of metal when the icon and its *āsana*-base are of metal construction. Normally such *prabhā*-elements require props to keep them standing upright, and these are mentioned also in §213.

As for the decoration and other details of construction, these are given briefly in §213. Here we may note that the vertical uprights of the frame are to resemble stalks—suggesting yet another kind of origin for the *prabhā*-motif.* Decorations of the frame may take the form of representations of various incarnations and *mūrti*-aspects of the Lord. Some indications of measurements are also given.

§ 212

बिम्बानुसारतो वृत्तां प्रभां वृत्तायतन्तु वा । मनोहरां विदध्याच्च तेजोराशिभिरन्वितम् ॥

Viśvāmitra XXII : 60

§ 213

. . . वृत्तां वृत्तायतां वापि प्रभां बिम्बानुसारतः ॥
कुर्यान्मनोहरां यस्मात्तेजोराशिः प्रभा मता । द्व्यङ्गुलं काण्डमानं स्यात्पुष्पक्षेत्रं तदर्धकम् ॥
अर्धाङ्गुलं भवेत् क्षेत्रं काण्डं तदनुपूर्ववत् । वेत्रं तदनुभूयोपि ज्वालामालोपरिस्थिता ॥
अर्धाङ्गुलान्तरालास्स्युर्ज्वालाः पञ्चशिखास्तथा । त्रिशिखा वा यथायोगं दक्षिणावर्तशोभिताः ॥
युग्मा वा स्युरयुग्मा वा काण्डे काण्डे प्रकल्पयेत् । दशावतारमूर्तीर्वा मीनाद्याः केशवादिकाः ॥
प्रभायाः पार्श्वयोः पृष्ठे शङ्कुनालं प्रकल्पयेत् । बिम्बे यानाधिरूढे तु कर्तव्या तोरणप्रभा ॥
अन्तर्बहिश्च दाढर्यार्थमायसं तु निवेशयेत् । बिम्बं प्रभामासनं वा लोहजं परिकल्पयेत् ॥

Pādma "kr." XIX : 27*b*-33

* In South India doorways are often decorated with leaves of banana-trees, the trunks coming down along either side of the entrance. This is invariably done at times when auspicious events take place...weddings, *etc.* It may be that this festive motif is carried over into the *prabhā*-design also.

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

CHAPTER FIVE

ICONOGRAPHICAL DESCRIPTIONS

of

Vyūhas, Avatāras, Mūrtis, and Female Deities

Strictly speaking according to Śrī-vaiṣṇava theology, the Lord is One. Yet, because of His inner Dynamic Vitality and His Creative Activity, He is comprehended by men in different modes, appearances, forms and energies. The array of shapes given to the Divine One are startlingly numerous to one casually surveying their descriptions. In this central portion of our Sourcebook we bring together the descriptions of all the shapes of the Lord as well as of His attendant deities and the subsidiary, functionary divines. But, it must be remembered, theologically these are all traceable to an issue in One Source.

Digitized by Google Original from UNIVERSITY OF MICHIGAN

In this chapter, divided into four sections after a brief introductory portion, we look at the iconographical descriptions of the *Vyūhas* (" modes "), *Avatāras* (" appearances ", " incarnations "), *Mūrtis* (" forms "), and *Devīs* (" female deities "). The next chapter, Chapter Six, turns from the most important shapes of the Lord to other forms of Viṣṇu and to passages relating to His close Attendants—namely, Ananta, Garuḍa, Viṣvaksena and Sudarśana. In the following chapter, Chapter Seven, all the passages describing the divine beings and lesser attendants that populate the precincts of the temple compound are given. The order of presentation we have followed in these three chapters has been based on two considerations: one, the hierarchical ranking actually found to operate in Śrī-vaiṣṇava (and Pāñcarātra) temples starting with the Lord at the center and moving out from there in ever-expanding circles (*āvaraṇas*, a term also—appropriately—used to refer to the " courtyards " of a temple compound) to the outermost periphery of the world of man: the other, an order provided in what is perhaps the most popular text among the *saṃhitās* of the *Pāñcarātrāgama*, the influential *Pādma-saṃhitā* (see " *kriyāpāda* ", XXII: 1–72), gives authentic literary support also for our order.

Some introductory reflections on the unity and diversity of Viṣṇu

The first ten excerpts here, §214–§223, may serve as an introduction to the theological background against which one must attempt to see all the iconographical descriptions that follow. Our remarks can at best be but indicative, however. In His Ultimate Mode of Being, the Lord is, of course, indescribable, full of all qualities, neither male nor female, having no shape or form. But, among His infinite qualities is that of Mercy. Out of His Mercy, He chooses to take forms and shapes, to make appearances, to undertake activities, *etc.*, by which He may be apprehended. These are His *Vyūha-*, *Avatāra-*, *Mūrti-* and *Śakti-*modes of revelation, as well as the other shapes and forms that attest to His Existence as the Transcendent One.

In terms of our iconographical concerns, the most sublime of His Higher Forms that can be depicted is His " *Para* "-aspect, sometimes also called Viṣṇu in the form of " Paravāsudeva ". The difficulties of depiction are readily understandable, when one considers that this Form should display all " qualities ", reveal all the Divine Decorations (*see* Chapter Eight, below), yet attest also to His Unity. Consequently, in excerpts §214–§218, we find that Paravāsudeva may be depicted with two hands or four, may be seated, standing or reclining, and may be shown alone or in company of other deities—here, as in so many collations, we find no consistency among the prescriptions for icons depicting the Divine.

Digitized by Google Original from UNIVERSITY OF MICHIGAN

In §219–§222, alluding to a number of reasons and justifications for this action, we learn that the Paravāsudeva form itself takes different modes at different times and places to undertake different activities associated with creation, preservation and destruction—and that these may be iconographically distinguished from one another by the color given and the weapons held, *etc.* There are four of these different (*Vyūha*) modes, and while they are spoken of in general terms here, they are taken up specifically in the next section of excerpts.

§ 214

वरदाभयहस्तं च द्विभुजं पद्मलोचनम् । रेखामयेन चक्रेण शङ्खेन च करद्वये ॥
अङ्कितं निर्विकारांघ्रिस्थितं परमशोभनम् । अन्यूनानतिरिक्तैः स्वैर्गुणैः षड्भिरलङ्कृतम् ॥
समं समविभक्ताङ्गं सर्वावयवसुन्दरम् । पूर्णमाभरणैः शुभ्रैः सुधाकल्लोलसङ्कुलैः ॥
रश्मिभूतैरमूर्तैः स्वैरच्युताद्यैरविच्युतम् । एका मूर्तिरियं दिव्या परास्या वैष्णवी परा ॥

Lakṣmi Tantra X : 13–16

§ 215

. . . ध्येयः परो जगन्नाथो देवोऽनन्तसमन्वितः ॥
वरदाभयदेनैव शङ्खचक्राङ्कितेन तु । त्रैलोक्योद्धृतिदक्षेण युक्तः पाणिद्वयेन तु ॥
शान्तः संवित्स्वरूपस्तु भक्तानुग्रहकाम्यया । अनौपम्येन वपुषा ह्यमूर्तो मूर्ततां गतः ॥
विश्वमाप्याययन् कान्त्या पूर्णेन्द्वयुततुल्यया । रश्मिभिर्भास्करो यद्वत् समुद्र इव वीचिभिः ॥
स्वमूर्तिभिरमुक्ताभिरच्युतादिभिरन्वितः । दीप्तिमद्भिरमूर्तैस्तु सुधाकल्लोलसङ्कुलः ॥
पूर्ण आभरणैः सर्वैर्निर्विकाराङ्घ्रिविग्रहः । ततः सुषुप्तिव्यूहस्य वक्ष्ये ध्यानमनुत्तमम् ॥
वेदकत्वेन भगवान् ब्रह्मसंवलिताकृतिः । स्तम्भवत्कर्णिकामध्ये स्थित्वा वेद्यत्वमेति च ॥
स्वयमेवोपकाराय कर्मिणां ब्रह्मयाजिनाम् । प्राग्भागादुत्तरं यावत् गुणभेदेन लाङ्गलिन् ॥
विभजत्यात्मनात्मानं वासुदेवः परः प्रभुः । अनुज्झितस्वरूपस्तु प्राग्भागे षड्गुणात्मना ॥
बलसंवलितेनैव ज्ञानेनास्तेऽथ दक्षिणे । ऐश्वर्येण च वीर्येण प्रत्यग्भागे प्रतिष्ठितः ॥
तेजःशक्त्यात्मना सौम्ये संस्थितः परमेश्वरः । . . . .

Īśvara[1] XXIV : 73*b*–83*a*

§ 216

एवं नत्वा ततो ध्यायेन्मन्त्रव्यूहं यथास्थितम् । अभ्यन्तरे विमानस्य गर्भभूमौ तु मध्यतः ॥
सरसीरुहमास्थाय संस्थितं पुरुषोत्तमम् । प्रावृड्जलदसन्दोहविलसद्दिव्यविग्रहम् ॥
सर्वदेवमयं देवं सर्वेषां तेजसां निधिम् । सर्वलक्षणसम्पूर्णं सर्वज्ञादिगुणैर्युतम् ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

Digitized by Google

Original from
UNIVERSITY OF MICHIGAN



PARAVĀSUDEVA

(*To face entry § 217, p. 113*)

Digitized by Google

Original from
UNIVERSITY OF MICHIGAN

वपुषा सुन्दरेणैव दिव्येनाविष्कृतेन च । मुञ्चन्तमनिशं देहादालोकं ज्ञानलक्षणम् ॥
प्रयत्नेन विनाऽज्ञाननाशकृद्ध्यायिनां महत् । घनकुञ्चितनीलालिदलिताञ्जनसन्निभैः ॥
कर्पूरधूसरैर्दिव्यैः पुष्पसंवलितान्तरैः । किरीटमकुटाक्रान्तैः शोभितं स्वशिरोरुहैः ॥
बालचन्द्रप्रतीकाशफालोद्यत्तिलकोज्वलम् । सुभ्रुवं सुनसं शान्तं सविलासस्मिताधरम् ॥
किञ्चिदारक्तगोक्षीरशुद्धनीलाब्जलोचनम् । शीतलैर्दृष्टिपातैस्तु जगदाप्यायकारिणम् ॥
विलसद्गण्डफलकं श्रवणोज्वलकुण्डलम् । मुखसौन्दर्यनिष्यन्दचुबुकस्थलशोभितम् ॥
विकलङ्कशरच्चन्द्रविलसन्मुखमण्डलम् । कम्बुग्रीवं पीवरांसं दीर्घबाहुं महोरसम् ॥
चतुर्भुजमुदाराङ्गं विलसत्पाणिपङ्कजम् । पीतकौशेयवसनं निम्ननाभिं तनूदरम् ॥
चारूरुयुगलं चारुजङ्घाद्वितयमुज्वलैः । मणिनूपुरभूषाद्यैः विलसत्पादपङ्कजम् ॥
दिव्यगन्धानुलिप्ताङ्गं दिव्याम्बरधरं तथा । दिव्यस्रग्वेष्टनोपेतं दिव्यालङ्कारमण्डितम् ॥
अनेकरत्नखचितकिरीटमकुटोज्वलम् । कौस्तुभेनोरसिस्थेन श्रीवत्सेनाप्यलङ्कृतम् ॥
रत्नकाञ्चनसन्मुक्तायुक्तया वनमालया । सब्रह्मसूत्रया चैव शोभितं परमेश्वरम् ॥
मुख्यदक्षिणहस्तेन भीतानामभयप्रदम् । श्रीणीतटनिविष्टेन वामहस्तेन लीलया ॥
ध्रियमाणं गदां गुर्वीं निषण्णां धरणीतले । पश्चाद्दक्षिणहस्तेन चक्रं कालानलद्युति ॥
प्रणवध्वनिगर्भं तु हिमाद्रिशतशोभनम् । शङ्खं वामकरेणापि दधानमतुलप्रभम् ॥
स्वदेहतेजस्संभूतज्वालामण्डलमध्यगम् । करुणापूर्णहृदयं जगदुद्धरणोद्यतम् ॥
अभिन्नपूर्णषाड्गुण्यविभवेनोपबृंहितम् । योगिध्येयमजं नित्यं जगज्जन्मादिकारणम् ॥
साक्षाल्लक्ष्मीपतिं देवं ध्यायेन्नारायणं प्रभुम् । एवं शयानमासीनं यानारुढमथापि वा ॥
परं व्यूहं वैभवं वा द्विभुजं वा चतुर्भुजम् । अष्टबाह्वादिकं वापि नानाभूषणसंयुतम् ॥
नानास्त्रगणसंयुक्तं रूपं भगवतस्तथा । लक्ष्म्यादिशक्तिजालं च ध्यायेद्भक्तिसमन्वितः ॥

Īśvara[1] IV : 80–102

§ 217

शङ्खं चक्रं गदां पद्मं चतुर्भिर्धारयेत् भुजैः । अर्चनीयः परो देवः शुद्धस्फटिकसन्निभः ॥
सृष्टिबीजं तथा पद्मं चक्रं स्थितिनिबन्धनम् । गदां संहारबीजं तु शङ्खं मुक्तिनिबन्धनम् ॥

Parama III : 16–17

§ 218

सुवर्गाद्यायुधानान्तु विन्यासं मुनिसत्तम । परमात्मभावार्थं(च) प्रथमं शृणु नारद ॥
श्वेतपर्वतसन्निभं भक्तिदशं(?)गरुत्मनि संस्थितम् । सर्वदेवनमस्कृतं कमलासनाद्यभिपूजितम् ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

सर्वभूषणभूषितं द्विचतुर्भुजं द्विपदं मुने । स्वात्मदेहविराजितं कनकप्रभमम्बरं दधत् ॥
इतिध्यायन्मुनिश्रेष्ठ सर्वदेवमयं ततः । ध्यायन्तोत्पाद्यते तस्य सम्यग्ज्ञानं तु नारद ॥
इति ते दर्शितं साक्षान्मूर्तन्तु परमात्मनः । अस्य मूर्तस्य वक्ष्यामि विन्यासश्चायुधस्य च ॥
अस्य दक्षिणहस्ताग्रे चक्रश्चाधःस्थितस्य च । स्वागतावस्थितो हस्तपद्मं वा हरिनारद ॥
अधःस्थितस्य हस्ताग्रे चाक्षमालान्तु विन्यसेत् । एवं दक्षिणहस्तानां वामपार्श्वस्य चोच्यते ॥
वामपार्श्वस्य हस्तानां चोर्ध्वशङ्खं वरप्रदम् । सगदाकटिहस्तं स्यादित्थन्तु परमात्मनः ॥

Viṣvaksena XI : 1–8

§ 219

प्राच्यां सितेन वपुषा सूर्यकान्त्यधिकेन तु । व्यक्तिमभ्येति भगवान् वासुदेवात्मना स्वयम् ॥
पद्मरागसमानेन तेजसा समनन्तरम् । उदेति दक्षिणस्यां वै प्रभुस्सङ्कर्षणात्मना ॥
घर्मांशुरश्मिसंतप्तशतधामाधिकेन तु । रूपेण पश्चिमस्यां च व्यक्तं प्रद्युम्नसंज्ञया ॥
शरद्गगनसंकाशवर्णेन परमेश्वरः । समास्त उत्तरस्यां चाप्यनिरुद्धात्मना ततः ॥

Sāttvata IV : 8–11

§ 220

पुनरप्यययोगेन प्रागुदङ्मध्यमे दले । सितकृष्णेन वपुषा चानिरुद्धं स्मरेत् प्रभुम् ॥
उदक्पश्चिममध्यस्थे प्रद्युम्नं भावयेच्छदे । रूपेण कृष्णपीतेन ह्यप्ययावसरे तु वै ॥
प्रत्यग्दक्षिणमध्यस्थे पीतरक्तवपुर्धरम् । स्मरेत् सङ्कर्षणं देवं प्रतिस्रोतः क्रियाविधौ ॥
मध्ये प्राग्दक्षिणस्यां च सितरक्तेन तेजसा । वासुदेवो जगन्नाथो भावनीयो महामते ॥
अतिशुद्धाशयत्वेन स्फटिकोपलवद्विभुः । स्थानभेदं समासाद्य स चकास्ति द्वयात्तु वै ॥
गृह्णाति शबलं रूपमुपसंहारलक्षणम् । . . . .

Sāttvata V : 22–27*a*. Īśvara[1] XXIV : 130–133

§ 221

चातुरात्म्यं तदाद्यं वै शुद्धसंविन्मयं महत् । वह्न्यर्केन्दुसहस्राभमानन्दास्पदलक्षणम् ॥
बीजं सर्वक्रियाणां च द्विकल्पानां पदास्पदम् । चातुरात्म्यं तु तद्विद्धि द्वितीयममलेक्षण ॥
नित्यं नित्याकृतिधरं तेजसा सूर्यवर्चसम् । भिन्नं सितादिभेदेन चोर्ध्वाधस्संस्थितेन च ॥
कैवल्यभोगफलदं भवबीजक्षयङ्करम् । चातुरात्म्यं तृतीयं तु सुधासन्दोहसुन्दरम् ॥
स्थित्युत्पत्तिप्रलयकृत् सर्वोपकरणान्वितम् । प्रकृतिं स्वामधिष्ठाय समुदेत्यस्तमेति च ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

*चतुर्थं विद्धि तद्यस्य विश्वं तिष्ठति शासनात् । धत्ते सितादिकं रूपं चतुर्धा यत्कृते युगे ॥
रक्ताद्यं सितनिष्ठं च त्रेतायां हि महामते । पीतं कृष्णं सितं रक्तं संप्राप्ते द्वापरे युगे ॥
कलौ कृष्णं सितं रक्तं पीतश्चानुक्रमेण तु । युगसन्ध्या चतुष्के तु बिभर्ति परमेश्वरः ॥
विभिन्नमूर्तिसामान्यं रूपं यत्तन्निबोध मे । सितरक्तं कृतान्ते तु रक्तपीतमतः परम् ॥
पीतकृष्णं च तदनु कृष्णशुक्लमनन्तरम् । भेदः प्रागुदितैर्ज्ञेय आयुधाम्बरलाञ्छनैः ॥
समत्वादन्यथाङ्केन विभागोऽत्रावधार्यते । . . . .

Sāttvata V : 82–92*a*

§ 222

. . . वनमालाधराः सर्वे श्रीवत्सकृतलक्षणाः ॥
शोभिताः कौस्तुभेनैव रत्नराजेन वक्षसि । जाग्रत्पदे स्थितं देवं चातुरात्म्यमनुत्तमम् ॥
स्थित्युत्पत्तिप्रलयकृत्सर्वोपकरणान्वितम् । दिव्यं तच्चिन्तयेद्यस्य विश्वं तिष्ठति शासने ॥

Lakṣmi Tantra X : 39*b*–41

§ 223

आदिमूर्तिः परो देवो वासुदेवः सनातनः । द्वितीया तु परा मूर्तिस्सङ्कर्षण इति स्मृतः ॥
प्रद्युम्नाख्या तृतीया तु मूर्तिरेषा सनातनी । चतुर्थी तु भवेन्मूर्तिरनिरुद्धेति संज्ञिता ॥
चतस्रो मूर्तयस्त्वेताः प्रतिष्ठाप्य पृथक् पृथक् । आसने शयने याने प्रतिष्ठाप्याः पृथक् पृथक् ॥
वासुदेवः परा मूर्तिः स्थापनीया द्विजोत्तमैः । द्वितीया स्थाप्यते मूर्तिः क्षत्रियैः मोक्षकाङ्क्षिभिः ॥
प्रद्युम्नाख्या तु विप्रेन्द वैश्यैस्स्थाप्या मुमुक्षुभिः । शूद्रैः संस्थाप्यते मूर्तिरनिरुद्धो जगद्गुरुः ॥
भेदैस्त्रिभिस्त्रिभिर्विप्र एकैको भिद्यते पुनः । वर्णास्त्रन्यासभेदेन भेदाश्च परिकीर्तिताः ॥

Viṣvaksena XI : 143–148

The four Vyūha-Modes described

The four *Vyūha*-modes of Paravāsudeva (=Viṣṇu) have the following names: Vāsudeva, Saṁkarṣaṇa, Pradyumna and Aniruddha. These names are usually maintained in this order inasmuch as it was in this order that the modes became manifest—although strictly speaking these modes appeared simultaneously.

Vāsudeva is described as 4-armed, bearing the *cakra*-discus, *śaṅkha*-conch, *gadā*-mace and *padma*-lotus; in some cases, however, He may extend the "*abhaya*"-*hasta* in place of

* *cf.* Īśvara[1] XXIV : 142–146

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

the lotus and hold a palm-leaf book in place of the mace. His color is lustrous or white, and He is usually dressed in yellow. *See* §224–§232.

Saṁkarṣaṇa, also four-armed and holding the same weapons, is distinguished by the order in which these objects are held in the various hands, although he may also be shown holding the *lāṅgala*-plow and *musala*-pestle or *astra*-arrows and *khaḍga*-machette in place of the lotus and mace; his color is usually light or pink, and He is usually dressed in blue. *See* §233–§244.

Pradyumna, described in excerpts §245–§253, is normally shown to be reddish in color, wearing a red-colored garment. In His hands, in addition to the *śaṅkha* and *cakra*, He may wield either the *śārṅga*-bow and *astra*-arrows or the *khaḍga*-machette and *śūla*-trident or the *gadā*-mace and *padma*-lotus or else extend the "*varada*" and "*abhaya*" hand-gestures.

Aniruddha is to be depicted as black in color, wearing yellow garments. His four hands hold either *śaṅkha*, *cakra*, *daṇḍa* (=*gadā*) and *padma* or else *śārṅga* and *astra* along with "*varada*" and "*abhaya*" hand-gestures. As in the case of all the others, He may sometimes be found with His Consort(s). *See* §254–§264.

In regard to the colors given in these specific passages the meticulous reader may wish to compare them with the general injunctions found earlier, in §151, above in Chapter Two.

The four *Vyūha*-modes are a hallmark of Śri-vaiṣṇava theology; the main place where these are found depicted iconographically nowadays is on the directional facets of *vimāna*-towers—Vāsudeva facing East, Saṁkarṣaṇa facing South, Pradyumna facing West and Aniruddha facing North.

§ 224

वासुदेवो गदाशङ्खचक्राम्बुजधरस्स्मृतः । . . . .

Mārkaṇḍeya VIII : 10*a*

§ 225

वासुदेवः शङ्खचक्रकञ्जकौमोदकीधरः । . . . .

Garuḍa [*ms.*]

§ 226

तत्राद्यं भगवद्रूपं हिमकुन्देन्दुकान्तिमत् । चतुर्भुजं सौम्यवक्त्रं पुण्डरीकनिभेक्षणम् ॥
पीतकौशेयवसनं सुवर्णध्वजशोभितम् । मुख्यदक्षिणहस्तेन भीतानामभयप्रदम् ॥
विद्याकोशस्तु वामेन सङ्गृहीतश्च शङ्खराट् । पृष्ठगे ह्यपरस्मिंस्तु प्रोद्यतं दक्षिणे त्वरि ॥

Īśvara[1] XXIV : 117–119

cf. Viṣṇu VI : 64–65 (*See* also Viṣvaksena XX : 141*b et passim*)

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 227

वासुदेवेति विख्यातं ततोऽन्यत् समपद्यत । वासुदेवाभिधः सोऽपि ह्येकवक्त्रश्चतुर्भुजः ॥
चक्राद्यायुधसंयुक्तस्तस्य कृत्यं निशामय । स्थित्यै चक्रं सरसिजं दधानं सृष्टये पुनः ॥
मुक्तये पाञ्चजन्यं च गदां संहृतये तथा । मयूरवर्णवत् श्यामः पीतनैसर्गिकाम्बरः ॥
स्फुरन्मकुटकेयूरकाञ्चीमञ्जीरमण्डितः । स वासुदेवो भगवान् सृष्टिस्थित्यन्तमुक्तिदः ॥

Bṛhadbrahma I : xii : 100–103

§ 228

चतुर्भुजैरुदाराङ्गैः शङ्खचक्रादिचिह्नितैः । नानाध्वजविचित्राङ्गैर्वासुदेवादिसंज्ञितैः ॥
व्यूहैः स्वं प्रविभज्यास्ते विभुर्नाम स्वलीलया । तत्राद्यं भगवद्रूपं हिमकुन्देन्दुकान्तिमत् ॥
चतुर्भुजं सौम्यवक्त्रं पुण्डरीकनिभेक्षणम् । पीतकौशेयवसनं सुपर्णध्वजभूषितम् ॥
मुख्यदक्षिणहस्तेन भीतानामभयप्रदम् । तथाविधेन वामेन दधानं शङ्खमुत्तमम् ॥
अपरेण दधानं च दक्षिणेन सुदर्शनम् । वामेन च गदां गुर्वीं निषण्णां वसुधातले ॥
संचिन्तयेत् पुरोभागे वासुदेवमितीदृशम् । . . . .

Lakṣmi Tantra X : 26–31*a*

§ 229

. . . आदिमूर्तिर्वासुदेवः पूर्वमेवोदितो मया ॥
दक्षिणोर्ध्वे गदा यस्य वामोर्ध्वे चक्रमुज्ज्वलम्। ब्रह्मेशौ पार्श्वगौ नित्यं शेषमन्यच्च पूर्ववत् ॥

Hayaśīrṣa " Ādi " XXI : 1*b*–2 [Adyar *ms.*]

§ 230

शङ्खचक्रगदापद्मधरं श्रीवत्सवक्षसम् । पीताम्बरं चतुर्बाहुं वासुदेवं विचिन्तयेत् ॥

Lakṣmi Tantra XXXVIII : 54

§ 231

सर्वालङ्कारसहितं देवदेवं परात्परम् । श्रीभूनीलाधिपं सत्यं वासुदेवं नमाम्यहम् ॥

Parāśara XIII : 99

§ 232

वासुदेवस्य वक्ष्यामि रूपं वै वायुधानि ते । गोक्षीरस्फाटिकाकारं श्यामाकृतिमथोऽपि वा ॥
पीतवस्त्रधरं वापि रक्ताम्बरमथापि वा । शङ्खचक्रगदाहस्तं सर्वाभरणभूषितम् ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

सर्वावयवसंपूर्णं चतुर्बाहुविराजितम् । सर्वालङ्कारसंयुक्तं वासुदेवं विचिन्तयेत् ॥
वक्ष्याम्यस्त्रं तु हेतीनां विन्यासं ते महामुने । अस्य दक्षिणहस्ताग्रे चक्रश्चावस्थितोऽम्बुजम् ॥
वामोर्ध्वशङ्खमन्यस्मिन् गदास्य(?)चाप्यधोमुखम् । श्रियं तु दक्षिणे पार्श्वे वामे पुष्टिं तु विन्यसेत् ॥
तुष्टिं वा वामपार्श्वे तु कारयेन्मुनिसत्तम । . . . .

Viṣvaksena XI : 9–14*a*

§ 233

सङ्कर्षणः शङ्खकञ्जचक्रकौमोदकीधरः । . . . .

Garuḍa [*ms.*]

§ 234

. . . सङ्कर्षणं गदाशङ्खवारिजं चक्रपाणयः ॥

Mārkaṇḍeya VIII : 10*b*

§ 235

. . . सङ्कर्षणमतः शृणु । गदाशङ्खाब्जचक्राणि धारयन्तं चतुर्भुजम् ॥

Pādma "kr." XVI : 37

§ 236

. . . बलदेवश्चतुर्बाहुः कुण्डलैकविभूषितः ॥
लाङ्गली मुसली देवो गदापद्मधरो विभुः । शङ्खचक्रगदापाणिः कर्तव्यो वरदोऽथवा ॥

Hayaśīrṣa "Ādi" XXI : 4*b*–5 [Adyar *ms.*]

§ 237

शङ्खचक्रगदापाणिं पीताम्बरविभूषितम् । सङ्कर्षणं न्यसेद्याम्यां दिशि बालार्कसन्निभम् ॥

Viṣvaksena XX : 142

§ 238

चक्रशङ्खगदाशूलधरं कामादिरूपिणम् । यजेत्सङ्कर्षणं देवं सर्वकामफलप्रदम् ॥

Parāśara XIII : 93

§ 239

तुषारनिचयाकारं नीलवस्त्रं चतुर्भुजम् । स्मरेत् सङ्कर्षणं सीरसौनन्दकधरं परम् ॥

Lakṣmi Tantra XXXVIII : 55

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

VĀSUDEVA

(To face entry § 232, p. 118)

Digitized by Google

Original from
UNIVERSITY OF MICHIGAN

Digitized by Google

Original from
UNIVERSITY OF MICHIGAN

§ 240

. . . सिन्दूरशिखराकारं सौम्यवक्त्रं चतुर्भुजम् ॥
अतसीपुष्पसंकाशवसनं ताललाञ्छितम् । मुख्येन पाणियुग्मेन तुल्यमाद्यस्य वै विभोः ॥
सीरं तच्चक्रहस्तेऽस्य मुसलं तु गदाकरे । दक्षिणे चिन्तयेद्भागे सङ्कर्षणमितीदृशम् ॥

Lakṣmi Tantra X : 31*b*–33

§ 241

. . . किं तु द्वितीयमूर्तेर्वै शुभे पाणितलद्वये ॥
स्फुटो रेखामयः शङ्खः सुव्यक्तं लाङ्गलं महत् । रम्येषुणा तृतीयस्य दक्षिणश्चिह्नितः करः ॥
तुर्यस्यासिवरेणैव शङ्ख आभ्यां करद्वये । अवाङ्मुखः करवशादूर्ध्ववक्त्रः स्वभावतः ॥
एतावता लक्षणेन व्यक्तिभावं गतेन च । भावस्थितिं निबध्नाति व्यूहेऽस्मिन् साधकस्य तु ॥

Īśvara[1] XXIV : 84*b*–87

§ 242

तथाविधे गदा वामे निषण्णा वसुधातले । सिन्दूरशिखराकारमेकवक्त्रं चतुर्भुजम् ॥
अतसीपुष्पसङ्काशवासोभृत्ताललाञ्छितम् । मुख्येन पाणियुग्मेन तुल्यमाद्यस्य वै विभोः ॥
सीरं तच्चक्रहस्तेऽस्य मुसलं तु गदाकरे । प्रावृण्णिशासमुदितखद्योतचयदीधिति ॥

Īśvara[1] XXIV : 120–122

§ 243

शङ्खचक्रगदापाणिं धृतश्रीवत्सकौस्तुभम् । तथा सङ्कर्षणं ध्यायेज्जातरूपसमप्रभम् ॥

Viṣṇu VI : 66

§ 244

. . . शृणु सङ्कर्षणस्य तु । बालसूर्यप्रतीकाशस्सङ्कर्षण इति स्मृतः ॥
पीतवस्त्रधरस्साक्षाच्चतुर्बाहुविराजितः । सर्वावयवसंयुक्तस्सर्वाभरणभूषितः ॥
सर्वालङ्कारसंयुक्तश्शङ्खचक्रधरस्सदा । इति साङ्कर्षणं रूपमस्य वै दक्षिणे करे ॥
ऊर्ध्वं चक्रं त्वधो हस्ते मुसलं विन्यसेत्सुधीः । वामोर्ध्वशङ्खमित्युक्तं पुण्डरीकं त्वधःकरे ॥
दक्षिणे तु श्रियं वामे पुष्टिं संस्थापयेद्बुधः । इति सङ्कर्षणश्चोक्तं प्रद्युम्नं शृणु नारद ॥

Viṣvaksena XI : 15–19

§ 245

दूर्वामरकतप्रख्यं प्रद्युम्नं च तथा स्मरेत् । . . . .

Viṣṇu VI : 67*a*

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 246

वरदाभयहस्तं च निमग्नोद्धरणक्षमम् । प्रद्युम्नं संस्मरेद्रक्तं रक्तवाससमीश्वरम् ॥

Lakṣmī Tantra XXXVIII : 56

§ 247

शङ्खचक्रसमोपेतं चतुर्बाहुविराजितम् । प्रद्युम्नं पश्चिमे न्यस्य शातकुम्भनिभं मुने ॥

Viṣvaksena XX : 143

§ 248

दरकौमोदकीकञ्जचक्री प्रद्युम्न उच्यते । . . . .

Garuḍa [*ms.*]

§ 249

प्रद्युम्नश्शङ्खचक्राभ्यां सह दण्डधरोऽब्जवान् । . . . .

Mārkaṇḍeya VIII : 11*a* *cf.* Pādma "kr." XVI : 38*a*

§ 250

पीताम्बरं चतुर्बाहुं सर्वावयवसंयुतम् । शङ्खचक्रगदापाणिं सर्वाभरणभूषितम् ॥
सर्वालङ्कारसंयुक्तमित्थं प्रद्युम्नरूपकम् । दक्षिणोर्ध्वकरे पद्ममधः कौमोदकीं न्यसेत् ॥
वामोर्ध्वाधःस्थिते हस्ते शङ्खचक्रन्तु विन्यसेत् । इत्थं प्रद्युम्नमूर्तन्ते देवर्षे वर्णितोऽधुना ॥

Viṣvaksena XI : 20–22

§ 251

चक्रशङ्खासिशूलादिधरं विद्यादिदायकम् । सर्वाभरणभूषाङ्गं प्रद्युम्नमनिशं भजे ॥

Parāśara XIII : 105

§ 252

प्रावृण्णिशासमुदितखद्योतनिचयप्रभम् । * रक्तकौशेयवसनं मकरध्वजशोभितम् ॥
सौम्यवक्त्रं चतुर्बाहुं तृतीयं परमेश्वरम् । मुख्यहस्तद्वयं चास्य प्राग्वत्तुल्यं महामते ॥
वामेऽपरस्मिन् शार्ङ्गं च दक्षिणे बाणपञ्चकम् । अपरे चिन्तयेद्भागे प्रद्युम्नमिति कीर्तितम् ॥

Lakṣmī Tantra X : 34–36

* Īśvara[1] XXV : 123–124. || Lakṣmī Tantra X : 34–36

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 253

प्रद्युम्नश्च चतुर्बाहुः शङ्खचक्रधरः प्रभुः । चक्रं दक्षिणे दद्यात् वामहस्ते धनुस्तथा ॥
शङ्खं च दक्षिणे दद्यात् गदां वामे च दापयेत् । प्रद्युम्नं कारयेद्देवं सर्वलक्षणलक्षितम् ॥
स्त्रियौ चैवास्य कर्तव्ये खड्गचर्मधरे शुभे । रतिप्रीत्योर्मध्यगतं कम्बुग्रीवं सकार्मुकम् ॥
द्विभुजं शरहस्तं वा प्रद्युम्नं कारयेत् बुधः । . . . .

Hayaśirṣa "Ādi" XXI : 6-9*a*

§ 254

अनिरुद्धो गदाशङ्खवनजारिकरो मतः । . . .

Garuḍa [*ms.*]

§ 255

. . . चक्रदण्डाब्जशङ्खाश्च अनिरुद्ध इति स्मृतः ॥

Mārkaṇḍeya VIII : 10*b*

§ 256

शङ्खचक्रगदापाणिं पीताम्बरविभूषितम् । अनिरुद्धं न्यसेत्तस्मिन्नुत्तरे नीलरूपिणम् ॥

Viṣvaksena XX : 144

§ 257

शङ्खचक्रधनुःखड्गधरं सर्वार्थदायकम् । सर्वालङ्कारसंयुक्तमनिरुद्धं यजेत्सदा ॥

Parāśara XIII : 111

§ 258

. . . अनिरुद्धश्चतुर्बाहुः कम्बुग्रीवस्सुशोभितः ॥
दक्षिणेऽस्य गदा देया शङ्खचक्रे तु वामतः । दक्षिणे च तथा पद्ममनिरुद्धस्य दापयेत् ॥

Hayaśirṣa "Ādi" XXI : 9*b*-10 [Adyar *ms.*]

§ 259

. . . अनिरुद्धोऽरिदण्डाब्जपद्मपाणिश्चतुर्भुजः ॥

Pādma "kr." XVI : 38

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 260

. . . नीलाम्बुदप्रतीकाशमनिरुद्धं तथैव च ॥

Viṣṇu VI : 67*b*

§ 261

*अञ्जनाद्रिप्रतीकाशं सुपीताम्बरवेष्टितम् । चतुर्भुजं विशालाक्षं मृगलाञ्छनभूषितम् ॥
आदिवत् पाणियुगलमाद्यमस्य विचिन्तयेत् । दक्षिणादिक्रमेणाथ द्वाभ्यां वै खड्गखेटकौ ॥
दधानमनिरुद्धं तु सौम्यभागे विचिन्तयेत् । वनमालाधराः सर्वे श्रीवत्सकृतलक्षणाः ॥

Lakṣmi Tantra X : 37–39

§ 262

शार्ङ्गं शरांश्च बिभ्राणं वरदं चाभयप्रदम् । संस्मरेदनिरुद्धं च पीतं विशदवाससम् ॥

Lakṣmi Tantra XXXVIII : 57

§ 263

पृथक्कृत्य स्वमात्मानमास्तेऽनन्तासनो हरिः । अनिरुद्धात्मको देवः श्रीभूमिभ्यां सह प्रभुः ॥
मध्ये क्षीरार्णवं श्वेतद्वीपाख्ये हेमनिर्मिते । प्रासादे सेव्यमानश्च योगिभिर्विविधैरपि ॥
चण्डाद्यैर्द्वारपालैश्च कुमुदाद्यनुजीविभिः । पक्षीन्द्रविष्वक्सेनाभ्यां सेव्यमानो मुदान्वितः ॥
श्रीवत्सवक्षा नित्यश्रीरजेयः शाश्वतो ध्रुवः । अनिरुद्धो जगत् स्वांशैरिन्द्राद्यैः परिपालयन् ॥

Bṛhadbrahma I : xiii : 183–186

§ 264

अनिरुद्धं वदामोऽथ शृणु नारद तत्त्वतः । नीलजीमूतसङ्काशं कालाञ्जनचयोपमम् ॥
शङ्खचक्रधरं देवं पीतवस्त्रं चतुर्भुजम् । सर्वाभरणसंयुक्तं सर्वावयवशोभितम् ॥
सर्वालङ्कारसंयुक्तं अनिरुद्धमतीत . . म् । अस्य वामकरे चोर्ध्वे शङ्खमन्यकरे गदाम् ॥
दक्षिणोर्ध्वे न्यसेच्चक्रमन्यत्राभयमिष्यते । अनिरुद्धं जगन्नाथं अनन्तोपरिशायिनम् ॥
श्रियं दक्षिणतः पार्श्वे पुष्टिं वामेऽस्य विन्यसेत् । शयने सति मूलार्चा द्विभुजं वा चतुर्भुजम् ॥
कल्पयेन्मुनिशार्दूल सर्वसंपत्सुखावहम् । देवस्य वामपार्श्वे तु श्रियं पुष्टिं तु विन्यसेत् ॥
अथवा कल्पयेदेवं मौलिपार्श्वे श्रियं मुने । चित्रं वाप्यर्धचित्रं वा चित्राभासन्तु वा मुने ॥
यजमानेच्छया कुर्याद्देवीनां लक्षणं क्रमात् । इत्थं श्रियादिमूर्तिं ते पूर्वपूर्वा गरीयसी ॥

Viṣvaksena XI : 23–30

* Lakṣmī Tantra X : 37–38. || Īśvara[1] XXIV : 125–126

Digitized by Google Original from UNIVERSITY OF MICHIGAN

The Avatāra—incarnations described

While the preceding *Vyūha*-modes proceed from the "*Para*" form of the One Lord He manifests Himself in terrestrial shapes as well in His "*Apara*" forms. Chief among these are the *avatāra*-incarnations of the Supreme One in animal, half-animal-half-human, and human beings. In excerpt §266, we learn that the reason God takes these visible and familiar shapes is for the welfare (*upakāra*) of the universe. In §267, we have textual evidence to support the worship of one or another of the incarnational forms in separate shrines; different expectations can be realized by devoting oneself to one or another of the incarnational forms with appropriate liturgical responses. In §269-§380 we have collated the entries from the available Pāñcarātra literature that describe the individual, popular incarnations. In the following pages we shall take up each of these incarnations briefly, one by one.

§ 265

. . . . तत्राष्टभुजमाकारं कल्पयित्वा सुवाहनम् ॥
सायुधं सपरिवारं च उदयार्थी प्रपूजयेत् । . . . .

Parama III : 125-13

§ 266

अष्टबाहुस्तदाराध्यो रक्तपद्मे जनार्दनः । वाहनेनायुधैश्चापि परिवारैश्च संभृतः ॥
अनन्तः पन्नगः प्राच्यां पश्चिमायां च पक्षिराट् । देवस्य वामतो लक्ष्मीर्दक्षिणेन सरस्वती ॥
आग्नेय्यां वृद्धिरेव स्यान्नैऋत्यां सिद्धिरुच्यते । वायव्यां मतिरुद्दिष्टा शान्तिरीशानगोचरा ॥
शङ्खं चक्रं गदा पद्मं खड्गं खेटं शरं धनुः । इत्यायुधानि देवस्य करेष्वष्टसु पद्मज ॥
उरसा कौस्तुभं रत्नं श्रीवत्सं च समुद्वहन् । लोकोपकारसिद्ध्यर्थं अनेकं रूपमास्थितः ॥

Parama IV : 79-83

§ 267

अवतारेऽथवा कुर्यादर्चनाबेरमत्र वै । अत्र किञ्चिद्विशेषोऽस्ति मत्स्यादीनान्तु नारद ॥
प्रवक्ष्यामि मुनिश्रेष्ठ शृणु मत्स्यादिकान् क्रमात् । बहिरावरणे कुर्यादवतारालयं बुधः ॥
मण्टपे गोपुरे वापि प्राकारे वा स्वतन्त्रकम् । सर्वकामप्रदं पुण्यमायुरारोग्यवर्धनम् ॥
जयलक्ष्मीविवृद्ध्यर्थं स्वतन्त्रपरतन्त्रयोः । अवतारार्चनफलं लोकेषु परिपठ्यते ॥
पर्वते वा वने वापि ग्रामे वा नगरेऽपि वा । कारयेल्लक्षणोपेतं प्रासादादीन् क्रमान्मुने ॥
स्वतन्त्रेणैव वाचास्मिन् परतन्त्रेण वा मुने । कारयेत् प्रतिमामत्र पूर्वोक्तद्रव्यसंयुतम् ॥
संस्थाप्य विधिवत्तेषां पूजयेत्तु दिने दिने । स्वतन्त्रार्चाविधाने तु मूर्तिभेदविधिं शृणु ।
बलिबिम्बोत्सवादींश्च वासुदेवादिकान् नयेत् । मूलमूर्त्यनुसारं तु कुर्याद्वाप्यवतारके ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

यजमानेच्छया चास्मिन्यथाकामं समाचरेत् । परिवाराणि सर्वाणि पूर्ववत् क्रमयोगतः ॥
कल्पयेदवताराणां स्वतन्त्रार्चाविधानके । द्वाराद्यावरणान् सर्वान् कुर्याच्चैव स्वतन्त्रके ॥
मुक्त्या युक्तिविशेषेण क्रियते शास्त्रबुद्धिमान् । एवमुक्तप्रकारेण प्रतिमां कुरुते यदि ॥
सर्वान् कामानवाप्नोति विष्णुलोकं स गच्छति । . . . .

Viṣvaksena XI : 312–323*a*

§ 268

. . . श्रीवत्सेनाङ्कितोरस्काञ्जटामुकुटसंयुतान् ॥
किरीटिनो वा कुर्वीत कर्मबिम्बांश्च लोहजान् । विष्णोरंशावताराणां कर्मार्चाद्यास्तु कौतुकाः ॥

Pādma " kr. " XVIII : 46*b*–47

Matsya

Matsya, the fish-incarnation of Viṣṇu, is generally depicted in a readily-recognizable fish shape (§269 and §276), although sometimes the representation will have a fish-like body and a human face, and occasionally it will reveal a human body with a fish-like face (§275 and §273), or it may even be a human shape (§272). Whatever shape is given, the worshipper is to recall Nārāyaṇa (§269). Matsya may be shown with one eye (=profile ?), with two or three eyes (§276) ; his color is generally white (§269 and §274) but this is not standardized (§276). He may be shown in a ferocious aspect, with jaws gaping wide (§274, also §270).

Matsya carries the discus and other weapons or emblems, depending upon the number of arms found. The " *matsya* " or other *mudrās* may also be depicted, as also certain objects may sometimes be held in his hand (*e.g.*, lotus, fire). He may be depicted as standing alone, or he may be shown with Śrī, with Śrī and Bhū, with Śrī and Bhū and Nīlā, or with an encircling entourage of eight other fish-like creatures. The walls behind where Matsya is installed may be made to resemble water (§269 and §272).

Measurements are also given (§270, §271 and §272). It is believed that certain specific benefits are derived through the worship of the *matsya*-form (§269).

§ 269

मत्स्यादि चावताराणां मदंशोद्भवरूपिणाम् । स्थापनं च समासेन प्रवक्ष्याम्यधुना क्रमात् ॥
तत्र मत्स्यावतारस्य स्थापनं कमलोद्भव । शृणुष्वैकमनाः पूर्वं सर्वपापहरं परम् ॥
सारात्सारतमं गुह्यं भुक्तिमुक्तिसुखप्रदम् । मस्त्याकृतिं महाकायं शुक्लवर्णं तु कारयेत् ॥
कच्छ(आस्य)पुच्छसमायुक्तं पक्षपादसमन्वितम् । गर्भजालसमायुक्तं शतावलिसमन्वितम् ॥
फलके वा पटे मध्ये आत्मार्थाय लिखेत् क्रमात् । परार्थे च क्रमात् कृत्वा मीलयेत्सुविचित्रितैः ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

शतपत्रमया तु (?) मत्स्यरूपं वरं तु माम् । ध्यायेन्नारायणं साक्षात्सर्वकामसुखप्रदम् ॥
अष्टायुधपरीवारं छत्रचामरभूषितम् । सर्वयोगीश्वरेशं मामनिरुद्धं जलात्मकम् ॥
ध्यायेद्देवादिसंयुक्तं आत्मार्थस्य परस्य च । एवं ध्यात्वा विधानेन ततः स्थापनमाचरेत् ॥

Viṣṇu XIV : 1-8

§ 270

. . . षड्विंशदङ्गुलायामं तदर्धेन तु विस्तृतम् ॥
दैर्घ्याष्टमांशसंयुक्तं पुच्छं कृच्छ्रं तु कारयेत् । रोहितं विवृतास्यन्तु द्वादशाङ्गुलमानता ॥
यवैकं पृष्ठरोमन्तु पुच्छोर्ध्वं क्रोडगं तथा । कृतस्यैवंविधस्येह रोहितस्य मुखोद्गतम् ॥
नारायणाङ्गं कुर्वीत आगुल्फं तन्मुखोद्गतम् । एवं नृमत्स्यं मत्स्यं वा स्थापयेद्यस्तु मानवः ॥
सर्वज्ञत्वं भवेत्तस्य सर्वापन्मुक्तिरेव च । . . . .

Hayaśīrṣa "Ādi" XX : 1b-5a

§ 271

मत्स्याकारं भवेद्यस्तु षोडशाङ्गुलमुन्नतम् । षडङ्गुलं तु वैपुल्यं मानाख्यं परिकल्पयेत् ॥

Mārkaṇḍeya VIII

§ 272

तत्र मत्स्यस्य कायश्च दैर्घ्याद्वै षोडशाङ्गुलम् । दशाङ्गुलं तु वैपुल्यान्मीनाख्यं परिकल्पयेत् ॥
शूलं मत्स्याकृतिं कृत्वा शिलामृत्काष्ठजं तु वा । अर्धचित्रेण वा कुर्याच्चित्राभासेन वा पुनः ॥
समुद्रं तु लिखेद्भित्तौ पद्मस्योपरि कल्पयेत् । पञ्चायुधान् लिखेद्भित्तौ छत्रादीन् परिकल्पयेत् ॥
नारदेनापि मनुना समभ्यर्चितमादरात् । कर्मार्चादीनि बिम्बानि सौम्यवक्त्राश्चतुर्भुजाः ॥
आसीना वा स्थिता वाऽपि शङ्खचक्रगदाधराः । . . . .

Pādma "kr." XVII : 2-6a

§ 273

चक्रशङ्खधरं देवं सर्वाभरणसंयुतम् । मत्स्यग्रीवहरिं वन्दे श्रीभूनीलादिसंयुतम् ॥

* * *

चक्रशङ्खगदापद्मशार्ङ्गबाणासिधारिणम् । विभुं खेटधरं देवं किरीटाद्यैरलङ्कृतम् ॥
श्रीवत्सकौस्तुभोरस्कं वनमालाविराजितम् । मत्स्यनारायणं वन्दे श्रीभूनीलाधिपं सदा ॥

* * *

Digitized by Google Original from UNIVERSITY OF MICHIGAN

शार्ङ्गचक्रगदापद्मशङ्खबाणासिधारिणम् । शूलवज्राङ्कुशधरं मत्स्यग्रीवमहं भजे ॥

* * *

चक्रशङ्खगदापद्मशार्ङ्गबाणासिधारिणम् । खेटवज्राङ्कुशधरं वह्निशूलधरं विभुम् ॥
किरीटहारकेयूरकटकादिविभूषितम् । श्रीभूमिसहितं देवं मत्स्यग्रीवमहं भजे ॥

* * *

वराभयगदाचक्रशङ्खबाणधनुर्धरम् । शूलखेटाम्बुजधरं वज्रपाशधरं विभुम् ॥
श्रीभूनीलाधिपं देवं अरिनाशनकारणम् । मत्स्यग्रीवहरिं वन्दे भुक्तिमुक्तिप्रदायकम् ॥

* * *

अग्निचक्रधरं देवं किरीटादिविभूषितम् । मत्स्यग्रीवहरिं वन्दे सर्वमृत्युविनाशनम् ॥
मत्स्यग्रीवमहं वन्दे परात्परमजं विभुम् । सर्वशत्रुक्षयकरं सदाशिवपितामहम् ॥

Parāśara XXVIII : 6, 20–21, 25, 27–28, 30–31, 36–37

§ 274

श्वेतवर्णं तथा ब्रह्म षडङ्गं षट्स्वरैर्न्यसेत् । व्याप्यं तद् व्यापकं चैव कुर्यान्मन्त्रेण मन्त्रवित् ॥
दंष्ट्राकरालमत्युग्रं शङ्खचक्रधरं विभुम् । मात्स्यरूपहरिं ध्यायेत्सर्वविद्याप्रदायकम् ॥

Śeṣa XXII : 14–15

§ 275

मत्स्याननहरिं देवं चक्रशङ्खधरं विभुम् । सर्वाभरणसंयुक्तं श्रीभूनीलाधिपं भजे ॥

Parāśara XV : 24

§ 276

. . . मत्स्यादीन् शृणु नारद । शतपत्रमयस्याथ पुण्डरीकस्य मध्यमे ॥
पद्मासनस्थं मत्स्याष्टपरीतं कनकप्रभम् । त्रिनेत्रं द्विभुजं चैव प्राङ्मुखं पद्मधारिणम् ॥
सर्वावयवसंपूर्णं सर्वाभरणभूषितम् । मत्स्यादिमानिनं मूर्तिमित्थमुक्तं च नारद ॥
पद्मपूर्वदले मत्स्यं राजतञ्चाथ विन्यसेत् । सौम्यदिग्दलमध्ये तु मत्स्यं ताम्रनिभं न्यसेत् ॥
नैर्ऋत्यदिग्दले मत्स्यं कृष्णवर्णं तु विन्यसेत् । वारुणे दिग्दले मत्स्यं रक्तवर्णं तु विन्यसेत् ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

MATSYA

(To face entry § 275, p. 126)
(See Appendix II)

Digitized by Google

Original from
UNIVERSITY OF MICHIGAN

Digitized by Google

Original from
UNIVERSITY OF MICHIGAN

वायव्यदिग्दले मत्स्यं श्यामवर्णं तु विन्यसेत् । सौम्यदिग्दलमत्स्यं तु ताम्रवर्णं तु विन्यसेत् ॥
ईशानदिग्दले मत्स्यं रक्तवर्णं तु विन्यसेत् । इत्यष्टदिग्दलस्थैस्तु मत्स्यैरभिमुखीकृतम् ॥
मत्स्याभिमानिनं मूर्तं तव स्नेहात्प्रदर्शितम् । अस्य दक्षिणपार्श्वे तु श्रियं पुष्टिं परत्र तु ॥

Viṣvaksena XI : 31–38

Kūrma

The incarnation of Viṣṇu as Kūrma is generally recognized by the tortoise form, the icon being either a full tortoise (§280, §281, §282 and §285) or a human body having a tortoise head (§280 and §284) or a tortoise body with a human head (§280). The favored color seems to be black (§277 and §278), although it is permissible to show Kūrma as a golden color (§279, §281 and §283). The figure may be surrounded by a halo (§280), or it may be depicted as within the disc of the moon (§284).

The number of limbs varies, and so do the weapons carried (§278, §283 and §284), the decorations borne (§285 and §286); Kūrma may also be shown with the *svastika*-sign and displaying the "*kūrma*"-*mudrā*. His open mouth (§281) may suggest that he is reciting the Vedas; it may also afford space for an emergent Govinda to be placed (§280). Kūrma may be shown with one eye (=profile ?—§277), with two or three eyes (§278). His general aspect may be ferocious (§283) or benign (§284), but in either case the *utsavabera*-icon should be depicted as benign (§279).

Kūrma may be displayed with Śrī and Puṣṭi (§278) or with Śrī and Bhūmi (§284); he may (also ?) be surrounded by twelve other tortoise forms (§278). The background against which he is placed may be painted to reveal him carrying the mountain and/or in company with other deities (§279). Specific as well as proportionate measurements are available (§279, §280 and §282).

§ 277

अथ वक्ष्ये समासेन कूर्मस्थापनमब्जज । सर्वकामप्रदं पुंसां भुक्तिमुक्तिफलप्रदम् ॥
महाजलार्णवे ध्यात्वा तत्र स्थापनसंमतः । तन्मध्ये तु ततः पद्मं ध्यात्वा केसरमन्त्रिणम् ॥
तन्मध्ये तु तदा ध्यायेत्कूर्माकारमनुत्तमम् । एकचन्द्रं महाकायं कृष्णवर्णं जगत्पतिम् ॥
छत्रचामरसंयुक्तं सर्वालङ्कारशोभितम् । परिवारसमायुक्तं ध्यायेत्तं कूर्मरूपिणम् ॥
स्वगृहे वाऽऽलये वापि आत्मार्थस्य परस्य च । ध्यात्वा संपूजयेद्बिम्बं कच्छपेन्द्रं सनातनम् ॥
मत्स्याकारस्य कूर्मस्य बिम्बं पश्चिमभागतः । कारयेद्बिम्बमन्यानि गलान्तपरिमाणकम् ॥
तद्बिम्बाग्रे चतुर्वक्त्र पादहस्तसमन्वितम् । शङ्खाद्यायुधसंयुक्तं कृत्वा स्थापनमारभेत् ॥

Viṣṇu Tantra XV : 1–7

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 278

विन्यसेन्मत्स्यरूपं वै कूर्ममूर्ति ततश्शृणु । कालाञ्जनगिरिप्रख्यं त्रिणेत्रं स्वाङ्गशोभितम् ॥
चतुर्बाहुयुतश्चैव सर्वाभरणभूषितम् । अञ्जनभूभृत्सन्निभमूर्ति द्वादशपत्रे वर्ततमाब्जे ॥
पद्मसमाख्यस्वासनयुक्तः कूर्मशरीरी विष्णुरिहास्ते । शङ्खचक्रधरश्चैव पद्महस्तस्तथैव च ॥
ततो द्वादशकूर्मा हि देवोऽप्यभिमुखीकृतः । अस्य दक्षिणहस्तेन चक्रपद्मे करान्तरे ॥
वामोर्ध्वशङ्खमित्युक्तं पद्मश्चाधःस्थिते करे । प्राक्क्रमतोऽब्जद्वादशपत्रारूढशरीरैः द्वादशकूर्मैः ॥
अञ्जनवर्णप्रख्यशरीरैरावृतमूर्तिः स्वाभिमुखस्थैः । अस्य दक्षिणपार्श्वे तु श्रियं विन्यस्य बुद्धिमान् ॥
पुष्टिं वामे न्यसेदेवं कूर्ममूर्तिरुदाहृतः ॥ . . . .

Viṣvaksena XI : 39-45*a*

§ 279

कूर्मवत्कूर्ममूर्तिं तु कल्पयेत्कमलासन । तपनीयनिभं कूर्मं विस्तारं द्वादशाङ्गुलम् ॥
शिलामृत्काष्ठजं पद्मपीठे संस्थापयेत्प्रभुम् । आभासे वार्धचित्रे वा क्षीरोदमथनं लिखेत् ॥
कच्छपेन्द्रस्य पृष्ठे तु मन्दरं पर्वतोत्तमम् । तस्य दक्षिणपार्श्वे तु वासुदेवं सनातनम् ॥
मन्दरस्य गिरेरग्रे न्यस्तहस्तं जगद्गुरुम् । वामपार्श्वे गिरेस्तस्य ब्रह्माणं सहशङ्करम् ॥
वासुकेः पूर्वभागं तु गृह्णन्त्यसुरराक्षसाः । पुच्छभागं तु गृह्णन्ति वासुकेर्देवतागणाः ॥
कर्मार्चादीनि बिम्बानि सौम्यवक्त्राश्चतुर्भुजाः । . . . .

Pādma "kr." XVII : 7-12*a*

§ 280

. . . दैर्घ्यं त्रितालसंयुक्तं तदूर्ध्वं परिमण्डलम् ॥
चतुश्चरणसंश्लिष्टं चतुरङ्गुलमात्रया । कपोलद्वयमध्यात्तु गोविन्दन्तु समुद्धृतम् ॥
कृत्वा चागुल्फपर्यन्तमुद्गच्छन्तं सुरोत्तम । नृकूर्मं कारयित्वैवं कूर्मं वा स्थापयेत्तु यः ॥
स्ववंशोत्तरणं तस्य जायते मुक्तिरेव च । . . . .

Hayaśīrṣa "Ādi" XXIII : 5*b*-8*a*

§ 281

कूर्मात्मा कूर्मवद्देवो ध्यातव्यस्त्वथ लाङ्गलिन् । द्रवत्कनकवर्णाभस्वसामर्थ्यजलाश्रयः ॥
शक्त्यादिककलाद्वन्द्वद्वितयाङ्घ्रिः सनातनः । शान्त्यादिककलाढ्यश्च प्रोद्गिरंस्तु श्रुतित्रयम् ॥
अतसीपुष्पसङ्काशः शङ्खचक्रगदाधरः । मखोपकरणाङ्गश्च निमग्नोद्धारणक्षमः ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

स्वशक्तिविभवाधारमिच्छाज्ञानक्रियार्चिषम् । नानाविशेषविज्ञानस्फुलिङ्गोर्मिसदोदितम् ॥
दारयन्तं स्थितं हार्दमनूनं मोहमुल्बणम् । नदन्नादमनाख्येयं तमजं परमेश्वरम् ॥

Īśvara[1] XXIV : 260–264

§ 282

कूर्मवत्कूर्ममूर्तिन्तु षडष्टाङ्गुलविस्तृतम् । आननन्तु षडङ्गुल्यं कूर्मश्चैव षडङ्गुलम् ॥
शेषन्तु गलभागेन कल्पयेच्छिल्पिवित्तमः । शिलाकृत्वाष्टजं पद्मं पीठे संस्थापयेत्प्रभुम् ॥
ममार्चादिषु बिम्बानि सौम्यवक्त्रं चतुर्भुजम् । . . . .

Mārkaṇḍeya VIII

§ 283

आधायोल्लिखिताकारमाधाराख्यं स्मरेत्प्रभुम् । कूर्ममुद्रान्वितं कूर्मवक्त्रं निष्टप्तरुक्मभम् ॥
शङ्खपद्मधरं कूर्मं स्वस्तिकेन स्थितं स्मरेत् । मुञ्चन्तमनिशं तेजो देहाद्भीषणमुत्कटम् ॥

Pauṣkara XXIV : 22–23

§ 284

शङ्खचक्रधरं देवं चन्द्रमण्डलमध्यगम् । श्रीभूमिसहितं देवं किरीटादिविभूषितम् ॥
श्रीवत्सकौस्तुभोरस्कं वनमालाविराजितम् । गदापद्मधरं शान्तं कूर्मग्रीवमहं भजे ॥

* * *

चक्रशङ्खाभयवरगदापद्मादिधारिणम् । शार्ङ्गबाणासिखेटाग्निशूलपाशधरं विभुम् ॥
किरीटादिधरं शान्तं परशुं मुसलं हलम् । कूर्मग्रीवमहं वन्दे चन्द्रमण्डलमध्यगम् ॥

Parāśara XXIX : 5–6, 12–13

§ 285

चक्रशङ्खधरं देवं कूर्मरूपं हरिं विभुम् । सर्वाभरणभूषाङ्गं श्रीकूर्ममनिशं भजे ॥

Parāśara XV : 123

§ 286

. . . शङ्खचक्रधरं देवं सर्वाभरणभूषितम् ॥
सर्वाकारमजं देवं कूर्मरूपं हरिं भजे । . . . .

Śeṣa XXII : 33*b*–34*a*

Digitized by Google Original from UNIVERSITY OF MICHIGAN

Varāha

Varāha, the boar-incarnation of Viṣṇu, may have an all-over boar shape (§287) but he is more often shown with a boar-face only and a human body (§291, and §292 ; *see* also §288 and §289). His ears should be " curved " (§288), his jaws large (§287), and at least his *karma-bera*-likeness benign (§290 and §291). His coloring will preferably be crystal (§290 and §291) or white (§289, §290 and §291) or " luminous " (§289), but he may also be black (§287, §290 and §291), green (§292) or blue (§289). His body is said to represent the sacrifice (§287 and §295). Specific measurements are available (§288 and §293).

The number of arms varies from four (§290, §291, §292 and §293) to sixteen (§289). He will be showing at least the *śaṅkha* and *cakra* (§288, §289, §290, §291, §292, §293, §294 and §295) and in some cases also the *gadā*-club (§288, §291, §292 and §293). Other weapons are mentioned as appropriate for other hands (either eight or sixteen, according to §289) ; as well, he may sport the *upavīta*-cord (§290) and display the *śrīvatsa*-mole (§290 ?, §291 and §294). He is also shown with a *kirīṭa*-crown (§289 and §291).

While one of his right hands will touch his waist (§290, §292 and §294), with another of his limbs he will be shown holding, lifting, embracing or otherwise touching Earth (§288–§293)—during which pose he may also be sniffing her with his snout (§289 and §290), touching his nose to her breast (§291), and/or touching her thigh (§290). Earth has certain characteristics of her own to be maintained (§290, §291 and §292). Varāha thus with Bhūmi may also be shown with Lakṣmi (§293), or with all three consorts (§289 and §295). His foot may be placed on the cosmic serpent (§288 and §289).

As the first excerpt, §287, indicates, when Varāha lifts high the Earth it is to be recalled that thus the Lord lifts man from his sinful state.

§ 287

. . . तं यज्ञपुरुषं (वपुषं) ब्रह्म वासुदेवमजं हरिम् ॥
ध्यायेद्वै सूकरात्मानमञ्जनाद्रिसमप्रभम् । यज्ञाङ्गचिह्नितार्ङ्घ्रि च महाव्याहृतिदंष्ट्रिणम् ॥
भूर्भुवस्स्वश्शरीरं च शब्दब्रह्मैकमानसम् । निर्णुदन्तं प्रपन्नानामविद्यापङ्कमञ्जसा ॥
वैद्येन पोत्रप्रान्तेन त्वक्षयेनामलेन च । वासनावासितानां च जीवानां भवशान्तये ॥
महाविभूतिर्भगवान् पूर्णषाड्गुण्यविग्रहः । स्वकराब्जान्तराद्ब्रह्म तत्त्वादादाय चाञ्जलिम् ॥
करोति सेचनं दोषं दधानां च स्वतेजसा । स्थूलरूपेण तमजं बहिराराधनाविधौ ॥
आध्मातं वायुना यद्वन्निर्धूमाङ्गारपर्वतम् ॥ . . . .

Sāttvata XII : 46*b*–52*a*

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 288

. . . वक्त्रं कलाष्टकायामं प्रोथमस्य द्विगोलकम् ॥
हनू सप्ताङ्गुले चास्य सृक्किण्यौ द्व्यङ्गुले मते । सप्ताङ्गुलं मुखं प्रोक्तं वक्त्रौ सार्धकलौ द्विजौ ॥
नासारन्ध्रं भवेन्नेत्रं यवहीनेऽक्षिणी मते । किञ्चिद्वक्त्रे स्मृते श्रोत्रे द्विगोलकसमायते ॥
चतुष्कलं कर्णमध्यं तदर्धं च तदुच्छ्रितम् । वस्वङ्गुला भवेद् ग्रीवा नेत्रैकं चोल्बणं तु सा ॥
शेषं नृसिंहवत्कार्यं वराहस्य तु विग्रहम् । शेषाहिविधृतं पादं बाहुना धारयन् धराम् ॥
शङ्खं वामेऽथवा लक्ष्मीं गदाचक्रे तु दक्षिणे । एवं नरवराहन्तु कृत्वा यः स्थापयेन्नरः ॥
भवोदधिसमुत्तारं राज्यं चाहतकण्टकम् । प्राप्नुयान्नात्र सन्देहो ह्यमुत्र दिवि वा भुवि ॥

Hayaśirṣa "Ādi" XXIII : 18b-24

§ 289

चक्रशङ्खगदापद्मधनुर्बाणासिधारिणम् । वज्रायुधधरं देवं वन्दे वाराहरूपिणम् ॥

* * *

चक्रशङ्खाभयवरफणिवालाग्रधारिणम् । श्रीमदादिवराहं तं देवं जानुधरं विभुम् ॥
भजे भूमिधरं वन्दे फणमूर्ध्नि स्थितं हरिम् । वराहग्रीववेषाढ्यं किरीटादिविभूषितम् ॥

* * *

शङ्खचक्रगदापद्मधनुर्बाणासिधारिणम् । शूलवज्राग्निखेटादिपाशाङ्कुशधरं विभुम् ॥
सदा वराभयहलधरं नीलोत्पलप्रभम् । वन्दे वराहग्रीवं तं सर्वाभरणभूषितम् ॥

* * *

चतुश्चक्रधरं देवं किरीटादिविभूषितम् । वराहनरसिंहं तं भजे राज्यजयप्रदम् ॥

* * *

गदाचक्रधरं देवं सर्वाभरणभूषितम् । श्रीभूनीळाधिपं देवं भूवराहमहं भजे ॥

* * *

अग्निचक्रधरं देवं सर्वाभरणभूषितम् । ध्यायेद्वराहग्रीवं तं भयरोगार्तिनाशनम् ॥

Parāśara XXX : 10, 13–14, 17–18, 21, 26, 32

§ 290

. . . वाराहं शृणु वक्ष्यामि राजावर्तनिभं मुने ॥
शङ्खवर्णन्तु वा श्यामं सर्वलक्षणलक्षितम् । नवयौवनसम्पूर्णां सर्वावयवसुन्दरीम् ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

नारीणामुत्तमां देवीं सुकेशां पङ्कजाननाम् । विद्युल्लताप्रभां वापि श्यामां वापि कृताञ्जलिम् ॥
सर्वालङ्कारसंयुक्तां निमग्नां जगतीं शुभाम् । वामदोष्णा समालिङ्ग्य प्रोद्धृत्यालिङ्ग्य सुस्थिताम् ॥
वामेन बाहुनाश्लिष्य जिघ्रन्देवीमुखं प्रभुम् । वामेनालिङ्ग्य हस्तेन तस्याः स्कन्धं तपोनिधे ॥
गृहीत्वोरु दृढं तस्या दक्षिणेन करेण च । उदाराङ्गं चतुर्बाहुं शङ्खचक्रधरं प्रभुम् ॥
दक्षिणे तु न्यसेच्चक्रं वामे शङ्खं तु विन्यसेत् । इत्थं वराहरूपं ते प्रथमं परिपठ्यते ॥
अथवा क्रोडवक्त्रश्च महाकायं सुदंष्ट्रकम् । सर्वलक्षणसंपन्नं श्रीवत्साङ्कितवक्षसम् ॥
तिर्यक्संस्थितसूत्रश्च रूपं वैधं महात्मनः । वराहं मध्यमं प्रोक्तं संक्षेपात्तु तपोनिधे ॥
अथवा शृणु वक्ष्यामि रूपं वाराहरूपिणम् । उद्धृत्य नासिकातुल्यं वामहस्तस्य कोर्परम् ॥
वामपार्श्वार्धभागे तु निरीक्षन् कोर्परं सदा । कटिप्रदेशमालम्ब्य पाणिना दक्षिणेन तु ॥
एवं रूपं महाविष्णोः शङ्खचक्रधरस्य च । अस्य दक्षिणहस्ताग्रे चक्रं शङ्खं परेव (ण) हि ॥
इति वराहमूर्तस्य त्रिधा रूपन्तु दर्शितम् । एवमुक्तस्य रूपस्य त्रिधाकारस्य नारद ॥

Viṣvaksena XI : 45b–57

•

§ 291

विष्णोर्महावराहस्य निर्माणमधुनोच्यते । नखात्कण्ठपर्यन्तं वक्त्रसृष्टिर्वराहवत् ॥
चतुर्भुजं शङ्खचक्रधारिणं स्फटिकप्रभम् । पीतवस्त्रं मुकुटिनं श्यामलाकृतिमेव वा ॥
सतिर्यक्संस्थितं सूत्रे दैविके स्थापयेत्पदे । शयनं यानकं चैव वराहस्य तु नेष्यते ॥
स्थापयेदेकबेरं तु शङ्खचक्रगदाधरम् । आसनेऽपि तथा रूपं ब्रह्मस्थाने ऋजुर्भवेत् ॥
दिव्ये तु स्थानके चैव ऋज्वङ्गं नैव कारयेत् ॥ उद्धृत्य धरणीं देवीं वामहस्तस्य कूर्परे ॥
कटिप्रदेशमालम्ब्य पाणिना दक्षिणेन तु । जिघ्रन् देव्याः स्तनं देवः श्रीवत्साङ्कः किरीटवान् ॥
कृताञ्जलिपुटा देवी श्यामवर्णा सुमध्यमा । कल्पनीया मही देवी देवे तिष्ठति पद्मज ॥
आसीने तु तथासीना पुष्पहस्ता वसुन्धरा । वामपार्श्वे प्रतिष्ठाप्या वराहवपुषो हरेः ॥
आरोपितव्या देवस्य वामोत्सङ्गे वसुन्धरा । आलिङ्गिता च हस्तेन वामेन प्रेक्षितानना ॥
कर्मार्चनादिप्रतिमा आसीना वा स्थितापि वा । देव्या सह क्रोडवक्त्रा सौम्यवक्त्रा चतुर्भुजा ॥

Pādma "kr." XVII : 12–21

§ 292

निर्माणं च वराहस्य कथयामि यथातथम् । पुरुषाकारं वपुष्मन्तं वक्त्रं वाराहवत् भवेत् ॥
शङ्खचक्रगदाधारि चतुर्भुजसमन्वितम् । स्फटिकाभं महाकायं एतद्वाराहलक्षणम् ॥
पीतवस्त्रं मुकुटिना मेचकाकारमेव वा । देवं च समुपद्धृत्य वामहस्तेन कूर्परे ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

आलम्ब्य भानुभागे तु पाणिना दक्षिणेन तु । आसीने तु तथारूपं ब्रह्मस्थाने.....द्भवेत् ॥
आसीने तु तदासीना पुष्पहस्ता वसुंधरा । वामपार्श्वे प्रतिष्ठाप्य वाराहवपुषो हरेः ॥
कर्मार्चादिप्रतिमात्वासीना वा स्थितापि वा । देव्या सह क्रोडवक्त्रा सामान्या वा चतुर्भुजा ॥

Mārkaṇḍeya VIII

§ 293

चतुर्बाहुर्वराहस्तु शेषः पाणिपदे धृतः । धारयन् बाहुना पृथ्वीं धारयन् कमलामथ ॥
पादलग्ना धरा कार्या यदा लक्ष्मीर्भुजस्थिता । वराहं कारयेद्देवं शङ्खचक्रगदाधरम् ॥
सप्ततालौ प्रशस्येते नृवराहनृकेसरी । नवतालावभ्यधिकौ पुरस्तात् कथितौ तव ॥

Hayaśīrṣa "Ādi" XXIII

§ 294

कटिप्रदेशमालम्ब्य पाणिना दक्षिणेन तु । विष्णुरूपं महाकारं सुतप्तं सूकराननम् ॥
सर्वलक्षणसंपन्नं श्रीवत्साङ्कितवक्षसम् । एवं मद्विग्रहं ब्रह्मन् शङ्खचक्रधरं परम् ॥

Viṣṇu Tantra XVI : 5–6

§ 295

. . . शङ्खचक्रधरं देवं सर्वाभरणभूषितम् ॥
श्रीभूमिनीलासहितं भजे यज्ञवराहकम् । . . . . .

Śeṣa XIII : 4*b*–5*a*

§ 296

भुजाग्रे भूधरं देवं चक्रशङ्खधरं विभुम् । किरीटादिविभूषाङ्गं भूवराहमहं भजे ॥

Parāśara XV : 140

Vāmana

Vāmana, the dwarf-incarnation of Viṣṇu who conquered the evil king Mahābali and redeemed the earth and sky by so doing, is to be differentiated from the Vāmana that is recounted among the twelve *mūrti*-forms of the Lord. Both "Vāmanas" are described in the following group of excerpts—generally speaking the two-armed descriptions belonging to the *avatāra*-incarnation (§297–§300; but also including the four-armed forms described in §301 and §302), and the four-armed descriptions belonging to the *mūrti*-form. It is hoped that by having the two "Vāmanas" together, thus, they can be more easily understood to be separate and distinct beings.

Digitized by Google Original from UNIVERSITY OF MICHIGAN

The dwarf Vāmana is consistently said to be dark or black in color. With one of his two hands he may be begging for the Earth in outstretched supplication (§297, §298 and §299); in some other descriptions he is said to be carrying an umbrella (§200 and §301) and/or a small jug (§300). He carries (under one of his arms?—§297, §298 and §299) a *daṇḍa*-stick. He is said to wear an *upavīta*-cord (§297, §298, §299, §300 and §301 ?) and to have a *śikhā*-tuft (§297, and §300; *cf.* §299). In addition to a loin-cloth (§297 and §298 ?) he wears a yellow-colored garment (§297). When he is displayed in a shrine of his own, other deities may be painted on the walls—Garuḍa, Brahmā, Gaṅgā, Jāmbavān, *et. al.*

As for the *mūrti*-form of Vāmana, he asually has four arms, and bears the *śaṅkha* and *cakra* along with either the *padma* and *gadā* (§305, §306 ?, §307 and §308) or in some other combination that includes *daṇḍa* and *astra*-arrows (*see* §304).

§ 297

वामनं वामनाकारं श्यामलं दण्डधारिणम् । मौञ्जीमेखलया युक्तं ब्रह्मसूत्रविराजितम् ॥
कौपीनाच्छादनधरं द्विबाहुं नररूपवत् । कृष्णाजिनांबरं देवं शुद्धस्फटिकसन्निभम् ॥
काकपक्षधरं देवं रजतालकशोभितम् । ईषत्कुञ्चितसव्यांघ्रि याचमानं वसुन्धराम् ॥
आसीनो वा शयानो वा स्थितं वा यदि भूपते । आरूढं विहगेशस्य पीठिकायां सुसंस्थितम् ॥
एकबेरविधानं चेत् स्थापयेत् ब्रह्मणः परे । बहुबेरविधाने तु त्रैलोक्याक्रमणोद्यतम् ॥
भुवनत्रयदातारं सभार्यं सपुरोहितम् । पादोदधिसमुद्भूतां गङ्गामाकाशगामिनीम् ॥
तर्जन्या वामया वापि निर्दिशेत्तु समुद्रुतम् । चरणं सव्यमत्युच्चैः श्यामलं पीतवाससम् ॥
शङ्खचक्रगदाखड्गधनुःपाशादि धारिणम् । कुर्यात् . . . .

Mārkaṇḍeya VIII

§ 298

. . . वामनस्य हरेर्मूर्तिं बहुधा संप्रचक्षते ॥
वामनं वामनाकारं श्यामलं दण्डधारिणम् । द्विभुजं मेखलादामशोभितं शोभनाकृतिम् ॥
कौपीनाच्छादनधरं मृगाजिनधरं विभुम् । यज्ञोपवीतिनं काकपक्षसंयुतकुन्तलम् ॥
ईषत्कुञ्चितसव्याङ्घ्रिं दक्षिणेन ऋजुस्थितम् । दक्षिणेन तु हस्तेन याचमानं वसुन्धराम् ॥
शोभितं शोभनाकारं स्थितं वा शयनासनम् । अथवा गरुडारूढं कल्पयेत्कमलासन ॥
एकबेरविधानं चेत्स्थापयेद् ब्रह्मणः पदे । बहुबेरविधानं तु त्रैलोक्यक्रमणोद्यतम् ॥
विष्णुं प्रकल्पयेद्दिव्ये भागेऽष्टभुजसंयुतम् । चतुर्भुजं वा बहुभिर्बाहुभिर्वा समन्वितम् ॥
तस्य दक्षिणपार्श्वे तु वामनं वामनाकृतिम् । तस्यापसव्ये दैत्येन्द्रं बलिं करकधारिणम् ॥
भुवनत्रयदातारं सभार्यं सपुरोहितम् । वामपार्श्वे तु पक्षीन्द्रं मुष्टिना शुक्रघातिनम् ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

वामभित्तौ विधातारमुपरिष्टादवस्थितम् । क्रममाणस्य देवस्य सव्याङ्घ्रिक्षालनोद्यतम् ॥
पादोदकसमुद्भूतां गङ्गामाकाशगामिनीम् । तर्जन्या वामया चापि निर्दिशन्तं समुद्धृतम् ॥
चरणं सव्यमत्युच्चैः श्यामलं पीतवाससम् । शङ्खचक्रगदाखड्गधनुःपाशादिधारिणम् ॥
जाम्बवन्तं च भित्तौ तु भेरीताडनतत्परम् । देवर्षिगणसङ्घातान् कृताञ्जलिपुटान् स्थितान् ॥
भित्तौ कृत्वा ततः कर्माद्यर्चां चैव चतुर्भुजाम् । . . . .

Pādma "kr." XVII : 41*b*–54*a*

§ 299

. . . वामनस्य वदामोऽत्र रूपं शृणु महामुने ॥
सुस्थितं पद्मनाभेन वामनं वामनाकृतिम् । बालकुञ्जरसङ्काशं बृहत्स्कन्धं महाभुजम् ॥
श्यामलं नीरजाक्षं तु आयताब्जविलोचनम् । क्षोणीतलं पदन्यासैर्लोलयन्निव नारद ॥
जटाटवीसमायुक्तं सर्वेषां च मनोहरम् । द्विभुजं सव्यहस्तेन मुष्टिना दण्डधारिणम् ॥
आकुञ्चितं वामपादं स्वागतं दक्षिणं भुजम् । हारकुण्डलकेयूरभूषणैर्भूषितं मुने ॥
लम्बयज्ञोपवीतेन मेखलानां त्रयेण च । संवृत्तं युक्तरूपं तु काश्यपं ब्रह्मचारिणम् ॥
कौपीनधारिणं वापि पीतवाससमेव च । रक्षार्थं विष्टपानां तु वामनत्वमुपागतम् ॥

Viṣvaksena XI : 65*b*–71

§ 300

. . . कमण्डलुं यज्ञसूत्रं सशिखं छत्रधारिणम् ॥
तेजःपुञ्जसमं देवं वामनं पुरुषं भजे । . . . .

Śeṣa XXV : 5*b*–6*a*

§ 301

चक्रशङ्खछत्रवंशधारिणं वामनं हरिम् । लक्ष्म्या सह विभूषाङ्गं विप्ररूपधरं भजे ॥

Parāśara XV : 186

§ 302

. . . भुजत्रिगोलकायामवक्षोविस्तारशोभितम् ॥
पाणिपादतुरीयांशप्रवृद्धशिरसं तथा । ऊर्ध्वाघ्रिद्वितयायामविहीनमुखयुग्मकम् ॥
कटिस्फिक्पार्श्वनाभीषु तद्दिव्यं वामनं बुधः । कृत्वा संस्थापयेद्देवं मोहनाशाय सर्वधा ॥

Hayaśīrṣa "Ādi" XXIII : 22*b*–24

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 303

वामोर्ध्वं कौमुदी यस्य पुण्डरीकमधःस्थितम् । दक्षिणोर्ध्वं सहस्रारं पाञ्चजन्यमधस्स्थितम् ॥
सप्ततालप्रमाणञ्च वामनं कारयेत्सदा । . . . .

Hayaśirṣa "Ādi" XIII : 14–15*a*

§ 304

. . . पद्मदण्डारिशङ्खास्त्रो वामनः शङ्खचक्रधृक् ॥

Pādma "kr." XVI : 33*b*

§ 305

अरिकौमोदकीकञ्जदरधारी तु वामनः । . . . .

Garuḍa (*ms.*)

§ 306

शङ्खचक्रगदापाणिर्वामनस्याब्जमीरितम् । . . . .

Mārkaṇḍeya VIII

§ 307

चक्रशङ्खगदापद्मधारिणं भूरमापतिम् । नमामि वामनं देवं सर्वालङ्कारभूषितम् ॥

Parāśara XV : 63

§ 308

. . . वामन उच्यते ॥
कर्णिकारदलप्रख्यं रक्तवस्त्रं चतुर्मुखम् । सर्वावयवसंपूर्णं सर्वालङ्कारभूषितम् ॥
सर्वाभरणसंयुक्तं सर्वसिद्धिप्रदं वरम् । प्रथमे तु करे चक्रमधः शङ्खं च दृश्यते ॥
गदा च वामहस्ते तु ह्यधः पद्मं च शोभते । वामनाख्यं तु विप्रेन्द्र विज्ञेयोऽथ विलक्षणः ॥

Viṣvaksena XI : 183*b*–186

§ 309

विद्धि वामनरूपस्य लक्षणं किंतु लाङ्गलिन् । ललाटनासावक्त्रेभ्यः समादायांङ्गुलत्रयम् ॥
मस्तकस्योपरिष्टात्तु जटाबन्धं प्रकल्पयेत् । जटावसानमायामं यथा स्यात्पञ्चतालकम् ॥

Sāttvata XXIV : 235*b*–237*a*=Īśvara[1] XVII : 236–237=Śrīpraśna XIII : 151–152

Digitized by Google Original from UNIVERSITY OF MICHIGAN

As in the case of the preceding " Vāmana " entry, here, too, we have two " Trivikramas ". First to be distinguished is the incarnational form—recalling the story of how Vāmana, Viṣṇu-incarnate, swelled to great size and covered in two steps the entire creation, coming back in his third step to crush the wicked Mahābali ; Trivikrama is the name of this gigantic, high-stepping savior. He is usually indentifiable iconographically by his size and the fact that one foot is raised high, the other placed near the king (§312, and §311 ?—although there are variations on this : §313). According to §310, he is depicted either as black or golden in color, wearing silken garments and having all decorations. He may have either two or four arms (§312 and §313 ; §310 and §311), holding the *śaṅkha* and *cakra* in either case. An alternative way of showing him, according to §313, is on Garuḍa's back.

As for the *mūrti*-form known as Trivikrama, he is recognized by the following four weapons : *śaṅkha*, *cakra*, lotus and club or stick. Nothing more of significance is available in the literature about him—*see* §314, §315, §316 and §317.

The description found in §318 is not clear whether it refers to the *avatāra* or the *mūrti* " Trivikrama ".

§ 310

सङ्कर्षणस्य भेदोऽयं त्रिविक्रममधो शृणु । तप्तहाटकसङ्काशं श्यामवर्णनिभं तु वा ॥
सर्वालङ्कारसंयुक्तं सर्वावयवशोभितम् । सर्वाभरणसंयुक्तं पीतवस्त्रं चतुर्भुजम् ॥
शङ्खचक्रगदापाणिं सर्वदेवनमस्कृतम् । त्रिविक्रमस्य संप्रोक्तं लक्षणं तु य.....द्विदम् ॥

Viṣvaksena XI : 179–181

§ 311

. . . दक्षिणोर्ध्वं गदा यस्य पङ्कजं चाप्यधःस्थितम् ॥
वामोर्ध्वं संस्थितं चक्रं अधश्शङ्खं प्रदृश्यते । ब्रह्माण्डगं वामपादं दक्षिणं शेषपृष्ठगम् ॥
बलिवञ्चनसंसक्तं वामनञ्चाप्यधःस्थितम् । त्रिविक्रमेति सा मूर्तिः स्थापिता राज्यभोगदा ॥

Hayaśīrṣa "Ādi" XXIII : 21*b*–23 (Adyar *ms.*)

§ 312

चक्रशङ्खधरं देवं ऊर्ध्वपादैकवेषिणम् । . . . .

Parāśara XV

§ 313

. . . त्रिविक्रममितश्शृणु । चतुर्भुजो वा द्विभुजस्सव्यं पादं महीतले ॥
मस्तके सुरराज्यं च (मस्तकेऽसुरराजस्य ?) पादं सव्येतरं दिवि । विन्यस्य याचते भूयस्सव्येतरकरेण तम् ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

धरणीं देहि देहीति एष एव त्रिविक्रमः । कल्पयेद्वैनतेयस्य स्कन्धोपरि जगत्पतिम् ॥
स एव यानारूढस्स्यादुदितश्च त्रिविक्रमः । . . . .

Viṣṇutilaka VI : 425–428*a*

§ 314

पद्मशङ्खारिदण्डास्त्रः शृणु विक्रमवामनः । . . . .

Mārkaṇḍeya VIII

§ 315

कौमोदकीचक्रदरकञ्जधारी त्रिविक्रमः । . . . .

Garuḍa (*ms.*)

§ 316

चक्रशङ्खाब्जदण्डास्त्रधरः कार्यस्त्रिविक्रमः । . . . .

Pādma "kr." XVI : 33*a*

§ 317

चक्रशङ्खगदापद्मधारिणं भूपतिं विभुम् । सर्वाभरणभूषाङ्गं नमामि श्रीत्रिविक्रमम् ॥

Parāśara XIII : 56

§ 318

शङ्खचक्रधरं देवं विभुं तेजोमयं विभुम् । त्रिविक्रमं वासुदेवं तं भजे विश्वरूपिणम् ॥

Śeṣa XXV : 10

Narasimha

Narasimha, the leonine incarnation, may be shown in a variety of ways—seated or standing, ferocious or benign, alone or in company, and combinations of these. Normally, he is shown with a lion's head and a human body (§321, §322, §323 and §327). In his more ferocious aspects he is shown with three eyes, big and bulging (§321, §322, §327, §329 and §332), his mouth gaping open (§321, §322 and §339), his fangs shown (§319, §321, §322, §328, §329 and §339), his mane heavy and hanging (§328, §335 and §339), his tail flaying the earth (§333). His claws will be sharp (§323), and he may be shown rending open the demon on his lap, if he is seated (§319, §323, §329 and §330).

Digitized by Google Original from UNIVERSITY OF MICHIGAN

His color is usually bright or white (§320, §321, §322, §323, §327, §334, §335 and §336), but he may also be yellow (§320), or his original color may be obscured because he is besmeared with red (§321 and §322). He may be surrounded by a fiery nimbus (§320). In most depictions he will be wearing an *upavīta*-cord, and numerous ornaments.

Usually he will be shown with four arms, carrying at least the *śaṅkha* and *cakra* (§324, §325 and §326) ; but he may also be shown with two, eight, ten or sixteen or more arms (§323; §328, §329, §334 and §340), hence with various ornaments and weapons.

In his more benign aspects—and he may be shown in these either standing or sitting—he will show some sign of yogic inclinations or else be shown with one or more of his Consorts, holding various weapons according to the number of arms he has (§319, §321, §322, §323 and §332). He may also be shown in the company of Brahmā or others (§322, §323 and §334).

Other forms Narasiṁha may take are : as the Cosmic Lion licking up all creatures (§319), as the embodiment of all Truth, Knowledge and Bliss (§336), as a combination form associated with Varāha (§337), or as combined in some essential way with the Sudarśana motif—either holding the discus as a weapon (§338) or else merged with it into one combined icon (§339).

As for precise measurements, these are available (§319 and §341) ; according to the last excerpt, §341, one may control the desired benefits of worshipping Narasiṁha by turning to icons of him that have utilized different measurements.

§ 319

तिर्यङ् नृसिंहदेवस्य तथा विपुलमाननम् । वर्तुलेऽस्य तथा नेत्रे कक्षौ तालमितौ शुभौ ॥
भ्रुवौ ह्याकुञ्चिते वक्रे विकृतं वक्रदंष्ट्रकम् । लेलिहाना तथा जिह्वा समुद्धतसटं शिरः ॥
दंष्ट्रेऽङ्गुलविनिर्याते वक्राग्रे च सिते तथा । त्रिकलाभ्यधिकं वक्षः पञ्चनेत्राधिका कटिः ॥
त्रिकलाभ्यधिके चोरू जानू अपि कलाधिके । जङ्घे सार्धकले मध्ये विस्तृते श्रोणिभागतः ॥
ऊर्ध्वौ किञ्चित् सृतौ पादौ बाहुमूले कलाधिके । किञ्चित्किञ्चित्तथा हीनौ पर्यन्ते चोपबाहुकौ ॥
वपुरित्थं नृसिंहस्य कुर्याद्देशिकसत्तमः । जानुदेशे च संस्थाप्य विदारितमहासुरम् ॥
भूषितं वैजयन्त्या तु मालया श्रीसमन्वितम् । शङ्खचक्रधरं देवं नृसिंहं कारयेत् बुधः ॥

Hayaśīrṣa "Ādi" XXIII : 15-21.

§ 320

नदन्नादमनाख्येयं तमजं परमेश्वरम् । निष्टप्तकनकाभं च ध्यायेद्देवं नृकेसरिम् ॥
ज्वलदग्निस्फुलिङ्गाभिः स्वदेहोत्थाभिरावृतम् । रथाङ्गशङ्खधातारं बृहन्मूर्तिं सुभीषणम् ॥
सत्सत्त्वकरजश्रेणिदीप्तेनोभयपाणिना । संयच्छन्तं धिया सम्यग्भविनां साभयं वरम् ॥
अमृताध्मातमेघाभममृताहरणं विभुम् । पीताम्बरधरं ध्यायेदेकवक्त्रं चतुर्भुजम् ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

श्रोणीतटार्पितकरं शङ्खचक्रविभूषितम् । मध्यतो दक्षिणेनैव वहन्तं गिरिरूपधृत् ॥
शुद्धज्ञानानुविद्धं च कर्मसम्भवभीतिहम् । दिशन्तं स्वधिया सम्यग्भक्तानां भक्तवत्सलम् ॥
मन्थामथितदुग्धाब्धिं क्षोभयित्वा प्रकाशितम् । अमृतं क्षुत्तृषादीनां प्रतिपक्षमनामयम् ॥
शुद्धं चानश्वरं भाव्यं मायाख्यार्णवमध्यगम् । आत्मामृतमनौपम्यमाहारध्वंसकर्मणा ॥

Sāttvata XII : 73–80. *cf.* Īśvara[1] XXIV : 265–271

§ 321

गलादधस्तान्नररूपधारी परत्र सिंहाननभृत्स्वरूपः । बिभर्ति नेत्राणि हुताशनार्कप्रभाञ्चितान्येव विभीषणानि ॥
शङ्खचक्रधरं चैव सर्वाभरणभूषितम् । सर्वावयवसंपूर्णस्सर्वसिद्धिकरश्शुभः ॥
चक्रञ्च दक्षिणे हस्ते शङ्खं वामे न्यसेद्बुधः । श्वेतपर्वतसङ्काशं सर्वदुःखविशोधनम् ॥
रक्तचन्दनलिप्ताङ्गं कालाभ्रोद्वमनिस्स्वनम् । शरदिन्दुकलादंष्ट्रं क्रुद्धं हाटकनाटकम् ॥
संफुल्लवदनं शरवद् दुष्टानामतिभीषणम् । एवं रूपं नृसिंहस्य कृत्वा पूर्वं मृदा मुने ॥
पर्यङ्ककलितं कृत्वा आसीनं विष्टरे शुभे । हस्तयोः कोर्परे तस्य जान्वोरुपरि विन्यसेत् ॥

Viṣvaksena XI : 58–63

§ 322

गलान्तनररूपं च महासिंहमतः परम् । श्वेतपर्वतसङ्काशं रक्तचन्दनचर्चितम् ॥
नीलजीमूतपादं च रक्षसां भयदायकम् । सर्वदुःखहरं पुंसां सर्वसिद्धिकरं शुभम् ॥
श्वेतदंष्ट्रं विकासास्यं रक्तवृत्तोग्रदृष्टिकम् । . . . .

• • •

. . . योगपट्टसमायुक्तमासीनं सम्यगासने ॥
हस्तयोः कूर्परं न्यस्य पादजानू तु संस्थितः । श्रीभूमीभ्यां समोपेतं ब्रह्मशङ्करसंयुतम् ॥

Viṣṇu Tantra XVII : 3–5*a*, 7*b*–8

§ 323

नृसिंहमूर्तिर्बहुधा तत्र काचित्प्रदर्श्यते । वक्त्रं केसरिणो वक्त्रं व्यात्तास्यं दंष्ट्रया युतम् ॥
भ्रुकुटीकुटिलं भीमं त्रिणेत्रं मुकुटोज्वलम् । अङ्गान्तरं नरस्येव चतुर्भुजमुदायुधम् ॥
रक्तकञ्चुकसंयुक्तं श्रीवत्साङ्कविराजितम् । शुद्धस्फटिकसङ्काशं शङ्खचक्रविराजितम् ॥
पर्यङ्कबन्धसंयुक्तमासीनं सम्यगासने । प्रसार्य जानुनोर्हस्तौ मुख्यौ विस्तारिताङ्गुली ॥
दम्भोलिभीमनखिनौ भागे दिव्ये प्रतिष्ठितम् । एकबेरविधानं चेदासीनो वा स्थितोऽपि वा ॥
शङ्खचक्रगदापाणिः स्थितश्चेत्कमलासन । अथवा दैविके भागे सिंहविष्ठरविष्ठितम् ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN



YOGANARASIṂHA

(To face entry § 322, p. 140)

Digitized by Google

Original from
UNIVERSITY OF MICHIGAN

Digitized by Google

Original from
UNIVERSITY OF MICHIGAN

श्रीभूमीभ्यां सहासीनं बद्धपर्यङ्कबन्धनम् । यद्वा भूमितले पादमेकं संस्थाप्य दक्षिणम् ॥
अपरेण सुखासीनो विष्ठरे विपुले दृढम् । यद्वा प्रसार्य जानूर्ध्वमुत्क्षिप्योपरि जानुनः ॥
वामहस्तं प्रसार्यान्यहस्तं कृत्वाऽभयप्रदम् । दक्षिणं जानुनोऽधस्तात् स्थापयित्वा तदासने ॥
श्रीभूमिसहितो दिव्ये तिष्ठन् भागे यथापुरम् । यद्वाष्टभुजसंयुक्तनृसिंहं परिकल्पयेत् ॥
चक्रं खड्गं च बाणं च अभयं दक्षिणे भुजे । पाञ्चजन्यं गदां शार्ङ्गं वामबाहुषु कारयेत् ॥
जानूपरि तथा वामं हस्तमेकं प्रसारयेत् । यद्वा भुजयुगं जानुद्वयस्योपरि कल्पयेत् ॥
अथवा षोडशभुजो नरसिंहः प्रशस्यते । चक्रं खड्गं स परशुं शूलं बाणं तथाङ्कुशम ॥
वज्रं च दक्षिणभुजप्रदेशेष्वितरेष्वपि । शङ्खं चर्म गदां शक्तिं शार्ङ्गं पाशं च तोमरम् ॥
शिष्टौ करौ यथापूर्वं स्थापयेज्जानुनोर्द्वयोः । वामजानूर्ध्वगं कुर्यादधस्तादितरं पुनः ॥
उत्सङ्गे देवदेवस्य हिरण्यकशिपुं रिपुम् । नखैर्विदारितोरस्कं स्रवद्रुधिरपङ्किलम् ॥
रुधिरस्तोमसंभूतसिराणां ग्रामसङ्कुलम् । कुर्याच्च दक्षिणे पार्श्वे विधिमन्यत्र शङ्करम् ॥
प्रह्लादं गरुडं चापि पार्श्वयोस्तत्र कारयेत् । स्वतन्त्रे नरसिंहे तु कर्मबिम्बानि कारयेत् ॥
चतुर्भुजं वा सर्वत्र चासीनं सुस्थितं तु वा । श्रीभूमिसहितं वापि रहितं वापि कारयेत् ॥
कर्मार्चनादिप्रतिमां सौम्यवक्त्रां चतुर्भुजाम् । . . . .

Pādma "kr." XVII : 22–41*a*

§ 324

नृसिंहश्चक्रजलजगदाशङ्खधरः स्मृतः । . . . .

Pādma "kr." XVI : 40*a*

§ 325

चक्रपद्मगदाशङ्खनृसिंहः स्याद्भयानकः । . . . .

Mārkaṇḍeya VIII

§ 326

नरसिंहश्चतुर्बाहुश्शङ्खचक्रगदाधरः । शङ्खचक्रधरो वापि विदारितमहासुरः ॥

Hayaśirṣa "Ādi" XXIII

§ 327

बहुधा नृसिंहमूर्तीश्च तत्र काचिप्रदृश्यते । आननं सिंहवत्कृत्वा नरवद्वपुषा स्मृतः ॥
चतुर्बाहुं विशालाक्षं स्फटिकाभसमन्वितम् । भ्रुकुटीकुटिलं भीमं कल्पयेत्पृथुसत्तम ॥

Mārkaṇḍeya VIII

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 328

. . . तत्र सिंहं महादंष्ट्रं महावक्त्रं महासटम् ॥
श्रीवत्सवक्षसं श्रीशं कौस्तुभेन विराजितम् । अष्टबाहुं सुविस्तीर्णमष्टायुधधरं हरिम् ॥
रक्तकेशं च रक्ताक्षं ध्यायेत् सिंहं महाबलम् । . . . .

Īśvara² XI : 2*b*–4*a*

§ 329

बिभ्राणं शक्तिखड्गं ज्वलनमथ सृणी कुन्तदन्तौ कुठारम्, चक्रं शङ्खाब्जपाशान् हलमुसलगदा-
खेटशूलांश्च दोर्भिः ।
प्रत्यालीढं तमीडे त्रिनयनलसितं पिङ्गकेशं सुदंष्ट्रम्, देवं पर्यङ्कयोगासनलसितचतुश्चक्रभास्यं
नृसिंहम् ॥

Parāśara XXV : 10

§ 330

उद्यद्भास्वत्सहस्रप्रभमशनिनिभं त्र्यक्षरैर्विस्फुरन्तम्, वह्न्यावह्न्य(?) विद्युत्ततिविततसदाभूषणं
भूषणैश्च ।
दिव्यैरादीप्तनिशितललसद्बाहुदण्डैरनेकैः संभूतं भिन्नदैत्येश्वरतनुमतनुं नारसिंहं नमामि ॥

Śeṣa XXIII : 19

§ 331

. . . सर्वाभरणभूषाङ्गं सर्वदेवमयं विभुम् ।
सर्वायुधधरं देवं भजे ब्रह्मनृकेसरिम् ॥ . . . .

Śeṣa LXII : 12*b*–13*a*

§ 332

सर्वाभरणभूषाङ्गं त्रिनेत्रं सौम्यविग्रहम् । श्रीभूनीलाधिपं देवं नारसिंहमुपास्महे ॥

Śeṣa XXVII : 6

§ 333

. . . जपापुष्पप्रतीकाशं द्विभुजं रक्तलोचनम् ॥
करौ भूमौ प्रतिष्ठाय लेलिहन् सचराचरम् । आस्फोट्य भूमौ लांगूलमाच्छयुक्तं सुरेश्वरम् ॥
पुच्छसिंहमिति ख्यातं सर्वलोकभयङ्करम् । . . . .

Īśvara² IV : 73*b*–75*a*

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 334

. . . पञ्चवक्त्रं महाभीमं कालानलसमप्रभम् ॥
अण्डमालाधरं रौद्रं कर्णभारेण (कर्णाभरण ?) संयुतम्। सर्पयज्ञोपवीतं च पञ्चाननसुशोभितम् ॥
भुजैः परिघसङ्काशैः दशभिश्चोपशोभितम्। अक्षसूत्रं गदां पद्मं शङ्खं गोक्षीरसन्निभम् ॥
धनुश्च मुसलं चैव तथा चक्रेण मण्डितम्। बाणं वरदखड्गं च सर्वदेवैरुपासितम् ॥
मकुटं च महाभीमं शुद्धस्फटिकसन्निभम्। चन्द्राञ्जनसुवर्णाभं इन्द्रकोपनिभं तथा ॥
पूर्वादि चोत्तरान्तं तु ऊर्ध्वमग्निनिभं मुखम्। एतं मेरुरिति ख्यातं सर्वव्याधिविनाशनम् ॥

Īśvara² IV : 76*b*–81

§ 335

. . . चतुर्भुजं त्रिणेत्रं च शङ्खचक्रधरं शुभम् ॥
शशिकोटिसहस्राभं हिमकुन्देन्दुसन्निभम्। सहस्रादित्यसङ्काशं किरीटमकुटोज्वलम् ॥
शतरुद्रसहस्राभं सटाचक्रोज्वलं मुखम्। योगपट्टपिनद्धाङ्गं आसीनं पद्मपीठके ॥
जान्वारूढस्रस्तभुजं द्वन्द्वरक्तनखोज्वलम्। यज्ञोपवीतसंयुक्तमुत्तरीयकशोभितम् ॥
दिव्यसिंहासनारूढं सर्वज्ञानमयं परम्। श्रीवत्सकौस्तुभोरस्कं नानारत्नविभूषितम् ॥

Īśvara² IV : 62*b*–66

§ 336

सत्यज्ञानसुखस्वरूपममलं क्षीराब्धिमध्यस्थितं, योगारूढमतिप्रसन्नवदनं भूषासहस्रोज्वलम्।
त्र्यक्षं चक्रपिनाकसाभयकरं बिभ्राणमर्कच्छविं छत्रीभूतफणीन्द्रमिन्दुधवलं लक्ष्मीनृसिंहं भजे ॥

Parāśara XV : 160

§ 337

चक्राष्टकधरं देवं त्रिनेत्रं चोग्रविग्रहम्। विश्वरूपमजं सौम्यं वराहनृहरिं भजे ॥

Śeṣa XXVIII : 19

§ 338

. . . विश्वरूपमुदाराङ्गं सुदर्शननृकेसरिम् ॥
ज्वालामालाधरं देवं भजे तं विश्वतोमुखम्। . . . .

Śeṣa XXIV : 15*b*–16*a*

§ 339

सुदर्शनस्य हृदये विष्ठितं नृहरिं हरिम्। स्फटिकाचलसङ्काशं परःशतसटाकुलम् ॥
प्रलयाम्बुदनिर्घोषगम्भीरगहनध्वनिम्। शङ्खचक्रधरं द्वाभ्यां कराभ्यामितरौ पुनः ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

• प्रसार्य जानुनोर्भीमं नखदम्भोलिभीषणौ । व्यत्यस्तचरणद्वन्द्वमासीनं पद्मविष्टरे ॥
भ्रुकुटीकुटिलं योगपट्टिकादृढबन्धनम् । व्यादाय वक्त्रकुहरं दंष्ट्रिणं स्फुटिताधरम् ॥
त्रिणेत्रमखिलाकल्पकल्पितं ब्रह्मगर्जितम् । . . . .

Pādma "car." XXXI : 257–261a

§ 340

नरसिंहविशेषोऽस्ति चतुस्सप्ततिविग्रहः । नरसिंहेति मूर्तीनां नामधेयं सुकथ्यते ॥
प्रथमं स्वयंनृसिंहः स्याद्विधानां मोक्षसिंहकम् । विजयं नृसिंहकं चैव छत्राख्यं नरसिंहकम् ॥
दीर्घसिंहं च दृप्तानां विरूपं च नृसिंहकम् । पूर्णसिंहाब्धिसिंहः स्याल्लक्ष्मीसिंहावुभावपि ॥
विजयलक्ष्मीसिंहाख्यं योगयोगेश्वरावपि । दीप्तिसिंहाब्धिसिंहः स्यात्पुष्टं भूतप्रमाथिनम् ॥
ज्वालानृसिंह उग्रं च ओं घोरं च नृसिंहकम् । विदारणनृसिंहः स्यादहोबलनृसिंहकम् ॥
स्तंभसिंहमहासिंहपातालनरसिंहकम् । वक्ष्यं चानन्तसिंहं च ग्रहणप्रमनावपि ॥
आवेशनरसिंहं च अट्टहासनृसिंहकम् । नवव्यूहनृसिंहः स्याच्चक्रसिंहं दिशो दश ॥
चण्डसिंहारसिंहं च प्रसादं ब्रह्मसिंहकम् । विष्णुरौद्रं च मार्ताण्डं चन्द्रभैरवसिंहकम् ॥
पृथिवीवायुसिंहं च आकाशनरसिंहकम् । ज्वलनाधारसिंहः स्यादमृतं हंसं तथैव च ॥
आत्मसत्यं च यज्ञं स्यादन्नदानप्रभासकम् । विश्वरूपं त्रितारं च चतुस्सप्ततिविग्रहम् ॥
इत्येवं नरसिंहं स्यादायुधानां विभेदकम् । . . . .

Vihagendra IV : 7–17a [sic.]

§ 341

नृसिंहस्य मुखे वित्त परितश्चाष्टलोचनम् । ततोऽष्ठखण्डदेशाच्च कुर्यात्कर्णद्वयोत्थितम् ॥
तत्कर्णद्वयमानेन ललाटान्तं नयेत्पुनः । प्रमाणात्प्राक्प्रणीताच्च संरम्भाघ्राणलक्षणः ॥
प्रफुल्लविकसच्छिद्रं घ्राणवंशान्वितं भवेत् । तच्छिद्रे पूर्वमानाच्चाप्यस्य वै त्रियवाधिकम् ॥
सगोलमुत्तराङ्गेषु सकलांशं च लोचनम् । अधरोष्ठं परिज्ञेयं सचतुर्यवमङ्गुलम् ॥
सार्धं चतुष्कलं वक्त्रं शेषायामो हनोः स्मृतः । तद्विकामः परिज्ञेयः नेत्रमानं यवाधिकम् ॥
अग्रतो ह्रासमायाति सृक्विण्यन्तं हि चाङ्गुलम् । सर्ववृत्तं तदर्धेन नेत्रयुग्मं सविस्मयम् ॥
पूर्ववद्विस्तृतं श्रोत्रं कलार्धेन तदुन्नतेः । तुल्या चेन्द्रकलायुग्मयोगस्य भूस्त्रिगोलका ॥
तन्मध्यं तु कलामानं शङ्खावर्तोपमं महत् । भागमानं समावृत्तं कार्यं तच्छिरसि स्फुटम् ॥
दैर्घ्येण सार्धतालं च क्ष्माधरस्याननं स्मृतम् । विस्तारेण ललाटाच्च तन्मानं द्व्यङ्गुलोज्झितम् ॥
सौम्यरूपस्य च विभोः प्रोद्यतस्य कलोज्झितम् । तच्चतुर्धांशमानेन पोत्रदेशस्य विस्तृतिः ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

तस्योपरिष्टाद्बाहुल्यं तत्समं चाङ्गुलं त्वधः । हनुद्वयस्य वै मानं सार्धं सप्ताङ्गुलं स्मृतम् ॥
शेषमाननरन्ध्रं तु सृक्विणीभ्यां यदन्तरम् । तद्विकासश्च सार्धेन कलार्धेनाग्रदेशतः ॥
स एवाङ्गुलमानेन विज्ञेयः सृक्विणीद्वयात् । घ्राणरन्ध्रश्च वक्रोक्ते(त्थे?) दंष्ट्रे त्वर्धकलोन्नते ॥
नासावंशं यथापूर्वं कदलीनाडिपृष्ठवत् । श्रोत्रे वाजिमुखोक्ते तु को(कि)टेः सप्तकलान्तरे ॥
तत्तुल्ये लोचने किंतु प्रान्ततीक्ष्णे यवोज्झिते । एतेषां विहिता ग्रीवा ह्यङ्गुलद्वितयेन तु ॥
प्रत्येकदेशात्संयुक्ता सौम्यमूर्त्युदिता च या । विनोच्छ्रायेण नृहरेः यस्य गात्रस्य या प्रमा ॥
सा सा संवेष्टनाद्व्यासात्कलार्धेनाधिका भवेत् । वक्षःकट्युदरांसस्फिक्कलामानाधिकानि च ॥
तथैव नखपत्राणि देहश्चास्य समांसलः । संपूर्णो दक्षिणावर्तैर्लोमभिश्चातिकुञ्चितैः ॥
त्रिचतुःपञ्चवक्त्रस्य विनैवोर्ध्वमुखेन तु । दक्षिणोत्तरवक्त्राभ्यां ह्रासं कुर्याद् द्विगोलकम् ॥
विकासः सिंहवक्त्रोक्तः उदग्वक्त्रस्य तत्र च । समो दृक्सन्निवेशस्तु चतुर्णां मोक्षसिद्धये ॥
आरोग्यभोगकैवल्यप्राप्तयेऽर्धाङ्गुलेन च । कुर्यात्सव्यापसव्याभ्यामथो दृक्सन्निवेशनम् ॥
सहपूर्वाननेनैव सम्यक् प्रत्यङ्मुखस्य च । निष्का(ष्ठा)सायामविस्तारघ्राणदृग्भ्रूश्रुतिष्वथ ॥
ईषत्तिर्यक्क्षितिन्यस्तदृङ्मुखं दक्षिणं शुभम् । तद्वच्च प्रोक्तदृग्वक्त्रमुत्तरं सर्वसिद्धिकृत् ॥
स्वकार्यसूचनान्नूनं तन्मन्त्रस्य च सन्निधिः । अतोऽन्यथा समाश्रित्य शान्तिमस्ते च मन्त्रराट् ॥
नित्यं तत्सन्निधानाच्च भूतवेतालराक्षसाः । आदर्शनात्पलायन्ते आविशन्ति च दर्शनम् ॥
आदाय शिरसा मन्त्रिसमाज्ञां संप्रयान्ति ते । अतः समाचरेद्यत्तद्येन स्याद्बिम्बसन्निधिः ॥
न हि तत्सन्निधानाद्वै कश्चिदारभते शुभम् । वराहदंष्ट्रं सिंहाक्षं तथा चिपिटनासिकम् ॥
विधेयं पश्चिमं वक्त्रं पञ्चवक्त्रस्य वै विभोः । अस्याधरोत्तराभ्यामप्योष्ठाभ्यां समता भवेत् ॥
विभिन्नताङ्गुलार्धेन ताभ्यां तन्मध्यगा स्फुटा । कार्या दशनपाली वै मूलमध्याग्रतः समा ॥
कलार्धेनोल्बणं वृत्तं तद्गण्डद्वितयं ततः । द्विकलं चाग्रतः श्मश्रु कला चार्धकला क्रमात् ॥
सम्बन्धवेणिः पूर्वोक्तमानेन शुभकृद्भवेत् । सिंहसूकरवन्मुख्यवक्त्राणां सौम्यतां नयेत् ॥
प्रमाणं दृग्गताल्लक्षाद्व्यवहारमयात्तु वै । विकासश्चाश्ववक्त्रोक्तः सौम्यरूपस्य भूभृतः ॥
तदाद्योक्तस्तु नृहरेः प्रागुक्तो यः समाचरेत् । तथा वक्त्राङ्गभावित्वे विभोः शक्तीश्वरस्य च ॥
हारनूपुरवस्त्रस्रक्कटकाङ्गदभूषिता । माल्योपवीतकेयूरमकुटाद्युपशोभिता ॥
प्रतिमा मन्त्रमूर्तीनां कृता भवति सिद्धिदा । यत्पुरा पञ्चधा प्रोक्तं वाहनं प्राणदैवतम् ॥
तस्य बिम्बसमुत्थेन तालेन मुखमण्डलम् । द्व्यङ्गुलं तु ललाटोक्तं जटाबन्धो द्विलोचनः ॥
द्व्यङ्गुलेनोन्नतः कर्ण उरः पञ्चकलं स्मृतम् । अष्टाङ्गुलं तदुदरं कटिः पञ्चाङ्गुलोन्नता ॥
नवाङ्गुलोन्नतावूरू जानुनी द्व्यङ्गुले स्मृते । अष्टाङ्गुलोच्छ्रिते जङ्घे द्व्यङ्गुले पदपिण्डके ॥
शममेकं कलाहीनं तद्ग्रीवायाश्च वेष्टनम् । बिम्बतुल्या परिज्ञेया सर्वदा साङ्गविस्तृतिः ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

तद्विभागाधिकं वित्त वेष्टनं ह्युदरस्य च । परिधिः कटिदेशस्य चतुर्नेत्राधिकस्तु वै ॥
बिम्बोकसदृशं वित्त तदूर्वोर्मूलवेष्टनम् । तदेव जङ्घामध्यस्य जङ्घान्तस्य तदेव हि ॥
पादं पञ्चकलायामं चतुरङ्गुलविस्तृतम् । द्व्यङ्गुलं पार्ष्णिदेशाच्च अङ्गुष्ठोऽर्धकलासमः ॥
विज्ञेया अङ्घ्रिदेशाच्च यवेनाङ्गुलयः क्रमात् । नाभिरन्ध्रं सुविस्तीर्णं द्व्यर्धलोचनविस्तृतम् ॥
मध्यमाङ्गुलिपर्यन्तं मणिबन्धान्नवाङ्गुलम् । त्रिकलः पाणिविस्तारः तन्नखा निशितोन्नताः ॥
तद्बाहुमस्तकं वित्त उच्छ्रायेण द्विलोचनम् । भुजोपभुजयुग्मं यत्तत् द्वितालसमं स्मृतम् ॥
कलार्धेनाधिकं बिम्बबाह्वोस्तद्बाहुवेष्टनम् । बिम्बोष्ठां सद्विधीर्ह्येवं स्तनभूर्लोचनोल्बणा ॥
वृत्तवैपुल्यमानेन लोचने पद्मपत्रवत् । भ्रूयुग्मं नरसिंहोत्थं घ्राणाग्रं शुकचञ्चुवत् ॥

Sāttvata XXIV : 180*b*–227*a*, Īśvara[1] XVII : 181–227, Śriprasna XIII : 96–142

Paraśurāma

Paraśurāma, the brahmin incarnation of Viṣṇu who opposed domination by the kṣatriya rulers, is usually recognized by the fact that he is shown carrying an ax (*paraśu*) and by his virile figure. In the three excerpts below we learn that he can be shown alone or in a group-standing or seated, having two or four arms. In all cases he is to be depicted with matted hair. *See* §342, §343 and §344.

§ 342

. . . आसीनं द्विभुजं शान्तं जटामुकुटधारिणम् ॥
परशुं सशरं चापं दक्षिणेतरहस्तयोः । धारयन्तं सुवर्णाभं ब्राह्म्या लक्ष्म्या विराजितम् ॥
श्रीवत्सेनाङ्कितोरस्कं सोपवीतोत्तरीयकम् । स्थितं वा कल्पयेद्देवमेकबेरं विधेः पदे ॥
बहुबेरे पदे दिव्ये देवीं वामे प्रकल्पयेत् । चतुर्भुजा च कर्मार्चा जामदग्न्येन वा समा ।
भङ्गत्रयसमोपेतं त्रयस्त्रिंशत्सुलक्षणम् । यद्वा चतुर्भुजं कुर्याज्जामदग्न्यं चतुर्मुख ॥
शङ्खचक्रधरं शार्ङ्गशरहस्तं यथापुरम् । . . . .

Pādma "kr." XVII : 55*b*–60*a*

§ 343

. . . जामदग्न्यस्य रामस्य रूपं वक्ष्याम्यतः परम् ॥
.....तस्य वर्णाभं द्विभुजं श्वेतरत्नकम् । आसीनं तु प्रसन्नास्यं ब्रह्मलक्ष्मीसमावृतम् ॥
सर्वलक्षणसंपूर्णं सर्वाभरणभूषितम् । सर्वालङ्कारसंयुक्तं जटामण्डलभूषितम् ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

परशुं दक्षिणे हस्ते वामे चाप.....पत्रिणम् । वामे कमण्डलुं वापि चाक्षसूत्रं तु दक्षिणे ॥
इत्थं रूपं मुने तुभ्यं जामदग्नेस्तु वर्णितम् । . . . .

Viṣvaksena XI : 71*b*–75*a*

§ 344

जामदग्न्यं तु कुर्वीत जटामुकुटमण्डितम् । चतुर्बाहुं महाभागं सर्वक्षत्रान्तकं प्रभुम् ॥
दक्षिणे परशुं हस्ते वामे दद्यात्तथा धनुः । खड्गं दक्षिणहस्ते तु वामहस्ते तु खेटकम् ॥
कुठारहस्तं द्विभुजं कुर्याद्वा रेणुकासुतम् । . . . .

Hayaśirṣa "Ādi" XXIV : 25–27*a*

Rāma

One of the most popular incarnations of Viṣṇu among Vaiṣṇavas of all schools is as Rāma, the noble king and ideal husband. In the *Pāñcarātra* literature, then, we are not surprised to find a number of variants on the favorite themes indicating Rāma's presence. Generally, however, he is depicted with a bow in one hand, the arrows being either held in the other hand or in a sling on his back. Also, Rāma is rarely shown alone—he is most often found as the center of a group, flanked on either side by Sītā, his wife, and Lakṣmaṇa, his brother. Not uncommonly, Hanumān, the converted monkey-deity, is shown in a worshipful attitude as a fourth member of the group.

In excerpt §346, we are presented with a number of options for presenting Rāma—standing in the *tribhaṅga*-stance, seated, enthroned, reclining—and in the company of his extended family. Here, the members of primary group are given as three-dimensional icons while the other brothers and their wives—Bharata and Māṇḍavī, Śatrughna and Śrutakirti—and others are to be presented on a mural in the background. Measurements for both the icons and the painted figures are given. Rāma's color is black here.

In §348 and §350 the rarely seen "*vīrāsana*" posture—Rāma seated with Sītā on his lap—is described. More conventional descriptions are given in §347, §349 and §351, the latter one giving more dimensions for use in making metal icons.

The two closing excerpts, §353 and §354, are given over to descriptions of Hanumān—the former in a terrific stance, the latter in a benign attitude.

§ 346

. . . रामस्य राघवस्याथ लक्षणं वक्ष्यतेऽधुना ।
त्रिभङ्गं द्विभुजं रम्यं श्यामवर्णं किरीटिनम् । श्रीवत्साङ्कं प्रसन्नाभं यद्वा रामं चतुर्भुजम् ॥
ऋजुस्थितं दक्षिणेन चरणेनेतरेण तु । कुञ्चितेनाङ्घ्रिणा स्तोकं शरशार्ङ्गधनुर्धरम् ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

उद्धरेच्च ललाटान्तं वामहस्तं धनुर्धरम् । अन्तरालं मुखमितं शरहस्तं तु दक्षिणम् ॥
कटिसूत्रसमं कुर्यान्मुखमानं सगोलकम् । अन्तरालं भवेन्मुष्टेः कटिसूत्रस्य च द्वयोः ॥
अपराभ्यां च हस्ताभ्यां शङ्खं चक्रं च धारयेत् । मुखं दक्षिणतो भङ्गं मध्यकायं तु वामतः ॥
कट्यां दक्षिणतो भङ्गः किञ्चिद्भङ्गत्रयं मतम् । कम्बुग्रीवं महोरस्कं त्रयस्त्रिंशत्सुलक्षणम् ॥
पञ्चदीर्घं चतुर्ह्रस्वं पञ्चसूक्ष्मं षडुन्नतम् । सप्तरक्तं त्रिगम्भीरं त्रिविस्तीर्णं प्रशस्यते ॥
बाहू नेत्रान्तरं चैव हनुर्नासा तथैव च । स्तनयोरन्तरं चैव पञ्चदीर्घं प्रशस्यते ॥
ग्रीवा प्रजननं पृष्ठं ह्रस्वे जङ्घे च पूज्यते । सूक्ष्माण्यङ्गुलिपर्वाणि केशदन्तनखत्वचः ॥
इमानि पञ्च सूक्ष्माणि कथितानि मयानघ । कक्षः कुक्षिश्च वक्षश्च घ्राणं स्कन्धो ललाटिका ॥
षडुन्नतमिदं प्रोक्तं सप्तरक्तमतः शृणु । पाणिपादतलं रक्तं नेत्राद्यन्तं नखानि च ॥
तालुजिह्वाधरोष्ठं च सप्त रक्ता इमे स्मृताः । स्वरः सत्त्वं च नाभिश्च त्रिगम्भीरं प्रशस्यते ॥
उरश्शिरो ललाटश्च त्रिविस्तीर्णं प्रकीर्तितम् । एवंलक्षणसंयुक्तं सर्वलोकसुखावहम् ॥
कुर्याद्दाशरथिं रामं मानादित्रयसंयुतम् । लक्ष्मणं कारयेद्वामे तथालक्षणलक्षितम् ॥
जानकीं दक्षिणे पार्श्वे देवीं वेदिसमुत्थिताम् । भरतं दक्षिणे भित्तौ ससुग्रीवविभीषणम् ॥
शत्रुघ्नं चाङ्गदं चैव हनूमन्तं च वामतः । दिव्ये भागे स्थितस्यैव परिवारादिकल्पनम् ॥
भद्रासने समासीनं त्यक्त्वा तत् सशरं धनुः । अभयो दक्षिणो हस्तो वामस्तु वरदो भवेत् ॥
जानकी तु सुखासीना भवेद्दक्षिणपार्श्वतः । लक्ष्मणो वामपार्श्वे तु स्थितश्च रचिताञ्जलिः ॥
यद्वा महार्हशयने शयानं परिकल्पयेत् । पृष्ठतो मौलिपार्श्वे तु जानकी स्यात् सुखासना ॥
कुड्यस्थाः पूर्ववत्सर्वे कर्तव्या लक्ष्मणादयः । पवनात्मजमारूढो यानं वा सशरासनः ॥
एकबेरविधाने तु राघवो ब्रह्मणः पदे । शरचापधरं कुर्यात् स्थितं लक्षणलक्षितम् ॥
अथवाऽभयदं हस्तं दक्षिणं दक्षिणेतरम् । कटिस्पृशं करं कुर्यात् वरदं वा यथारुचि ॥
दक्षिणोत्तरयोर्भित्त्योः परिवारा यथापुरम् । रामस्य भ्रूप्रदेशान्तं भरतं परिकल्पयेत् ॥
लक्ष्मणं च कपोलान्तं चुबुकान्तमथाऽपि वा । शत्रुघ्नं कण्ठमध्यान्तं सर्वे चापशरान्विताः ॥
भङ्गादयश्च तद्वत्स्युः केशबन्धसमन्विताः । मुखद्विगुणमायाममध्यर्धं वा समुन्नतम् ॥
केशबन्धो भवेदेषां श्रीवत्सरहितास्तथा । वामं मुष्टिधरं हस्तं दक्षिणं भरतस्य वा ॥
वामं देव्या भुजे न्यस्तं स्वातन्त्र्ये परिकल्पयेत् । शत्रुघ्नो लक्ष्मणश्चापि स्वातन्त्र्ये भरतो यथा ॥
भरतः श्यामलाकारो लक्ष्मणः कनकप्रभः । शत्रुघ्नो रक्तवर्णाभः श्रीमल्लक्ष्मणसंयुतः ॥
माण्डवी भरतस्य स्यादूर्मिला लक्ष्मणस्य तु । श्रुतकीर्तिर्भवेद्देवी शत्रुघ्नस्याऽम्बुजासन ॥
सीता श्रीरिव कर्तव्या कल्याणबहुलक्षणा । करण्डिकामौलिधरा कबरीवालकैर्युता ॥
बिभ्राणा वामहस्तेन सरसीरुहकुड्मलम् । ऊरुप्रदेशविश्रान्तवामेतरभुजाऽथवा ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN



SĪTĀ

(*To face entry § 346, p. 148*)

Digitized by Google

Original from
UNIVERSITY OF MICHIGAN

Digitized by Google

Original from
UNIVERSITY OF MICHIGAN

ऊरुप्रदेशविश्रान्तसव्यहस्तसरोरुहा । सव्येतरेण बिभ्राणा रक्तकञ्चुकबन्धना ॥
हिरण्यवर्णा सीता स्यान्माण्डवी पाटलप्रभा । ऊर्मिला श्यामवर्णाभा श्रुतकीर्तिः सितप्रभा ॥
धम्मिल्लसंयुता देव्यो भरतादेश्चतुर्मुख । हनूमान्वानराकारः कर्तव्यो हेमसन्निभः ॥
कुञ्चिताग्रमहाबालं प्रह्वकायमवस्थितम् । आस्यं पिधाय हस्तेन दक्षिणेनेतरेण तु ॥
वस्त्रप्रदेशमाच्छाद्य विनीतवदवस्थितम् । केशे बन्धयुतं कुर्यादुच्छ्रायस्तस्य वक्ष्यते ॥
रामस्य बाहुपर्यन्तमुन्मानं त्र्यंशमेव वा । अर्धं वा पादमथवा यथाविभवमुन्नतिः ॥
सुग्रीवं वानराकारं रामबाहुसमुच्छ्रयम् । प्राञ्जलिं वेत्रसहितं स्थितं मुकुटधारिणम् ॥
हारादिभूषणैर्युक्तं कुर्यात्कनकपिङ्गलम् । अङ्गदं वानराकारं राममानार्धमुन्नतम् ॥
कृताञ्जलिपुटं वेत्रक्षुरिकामौलिधारिणम् । केशबन्धयुतं वापि बन्धुजीवसमद्युतिम् ॥
विभीषणं महाकायं घोरं कालायसप्रभम् । दंष्ट्राकरालवदनं भ्रुकुटीकुटिलेक्षणम् ॥
रक्ताक्षं मुकुटोपेतं कृताञ्जलिपुटं स्थितम् । रामस्य बाहुपर्यन्तं समुच्छ्रायं प्रकल्पयेत् ॥
कृताञ्जलिपुटं सौम्यं निषादाधिपतिं गुहम् । नीलनीरदसङ्काशं राममानार्धमुन्नतम् ॥
स्वातन्त्र्यं पारतन्त्र्यं च राघवस्योभयं भवेत् । दिव्ये भागेऽथवा ब्राह्मे गर्भगेहे स्थितो यदि ॥
स्वतन्त्रो राघवः प्रोक्तः पदे पूर्वोदिते यदि । चतुर्भुजा गर्भगेहे कल्पितः कमलासन ॥
पश्चाद्विमानशोभार्थं कल्पितः परवानयम् । स्वतन्त्रे राघवे बिम्बान् कर्माद्यर्थं प्रकल्पयेत् ॥
अन्यांस्तत्सदृशं रामं लक्ष्मणं जनकजात्मजाम् । सिंहासने सहैकस्मिन् प्रभया च परिष्कृतान् ॥
यद्वा चतुर्भुजान् कुर्यात् कर्माद्यर्चां चतुर्मुख । दौवारिकांश्च स्वातन्त्र्ये कल्पयेद् द्वारपार्श्वयोः ॥
नलं च दक्षिणे पार्श्वे जाम्बवन्तं तथोत्तरे । जाम्बवान स्वर्णवर्णाभो नलः शुक्लसमप्रभः ॥
क्षुरिकावेत्रहस्तौ च बद्धकल्याणकञ्चुकौ । नीलं सेनापतिं कृत्वा विष्वक्सेनपदे न्यसेत् ॥
गुहो वा तत्र संस्थाप्यो विष्वक्सेनोऽथवा स्वयम् । रामस्य पुरतः कल्प्यः मारुतिर्मुखमण्डपे ॥
गरुडो वा यथापूर्वं परिवारान् प्रकल्पयेत् । . . . .

Pādma "kr." XVII : 60*b*-112*a*

§ 347

. . . कुर्याद्दाशरथिं रामं दशतालं चतुर्भुजम् ॥
शरकार्मुकहस्तञ्च शङ्खचक्रधरं प्रभुम् । दक्षिणोर्ध्वे भवेच्चक्रं वामोर्ध्वे शङ्खमेव च ॥
दक्षिणाधो भवेद्बाणो वामाधो धनुरेव च । द्विभुजं शरहस्तं वा वामं कुर्यात् सकार्मुकम् ॥
कृत्वैवं राघवं रामं सर्वलक्षणसंयुतम् । क्रूरशत्रुविनाशाय स्थापयेत्सर्वकामदम् ॥

Hayaśirṣa "Ādi" XX : 28*b*-31 (Adyar *ms.*)

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 348

अथ ध्यानमहं वक्ष्ये रामस्याद्भुतकर्मणः । कालमेघसमच्छायं वीरासनसमन्वितम् ॥
दक्षहस्ताग्रविलसज्ज्ञानमुद्राभिशोभितम् । वामजानुकटिन्यस्तवामपाणिविराजितम् ॥
वामपार्श्वस्थया देव्या करविन्यस्तपद्मया । विद्युन्निभाङ्गयाश्लिष्टं सीतां सर्वविभूषिताम् ॥
माणिक्यमकुटोद्भासिमौलिमाविस्मिताननम् । नानारत्नविभूषाभिः परिभूषितविग्रहम् ॥
सर्वाभरणसंयुक्तं पार्श्वे लक्ष्मणसेवितम् । सुग्रीवहनुमत्प्रख्यैः अन्यैश्च मुनिभिर्युतम् ॥
Vāyu II (*ms.*)

§ 349

वामे भूमिसुता पुरस्तु हनुमान् पश्चात् सुमित्रासुतः, शत्रुघ्नो भरतश्च पार्श्वयुगले वाय्वादिकोणेषु च ॥
सुग्रीवश्च विभीषणश्च युवराट् तारासुतो जाम्बवान्, मध्ये नीलसरोजकोमलरुचिं रामं भजे श्यामलम् ॥
Parāśara XV : 202

§ 350

साधु वक्ष्यामि सर्वं ते शृणुष्वावहितो मुने । सीतालङ्कृतवामाङ्कं द्विभुजं चारुलोचनम् ॥
वामहस्तेन सीतायाः स्पर्शयन् स्तनमण्डलम् । ज्ञानमुद्रायुतेनान्येनान्वितं लोकसुन्दरम् ॥
धनुर्द्वयकरेणापि लक्ष्मणेन सुशोभितम् । कोटिकन्दर्पसङ्काशं राघवं करुणाकरम् ॥
उपविष्टं पद्ममध्ये वीरासनमनोहरम् । हनुमत्सेवितश्चाग्रे कुर्यादेवं मनोरमम् ॥
दशाक्षरप्रकारोऽयं कथितो मुनिपुङ्गवैः । नीलोत्पलदलश्यामं पीताम्बरधरं विभुम् ॥
द्विभुजं कञ्जनयनं दिव्यसिंहासनस्थितम् । वसिष्ठाद्यैश्च परितो वृतं रत्नकिरीटिनम् ॥
सीतासंलापचतुरं दिव्यगन्धादिशोभितम् । चापद्वयकरेणाथ सेवितं लक्ष्मणेन च ॥
शत्रुघ्नभरताभ्याञ्च पार्श्वयोरथ सेवितम् । (एवं) ध्यायन्ननन्यधीः रामं द्वादशाक्षरमन्वहम् ॥
Agastya[2] XXX (MGOML *ms.* R. 5059)

§ 351

. . . रामस्याथ वदामोऽत्र रूपं दाशरथेस्तव ॥
अतीव रूपसम्पन्नौ नीलवेल्लितमूर्धजौ । व्यूढोरस्कोन्नतांसौ च केयूराङ्गदचित्रितौ ॥
दीर्घबाहू श्रियोपेतौ सौम्यौ प्रहसिताननौ । कर्णान्तलोचनौ साक्षात् प्रथमे वयसि स्थितौ ॥
सौन्दर्यामृततोयैश्च सिञ्चन्ताविव विश्वतः । खड्गहस्तौ धनुष्पाणी भुजविख्यातविक्रमौ ॥
बद्धगोधाङ्गुलित्राणौ मुने वैश्रवणोपमौ । औदार्यरूपसम्पद्भिः नृणां चित्तापहारिणौ ॥
कौसल्यायास्सुमित्रायाः प्रीतिदौ वीर्यवत्तरौ । राक्षसध्वान्ततिग्मांशू शूरौ दशरथात्मजौ ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN



RĀMA

(To face entry § 347, p. 149)

Digitized by Google

Original from
UNIVERSITY OF MICHIGAN

तद्विभागाधिकं वित्त वेष्टनं ह्युदरस्य च । परिधिः कटिदेशस्य चतुर्नेत्राधिकस्तु वै ॥
बिम्बोकसदृशं वित्त तदूर्वोर्मूलवेष्टनम् । तदेव जङ्घामध्यस्य जङ्घान्तस्य तदेव हि ॥
पादं पञ्चकलायामं चतुरङ्गुलविस्तृतम् । द्व्यङ्गुलं पार्ष्णिदेशाच्च अङ्गुष्ठोऽर्धकलासमः ॥
विज्ञेया अङ्घ्रिदेशाच्च यवेनाङ्गुलयः क्रमात् । नाभिरन्ध्रं सुविस्तीर्णं द्व्यर्धलोचनविस्तृतम् ॥
मध्यमाङ्गुलिपर्यन्तं मणिबन्धान्नवाङ्गुलम् । त्रिकलः पाणिविस्तारः तन्नखा निशितोन्नताः ॥
तद्बाहुमस्तकं वित्त उच्छ्रायेण द्विलोचनम् । भुजोपभुजयुग्मं यत्तत् द्वितालसमं स्मृतम् ॥
कलार्धेनाधिकं बिम्बबाह्वोस्तद्बाहुवेष्टनम् । बिम्बोष्ठां सद्विधीर्ह्येवं स्तनभूर्लोचनोल्बणा ॥
वृत्तवैपुल्यमानेन लोचने पद्मपत्रवत् । भ्रूयुग्मं नरसिंहोत्थं घ्राणाग्रं शुकचञ्चुवत् ॥

Sāttvata XXIV : 180*b*–227*a*, Īśvara[1] XVII : 181–227, Śrīpraśna XIII : 96–142

Paraśurāma

Paraśurāma, the brahmin incarnation of Viṣṇu who opposed domination by the kṣatriya rulers, is usually recognized by the fact that he is shown carrying an ax (*paraśu*) and by his virile figure. In the three excerpts below we learn that he can be shown alone or in a group-standing or seated, having two or four arms. In all cases he is to be depicted with matted hair. *See* §342, §343 and §344.

§ 342

. . . आसीनं द्विभुजं शान्तं जटामुकुटधारिणम् ॥
परशुं सशरं चापं दक्षिणेतरहस्तयोः । धारयन्तं सुवर्णाभं ब्राह्म्या लक्ष्म्या विराजितम् ॥
श्रीवत्सेनाङ्कितोरस्कं सोपवीतोत्तरीयकम् । स्थितं वा कल्पयेद्देवमेकबेरं विधेः पदे ॥
बहुबेरे पदे दिव्ये देवीं वामे प्रकल्पयेत् । चतुर्भुजा च कर्मार्चा जामदग्न्येन वा समा ।
भङ्गत्रयसमोपेतं त्रयस्त्रिंशत्सुलक्षणम् । यद्वा चतुर्भुजं कुर्याज्जामदग्न्यं चतुर्मुख ॥
शङ्खचक्रधरं शार्ङ्गशरहस्तं यथापुरम् । . . . .

Pādma "kr." XVII : 55*b*–60*a*

§ 343

. . . जामदग्न्यस्य रामस्य रूपं वक्ष्याम्यतः परम् ॥
.....तस्य वर्णाभं द्विभुजं श्वेतरत्नकम् । आसीनं तु प्रसन्नास्यं ब्रह्मलक्ष्मीसमावृतम् ॥
सर्वलक्षणसंपूर्णं सर्वाभरणभूषितम् । सर्वालङ्कारसंयुक्तं जटामण्डलभूषितम् ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

परशुं दक्षिणे हस्ते वामे चाप.....पत्रिणम् । वामे कमण्डलुं वापि चाक्षसूत्रं तु दक्षिणे ॥
इत्थं रूपं मुने तुभ्यं जामदग्नेस्तु वर्णितम् । . . . .

Viṣvaksena XI : 71*b*–75*a*

§ 344

जामदग्न्यं तु कुर्वीत जटामुकुटमण्डितम् । चतुर्बाहुं महाभागं सर्वक्षत्रान्तकं प्रभुम् ॥
दक्षिणे परशुं हस्ते वामे दद्यात्तथा धनुः । खड्गं दक्षिणहस्ते तु वामहस्ते तु खेटकम् ॥
कुठारहस्तं द्विभुजं कुर्याद्वा रेणुकासुतम् । . . . .

Hayaśirṣa "Ādi" XXIV : 25–27*a*

Rāma

One of the most popular incarnations of Viṣṇu among Vaiṣṇavas of all schools is as Rāma, the noble king and ideal husband. In the *Pāñcarātra* literature, then, we are not surprised to find a number of variants on the favorite themes indicating Rāma's presence. Generally, however, he is depicted with a bow in one hand, the arrows being either held in the other hand or in a sling on his back. Also, Rāma is rarely shown alone—he is most often found as the center of a group, flanked on either side by Sītā, his wife, and Lakṣmaṇa, his brother. Not uncommonly, Hanumān, the converted monkey-deity, is shown in a worshipful attitude as a fourth member of the group.

In excerpt §346, we are presented with a number of options for presenting Rāma—standing in the *tribhaṅga*-stance, seated, enthroned, reclining—and in the company of his extended family. Here, the members of primary group are given as three-dimensional icons while the other brothers and their wives—Bharata and Māṇḍavi, Śatrughna and Śrutakirti—and others are to be presented on a mural in the background. Measurements for both the icons and the painted figures are given. Rāma's color is black here.

In §348 and §350 the rarely seen "*vīrāsana*" posture—Rāma seated with Sītā on his lap—is described. More conventional descriptions are given in §347, §349 and §351, the latter one giving more dimensions for use in making metal icons.

The two closing excerpts, §353 and §354, are given over to descriptions of Hanumān—the former in a terrific stance, the latter in a benign attitude.

§ 346

. . . रामस्य राघवस्याथ लक्षणं वक्ष्यतेऽधुना ।
त्रिभङ्गं द्विभुजं रम्यं श्यामवर्णं किरीटिनम् । श्रीवत्साङ्कं प्रसन्नाभं यद्वा रामं चतुर्भुजम् ॥
ऋजुस्थितं दक्षिणेन चरणेनेतरेण तु । कुञ्चितेनाङ्घ्रिणा स्तोकं शरशार्ङ्गधनुर्धरम् ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

Digitized by Google

Original from
UNIVERSITY OF MICHIGAN

नरनारायणाख्यातौ तावुभौ रघुनन्दनौ । जगतां पालनार्थाय मानुष्यत्वमुपागतौ ॥
पुण्डरीकविशालाक्षौ तावुभौ पीतवाससौ । भुजान्ते बद्धतूणीरौ बाणपाणी महामुने ॥
निवसन्तौ श्रिया साकं वाल्मीकैः कविसागरे । रक्षसां मृत्युसङ्काशौ रावणस्यातिरावणौ ॥
नृपसूनू रघुश्रेष्ठौ भ्रातरौ रामलक्ष्मणौ । सर्वैश्च लक्षणैर्युक्तौ स्थापयेत्तत्र वित्तमः ॥
...सर्वलक्षणोपेतां सीतां रामस्येव दुर्लभाम् । नैर्ऋतानां विनाशाय जातां शुद्धामयोनिजाम् ॥
त्रिगुणात्ममयीं मायां मूलप्रकृतिसंस्थिताम् । व्यक्तरूपेतिसंज्ञापि साक्षादव्यक्तरूपिणीम् ॥
पतिव्रतां महाभागां स्त्रीणामप्युत्तमां श्रियम् । रक्तपद्मकरां देवीं पद्मां पद्मोपमाननाम् ॥
यौवनोद्दामदिव्याङ्गीं सीतां जनकनन्दिनीम् । पातिव्रत्यगुणोपेतां सीतां रामस्य वल्लभाम् ॥
सर्वालङ्कारसंयुक्तां नीलालकशिरोरुहाम् । मालानिबद्धधम्मिल्लां मदविभ्रान्तलोचनाम् ॥
कालपीताम्बरधरां स्थापयेत् वामपार्श्वतः । सव्यमुष्टिं ललाटान्तं कूपोर्ध्वमुखमन्तरम् ॥
तस्मिन्नवनवश्चापि बाणौघजघनं दृढम् । वासवास्तं वामबाहौ कारयेन्मुनिसत्तम ॥
साधकं कटिसूत्रे तु वामपार्णि तु दक्षिणम् । कालाग्निसदृशं बाणं पौलस्त्यान्तकरं दृढम् ॥
अन्तरेऽस्य मुखं कृत्वा गोलकं चोल्बणं भवेत् । मर्दन्तं रावणपुरं स्वबलं च गुणं तथा ॥
निहत्य रामहस्तस्थं स्थापयेद्दक्षिणे करे । वसुतालेन वा विद्धान्नान्दतालक्रमेण वा ॥
बेरस्य चानुरूपेण चरेत्सर्वायुधानि वै । कुञ्चितं वामपादं तु सुस्थितं दक्षिणं पदम् ॥
कनिष्ठिका सितस्थाने त्वङ्गुष्ठस्य स्थितिर्भवेत् । स्तोककुञ्चितजानुश्च पादौ वामस्थितो भवेत् ॥
मुखे शरीरे कट्यां च त्रिष्वङ्गेषु च नारद । त्रिभङ्गित्वान्मुनिश्रेष्ठ त्रिभङ्गीति प्रपठ्यते ॥
मुखं दक्षिणतो भङ्गं तनुमध्यं तु वा पुनः । दक्षिणे कटिभङ्गस्तु भङ्गत्रयमुदाहृतम् ॥
वामहस्तस्सचापस्स्याद्दक्षिणस्सशिलीमुखः । लक्ष्मणस्य भवेदेवं लक्षणं भरतस्य तु ॥
शत्रुघ्नस्याप्यथैवं स्यादिति तन्त्रेषु निश्चितः । संस्थाप्य मध्यमे रामं वामपार्श्वेऽस्य लक्ष्मणम् ॥
दक्षिणे स्थापयेद्देवीं सीतां जनकनन्दिनीम् । शत्रुघ्नभरतौ कार्यावुत्तरे दक्षिणे क्रमात् ॥
चामरासक्तबाहू तौ परिवारविधावपि । इति स्वतन्त्रे निर्दिष्टं परतन्त्रे वदाम्यहम् ॥
लोहैश्च निर्मिते बेरे चोत्तमादिक्रमैर्मुने । ललाटपट्टपर्यन्तं पादाङ्गुष्ठात्समुच्छ्रयम् ॥
द्वात्रिंशदङ्गुलं विद्धि उत्तमं कौतुकं द्विज । यस्मात्सप्ताङ्गुलैर्हीनं मध्यमं बेरमुच्छ्रयम् ॥
अस्मान्नवाङ्गुलैर्हीनं मध्यमं बेरमुच्छ्रयम् । अस्मान्नवाङ्गुलैर्हीनं अधमं परिकीर्तितम् ॥
इति दाशरथेर्मूर्तमुत्सेधं मुनिसत्तम । सीतालक्ष्मणयोश्चापि भरतस्यापि सांप्रतम् ॥
शत्रुघ्नस्यापि देवर्षे वदाम्यायाममद्य ते । देवस्य बाहुमूलान्तं देव्योत्सेधं प्रचक्षते ॥
लक्ष्मणस्योच्छ्रयं चापि रामस्यास्यान्तमीरितम् । लक्ष्मणस्य भुजान्तं स्याच्छत्रुघ्नस्योच्छ्रयं मुने ॥
इति दीर्घप्रमाणोक्तं शेषं पूर्ववदाचरेत् । स्वतन्त्रे परतन्त्रे च लक्षणं तव भाषितम् ॥

Viṣvaksena XI : 75b-109

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 352

मूलबेरस्य बाह्वन्तमुत्सेधं लक्ष्मणस्य तु । भरतस्य तथोत्सेधमिति तन्त्रे विदुर्बुधाः ॥
लक्ष्मणस्यापि बाह्वन्तं शत्रुघ्नस्योच्छ्रयं भवेत् । . . .

Viṣvaksena X : 116–117*a*

§ 353

दष्ट्रांकरालमत्युग्रं पिङ्गाक्षं मुष्टिधारिणम् । उदाराङ्गं त्रिनेत्रं तं वन्दे लङ्काभयङ्करम् ॥

Śeṣa XXIX : 5 (*sic.*)

§ 354

चक्रशङ्खधरं देवं शान्तं हैमवतीपतिम् । सर्वभूषणभूषाङ्गं मर्कटेशमहं भजे ॥

Parāśara XX : 7

Balarāma

This incarnation of Viṣṇu is always shown with the *hala*-plow, generally also as "fair" or white in color. In §355 and §356 he is described as having two hands, but the remaining excerpts—§357, §358, §359 and §360—make it clear that he may also be shown with four arms. In each case, the weapons and/or ornaments are specified for each hand. In §357 and §358 he is described as revealed with his wife (Revatī, or Śrī). In the former, she is shown carrying a jug—perhaps reminiscent of the episodes of her husband's monumental drinking bouts.

§ 355

रामस्य बलभद्रस्य लक्षणं कथयाम्यहम् । मनुष्याकारवत्कुर्यात् भागेऽथ परिकल्पयेत् ॥
द्विभुजं लाङ्गलं चैव प्रसव्येतरहस्तयोः । बिभ्राणमथवा हस्तं वामहस्तं कटिस्थले ॥
एवंलक्षणसंयुक्तं कारयेत् शिल्पिवित्ततः । . . . .

Mārkaṇḍeya VIII

§ 356

. . . बलराममहं वन्दे मुसलि हलधारिणम् ॥
सर्वाभरणभूषाङ्गमनन्तं श्रीपतिं सदा । . . . .

Parāśara XV : 239*b*–240*a*

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 357

. . . रामस्य बलभद्रस्य लक्षणं वक्ष्यतेऽधुना ॥
द्विभुजं धवलं दिव्ये भागेऽथ परिकल्पयेत् । मुसलं लाङ्गलं चैव प्रसव्येतरहस्तयोः ॥
बिभ्राणमथवा न्यस्तवामहस्तं कटिस्थले । दक्षिणाभयदं यद्वा चतुर्भुजमुदायुधम् ॥
हलं च दक्षिणे हस्ते वामे च मुसलायुधम् । धारयन्तं विभुं नीलवसनं शङ्खचक्रिणम् ॥
किरीटिनं बद्धकेशमथवा वामपार्श्वतः । रेवतीं कल्पयेद्देवीं दक्षिणे वा यथारुचि ॥
करण्डिकामुकुटिनीमथवा कबरीधराम् । असितां पारतन्त्र्ये च स्वातन्त्र्ये च यथापुरम् ॥

Pādma "kr." XVII : 112*b*-117

§ 358

बलरामस्य वक्ष्यामि शृणु नारद लक्षणम् । बलभद्रनिभाभिख्यः कुन्देन्दुधवलप्रभः ॥
पङ्कजाक्षोऽङ्गनावक्त्रः सर्वावयवशोभितः । सर्वालङ्कारसंयुक्तस्सर्वाभरणभूषितः ॥
सर्वावयवसंपूर्णः प्रभामण्डलमण्डितः । अस्य दक्षिणबाहौ तु मुसलं वामके करे ॥
हलं तु विन्यसेद्धीमान् बलरामस्य मन्त्रवित् । दक्षिणे तु श्रियं देवीं सौम्ये तु गरुडं न्यसेत् ॥
पीतं कृताञ्जलिं त्वेवं बलरामस्त्वथेरितः । . . . .

Viṣvaksena XI : 110-114*a*

§ 359

शङ्खचक्रधरं देवं वरदं हलधारिणम् । सर्वशान्तिकरं देवं बलरामहरिं शुभम् ॥

Śeṣa XXVI : 9

§ 360

. . . वामोर्ध्वं लाङ्गलं दद्यात् अधश्शङ्खं सुशोभनम् ॥
मुसलं दक्षिणोर्ध्वन्तु चक्रं चाधस्सुशोभनम् । गदां कृपाणं वा दद्यात् संस्थाने शङ्खचक्रयोः ॥

Hayaśīrṣa "Ādi" XXIII : 32*b*-33

Kṛṣṇa

This most popular of all of Viṣṇu's incarnations is usually shown to be "dark" in color. He is revealed with two arms (§364, §371, §373, and §374), but more often with four (§361, §362, §363, §364, §373 and §374). Often, in one or two of these hands he is holding his flute (§363, §367, §368, §369, §372 and §373); but he is also identified by other items—for examples the butterball, §373, or the shepherd's staff, §374—that indicate one of the many guises he takes as a child, a shepherd, a rustic swain, a charioteer, *etc.* Indeed, by collating the 14

Digitized by Google Original from UNIVERSITY OF MICHIGAN

different forms described in §373, the unusual form as a god of love in §366, and the four ascetic forms mentioned in §371, we have at least nineteen different forms in which the Lord as Kṛṣṇa is worshipped. The most widely-dispersed attitude among these in which Kṛṣṇa is worshipped seems to be the one with one or more females at his side—*see* §372 (Rādhā) and §373, §374 and §375 (Rukmiṇī and/or Satyabhāmā). Some specific measurements are available in §375.

§ 361

शङ्खकौमोदकीपद्मचक्रपाणिश्च कृष्णकः । . . . .

Mārkaṇḍeya VIII

§ 362

. . . कृष्णः शङ्खगदापद्मचक्रपाणिश्चतुर्भुजः ॥

Pādma "kr." XVI : 42*b*

§ 363

चक्रशङ्खगदापद्मधारिणं वनमालिनम् । शङ्खचक्रधरं श्रीशं वेणुं गायन्तमच्युतम् ॥
सर्वालङ्कारसंयुक्तं श्रीकृष्णं तं नमाम्यहम् । . . . .

Parāśara XIII : 187–188*a*

§ 364

. . . नवनीतनटं वापि पूजयेत्तमथापि वा ॥
चतुर्भुजं वापि तथा पूजयेत्तु दिने दिने । . . . .

Viṣvaksena XXX : 3*b*–4*a*

§ 365

. . . पक्षबाणधरं देवं श्यामलं चक्रधारिणम् ॥
चञ्चलं मान्मथं कृष्णं तं भजे सर्वतोमुखम् । . . . .

Śeṣa LV : 7*b*–8*a*

§ 366

कोदण्डमैक्षवमनेकशरं च पौष्पं चक्राब्जपाशसृणिकाञ्चनवंशनालम् ।
बिभ्राणमष्टविधबाहुभिरर्कवर्णं ध्यायेत् हरिं मदनगोपविलासवेषम् ॥

Parāśara XV : 254

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 367

बृन्दारण्ये तरणितनयातीरजे दिव्यकुञ्जे, पीठे चिन्तामणिवरमये वेणुमापूरयन्तम् ।
नीलाम्भोदद्युतिमनुपमं पीतवासोवसानं, वन्दे मुक्ताभरणकुसुमैर्भूषितं नन्दनन्दम् ॥

Śāṇḍilya I : xvi : 31

§ 368

अंसालम्बितवामकुण्डलधरं मन्दोन्नतभ्रूलतम्, किञ्चित्कुञ्चितकोमलाधरपुटं साचिप्रसारेक्षणम् ।
आलोलाङ्गुलिपल्लवैर्मुरलिकामापूरयन्तं मुदा, मूले कल्पतरोः त्रिभङ्गिललितं ध्यायेज्जगन्मोहनम् ॥

Śeṣa XXVI : 19

§ 369

सितहीरकचिबुकं गुरुमुक्ताकृतनासाभरणं शोणसरलविराजिततिलकं भवमङ्गलकरणम् ।
मारकतोज्वलकुण्डलयुगलं मकराकृतिहरणं यस्याननेन्दुमण्डलममलं ज्योतिः स्मितशरणम् ॥
छुरितालकचूडामणिबर्हापीडवरं केतकदलावतंसमनुश्रितमल्लीमाल्यभरम् ।
यस्याम्बुजतुलसीगुञ्जालीकृतदामप्रसरं काञ्चनसूत्रसुगुम्फविचित्रं पीतनिचोलरसम् ॥
मृगमदघुसृणसुशोभितलेपं विमलाञ्जनं नयने ताम्बूलारुणो भाससि रे अधरे मन्दस्मितरदने ।
दाडिमकुलानुकृतदन्तालिः स्फुरति वदि(?) दयने कूजति हरेर्मुरलिका मधुरं करपल्लवशयने ॥

Śāṇḍilya I : xvi : 7–9

§ 370

चक्रपद्मधरं देवं श्वेतपद्मोपरि स्थितम् । तं देवं पुत्रगोपालं अच्युतं विभुमव्ययम् ॥

Śeṣa XXVI : 52

§ 371

कृष्णमिन्दीवरश्याममूर्ध्वबाहुं जटाधरम् । पादेनैकेन तिष्ठन्तमाहरन्तं च मारुतम् ॥
एकत्रिषड्द्विषड्रात्राद्यतिकृच्छ्रपरायणम् । पक्षमासोपवासांश्च दिशन्तमनुचिन्तयेत् ॥

* * *

तमेव द्विभुजं ध्यायेदुदयादित्यवर्चसम् । कृष्णैणचर्मवसनं सत्कुठारकराङ्कितम् ॥
दशेन्द्रियाननं घोरं यो मनोरजनीचरम् । विवेकशरजालेन शमं नयति योगिनाम् ॥
ध्येयस्स एव विश्वात्मा सतोयजलदप्रभः । रक्तराजीवनयनो धनुश्शरकराङ्कितः ॥

* * *

. . . स्मर्तव्यस्सोऽपि भगवानतसीकुसुमद्युतिः ॥
वहन्वै वामहस्तेन सर्वशास्त्रार्थपुस्तकम् । दक्षिणेन तु शास्त्रार्थमादिशंश्च यथास्थितम् ॥

Sattvata XII : 145–146, 150–152, 154b–155

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 372

कर्णिकायामबालेन्दुमण्डले जलदाकृतिम् । सुवर्णवर्णया देव्या राधया परिवेष्टितम् ॥
कोटिकन्दर्पमुग्धाङ्गमरविन्दनिभेक्षणम् । मयूरपिञ्छाभरणं स्फुरन्मकरकुण्डलम् ॥
बन्धूकदलविभ्राजत्पाणिपादतलाधरम् । त्रिभङ्गसुन्दरग्रीवं वेणुवादनतत्परम् ॥
कुटिलालकमापीनभुजदण्डविभूषितम् । वलयाङ्गदमाणिक्यमयूखविलसत्तनुम् ॥
स्फरन्मुक्ताफलोदारद्युतिद्योतितवक्षसम् । श्रीवत्सकौस्तुभोरस्कं रणत्काञ्चीकलापकम् ॥
मञ्जुमञ्जीरनिर्घोषघुष्टपादसरोरुहम् । वधूकदम्बमध्यस्थमुदारगुणमण्डितम् ॥
वीणावादनतत्त्वज्ञं गानमोहितमन्मथम् । पार्श्वे विचिन्तयेद्देवीं राधिकां परदेवताम् ॥
कामकेलिकलाभिज्ञामुन्निद्रजलजेक्षणाम् । क्षीणमध्यामनिन्द्याङ्गीं मुग्धहासां महाच्छविम् ॥
गीतकाव्यकथालापविदग्धां सुन्दरोदरीम् । किशोरीं शैशवक्रीडापरामव्यञ्जितस्तनीम् ॥
नीलशाटीपरीधानां पङ्ककाश्मीरपङ्किलाम् । पङ्कजान्दोलितकरां कालिन्दीकेलिलम्पटाम् ॥
श्रीकृष्णांससमासक्तपाणिमाहूतषट्पदाम् । कौमुदीवल्लभां कान्तां बृन्दावनविलासिनीम् ॥

Bṛhadbrahma II : vi : 13-23

§ 373

यादवस्याऽथ कृष्णस्य निर्माणमधुनोच्यते । कल्याणलक्षणयुतं त्रिभङ्गं सिंहविष्टरे ॥
तिष्ठन्तं रुक्मिणीसत्यभामाभ्यां सहितं प्रभुम् । ईषत्कुञ्चितवामाङ्घ्रिं सुस्थितेतरमद्भुतम् ॥
मेघश्यामं विशालाक्षं पीतवस्त्रं चतुर्भुजम् । देवीसव्यभुजन्यस्तवामहस्तसरोरुहम् ॥
अधोमुखं तु हस्ताग्रं नाभिसूत्रसमन्वितम् । वामेतरकरस्पृष्टक्रीडामुष्टिमनोहरम् ॥
तत्करं कटिसूत्रान्तमुदस्ते तु करद्वयम् । शङ्खचक्रधरं कुर्याद् द्विभुजं वा यथोदितम् ॥
श्रीवत्साङ्कं प्रसन्नाभं वरेण्यं मुकुटोज्वलम् । बद्धालकभरं वापि भागे दिव्ये प्रकल्पयेत् ॥
रुक्मिणीं दक्षिणे पार्श्वे सत्यभामामथोत्तरे । विनतानन्दनं वापि भागे दिव्ये प्रकल्पयेत् ॥
आसीनं वा सुखं सार्धं देवीभ्यां सह विष्टरे । वामहस्तेन वरदं दक्षिणेनाभयप्रदम् ॥
यद्वा शयीत नृपवत्पर्यङ्के शोभिते भृशम् । भोगीन्द्रशयने वापि महापर्यङ्कमण्डिते ॥
पृष्ठतो मौलिपार्श्वे तु रुक्मिणीं कारयेत्सुधीः । सत्यभामा भवेत्पादसंवाहनसमुद्यता ॥
संवाहयन्त्या वा देव्या हस्ताभ्यां पादपङ्कजम् । तार्क्ष्यारूढं चतुर्बाहुं बिभ्राणं शरकार्मुकम् ॥
मुख्याभ्यामपराभ्यां च शङ्खं चक्रं चतुर्मुख । आरोप्य सत्यभामां वा वामोत्सङ्गे चतुर्भुजम् ॥
आरुह्य यान्तं पक्षीन्द्रं द्विभुजं वा यथारुचि । यद्वार्जुनस्य सारथ्यं कुर्वाणं परिकल्पयेत् ॥
रथस्थितं चतुर्बाहुं प्रतोदप्रग्रहौ दधत् । वामहस्तेन मुख्येन दक्षिणेन करेण तु ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

कपिध्वजाय प्रह्वाय परविद्यामुदीरयन् । अपराभ्यां च हस्ताभ्यां शङ्खचक्रधरं प्रभुम् ॥
किरीटिनं विशालाक्षं श्रीवत्साङ्कितवक्षसम् । द्विभुजं बुद्धकेशं वा कुर्यात्कमलसम्भव ॥
सार्धं च प्राञ्जलिं प्रह्वं सेषुं सेषुधिकार्मुकम् । * किरीटिनं श्यामवर्णं कल्पयेत्स्यन्दनस्थितम् ॥
विश्वरूपं तु वा कुर्यात्केशवं केशिसूदनम् । वृन्दावनगतं कृष्णं गवामनुचरं प्रभुम् ॥
ईषत्कुञ्चितवामाङ्घ्रिमितरेण ऋजुस्थितम् । गच्छन्तमपि गायन्तं वंशेन परमाद्भुतम् ॥
ईक्षमाणं मनाक् सव्ये पार्श्वे पुष्पावतंसितम् । विचित्रपुष्पग्रथितनवमालाविभूषितम् ॥
बर्हिबर्हैश्च रुचिरैर्वत्सदामविभूषणैः । भूषितं देवगन्धर्वसिद्धचारणसेवितम् ॥
कदम्बमूले वा मध्यन्दिने कृत्वा प्रतिष्ठितम् । व्यत्यासेन स्थितं पद्भ्यां वामेन ऋजुना स्थितम् ॥
दक्षिणप्रपदेनास्य पृष्ठभागस्पृशा स्थितम् । गोभिः सवत्सैर्हरिणैः पक्षिभिश्च समावृतम् ॥
ऋषिभिर्देवगन्धर्वैः किन्नराद्यैश्च सेवितम् । फणीन्द्रं कालियं यद्वा फणपञ्चकसंयुतम् ॥
पुरतः पुरुषाकारं नागाकारं च पृष्ठतः । कृताञ्जलिं दुराधर्षं आक्रम्य शिरसि स्थितम् ॥
वामपादेन गृह्णन्तं पुच्छं वामेन पाणिना । दक्षिणाभयदं हस्तं नृत्यन्तं कारयेद्बुधः ॥
अथवा कृततादङ्कं कुर्वाणं नाटचमद्भुतम् । महिषीं नागराजस्य भिक्षमाणां स्वकं पतिम् ॥
कृताञ्जलिपुटां देवीं तत्पार्श्वे वेपितां स्थिताम् । रासमण्डलमध्यस्थं यद्वा कुर्याज्जिगद्गुरुम् ॥
देव्यो गृहीत्वा हस्ताभ्यां कराग्रं मध्यतः स्थितम् । नृत्यं बहुसाहस्रगोपकन्याभिरावृतम् ॥
नवनीताय नृत्यन्तं सव्येन ऋजुना स्थितम् । उद्धृत्य दक्षिणं पादं विपरीतमथापि वा ॥
कारयेद्वामहस्तं तु चुबुकान्तसमुच्छ्रयम् । अभीतिदं दक्षिणेन वरदं वा यथारुचि ॥
मध्यतः स्तननाभ्योश्च वरदो हस्त इष्यते । यादवेन्द्रेण कृष्णेन क्रीडया यद्यथाश्रितम् ॥
कल्पयित्वा वपुस्तत्तदाराध्यं विभवार्थिभिः । एकबेरविधानं चेत् स्थापयेद् ब्रह्मणः पदे ॥
कर्मार्चादीनि बिम्बानि कल्पयेद्रघुवीरवत् । रुक्मिणीसत्यभामाभ्यां सह पीठे प्रकल्पयेत् ॥
रुक्मिणी कनकप्रख्या सत्याऽन्या श्यामला भवेत् । करण्डिकामकुटिनी यद्वा धम्मिल्लधारिणी ॥
सत्यभामा करे पद्मं धारयेद्दक्षिणे परम् । ऊरौ विश्रामयेदन्यं धारयेदन्यथाऽथवा ॥
यथोक्ततरविन्यासकल्पनं कमलासन । बाल्येऽपि या या देवी स्यात्सा सा कल्प्या यथाविधि ॥

Pādma "kr." XVIII : 1-37

§ 374

† कृष्णस्य स्थापनं कुर्यात् त्रिभङ्ग्या तु समन्वितम् । समन्तमेकपीठे तु रुक्मिणीसत्यभामयोः ॥
कृष्णं च बालवपुषं श्यामलं पीतवाससम् । रुक्मिणी कनकाभा स्यात्सत्यभामा च श्यामला ॥

* Pādma "kr." XVIII : 17b-19 = Mārkaṇḍeya VII : 67b-69.

† These same verses are also found later in the same work, Viṣṇu Tantra XXV : 3-8, 12-13 [Adyar ms.]

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

वासुदेवं गुडाकेशं सर्वाभरणभूषितम् । क्रीडायष्टियुतं देवं त्रिभङ्गस्थितिसंयुतम् ॥
दक्षिणे कटकं हस्ते यष्ट्याधारसमन्वितम् । वामदेव्या भुजे सक्तं वामहस्तमधोमुखम् ॥
वामं करतले कृत्वा नाभिसूत्रं तु कारयेत् । दक्षिणं यष्टिहस्तं तु वस्त्रमात्रे तु योजयेत् ॥
आसीनं यानकं वापि कृष्णबिम्बं तु पद्मज । कारयेत्कटकाद्यैस्तु द्विभुजं वा चतुर्भुजम् ॥

* * *

शङ्खकौमोदकं पद्मं हेतिराजं च पद्मज । ऋषीणां परपूर्वन्तु प्रादक्षिण्येन कारयेत् ॥
कृष्णमूर्तिधरं चैव कर्मार्चादीनि देशिकः । रुक्मिणीसत्यभामाभ्यां सहितं स्थापयेत् क्रमात् ॥

Viṣṇu Tantra XVIII : 2-7, 11-12 [Adyar *ms.*]

§ 375

अतः परं प्रवक्ष्यामि कृष्णं कृष्णाञ्जनप्रभम् ॥
स्थापनं कार्यमस्यैव स्थानकं तु विशेषतः । त्रिभङ्ग्या सम्मितं तं तु स्थितं पीठे महामुने ॥
क्रीडायष्टिसमायुक्तं देव्यौ च परमं हरिम् । स्थापयेद्देविके स्थाने सर्वज्ञं सर्वकारणम् ॥
एवं संक्षेपतः प्रोक्तं विविक्तेनाधुना मुने । अतश्श्यामनिभं वापि पीताम्बरसमन्वितम् ॥
वासुदेवं गुडाकेशं सर्वाभरणभूषितम् । क्रीडायष्टिधरं देवं त्रिभङ्गिस्थितिसंयुतम् ॥
सुस्थितं दक्षिणं पादं वामपादं तु कुञ्चितम् । वामपादतलं तिर्यक् क्रमेणैव तु कारयेत् ॥
तत्कनिष्ठाङ्गुलिस्थाने चाङ्गुष्ठस्थितिमाचरेत् । किञ्चित्कुञ्चितजानुश्च वामपादस्थितिर्भवेत् ॥
वक्त्रं चैव तथा गात्रे कटीयन्त्रे तथैव च । त्रिषु मार्गेषु भङ्गित्वात् त्रिभङ्गित्वं विधीयते ॥
वक्त्रं दक्षिणतो भङ्गे मध्यकायं तु वामतः । कटिदक्षिणतो भागे भङ्गत्रयमुदाहृतम् ॥
कारयेद्दक्षिणं हस्तं सुर्याष्टि कटकान्वितम् । वामं देवीभुजासक्तं वामहस्तमधोमुखम् ॥
वामं करतलं चैव नाभिसूत्रेण योजयेत् । दक्षिणं कटिहस्तं तु वक्त्रसूत्रेण योजयेत् ॥
त्रिभागमानमायामं मुखं मूर्ध्नि त्रिगोलकम् । हनुग्रीवं त्रिमात्रार्धमर्धमात्राङ्गुलं स्मृतम् ॥
हिक्कानाभिमुखे चैव मध्यकायं प्रतिष्ठितम् । मेढ्रं नाभिमुखं नाभेः तस्मादूरुमुखद्वयम् ॥
मानं संक्षेपतः प्रोक्तं शेषं साधारणं स्मृतम् । देव्यौ तत्पार्श्वयोश्चैव स्थापयेत्क्रमयोगतः ॥
देवस्य दक्षिणे कुर्याद्रुक्मिणीं रुक्मसन्निभाम् । सत्यभामां च वामे तु कारयेत् श्यामसन्निभाम् ॥
पूर्ववत् कमलं गृह्य सात्त्विकेन समावृते ।

Viṣvaksena XI : 114*b*-129*a*

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

Buddha

The only place in the *Pāñcarātrāgama* sources where the Buddha, as an incarnation of Viṣṇu, is described iconographically is in the following excerpt, §376. Here he is described as seated in the lotus-posture, in *samādhi*, with a "*yoga-dṛṣṭi*" expression. He has long, pendant ears, a gem in his navel, one palm uplifted, and wears bark garments. He is described further as "Father of the world". His measurement should be in the "*daśatāla*"-convention.

§ 376

दशतालं तथा बुद्धं पद्मासनगतं हरिम् । प्रलम्बश्रवणं कुर्यात् चीवरालङ्कृतं तथा ॥
मणिनाभि सनाभिस्थं पद्मास्यं पद्मलोचनम् । समाधिस्थोत्तानपाणिं योगदृष्टिसमन्वितम् ॥
स्थापयेद्रूपकामस्तु पितेव जगतः स्थितम् । . . . .

Hayaśīrṣa "Ādi" XXIII : 34–36a

Kalkin

Kalkin is the horse-riding figure of the Apocalypse, ushering in the end of *Kali-yuga* days. He may have two arms (§378 and §379) or four (§377, §379 and §380); he may be alone (§377) or in the company of one (§378 and §379) or more (§380) of his consorts. He may also be shown surrounded by other gods and sages (§378, §379 and §380). He is red in color (§378 and §379), ferocious (§380), yet resplendent with halo or "lustrous power" (§379 and §378).

§ 377

. . . कल्किनन्तु चतुर्बाहुं बहुतूणं धनुर्धरम् ॥
शङ्खचक्रधरं कुर्यात् तथा खड्गधरं प्रभुम् । द्विभुजं वा हयारूढं खड्गपाणिं सुरेश्वरम् ॥

Hayaśīrṣa "Ādi" XXIII : 37b–38

§ 378

. . . कल्किनिर्माणलक्षणम् ॥
वाहनं तुरगं प्रोक्तं पिङ्गं युद्धविराजितम् । वृत्तायुतं सुवृत्ताक्षं रक्तवर्णाः प्रकीर्तिताः ॥
द्विभुजं चर्मवसनं खड्गखेटकधारिणम् । करण्डिकामकुटिनं जटाजालविराजितम् ॥
ब्राह्म्या लक्ष्म्या समाश्रित्य देवैः परिजनैस्सह । कल्किलक्षणमित्येव बेरभेदं प्रचक्षते ॥

Mārkaṇḍeya VIII

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 379

निर्माणमधुना वक्ष्ये कल्किविष्णोर्महात्मनः । पिङ्गश्मश्रुं विवृत्ताक्षं रक्ताभं हयवाहनम् ॥
द्विभुजं चर्मवसनं खड्गखेटकधारिणम् । जटामुकुटसंयुक्तं ब्रह्मलक्ष्म्यादिराजितम् ॥
पैशाचे यानकं कुर्याद्दिव्ये भागे स्थितिर्भवेत् । यद्वा चतुर्भुजं कुर्यात् मुख्याभ्यां खड्गखेटकौ ॥
अपराभ्यां खड्गचक्रं हस्ताभ्यां दधतं हरिम् । आसने खेटकं खड्गं न कुर्वीत कदाचन ॥
अभयं वरदं चैव करयुग्मं प्रकल्पयेत् । शयनं नेष्यते तस्य कल्किविष्णोर्महात्मनः ॥
एकबेरविधानं चेत्कल्पयेद्ब्रह्मणः पदे । आसीनं स्थानकं चैव भागे दिव्ये प्रकल्पयेत् ॥
तस्य दक्षिणपार्श्वेतु याज्ञवल्क्यं पुरोहितम् । नारदं दक्षिणे पार्श्वे भित्तिभूमिषु देवताः ॥
कल्पयेद् जङ्गमान् बिम्बान् द्विजान्वाथ चतुर्भुजान् । अभयं वरदं चैव द्वौ भुजौ परिकल्पयेत् ॥
चतुर्भुजे शङ्खचक्रे द्वयोरपरयोर्भवेत् ॥ . . . .

Pādma "kr." XVIII : 38-46*a*

§ 380

. . . अतिशोणलसङ्काशो.....त्रिणो भीमरूपवान् ॥
शङ्खचक्रगदापाणिश्चतुर्बाहुः किरीटधृक् । वनमालासमायुक्तः सर्वाभरणभूषितः ॥
सर्वालङ्कारसंयुक्तः पीतवस्त्रसमन्वितः । एवं कल्किर्मया प्रोक्तो हिते न्यासं वदामि ते ॥
दक्षिणोर्ध्वकरे चक्रं वामोर्ध्वे शङ्खमेव तु । वामस्याधरहस्ते तु पाशं कृष्णनिभं न्यसेत् ॥
कारयेद्दक्षिणे हस्ते कालदं(?) त्वधोमुखम् । श्रियं दक्षिणपार्श्वे तु वामे पुष्टिं न्यसेद्बुधः ॥
द्वितीयावरणे चाष्टपरिवारसमन्वितम् ॥ . . . .

Viṣvaksena XI : 134*b* 139*a*

The twelve Mūrti-forms of the Lord described

While the *avatāra*-incarnations of the Lord are all terrestrial beings, the *mūrti*-forms seem to be certain invisible powers of protection that the Lord takes to help his devotees through the trials of daily life on earth. In terms of myth, each of the twelve *mūrtins* is remembered for having overcome and conquered some demon or daemonic tendency; in terms of Vaiṣṇava piety, the presence of these *mūrti*-forms is invoked in twelve different parts of the body as it were, the devotee donning the "full armor of God"—to protect vital parts where nerves join, organs are located, or where there are skeletal joints. Liturgically, any one or another of these forms may be afforded worship in a separate shrine or temple of his own; further, in any temple housing Viṣṇu's Divine Presence these *mūrti*-forms find an established place in the walls, throughout the courtyards. In any case, these forms

Digitized by Google Original from UNIVERSITY OF MICHIGAN

may best be understood by the common man in visual terms, and so it is that we have iconographical descriptions given each of these forms in the *Pāñcarātrāgama* literature we turn to for our sources.

In all cases of depicting the twelve *mūrti*-forms of the Lord, the artist is enjoined to arm them preferably with the *śaṅkha*-conch, the *cakra*-discus, the *gadā*-club and the *abja*-lotus (see *Pādma-saṃhitā*, "kr." XVI : 36 and *Mārkaṇḍeya-saṃhitā* VIII : 9b). The differences come in regard to which hands hold these various instruments, coloring, *etc.*

We shall describe each form briefly in the following pages.

Keśava

Keśava, whose presence in Vaiṣṇava piety is invoked into the right jaw, is described briefly in §381-§386. In the last one of these it may be worth noting that in place of the lotus, this hand may sometimes be freed to advance the *abhaya-mudrā*.

§ 381

. . . शङ्खचक्रगदापद्मधरः केशव उच्यते ॥

Garuḍa [*ms.*]

§ 382

केशवस्याम्बुजं शङ्खं चक्रं दण्डस्तथायुधम् । प्रादक्षिण्येन बाहूनामन्येषामुच्यते क्रमात् ॥

Pādma "kr." XVI : 30

§ 383

शङ्खचक्रगदापद्मधरं श्रीभूपतिं हरिम् । नमामि केशवं देवं सर्वालङ्कारसंयुतम् ॥

Parāśara XIII : 18

§ 384

. . . वारिजं शङ्खचक्रं च केशवं दण्डधारिणम् ॥

Mārkaṇḍeya VIII : 3b

§ 385

पङ्कजं दक्षिणे यस्य पाञ्चजन्यं तथोपरि । वामोपरि यस्य चक्रं गदाचाधो व्यवस्थिता ॥
आदिमूर्तेस्तु भेदोऽयं केशवेति प्रकीर्त्यते . . . .

Hayaśirṣa "Ādi" XIX : 4–5a

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 386

. . . दक्षिणोर्ध्वकरे चक्रं वामोर्ध्वे शङ्खमुद्वहन् ॥
गदां वामाधरे हस्ते अभयं दक्षिणाधरे । अदिमूर्तेस्तु भेदोऽयं केशवाख्यं मुनीश्वर ॥
Viṣvaksena XI : 152*b*-153

Nārāyaṇa

Nārāyaṇa, whose presence is invoked into the devotee's left jaw, is iconographically described as pleasing to look at (§395). The way in which he holds his weapons is just the opposite of the way they are held by Keśava (§387). His colour may be blue (§390 and §395), white (§391), or golden (§396). He is associated with radiance—in one case, with the sun's rays (§396), and in another case with a shining, gem-studded throne (§395). He may also be shown in association with his two consorts, Śrī and Bhū (§393, §394 and §395). In §396 it may be noted that he may be shown carrying a rosary, a small vessel, and holding in two hands an open book instead of the usual weapons.

§ 387

अधरोत्तरभागेन कृतमेतत्तु यत्र वै । नारायणाख्या सा मूर्तिः स्थापिता भुक्तिमुक्तिदा ॥
Hayaśirṣa "Ādi" XIX : 6
cf. ibid. XXI : 11 [Adyar *ms.*]

§ 388

शङ्खचक्रगदापद्मो नारायण इति स्मृतः । . . . .
Mārkaṇḍeya VIII : 4*a*
cf. Pādma "kr." XVI : 31*a*

§ 389

नारायणः पद्मगदाचक्रशङ्खधरो मतः । . . . .
Garuḍa [*ms.*]

§ 390

नारायणमथो वक्ष्ये शृणु नारद सत्तम । कुन्दपुष्पनिभं वापि श्यामं वा रक्तमेव वा ॥
शङ्खचक्रगदापाणिं चतुर्बाहुं किरीटिनम् । पीताम्बरसमायुक्तं सर्वाभरणभूषितम् ॥
सर्वावयवसंयुक्तं सर्वालङ्कारशोभितम् । सर्ववेदमयं सूक्ष्मं त्रैलोक्याधिपतिं हरिम् ॥
एवंरूपं तु संचिन्त्य हेतिन्यासमथो शृणु । दक्षिणे तु करे चोर्ध्वे पद्मं मुकुलकं न्यसेत् ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

अस्याधरे तु चक्रं स्यात्कालाग्निसदृशप्रभम् । वामोर्ध्वे तु गदा न्यस्य ह्यधोहस्तेऽम्बुजं न्यसेत् ॥
एवं चायुधविन्यासं . . . .

Viṣvaksena XI : 154–159*a*

§ 391

शङ्खचक्रधरं देवं पीताम्बरधरं . . । शुद्धस्फटिकसङ्काशं सूर्यमण्डलसंस्थितम् ॥

Vasiṣṭha XVI : 10

§ 392

चक्रशङ्खगदापद्मधरं श्रीभूपतिं विभुम् । सर्वालङ्कारसंयुक्तं नारायणमहं भजे ॥

Parāśara XIII : 26

§ 393

चक्रशङ्खगदापद्मधरं नीलोत्पलप्रभम् । पुण्डरीकाक्षममलं किरीटादिविभूषितम् ॥
श्रीभूमिसहितं देवं पङ्कजासनसंस्थितम् । ज्ञानानन्दमयं देवं नारायणमुपास्महे ॥

Parāśara X : 14–15 *cf. ibid.* XI : 9–10 ; also Śeṣa LXI : 12*b*–14*a*

§ 394

. . . शङ्खचक्रधरं देवं गदापद्मधरं विभुम् ॥
श्रीभूमिनीलासहितं नारायणमहं भजे । . . . .

Śeṣa LVIII : 6*b*–7*a*

§ 395

नारायणं समाराध्य चक्राब्जे मण्डलोत्तमे । नीलाम्बुदप्रतीकाशं पुण्डरीकायतेक्षणम् ॥
चतुर्भिर्बाहुकमलैश्चक्रशङ्खौ गदाम्बुजे । दधानं सौम्यवपुषं नीलकुञ्चितमूर्धजम् ॥
वसानं पीतवसने पूर्णचन्द्रनिभाननम् । ताम्रोष्ठं चारुहसितं लसन्मकरकुण्डलम् ॥
श्रीवत्सं कौस्तुभं चैव बिभ्राणं बृहतोरसा । मुकुटाङ्गदहारादिसर्वाभरणभूषितम् ॥
वनमालां दधानं च सूर्यकोटिसमप्रभम् । रत्नसिंहानासीनं लक्ष्म्या देव्या भुवा सह ॥

Viśvāmitra VI : 43–47

§ 396

स्फाटिकेनाक्षसूत्रेण करस्थेन च शोभितम् । गणयन्नक्षसूत्रीयानावर्तान् वामपाणिना ॥
अथ नारायणं देवं ध्यायेत् कुमुदपाण्डुरम् । बद्धब्रह्माञ्जलिं शान्तं हृत्पद्मार्पितमानसम् ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

युञ्जानं च स्वमात्मानं परस्मिन्नव्यये पदे । कमण्डलुधरं ध्यायेत् काञ्चनाभमतो हरिम् ॥
विष्टराविष्टपाणिं च क्रियाकाण्डप्रदर्शकम् । पठन्तमनिशं शास्त्रं पञ्चरात्रपुरस्सरम् ॥
Sāttvata XII : 141-144 *cf.* Īśvara[1] XXIV : 334-336

§ 397

ध्येयस्सदा सवितृमण्डलमध्यवर्ती नारायणस्सरसिजासनसन्निविष्टः ।
केयूरवान् मकरकुण्डलवान् किरीटी हारी हिरण्मयवपुः धृतशङ्खचक्रः ॥
Śeṣa XXXIV : 16

Mādhava

Mādhava, associated with the devotee's right eye, is said to hold the four usual weapons —conch, club, discus and lotus—but in §402 and §403 it is stipulated that the lotus be red. No color is here found for Mādhava's body (*see*, however, §151, above).

§ 398

. . . गदाधरो माधवश्च चक्रशङ्खाम्बुजायुधः ॥
Mārkaṇḍeya VIII : 4*b*

§ 399

माधवश्चक्रशङ्खाब्जगदाधरकरः स्मृतः । . . . .
Garuḍa [*ms.*]

§ 400

. . . माधवो गदया सार्धं चक्रशङ्खाम्बुजायुधः ॥
Pādma "kr." XVI : 31*b*

§ 401

चक्रशङ्खगदापद्मधारिणं भूपतिं स्मरे । किरीटादिविभूषाङ्गं श्रीमाधवमहं हरिम् ॥
Parāśara XIII : 33

§ 402

. . . सव्याधः पङ्कजं यस्य पाञ्चजन्यं तथोपरि ॥
दक्षिणोर्ध्वं यस्य चक्रं गदा चाधो व्यवस्थिता । आदिमूर्तेस्तु भेदोऽयं माधवेति प्रकीर्त्यते ॥
Hayaśirṣa "Ādi" XIX : 5*b*-6 [Adyar *ms.*]

Digitized by Google · Original from UNIVERSITY OF MICHIGAN

§ 403

माधवं चाधुना प्रोक्तं मधुकैटभनाशनम् । अस्त्रविन्यासभेदं तु शृणु चास्य महामुने ॥
वामपार्श्वोर्ध्वहस्ते तु शङ्खं धवलकं न्यसेत् । अधोहस्ते न्यसेद्रक्तं पद्मं द्वादशपत्रकम् ॥
दक्षिणोर्ध्वकरे चक्रमधस्ताल्लकुटं न्यसेत् । तृतीया तु भवेन्मूर्तिर्माधवाख्यं तु नारद ॥

Viṣvaksena XI : 161–163

Govinda

Govinda, associated in piety with the devotee's left eye and in theology with Saṁkarṣaṇa, is depicted iconographically with the usual four symbols, but in §406 it is noted that in addition to these he is garlanded and bears all decorations. In §408 his color is said to be the hue of the rising sun (orange?), or black or ash-color ; he is to wear yellow clothing.

§ 404

गोविन्दस्तु गदापद्मदरचक्रधरो मतः । . . . .

Garuḍa [*ms.*]

§ 405

गोविन्दश्चक्रदण्डाब्जशङ्खायुधधरो भवेत् । . . . .

Mārkaṇḍeya VIII : 5*a* *cf.* Pādma "kr." XVI : 32*a*

§ 406

. . . चक्रशङ्खगदापद्मधारिणं वनमालिनम् ॥
सर्वाभरणभूषाङ्गं गोविन्दं तं नमाम्यहम् । . . . .

Parāśara XIII : 40*b*–41*a*

§ 407

दक्षिणाधःस्थितं चक्रं गदा चास्योपरि स्थिता । वामोर्ध्वं संस्थितं पद्मं शङ्खं चाधो व्यवास्थितम् ॥
सङ्कर्षणस्य भेदोऽयं गोविन्देति प्रकीर्त्यते । . . . .

Hayaśīrṣa "Ādi" XIX : 8–9*a* [Adyar *ms.*]

§ 408

वासुदेवस्य भेदोऽयं वक्ष्ये सङ्कर्षणस्य तु । तरुणार्कनिभं वापि श्यामं वाभ्रनिभं तु वा ॥
पीतवस्त्रं चतुर्बाहुं सर्वाभरणभूषितम् । सर्वाभरणसंयुक्तं गोविन्दं गोकुलालयम् ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

एवं ध्यायेन्मुनिश्रेष्ठ सर्वकामप्रदं हरिम् । अस्यास्त्रन्यासभेदं तु शृणु नारद सत्तम ॥
दक्षिणोर्ध्वकरे तस्य गदां चक्रमधो न्यसेत् । वामपार्श्वस्थहस्ते तु रत्न(क्त)पद्मं तु विन्यसेत् ॥
अथ कुर्यात्तु विप्रेन्द्र शङ्खं गोक्षीरसन्निभम् । गोविन्द एवं संप्रोक्तो विष्ण्वाख्यमधुना शृणु ॥
Viṣvaksena XI : 164–168

Viṣṇu

Viṣṇu, the *mūrti*-form to be distinguished from the All-Pervading One, is associated in Vaiṣṇava piety with the devotee's right nostril. Iconographically he is described as being "dark" or red in color (§416). He bears the usual four items, but in his own peculiar and recognizable order (*see* §411). In §413, eight weapons are named, from which we may presume that this Viṣṇu may also be shown in an eight-hand variant. In three passages, §413, §414 and 416, he is described as riding upon his Garuḍa-vehicle.

§ 409

विष्णू राजीवशङ्खारिगदाधरकरः स्मृतः । . . . .
Garuḍa [*ms.*]

§ 410

. . . गदाब्जशङ्खारिधरो विष्णुरित्यभिधीयते ॥
Mārkaṇḍeya VIII : 5*b*

§ 411

. . . दक्षिणोपरि पद्मं तु गदा चाधो व्यवस्थिता ॥
वामोर्ध्वं पाञ्चजन्यं च चक्रं चाधो व्यवस्थितम् । सङ्कर्षणस्य भेदोऽयं विष्णुरित्यभिशब्द्यते ॥
Hayaśīrṣa "Ādi" XIX : 9*b*–10

§ 412

चक्रशङ्खगदापद्मधारिणं श्रीधरं विभुम् । नमामि विष्णुं तं देवं सर्वाभरणभूषितम् ॥
Parāśara XIII : 46

§ 413

शङ्खचक्रगदापद्मशार्ङ्गासिशरखेटकैः । श्रीवत्सकैस्तुभापीतकौशेयैर्वनमालया ॥
किरीटहारकेयूरकुण्डलादिविभूषणैः । अलङ्कृतमुदाराङ्गमप्रमेयं सुरोत्तमम् ॥
दिव्यरूपं खगारूढं दिव्यगन्धानुलेपनम् । सहस्रादित्यसङ्काशं दुर्निरीक्षं सुरासुरैः ॥
Viṣṇu I : 18–20

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 414

. . . शङ्खचक्रधरं देवं पीतवासं चतुर्भुजम् ॥
सर्वाभरणसंयुक्तं वनमालाविराजितम् । राजावर्तमणिप्रख्यं हारकेयूरभूषितम् ॥
श्रीवत्सवक्षसं चारुमकराकृतिकुण्डलम् । कम्बुग्रीवं महाबाहुं किञ्चित्प्रहसिताननम् ॥
एवं ध्यात्वा महाविष्णुं गरुडोपरि संस्थितम् । सह द्वादशभिश्चैव मूर्तिभिर्दशभिस्तदा ॥
लोकपालैस्तथादित्यैः रुद्रैर्वसुभिरेव च । ऋषिभिश्चारणैस्सिद्धैः किन्नरैरप्सरोगणैः ॥

Viṣvaksena XXXVIII : 51*b*–55

§ 415

श्रीवत्सेनाङ्कितोरस्कं वनमालाविराजितम् । सर्वरत्नप्रभाजालकौस्तुभेन विराजितम् ॥
उन्नताङ्गं महोरस्कं कर्णान्तायतलोचनम् । आजानुबाहुं श्रीमन्तं सौम्यं प्रहसिताननम् ॥
लावण्यामृततोयाभिस्सिञ्चन्तमिव सर्वतः । चतुर्भुजमनुध्यायेत् शङ्खचक्रगदाधरम् ॥
एवंरूपं ततो ध्यात्वा देवदेवं तथैव च । अर्चयेद् गन्धपुष्पाद्यैरुपचारैर्मनोरमैः ॥

Viṣvaksena XV : 25–28

§ 416

रक्तपद्मदलप्रख्यं श्यामं वा रक्तमेव वा । कृष्णं वा मुनिशार्दूल सर्वलक्षणसंयुतम् ॥
सर्वावयवसंपूर्णं सर्वाभरणभूषितम् । शङ्खचक्रगदापाणिं पीतवस्त्रं चतुर्भुजम् ॥
सर्वालङ्कारसंयुक्तं ध्यायेद् विष्णुं सनातनम् । प्रथमे तु करे पद्मं ह्यधस्तात्कारयेद् गदाम् ॥
वामे शङ्खं न्यसेत्तस्याभयं चक्रं विराजितम् । अथवा मुनिशार्दूल शृणु विष्णुं सनातनम् ॥
ऋजुस्थितं सुसौम्यं यत्कटिहस्तसमन्वितम् । शङ्खचक्रोभयोपेतं पीताम्बरसमन्वितम् ॥
सर्वावयवसंपूर्णं सर्वाभरणभूषितम् । सर्वालङ्कारसंयुक्तं ध्वायेद्विष्णुं सनातनम् ॥
द्विःप्रकारं मया प्रोक्तं विष्णुं सकलमव्ययम् । एवं ध्यायेन्मुनिश्रेष्ठ कर्तुरिच्छावशात् कुरु ॥

Viṣvaksena XI : 169–175

§ 417

. . . नृसिंहवत् स्वगात्रात्तु किञ्चिदभ्यधिकस्सरः ॥
वामे शङ्खं च चक्रं च विष्णुरेवं द्विधा स्मृतः । . . . .

Hayaśirṣa "Ādi" XXI : 16*b*–17*a*

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

Thus *mūrti*-form of the Lord, whose presence is invoked in the devotee's left nostril, has the usual four objects of identification, though their order is peculiar to him and helps identify him (*see*, for example, §421). In §423 his color is stated to be red. An eight-arm variety is mentioned in §423, carrying rosary, stick, jug and bow in addition to the normative four items. He is described as in the company of Śrī and Bhū in §424.

§ 418

. . . दरपद्मगदाचक्रकरो हि मधुसूदनः ॥

Garuḍa [*ms.*]

§ 419

मधुसूदनश्चक्रशङ्खवारिजो दण्डतत्परः । . . . .

Mārkaṇḍeya VIII : 6*a*

§ 420

. . . विष्णुर्गदाब्जशङ्खारिधरः स्यान्मधुसूदनः ॥

Pādma "kr." XVI : 32*b*

§ 421

दक्षिणोपरि शङ्खं तु चक्रं चाधः प्रदृश्यते । वामोपरि तथा पद्मं गदा चाधः प्रदृश्यते ॥
मधुसूदननामोऽयं भेदः सङ्कर्षणस्य तु । . . . .

Hayaśīrṣa "Ādi" XIX : 11–12*a* [Adyar *ms.*]

§ 422

रक्तोत्पलदलप्रख्यं पीतवस्त्रं चतुर्भुजम् । शङ्खचक्रगदापाणिं सर्वावयवशोभितम् ॥
सर्वालङ्कारसंयुक्तं सर्वाभरणभूषितम् । प्रथमे तु करे शङ्खमधस्तात् चक्रकं न्यसेत् ॥
पद्मं वामोर्ध्वहस्ते तु गदां चाधःकरे न्यसेत् । मधुसूदनमूर्तेस्तु लक्षणं विद्धि नारद ॥

Viṣvaksena XI : 176–178

§ 423

प्रलयानलसूर्याभः स्मर्तव्यो मधुसूदनः । अष्टबाहुर्विशालांसोऽप्यग्नीष्टो मकराङ्कितः ॥
शङ्खचक्रधरश्चैव बाणकार्मुकधृक् तथा । रजस्तमोभ्यां मूर्ताभ्यां संप्रवृत्तिनिवृत्तये ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

*कर्णपीठनिविष्टं च ध्येयं पाणियुगं विभोः । विद्याधिदेवं भगवच्चतुर्वक्त्रं चतुर्भुजम् ॥
लम्बकूर्च (कर्णं) जटादण्डकमण्डल्वक्षसूत्रिणम् । फुल्लरक्ताम्बुजाभासं श्वेतपद्मकराङ्कितम् ॥
श्रुती ऋगाद्या वक्त्रेभ्यः प्रोद्गिरन्तमनुस्मरेत् । निर्धूमाङ्गारवर्णोऽयं शङ्खपद्माक्षसूत्रिणम् ॥

Sāttvata XII : 20–24

§ 424

. . . सर्वालङ्कारसयुक्तं वनमालाविभूषितम् ॥
श्रीभूसमेतं देवेशं नमामि मधुसूदनम् । . . . .

Parāśara XIII : 51*b*–52*a*

Trivikrama

This *mūrti*-aspect, associated in piety with the protection of the right ear, is to be distinguished from the *avatāra*-incarnation of the same name. We have already presented the excerpts relating to both these aspects of the Lord above, §310–§318.

Vāmana

This *mūrti*-form is associated in Vaiṣṇava piety with the left ear and its protection. This aspect of the Lord's Being is to be distinguished from the *avatāra*-incarnation of the same name. The entries for both the *mūrti*-form and the *avatāra*-incarnation of the two "Vāmanas" have been collated already in §297–§309, above.

Śrīdhara

Śrīdhara is the *mūrti*-form that affords protection, according to Vaiṣṇava piety, to the right shoulder. Iconographically, the four normative weapons are found, again with their peculiar assignment to the various four hands (*see* §429 and §430). According to §430 his color is that of molten gold ; he wears yellow garments.

§ 425

श्रीधरोऽरिगदाशङ्खपङ्कजाङ्ककरो मतः । . . . .

Garuḍa [*ms.*]

* Sāttvata XII : 20–22*a* || Īśvara[1] XXIV : 211*b*–213.

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 426

. . . श्रीधरोऽब्जारिगदाभृच्छङ्खायुध इति स्मृतः ॥

Mārkaṇḍeya VIII : 7b

§ 427

. . . श्रीधरो धृतवारिजः । सार्धं चक्रगदाशङ्खैः . . . .

Pādma "kr." XVI : 34

§ 428

चक्रशङ्खगदापद्मधारिणं भूरमापतिम् । नमामि श्रीधरं देवं सर्वालङ्कारसंयुतम् ॥

Parāśara XIII : 68

§ 429

. . . ऊर्ध्वदक्षिणतश्चक्रं अधः पद्मं व्यवस्थितम् ॥
वामोर्ध्वं कौमुदी यस्य पाञ्चजन्यमधःस्थितम् । पद्मा पद्मकरा यस्य वाममार्श्वे व्यवस्थिता ॥
स्थितो वाप्युपविष्टो वा सानुरागोऽविकारवान् । प्रद्युम्नस्य प्रभेदोऽयं श्रीधरेति. प्रकीर्त्यते ॥

Hayaśirṣa "Ādi" XIX : 15b–17 [Adyar *ms.*]

§ 430

तप्तजाम्बूनदप्रख्यं श्रीवत्साङ्कितवक्षसम् । सर्वावयवसंपूर्णं सर्वाभरणभूषितम् ॥
पीतवस्त्रं चतुर्बाहुं शङ्खचक्रगदाधरम् । श्रीधरस्य मया प्रोक्तं लक्षणं भुक्तिमुक्तिदम् ॥
ऊर्ध्वचक्रमधःपद्मं दक्षिणे तु करे न्यसेत् । वामे चैव गदा ज्ञेया ह्यधश्शङ्खं विराजितम् ॥
तथा श्रीधरमूर्तिस्तु विज्ञेया देशिकोत्तमैः । एवं प्रद्युम्नभेदस्तु अनिरुध्दाख्यमुच्यते ॥

Viṣvaksena XI : 187–190

Hṛsīkeśa

Hṛṣikeśa associated in Vaiṣṇava piety with protective powers over the left shoulder, is shown iconographically to bear the four normative weapons (the exception being in §435, where he bears *śaṅkha*-conch, *cakra*-discus, *śārṅga*-bow and *astra*-arrows). According to §434, he is colored blue.

§ 431

हृषीकेशोऽरिराजीवदरकौमोदकीधरः । . . . .

Garuḍa [*ms.*]

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 432

गदा शङ्खं च चक्रं च हृषीकेशस्य वारिजम् । . . . .

Mārkaṇḍeya VIII : 8a

§ 433

दक्षिणोर्ध्वं महाचक्रं कौमुदी तदधःस्थिता ।। वामोर्ध्वं नलिनं यस्य अधश्शङ्खं विराजते ॥
हृषीकेशेति स ज्ञेयः स्थापितस्सर्वकामदः । . . . .

Hayaśirṣa "Ādi" XIX : 18-19a [Adyar *ms.*]

§ 434

नीलोत्पलदलप्रख्यं चतुर्बाहुं किरीटिनम् । शङ्खचक्रगदापाणिं सर्वाभरणभूषितम् ॥
श्रीवत्सवक्षसोपेतं हृषीकेशं सनातनम् । दक्षिणेऽस्य महाचक्रं गदा च तदधः स्थिता ॥
वामहस्ते महापद्ममधस्तच्छङ्खमेव च । सामूर्तिस्तु सदा ज्ञेया हृषीकेशेति नामतः ॥

Viṣvaksena XI : 191–193

§ 435

शङ्खचक्रधनुर्बाणधरं श्रीभूपतिं विभुम् । सर्वाभरणशोभाङ्गं हृषीकेशं नमाम्यहम् ॥

Parāśara XIII : 74

Padmanābha

This *mūrti*-form of the Lord has the usual four instruments of identification (*see* §436, §437 and §438), but in one case (§439) we see that the lotus is substituted by a *khaḍga*-sword. In §442, it is stated that Padmanābha may be shown also with two hands. There, we see also, his color is black. The same passage further states that when he is depicted along the wall of a temple-courtyard in this two-arm variation he may be shown reclining, from his navel growing the Brahmā-bearing lotus.

In Vaiṣṇava piety Padmanābha is invoked as a protective power in the devotee's navel.

§ 436

. . . पद्मनाभश्शङ्खचक्रगदायुध इति स्मृतः ॥

Mārkaṇḍeya VIII : 8b

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 437

पद्मनाभः पद्मचक्रगदाशङ्खधरो मतः । . . . .

Garuḍa [*ms.*]

§ 438

. . . गदाचक्राब्जशङ्खास्त्रधरः पङ्कजनाभकः ॥

Pādma "kr." XVI : 35*a*

§ 439

चक्रशङ्खगदाखड्गधरं नाभौ च पङ्कजम् । किरीटादिविभूषाङ्गं पद्मनाभं नमाम्यहम् ॥

Parāśara XIII : 80

§ 440

. . . दक्षिणोर्ध्वं पुण्डरीकं पाञ्चजन्यमधस्तथा ॥

वामोर्ध्वं संस्थितं चक्रं कौमुदी तदधः स्थिता । पद्मनाभेति सा मूर्तिः स्थापिता मोक्षदायिनी ॥

Hayaśirṣa "Ādi" XIX : 18*b*–19 [Adyar *ms.*]

§ 441

पद्मनाभस्य वक्ष्येऽहं लक्षणं भुक्तिमुक्तिदम् । नीलाम्बरनिभो वाऽपि श्यामो वा मुनिसत्तम ॥
एवं ज्ञात्वा लक्षणं तत् सर्वज्ञं सर्वकारणम् । कारयेन्मुनिशार्दूल शिल्पिभिस्सह साधकः ॥
सर्वलक्षणसम्पन्नं सर्वाभरणभूषितम् । सर्वावयवसम्पूर्णं चतुर्बाहुं किरीटिनम् ॥
शङ्खचक्रगदापाणिं पीताम्बरसमन्वितम् । श्रीवत्सवक्षसोपेतं पद्मनाभमवैहि तम् ॥
प्रथमेऽस्य करे पद्ममधस्तात् शङ्खमेव च । वामे च दृश्यते चक्रं गदा च तदधः स्थिता ॥
सा मूर्तिः पद्मनाभेति नमस्कार्या विचारणैः (विचक्षणैः?) । विन्यसेद्वा यथाकाममस्त्रविन्यासमन्त्रवित् ॥

Viṣvaksena XI : 194–199

§ 442

अथवा पद्मनाभस्य लक्षणं शृणु सुव्रत । द्विभुजं पङ्कजाक्षं तु श्यामं वाभ्रनिभं तु वा ॥
ध्यायेत्तस्मिन् मुनिश्रेष्ठ कारयेल्लक्षणैर्युतम् । शयने सति संप्रोक्तं पद्मनाभस्य नारद ॥
अत्र कर्मार्चनादीनां लक्षणं वक्ष्यतेऽधुना । योगमुद्रासमायुक्तं शङ्खचक्रसमन्वितम् ॥
कारयेद्वा मुनिश्रेष्ठ कर्मार्चां पूर्ववत्तु वा । इत्येवं पद्मनाभस्य लक्षणं परिकीर्तितम् ॥
भित्तिपार्श्वेऽस्य नाभ्यूर्ध्वे रक्तपद्मं सुनालकम् । कारयेत्सुमनोरम्यं शतपत्रं सकर्णिकम् ॥
तदर्धं वाऽर्धकं वापि दलं पद्मस्य नारद । कर्णिकाग्रे विधिं ध्यायेल्लक्षणैस्सह नारद ॥
तल्लक्षणं प्रवक्ष्यामि शृणु भक्तिशुभप्रदम् । पद्मासनसमायुक्तं विधिं कनकसन्निभम् ॥

Viṣvaksena XI : 120–126

Digitized by Google Original from UNIVERSITY OF MICHIGAN

In Vaiṣṇava piety, the *mūrti*-form known as Dāmodara is invoked to give protection to the cranium. Theologically, he is related to the *vyūha*-mode Aniruddha. Iconographically, he bears the usual four instruments of identification (§443, §444, §445 and §446), although in §447 we find that in a seated attitude he may be shown with conch, discus, bow and sword; the support, in this case, will be the lotus. His color is blue, and he is shown with yellow clothing (§448).

§ 443

दामोदरः शङ्खकञ्जचक्रकौमोदकीधरः । . . . .

Garuḍa [*ms.*]

§ 444

शङ्खचक्राब्जदण्डास्त्रधरो दामोदरस्स्मृतः । . . . .

Mārkaṇḍeya VIII : 9*a*

§ 445

. . . पद्मचक्राम्बुजगदाधरो दामोदरः स्मृतः ॥

Pādma "kr." XVI : 35*b*

§ 446

दक्षिणोर्ध्वं पाञ्चजन्यमधस्तात्तु कुशेशयम् । सव्योर्ध्वं कौमुदी देवि हेतिराजमधःस्थितम् ॥
अनिरुद्धस्य भेदोऽयं दामोदर इति स्मृतः । . . . .

Hayaśirṣa "Ādi" XIX : 20-21*a* [Adyar *ms.*]

§ 447

चक्रशङ्खधरं देवं लक्ष्म्यालिङ्गितवक्षसम् । गदाशार्ङ्गखड्गधरं पद्मपीठोपरि स्थितम् ॥
सर्वाभरणभूषाङ्गं भक्तैस्सेव्यं जगत्पतिम् । नमामि सततं भक्त्या दामोदरमनामयम् ॥

Parāśara XIII : 86-87

§ 448

नीलजीमूतसङ्काशं पीतवस्त्रं चतुर्भुजम् । सर्वावयवसम्पूर्णं सर्वाभरणभूषितम् ॥
सर्वालङ्कारसंयुक्तं श्रीवत्साङ्कितवक्षसम् । शङ्खचक्रगदापाणिं वनमालाविराजितम् ॥
एवं ध्यायेत्स्वपन्तं तु दामोदरमनामयम् । प्रथमेऽस्य करे शङ्खमधस्तात् शङ्खमेव हि ॥
वामे चैव गदां तस्य ह्यधस्तात् चक्रमेव च । अनिरुद्धस्य भेदोऽयं दामोदर इति स्मृतः ॥

Viṣvaksena XI : 229-232

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

The Consorts of the Twelve Mūrtis

One general passage relates to the consorts of the twelve collectively: §449 says that they will all be shown holding a veena and a lotus.

§ 449

. . . एतेषां तु स्त्रियौ कार्ये पद्मवीणाधरे शुभे ॥

एतत्समासतः प्रोक्तं मूर्तीनां लक्षणं मया । . . . .

Hayaśirṣa "Ādi" XIX: 22*b*-23*a*

Female deities described

The Lord Who is One can take many shapes and forms, as we have already seen by surveying the *Vyūhas*, *avatāras* and *mūrtis*. He may just as well assume a feminine form to assert His Powers. Particularly among the Śrī-vaiṣṇavas the position of Śrī as a Full Presentation of Viṣṇu is asserted both in piety and in theology. In worship we see this female form of Viṣṇu's Power sometimes in the position of an attendant deity and consort or wife, sometimes also as a separate Goddess representing the Divine Presence fully and equally, sometimes also as a merely decorative motif.

In the following excerpts (§450–§476) are collated passages that deal exclusively with Her divine female forms in their main aspects as Śrī (+Lakṣmī), Bhū and Nīlā. The "lesser" female deities, as they appear as attendants and subservient figures, are grouped together later in §731–§743. We commence this section, however, with a general passage describing the iconography and proportionate sizes of female forms in general.

§ 450

अथातस्संप्रवक्ष्यामि देव्यादीनां सुलक्षणम् । अलङ्काराणि सर्वाणि शृणुष्व नृपसत्तम ॥
अङ्गुलैस्सप्तविंशत्या य(व)क्षोदण्डसमायतः । विस्तारो मध्यतस्तस्य त्र्यङ्गुलः षड्यवाधिकः ॥
अङ्गुलैर्दशभिष्षड्भिः चतुर्भिः द्व्यङ्गुलेन वा । अतो न्यूनं न कर्तव्यं कर्तव्यं सुपरीक्षितम् ॥
मूलबेरार्धमथवा त्रिभागमथवापि वा । एकभागं न कुर्वीत कारयेद्यदि शिल्पिना ॥
स्वराष्ट्रं नाशयेत्पूर्वं तद्ग्रामं च तथैव च । तस्मात् सर्वप्रयत्नेन शिल्पशास्त्रोक्तवर्त्मना ॥
सिंहासने सुखासीनमभयं वरदं करम् । कमवे (कल्पयेत्?) चावरौ हस्तौ सुखासनसमन्विताम् (तौ?) ॥
वीरलक्ष्मी तु विज्ञेया भोगलक्ष्मी प्रदर्शिका । द्विभुजा वा स्थिता मूर्तिः भोगलक्ष्मी इति स्मृता ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

त्रिकोणकाण्डिका वापि योगलक्ष्मी प्रकीर्तिता । योगलक्ष्मी तु श्रीवत्स(स्यात्?)भोगलक्ष्मी द्विपार्श्वयोः ॥
वीरलक्ष्मी तु वैशेषं पृथग्भवनकल्पनम् । पृथगावरणे वापि त्रिकं योग्यावकाशके ॥
द्वितीयावरणेऽवापि ह..... । तृतीयावरणे चापि चतुर्थावरणेऽपि वा ॥
पञ्चमावरणे वापि षष्ठमावरणेऽपि वा । सप्तमावरणे वापि देशे योग्यावकाशके ॥
वीरलक्ष्मीं प्रतिष्ठाप्य राजराष्ट्रसुखावहाम् । श्रियादिमूर्तिभेदं ते वक्ष्यामि नृपसत्तम ॥
श्रीमूर्तिः प्रथमोद्दिष्टा पुष्टिमूर्तिस्ततः परा । मेधा सरस्वती दुर्गा विघ्नेशश्च श्रियां धिषत् ॥
श्रियादिभेदमेवं स्यात् वक्ष्याम्यङ्गुलिनामकम् । षडेते मानमाख्यातं बेरस्याङ्गुलिनामकम् ॥
मकुटं पूर्वमेवोक्तं ललाटोच्छ्रायपञ्चकम् । अङ्गुली तु सुसूक्ष्मेण भेदस्तद्वद दैवतम् ॥
वक्षस्स्थले वसाने च नाममानमुदाहृतम् । कक्षबाह्वन्तरे चैव एकाङ्गुलमुदाहृतम् ॥
गणेषु सङ्कुलं प्रोक्तं पिटरे च महाङ्गुलम् । पञ्चपञ्चप्रकाशेन पञ्चमं पञ्चमाञ्चितम् ॥
पञ्चविंशत्यङ्गुलानां बाहुदीर्घं प्रशस्यते । बाह्वोरधः चतुर्विंशत्यङ्गुलस्य प्रमाणकम् ॥
मणिबन्धादधस्ताच्च दशाङ्गुलमिति स्मृतम् । नाभेरूर्ध्वं सवक्षोऽन्तमङ्गुलाष्टादशं स्मृतम् ॥
स्तनयोर्वृत्तमध्यान्तं पञ्चाङ्गुलमिति स्मृतम् । नाभ्यादधस्तात् गुह्याण्डमङ्गुलाष्टादशं स्मृतम् ॥
बून्याद्(?) अधस्तात्पादान्तं यावत्पञ्चदशाङ्गुलम् । पादं षडङ्गुलं प्रोक्तं विस्तृतं च दशाङ्गुलम् ॥
उरस्सपादहीनं वा अधमं प्रतिमोच्छ्रयम् । बेरोच्छ्रायत्रयं कृत्वा भागैकं पीठिकोच्छ्रयम् ॥
चतुर्भागैकभागं वा आसने पीठिकोच्छ्रयम् । पञ्चभागैकभागं तु स्थानके पीठिकोच्छ्रयम् ॥
अथवा पीठमेकं (वा) कल्पयेत् शिल्पिवित्तमः । पद्मपुष्पं भवेत् फुल्लमर्धपुष्पं सकर्णिकम् ॥
द्वारात्पादान्तविस्तारं तावदुत्सेधसंयुतम् । तस्य नालं भवेद्वृत्तं चतुरश्रं तु वा पुनः ॥
वृत्तं शिव इति प्रोक्तं चतुरश्रं पितामहः । हस्तमात्रं तदायामं मानं मानमुदीर्यते ॥
स्थानं तस्येदमाख्यातं आसनस्योच्यतेऽधुना । गर्भद्वारयुताङ्गं तु पादपद्मोच्छ्रयं तु या ॥
तावदायामविस्तारे पूर्ववच्छेषमुच्यते । एतत् ध्याने न शयने का.....नैव कदाचन ॥
देवस्य बाहुमूलान्तं देवीनामिति चोच्छ्रयम् । स्तनान्तं वा नृपश्रेष्ठ उच्छ्रायं परिपठ्यते ॥
देवीनां दक्षिणे पद्मं मुकुलं यदि विन्यसेत् । पद्मं तु वामहस्ते स्यात् महद्भयमवाप्नुयात् ॥
राजा कलहमाप्नोति तस्माद्यत्नेन वर्जयेत् । बहुबेरप्रतिष्ठायां देवीनां लक्षणं शृणु ॥
पार्श्वयोस्सह देव्या च बेरे यत्र प्रतिष्ठिता । तद्बेरं बहुबेरं स्यात् इति शास्त्रस्य निश्चयः ॥
मत्स्यादिलोकपालान्तं प्रभया कल्पितस्ततः । बहुबेरं समाख्यातं एकबेरविधानतः ॥
पृथग्देव्या(च?)प्यस्य सर्वत्र.....कारणसिद्धिदम् । वैकुण्ठे तु समासीनं सर्वसंहारकारणम् ॥
अनादिनिधनं विष्णुं प्रतिष्ठाप्य प्रपूजयेत् । . . . .

Mārkaṇḍeya X : 1-35a [*sic.*]

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

Lakṣmī, Bhū and Nīlā described

Lakṣmī, another name for Śrī, is also called " Kamalā ". In §451 and §452 we read that she is revealed seated on a lotus, holding the conch and discus as well as a lotus. §453 indicates that she may also be shown seated on the lap of Nārāyaṇa. §460 and §461 describe her form as it is seen in the lintel above an entrance ; she is there seated on a lotus, and is golden in color.

Turning to forms where Lakṣmī is shown as a separate figure—in her own shrine or temple—we find that she is described as having either two hands (§454, §455) or four hands (§456?, §457 and §458). Detailed measurements are available in §459 and, to a lesser degree, in §466, where she is said to be fashioned in either the " *navatāla* " or " *aṣṭatāla* " formula. In §462, §463, §464 and §465 we find her described in her " *vīra*," " *bhoga* " and " *yoga* " forms in her own temple—and §473, §474 and §475 there are descriptions of her own entourage of female attendants (§476 describes her male attendants).

Bhū is a second form, along with Lakṣmī, that is to flank the Lord. The attitude of these two is determined by the attitude of the main figure in such a case (*see* §468, §469 and §470).

Nīlā is briefly described in §471. §472 asserts that both Lakṣmī and Sarasvatī are to hold a veena and a lotus.

§ 451

. . . पद्महस्तां च कमलां वासुदेवां हरिप्रियाम् ॥
पद्मासनां पद्मभुवां महोदध्यात्मजामिलाम् । . . . .

Nāradiya XXVIII : 38*b*-39*a*

§ 452

कारयेत्कमलां देवीं तप्तकाञ्चनसन्निभाम् । सर्वलक्षणसंयुक्तां पद्मासनसमन्विताम् ॥
पद्महस्तां श्रियं देवीं पद्मनाभप्रियां शुभाम् । मणिमौक्तिकसंयुक्तां सर्वाभरणभूषिताम् ॥

Viṣvakseṇa XVIII : 48-49

§ 453

मध्याब्जकर्णिकामध्ये भावासनगतौ स्मरेत् । पुरुषं पुण्डरीकाक्षं तदङ्कस्थां च पङ्कजाम् ॥
प्राच्याब्जकर्णिकामध्ये लक्ष्मीदेहाद्विनिर्गताम् । द्विभुजां भावयेल्लक्ष्मीं द्विनेत्रां चारुकुण्डलाम् ॥
श्वेतमाल्याम्बरधरां हारकेयूरभूषिताम् । सर्वलक्षणसम्पन्नां पीनोन्नतपयोधराम् ॥
प्रबुद्धोत्पलविस्तीर्णलोचनां सुस्मिताननाम् । चलद्द्विरेफपटलरमणीयालकावलिम् ॥
लसल्ललाटतिलकामारक्ताधरपल्लवाम् । कृष्णकुञ्चितकेशां च वंशमुक्ताफलद्विजाम् ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

पद्मासनोपविष्टां च पाशाङ्कुशकरद्वयीम् । पद्मगर्भोपमाकारां संमुखीमावयोः स्मरेत् ॥
स्मरेद्दक्षिणभागाब्जकर्णिकोदरमध्यगाम् । वेषभूषादिभिस्तुल्यां लक्ष्म्याः कुन्दनिभां तु वा ॥

Lakṣmi Tantra XXXVIII : 29–35

§ 454

सौम्यवक्त्रा सौम्यनेत्रा द्विभुजा चारुकुण्डला । पद्मगर्भोपमा कान्त्या मेखलादाममण्डिता ॥
श्वेतमाल्याम्बरधरा हारकेयूरमण्डिता । सर्वलक्षणसम्पन्ना पीनतुङ्गघनस्तनी ॥
प्रबुद्धोत्पलविस्तीर्णलोचना सुस्मितानना । चरद्द्विरेफपटलतुल्यैर्युक्ता तथालकैः ॥
ललाटे तिलकं चित्रं वहन्ती च मनोहरम् । आरक्ताधररत्ना च वंशमुक्ताफलद्विजा ॥
अर्धचन्द्रललाटा च नीलकुञ्चितमूर्धजा । पाशाङ्कुशधरा देवी धर्मकामार्थमोक्षदा ॥
बद्धपद्मासना चैव मकुटोत्तमशोभिता । एवं ध्येयाऽहमीशाना लक्ष्मी व्यूहस्थिता सती ॥

Lakṣmi Tantra XLV : 16–21

§ 455

गणेशयागः संप्रोक्तः श्रीयागं तु ब्रवीम्यतः । श्रियः स्थानं तु पूर्वस्यां पश्चमायामथापि वा ॥
उत्तरस्यां तु वा कुर्यान्न चान्यत्र कथञ्चन । प्राच्यां तु पश्चिमद्वारं प्राग्द्वारं पश्चिमे तथा ॥
उत्तरे दक्षिणद्वारं श्रियः प्रासाद इष्यते । एवं च विधिना कार्यं पूर्वोक्तैर्द्रव्यविस्तरैः ॥
ततश्च प्रतिमां कुर्यादष्टतालप्रमाणतः । पूर्वोक्तैर्द्रव्यविस्तारैर्यथालाभं स्वशक्तितः ॥
पद्मकिञ्जल्कवर्णाभां द्विभुजां पद्मधारिणीम् । शुक्लमाल्याम्बरधरां चूडामकुटधारिणीम् ॥
मुण्डमालापरीतांसां पद्मकर्णावतंसिकाम् । आसीनां कारयेत् देवीमासने पद्मविष्टरे ॥

Sanatkumāra "Śiva" I : 101–106

§ 456

परास्तरणसंछन्ना धूपामोदसुधूपिता । ध्यायेच्च लक्ष्मीं तन्मध्ये प्रकृतिं त्रिगुणात्मिकाम् ॥
तस्मिन् शयनमध्ये तु संप्राप्तनवयौवनाम् । अतीव रूपसंपन्नां मदसंयुतलोचनाम् ॥
सर्वशक्तिसमोपेतां वैष्णवीं शुभविग्रहाम् । दिव्यमाल्याम्बरधरां दिव्यरत्नविराजिताम् ॥
दिव्यगन्धानुलिप्ताङ्गीं दिव्याभरणभूषिताम् । साभिलाषामृतुस्नातां प्रार्थयन्तीं हरिं पतिम् ॥
एवंरूपां तु संचिन्त्य देवीं पङ्कजधारिणीम् । गन्धमाल्योदकादीनि मुखवासान्तिकानि च ॥
यानि क्रीडोपचाराणि तानि ध्यात्वा समन्ततः । अतीव रूपसम्पन्नां प्रथमे वयसि स्थिताम् ॥
मकुटाङ्गदचित्राङ्गीं नीलकुञ्चितमूर्धजाम् । दिव्यमाल्याम्वरधरां दिव्यरत्नविभूषिताम् ॥

Viṣvaksena XX : 18–24

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 457

शङ्खचक्रसमायुक्तां पीतवस्त्रां चतुर्भजाम्। श्रियं सुवर्णवर्णाभां . . . .

Viṣvaksena XX : 145

§ 458

तप्तजाम्बूनदमयीं चतुर्हस्तसमन्विताम् । सर्वावयवसम्पूर्णां सर्वाभरणभूषिताम् ॥
सर्वशक्तिसमोपेतां मकुटादिविराजिताम् । सर्वालङ्कारसंयुक्तां सर्वरत्नविराजिताम् ॥
रक्तपद्मधरां देवीं रक्ताम्बरसमन्विताम् । पद्मासनसमायुक्तां साक्षाद्देवीं हरिप्रियाम् ॥
शङ्खचक्राम्बुजधरां लक्ष्मीमेव तु चिन्तयेत् । दक्षिणोर्ध्वकरे चक्रमधः पद्मविराजितम् ॥
वामे शङ्खमयं पद्मं वरदं वाभयं तु वा । एवं ध्यात्वा मुनिश्रेष्ठ स्वतन्त्रार्चाविधानके ॥
परतन्त्रे तु वक्ष्यामि लक्षणं पुष्टिसंयुतम् । शङ्खचक्रं व्यपोह्यैव श्रियं पुष्टिं तु कल्पयेत् ॥
द्विभुजां कनकाभासां श्रियं विन्यस्य दक्षिणे । . . . .

Viṣvaksena XX : 255-261*a*

§ 459

अतः परं प्रवक्ष्यामि लक्ष्मीलक्षणमुत्तमम् । अष्टताला तु कर्तव्या देवी लक्ष्मीस्सुरेश्वरी ॥
तत्क्रमं सौरकाण्डे तु कथयिष्ये तवानघ । नवतालिकक्षेत्रान्तु कथ्यमानामितः शृणु ॥
भ्रुवौ यवादिके कार्ये यवपीना तु नासिका । गोलकेनाधिकं वक्त्रमूर्ध्वं तिर्यग्विवर्जितम् ॥
आयते नयने कार्ये त्रिभागोनैर्यवैस्त्रिभिः । तदर्धेन तु वैपुल्यं नेत्रयोः परिकल्पयेत् ॥
कर्णपाशोधिकः कार्यः स्रग्विण्या सह सूत्रतः । नम्रं कलाविहीनं तु कुर्यादंशद्वयं सदा ॥
ग्रीवा सार्धकला कार्या तद्विस्तारोपशोभिता । नेत्रं विना तु विस्तारादूरू जानु च पिण्डिका ॥
अङ्घ्रिपृष्ठस्फिचे कट्यां यथायोगं प्रकल्पयेत् । सप्तांशेन तथा गुल्फो दैर्घ्ये विष्पानाहतः(?) ॥
नेत्रे तद्वर्जितायामजंघोरं(?) च तथा कटिः । मध्यपार्श्वं च तत् हृद्यं घनं पीनं कुचद्वयम् ॥
तालमात्रौ स्तनौ कार्यौ कटिस्सार्धकलाधिका । शेषमन्यत् यथोद्दिष्टं लक्ष्मी चेयं प्रकीर्तिता ॥
सर्वाभरणसम्पन्ना मध्यक्षामा स्तनोन्नता । श्रोणीतटे सुविस्तीर्णा कार्या देवी सुरेश्वरी ॥
द्विभुजा कम्बुग्रीवा तु विशालाक्षी सुलक्षणा । स्तनौ समुन्नतौ कार्यौ कञ्चुकेनावगुण्ठितौ ॥
नागहस्तोपमौ बाहू ऊरू रम्भासमौ शुभौ । नानारत्नोज्वलं पट्टं देव्याश्शिरसि दापयेत् ॥
नानारत्नोज्वला दिव्या मेखला श्रोणिसंस्थिता । युक्ता दिव्येन हारेण केयूरकटकोज्वला ॥
पद्मासना तु कर्तव्या पद्मश्रीफलपाणिका । दक्षिणे पुण्डरीकं तु वामहस्ते च श्रीफलम् ॥
स्थिता वा त्रिवलीभङ्गिशोभिता वा प्रशस्यते । स्त्रियौ पार्श्वद्वये कार्ये शुभे चामरहस्तिके ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

Digitized by Google

Original from
UNIVERSITY OF MICHIGAN

VĪRALAKṢMĪ

(*To face entry § 465, p. 181*)

Digitized by Google

Original from
UNIVERSITY OF MICHIGAN

भृङ्गारहस्तौ द्वौ नागौ स्नपयन्तौ श्रियं स्थितौ । श्रीरियं लक्षणोपेता स्थापिता सर्वकामदा ॥
सर्वासामेव देवीनां एतत्साधारणं स्मृतम् । . . . .

Hayaśirṣa " Ādi " XVIII : 1–17*a*

§ 460

. . . तप्तकाञ्चनवर्णाभां प्रवालसदृशाम्बराम् ॥
हारनूपुरकेयूरकरण्डमकुटादिकैः । अलङ्कृतामलङ्कारैः पुण्डरीकनिभेक्षणाम् ॥
अकलङ्कसुसम्पूर्णशरच्चन्द्रनिभाननाम् । पद्मकुम्भकरां लक्ष्मीं पद्मोपरिगतां स्मरेत् ॥
पद्मासनेनोपविष्टां द्वारस्योर्ध्व उदुम्बरे । . . . .

Īśvara[1] IX : 9*b*–12*a*

§ 461

तप्तकाञ्चनवर्णाभां प्रवालसदृशाम्बराम् । हारनूपुरकेयूरकरण्डमकुटादिभिः ॥
अलङ्कृतामलङ्कारैः पुण्डरीकनिभेक्षणाम् । अकलङ्कसुसम्पूर्णशरच्चन्द्रनिभाननाम् ॥
पद्मकुम्भकरां लक्ष्मीं पद्मोपरिगतां स्मरेत् । पद्मासनेनोपविष्टां द्वारस्योर्ध्व उदुम्बरे ॥

Pārameśvara XI : 9–11

§ 462

तत्र श्रियादिदेवानां रूपत्रयमुदाहृतम् । श्रीवत्सगा योगलक्ष्मीर्भोगलक्ष्मीस्तु पार्श्वगा ॥
वीरलक्ष्मीः पृथक् स्थाने स्वातन्त्र्येण प्रतिष्ठिता । एवमन्यासु देवीषु रूपत्रयमुदाहृतम् ॥
योगलक्ष्मीभोगलक्ष्म्योर्देवेन सह पूजनम् । वीरलक्ष्मीं पृथग् गेहे पूजयेत यथाविधि ॥
यत्र सा पूज्यते देवी तत्र श्रीर्निश्चला भवेत् । तद्विधानं प्रवक्ष्यामि शृणुध्वं मुनिपुङ्गवाः ॥
प्रथमावरणे वापि द्वितीयावरणेऽपि वा । तृतीयावरणादौ वा श्रियः स्थानं प्रकल्पयेत् ॥
तुष्टिं पुष्टिं च सावित्रीं वाग्देवीं च मुनीश्वराः । तद्विमानचतुर्दिक्षु दिङ्मूर्तीः परिकल्पयेत् ॥
कोणेषु वैनतेयं वा सिंहं वापि यथारुचि । तदन्तर्ब्रह्मभागे तु दिव्ये वा स्थापयेच्छ्रियम् ॥
चतुर्भुजामुदाराङ्गीं सर्वलक्षणसंयुताम् । पद्मासनेनोपविष्टां पद्मपत्रायतेक्षणाम् ॥
मुख्याभ्यां चैव हस्ताभ्यां अभीतिवरदायिनीम् । जघन्याभ्यां तु हस्ताभ्यां दिव्यपङ्कजधारिणीम् ॥

Īśvara[1] VII : 7–15

§ 463

वीर्यलक्ष्मीस्तु वै शेषा पृथग्भवनकल्पनम् । चतुर्बाहुसमायुक्ता आसीना वीरका भवेत् ॥
तथापि भद्रकासीना जयशक्त्यष्टका तता । अभयं वरदं पूर्वे अपरे पद्मकोभयम् ॥
आलये वीरलक्ष्मी स्यात् गृहे वीरं न कारयेत् । . . . .

Vihagendra II : 10–12*a*

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 464

भगवन् भवदावघ्न परतन्त्रस्वतन्त्रयोः । भेदं तन्मघकार्यं च विस्तरेण वदेन्मम ॥
आलयस्य समृद्ध्यर्थं वासुदेवस्य मन्दिरे । वीरलक्ष्मीं प्रतिष्ठाप्य विधिवत् पूज्यते यदि ॥
परतन्त्रेति तामाहुः कामिकामफलप्रदाम् । काम्यार्थी चोत्सवं तस्या रक्षाबन्धपुरस्सरम् ॥
चतुस्स्थानार्चनं कुर्यान्न ध्वजं न बलिक्रियाम् । तीर्थदानं न कुर्वीत मुमुक्षुरखिलं चरेत् ॥
पुण्यतीर्थतटे वापि रम्ये पर्वतमूर्धनि । पत्तनग्रामयोर्वापि काम्यार्थी विधिवद्रमे ॥
मन्दिरं कल्पयित्वाथ तत्र वै स्थापयेच्छ्रियम् । . . . .

Śrīpraśna XXX : 180–185a

§ 465

तत्र श्रियादिदेवीनां रूपत्रयमुदाहृतम् । श्रीवत्सगा योगलक्ष्मीर्भोगलक्ष्मीस्तु पार्श्वगा ॥
वीरलक्ष्मीः पृथक् स्थाने स्वातन्त्र्येण प्रतिष्ठता । एवमन्यासु देवीषु रूपत्रयमुदाहृतम् ॥
योगलक्ष्मीभोगलक्ष्म्योर्देवेन सह पूजनम् । वीरलक्ष्मीं पृथग्गेहे पूजयेत यथाविधि ॥
यत्र सा पूज्यते देवी तत्र श्रीर्निश्चला भवेत् । तद्विधानं प्रवक्ष्यामि शृणुध्वं मुनिपुङ्गवाः ॥
प्रथमावरणे वापि द्वितीयावरणेऽपिवा । तृतीयावरणादौ वा श्रियः स्थानं प्रकल्पयेत् ॥
तुष्टिं पुष्टिं च सावित्रीं वाग्देवीं च मुनीश्वराः । तद्विमानचतुर्दिक्षु दिङ्मूर्तीः परिकल्पयेत् ॥
कोणेषु वैनतेयं वा सिंहं वापि यथारुचि । तदन्तर्ब्रह्मभागे तु दिव्ये वा स्थापयेत् श्रियम् ॥
चतुर्भुजामुदाराङ्गीं सर्वलक्षणसंयुताम् । पद्मासनेनोपविष्टां पद्मपत्रायतेक्षणाम् ॥
मुख्याभ्यां चैव हस्ताभ्यामभीतिवरदायिनीम् । जघन्याभ्यां तु हस्ताभ्यां दिव्यपङ्कजधारिणीम् ॥

* * *

श्रीश्च वागीश्वरी कान्तिक्रियाशक्तिविभूतयः । इच्छा प्रीती रतिश्चैव माया धीर्महिमेति च ॥
शक्तयः केशवादीनां क्रमेण परिकीर्तिताः । धीस्तारा वारुणी शक्तिः पद्मा विद्या तथैव च ॥
साङ्ख्या विश्वा खगा भूर्गौर्लक्ष्मीर्वागीश्वरी तथा । अमृताहरिणी छाया नारसिंही तथा सुधा ॥
श्रीकान्तिवीराः कामा च सत्या शान्तिस्सरोरुहा । माया पद्मासना खर्वा विक्रान्तिर्नरसम्भवा ॥
नारायणी हरिप्रीतिर्गान्धारी काश्यपी तथा । वैदेही वैदविद्या च पद्मिनी नागशायिनी ॥
त्रिंशच्चाष्टाविमा देव्यः पद्मनाभादिशक्तयः । यत्रान्या भगवन्मूर्तिः पुण्या तत्र श्रियं यजेत् ॥
अन्यान्विमानदेवांस्तु पूर्वोक्तानेव पूजयेत् । विमानस्य चतुर्दिक्षु कल्पितां च विशेषतः ॥
तुष्टिं पुष्टिं च सावित्रीं वाग्देवीं च समर्चयेत् । अथाग्रमण्डपद्वारे दक्षिणे तु बलाकिनी ॥
वनमालिन्युदग्भागे पूजनीये क्रमेण तु । कृत्वैवं द्वारयागं तु कल्पयेदासनं ततः ॥

* * *

अभ्यन्तरे विमानस्य दिव्ये सरसिजासने । पद्मासनेनोपविष्टां फुल्लपद्मोदरप्रभाम् ॥
सर्वलक्षणसम्पन्नां सर्वालङ्कारभूषिताम् । चलद्द्विरेफपटलसमाक्रान्तालकावलिम् ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

ĀRYĀ

(To face entry § 466, p. 181)

Digitized by Google

Original from
UNIVERSITY OF MICHIGAN

Digitized by Google

Original from
UNIVERSITY OF MICHIGAN

विलसद्रत्नखचितकिरीटपरिशोभिताम् । अर्धचन्द्रललाटस्थराजमानललाटिकाम् ॥
प्रबुद्धोत्पलविस्तीर्णलोचनां सुस्मिताननाम् । कटाक्षैः करुणापूर्णैर्जगदाप्यायकारिणीम् ॥
दर्पणोदरसङ्काशविलसद्गण्डमण्डलाम् । प्रस्फुरन्नासिकावंशमौक्तिकां भ्रूलतोज्ज्वलाम् ॥
मुक्ताफलाभरदनां विलसद्विद्रुमाधराम् । रत्नताटङ्कविलसत्कर्णद्वयमनोहराम् ॥
पूर्णचन्द्रप्रतीकाशवदनां कम्बुकन्धराम् । रत्नग्रैवेयकोपेतां माङ्गल्यमणिभूषिताम् ॥
चतुर्भुजां पीवरांसां मुक्ताहारैश्च भूषिताम् । सुकर्कशदृढोत्तुङ्गपीनवृत्तघनस्तनीम् ॥
विचित्रकञ्चुकेनाढ्यां नानाभूषाविभूषिताम् । मुख्यदक्षिणहस्तेन भीतानामभयप्रदाम् ॥
सव्येन पाणिपद्मेन श्रितानां वरदायिनीय् । पश्चाद्दक्षिणहस्तेन पद्मकुट्मलधारिणीम् ॥
तथाविधेन वामेन दधानां फुल्लपङ्कजम् । मणिकङ्कणकेयूरनानारत्नाङ्गुलीयकैः ॥
मण्डितां दिव्यवसनां मेखलाद्यैरलङ्कृताम् । गम्भीरनाभिं त्रिवलीविभूषिततनूदराम् ॥
विचित्रमणिमञ्जीरविलसत्पादपल्लवाम् । दिव्यगन्धानुलिप्ताङ्गीं दिव्यमाल्यविभूषिताम् ॥
पूर्णेन्द्वयुततुल्याभां - सौन्दर्यामृतवारिधिम् । वीरलक्ष्मीमिमां ध्यायेत् सर्वाभीष्टप्रदायिनीम् ॥
एवं ध्यात्वा श्रियं देवीं हृदयादींश्च पूर्ववत् । किरीटं वनमालां च तथैव कमलद्वयम् ॥

Īśvara[1] VII : 7-15, 32-40, 48-62

§ 466

प्रासादस्यानुरूपेण प्रतिमां कारयेद् बुधः । नवतालेन वा कुर्यादष्टतालेन वा पुनः ॥
श्यामां त्रिलोचनां कुर्याच्छङ्खचक्रधनुर्धराम् । शूलोपघ्नांशुकधरां रक्ताम्बरविभूषणाम् ॥
रक्तपादाननां सौम्यां हारनूपुरशोभिनीम् । रक्ताशोकस्रजोपेतां मौलिनीं सावतंसकाम् ॥
त्रयोदशाब्ददेशीयामुत्पलायतलोचनाम् । सकृष्णसारां तामार्यां कुर्यात् सर्पेन्द्रमेखलाम् ॥
योगनिद्रेति सा प्रोक्ता विष्णोर्देवेश्वरस्य ह । अतः परं ब्रवीम्यस्याः परिवारचतुष्टयम् ॥
पश्चाच्चामरधारिण्यौ जया च विजयापि च । चूडामकुटधारिण्यौ रक्तशुक्लाम्बरस्रजौ ॥
दक्षिणे चैव वामे च स्थिते कुर्याद्विचक्षणः । पुष्कला चैव पूर्णा च कार्ये चोभयपार्श्वयोः ॥
शुक्लनीलाम्बरधरे चूडामकुटशोभिते । दक्षिणे चैव वामे च स्थिते कुर्याद्विचक्षणः ॥
ताम्बूलपत्रहस्ता स्यात् पुष्कला रूपशालिनी । पूर्णा कन्दुकहस्ता स्यादुद्वहन्ती च दर्पणम् ॥
एवं कुर्यात् स्थितां देवीं नासीनां तु कदाचन । पादपीठं भवेत् पद्मं देव्या नान्यत्कदाचन ॥

Sanatkumāra "Śiva" I : 210 219

§ 467

वीरलक्ष्मीं रमां देवीं शुक्लाम्बरधरां शुभाम् । स्वपादनखचन्द्राणां चन्द्रिका तु जगत्त्रयम् ॥
शुक्लयन्तीं महामायां विष्णोर्वक्षसि संस्थिताम् । सौवर्णै राजतैर्माल्यैः भूषितां भूषणोत्तमैः ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

दिव्यगन्धानुलेपैश्च दिव्यमाल्यैरलङ्कृताम् । हेमनूपुरसंयुक्तां हेमनूपुरभास्वराम् ॥
रत्नयुक्तैश्च वलयैर्मणिभिश्च विभूषिताम् । वलित्रयेण संयुक्तां स्तनाभ्यां किञ्चिदानताम् ॥
पद्मप्रभां पद्मनेत्रां किञ्चिद्विकसिताननाम् । पद्मनाभप्रियां पद्मां पद्मास्यां पद्मसम्मुखाम् ॥
करद्वयेन सौवर्णं धारयन्तीं वराम्बुजे । कलहंसरवाह्लादिपादूनपुररञ्जिताम् ॥
नानारत्नसमाकीर्णलसत्काञ्चीकलापिकाम् । सन्मुक्तामणिवैडूर्यैरुपेतोदरबन्धनाम् ॥
सितवस्त्रोत्तरासंगां तप्तकाञ्चनसुप्रभाम् । कुङ्कुमागरुकर्पूरपङ्काङ्कितपयोधराम् ॥
मुक्ताहारोज्ज्वलोरस्कां काञ्चनाङ्गदभूषणाम् । पद्मरागोज्वलैः कान्तैः काञ्चनैरुपशोभिताम् ॥
तप्तकाञ्चनसंयुक्तां रक्तचित्राङ्गुलीयकाम् । करद्वयस्थहेमाब्जसमानमुखपङ्कजाम् ॥
हेममालोज्वलां देवीं रत्नस्वस्तिकबन्धनाम् । हेममौक्तिकमाणिक्यविराजत्कन्धरां शुभाम् ॥
तरुणादित्यसङ्काशकुण्डलैर्मण्डिताननाम् । शशिमण्डलसङ्काशवदनामम्बुजेक्षणाम् ॥
अनन्तकान्तिसंयुक्तां तुङ्गनाससमन्विताम् । रोहिणीरुचिविद्वेषिमुक्तोत्तंसलसन्मुखाम् ॥
बालचन्द्रकलातुल्यललाटफलकोज्ज्वलाम् । कळका.....लोलाक्षियुगळां कमलालयाम् ॥
चापानतलसत्सुभ्रूयुगळां लोकमातरम् । केतकीकुसुमोपेतधम्मिल्लकभरां शुभाम् ॥
दिव्यरत्नप्रभाज्वालाज्वलन्मकुटशेखराम् । लसत्कलिकलाशब्दबर्हिभूषणभूषिताम् ॥
विद्रुमाधरबिम्बाभां कुन्त(न्द)कोरकसद्द्विजाम् । वामदक्षिणहस्ताभ्यां जनराश्यभयप्रदाम् ॥
ऐरावतादिभिस्सम्यग् नागरत्नैर्वृतां शुभाम् । ऐरावतं च कुमुदं वामनं सार्वभौमकम् ॥
आग्नेयादिषु कोणेषु दळेष्वेवंविधं नयेत् । वासुदेवं सङ्कर्षणं प्रद्युम्नं चानिरुद्ध(कम्?) ॥
(पूर्वा?)दिषु महादिक्षु संस्थितान् पद्मपत्रके । तद्बाह्ये दक्षिणे पार्श्वे विघ्नेशो वामतस्तथा ॥
दुर्गा स्थिता तु तद्बाह्ये शक्तयस्समवस्थिताः । कान्तिः पुष्टिः रतिस्तुष्टिः धृष्टिः कीर्तिर्मतिस्तथा ॥
शान्तिश्चैतास्तु संप्रोक्ताः शक्तयस्सबहिस्स्थिताः । अणिमा महिमा चैव लघिमा प्राप्तिरेव च ॥
प्राकाम्यं चेशिता चैव वशिता कामचारिता । आसां बहिस्तु देवर्षे लोकपाला व्यवस्थिताः ॥
तद्बाह्ये पूर्ववत्सर्वे संस्थिताः (परिचा)रिकाः। वृत्तिः प्रवृत्तिः क्षान्तिश्च स्वस्तिः ऋद्धिः प्रभा क्षतिः ॥
माया चेति तथा प्रोक्ताः छत्रचामरवस्त्रकाः । भूषणादीनि धृत्वान्तः परितः स्थापिताः पुनः ॥
माहेन्द्रमण्डलद्वारे संस्थिता द्वारपालिकाः । खड्गयष्टिधरास्त्वेताः द्वारपार्श्वे तु सुव्रताः ॥
दीप्तिः क्रिया रतिः प्रीतिः ऋद्धिशुध्द्यर्पणाः तथा । कीर्तिश्चैव क्रमात् ज्ञेया द्वे द्वे पूर्वक्रमेण वै ॥
धर्मश्च काममोक्षौ च कोणादिषु व्यवस्थिताः । कल्पसन्तानमन्दारपारिजातास्सुपुष्पिताः ॥
द्वारपार्श्वे स्थितास्तद्वत् कोणेष्वेव सुबिल्वकाः । एवं ध्यात्वा तु पद्मस्थां जपेन्मन्त्रं समाहितः ॥
Īśvara² X : 20-48

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

Digitized by Google

Original from
UNIVERSITY OF MICHIGAN

ŚRĪ

(*To face entry § 470, p. 183*)

Digitized by Google

Original from
UNIVERSITY OF MICHIGAN

§ 468

देवस्य दक्षिणे पार्श्वे लक्ष्मीं वामे वसुन्धराम् । आसीने कल्पयेद्देव्यौ आसीनस्य द्विजोत्तम ॥
बिम्बषट्कस्य कर्मादिः श्रीभूमी पार्श्वगे सदा । एकासनस्थितस्याग्रे देवेन पृथगेव वा ॥
लक्ष्मीं स्थितां वा सङ्कल्प्य वामाङ्घ्रिं लम्बयेत वा । अथासीनां तथा पृथ्वीं स्थितस्योभेऽभितः स्थिते ॥

Viśvāmitra XXII : 57–59

§ 469

. . . पद्मासनेनोपविष्टां ध्यायेद्बद्धाञ्जलिं धराम् ॥

Pauṣkara XXIV : 28b

§ 470

श्रीर्दक्षिणे धरा वामे देवस्य परिकल्पयेत् । कर्मार्चा तु सदा ताभ्यां पार्श्वयोरविनाभवेत् ॥
श्ररेषां तु बिम्बानां सहिता रहिता तु वा । पत्न्यौ प्रभा वाप्येकस्मिन् विष्टरे पृथगेव वा ॥
देवे स्थिते तथा देव्यावासीनस्यापि ते तथा । बिम्बे यानाधिरूढे तु कर्तव्या तोरणप्रभा ॥

Śrīpraśna XIV : 21–23

§ 471

श्रीमच्छ्रीतुलसीरूपां विष्णुपत्नीं हरिप्रियां । सर्वाभरणसंयुक्तां नीलादेवीमहं भजे ॥

Parāśara XVIII : 48

§ 472

. . . लक्ष्मी सरस्वती कार्ये पद्मवीणासमन्विते ॥

Hayaśirṣa "Ādi" XXII : 3b

§ 473

नीलनीरदवर्णाभाः प्रसन्नवदनेक्षणाः । पीताम्बरधराः सर्वाः सख्यः कनककुण्डलाः ॥
सितचामरहस्ताश्च चित्रवेत्रलताकराः । निरीक्षमाणा वदनं जयाया अजितस्य च ॥

Lakṣmi Tantra XLV : 68-69

§ 474

सख्यश्चतस्र एताः स्युर्द्विभुजाः सौम्यदर्शनाः । पद्मकोशप्रतीकाशाः श्रीवृक्षचमराङ्किताः ॥
पद्मासनोपविष्टाश्च प्रेक्षमाणा मदाननम् । एवं ध्येयास्तु सख्यस्ताश्चतुरोऽनुचरान् शृणु ॥

Lakṣmi Tantra XLV : 33-34

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 475

रक्तपङ्कजवर्णाभा लक्ष्मीर्नीलाम्बुजेक्षणा । दुग्धौघधवला पुष्टिरानन्दकलिताननाः
कान्त्याद्युन्नतिपर्यन्तमष्टकं स्फटिकामलम् । . . . .

Pauṣkara XPI : 16-17*a*

§ 476

लावण्यः सुभगश्चैव सौभाग्यश्च तृतीयकः । चतुर्थः सौमनस्यश्च चत्वारोऽनुचरा मम ॥
चतुर्भुजा सौम्यवक्त्राः नीलकौशेयवाससः । दधतः पद्मकुम्भौ च नलिनीध्वजमेव च ॥
प्रफुल्लामलवृक्षं च चतुर्भिः स्वभुजैः शुभैः । . . . .

Lakṣmī Tantra XLV : 35-37*a*

Digitized by Google Original from UNIVERSITY OF MICHIGAN



BHŪ

(*To face entry § 470, p. 183*)

Digitized by Google

Original from
UNIVERSITY OF MICHIGAN

Digitized by Google

Original from
UNIVERSITY OF MICHIGAN

CHAPTER SIX

OTHER FORMS OF VIṢṆU AND ATTENDANT DEITIES

Having already seen the more important modes, incarnation, forms and powers by which the Lord's Presence is recognized by His devotees, we turn now to yet other forms—although these are not quite so popular—through which, by concentration and meditation suited to their abilities and aspirations, the devout believers come to know the One Lord. Excerpts §477 through §551 present descriptions of these various " other " forms of Viṣṇu.

Also included in this chapter are the ever-liberated (*nitya-sūri*) chiefs among the attendant deities—namely Ananta (§552–§556), Garuḍa (§557–§578), Viṣvaksena (§579–§583) and Sudarśana (§584–§597). These are set

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

apart from the foregoing, and from other subsidiary manifestations of the Lord, because in liturgical terms whenever offerings are first made to the Lord and His Consorts these are next honored. As well, in piety, it is believed that these attendant deities never are far from the immediate presence of the Lord.

OTHER FORMS OF VIṢṆU

Mahāviṣṇu

This form of Viṣṇu, in his grandiose majesty, is seen for the most part only in drawings and in occasional representations on *vimāna*-structure exteriors. He is to be imagined as reigning thus in *Viṣṇuloka* : he is seated on his throne, attended by his two consorts, Śrī and Dharā (Bhūmi). The latter is on his left, while seated (?) in a lower position is Śrī. All around will be a number of male and female servants, as well as Viṣvaksena, Nārada, Tumburu, *et. al.*

§ 477

. . . महाविष्णुं महात्मानं विष्णुलोकस्थमीश्वरम् ॥
सिंहासने समासीनं सर्वपारिषदैर्वृतम् । विन्यस्तवामपादं तु श्रियस्त्वङ्के सनातनम् ॥
ततः सिद्धिसरस्वत्योश्चामरव्यग्रहस्तयोः । पृष्ठतः स्थितयोस्तत्र विनयानतचक्षुषोः ॥
स्थिते पुरस्तान्नम्राङ्गे किञ्चिद्दूरे कृताञ्जलौ । भूमौ विन्यस्तनयने विनीते च गरुत्मति ॥
आलवट्टकरायां तु धरायां वामपार्श्वतः । स्थितायां ब्रह्मगोत्रायां दिव्ये संहृत्य चक्षुषी ॥
बध्दाञ्जलिपुटे नम्रे किञ्चिदीशानगोचरे । पीतवस्त्रे हरिश्यामे विष्वक्सेने व्यवस्थिते ॥
नारदे दक्षिणे पार्श्वे दिव्यगेयसमन्विते । सातोद्ये च सुखासीने तुम्बुरुप्रमुखैः सह ॥
श्रियश्च पृष्ठतः किञ्चिन्नम्रगात्रे कृताञ्जलौ । मार्कण्डेये समासीने पुष्पाञ्जलिसमन्विते ॥
द्वारपालकृतानुज्ञाः शरणं जग्मुरञ्जसा । दृष्ट्वा तं परमात्मानं सर्वव्यापिनमच्युतम् ॥

Sanatkumāra "Ṛṣi" X : 3*b*–11

Śayanaviṣṇu

In excerpts §478, §479, §480 and §481 we have descriptions of the Recumbent Viṣṇu. In this first of these we find the Lord lying on the *anantaśayana*-serpent couch, floating on the Milk Ocean. At his feet is Lakṣmī, massaging his leg in devoted fashion. In §479, in addition to this description we see that he can be shown thus with a lotus also sprouting from his navel, bearing Brahmā. In §480, He is said, additionally, to be encircled by tongues of fire and many weapons, while in §481—unlike in the foregoing three descriptions—he is said to

Digitized by Google Original from UNIVERSITY OF MICHIGAN

have four arms, carrying the conch, discus, lotus and mace. Here, also, we learn that his color should be blue, that he should be dressed in yellow garments, and that he should be revealing bearing certain marks. Further, he is attended upon also by Garuḍa.

§ 478

. . . देवमर्णवशाय्याख्यं मूर्तेश्चक्रादिकैर्वृतम् ॥
लक्ष्म्या संवाह्यमानं च समाक्रान्तं च निद्रया । वीज्यमानं हि वै प्रीत्या गीयमानं हि विद्यया ॥

Īśvara[1] XXIV : 258*b*–259 ‖ Sāttvata XII : 67–68*a*

§ 479

. . . वामपार्श्वेण शयितं कारयेज्जलशायिनम् ॥
शेषपर्यङ्कगं देवं चतुर्बाहुं जनार्दनम् । श्रिया धृतैकचरणं सर्वालङ्कारभूषितम् ॥
देवीभिर्विमलाद्याभिस्सेव्यमानमितस्तत. । नाभ्युत्थपङ्कजारूढपितामहसमन्वितम् ॥

Hayaśirṣa "Ādi" XIX : 10*b*–12

§ 480

अनन्तशयनारूढं कल्पान्तहुतभुक्प्रभम् । ज्वलज्ज्वालावलीयुक्तं ज्वलनांशुविचेष्टितम् ॥
चक्राद्यायुधबृन्देन मूर्तेन परिवारितम् । स्थिताऽङ्घ्रिदेशतो लक्ष्मीश्चिता दक्षिणतो विभोः ॥
मूर्धदेशगता निद्रा षुष्टिस्तद्वामतः स्थिता । प्रधानदेवताध्यानमिदमुक्तं समासतः ॥

Īśvara[1] XXIV : 357–359

§ 481

. . . अथापश्यत्परं देवं क्षीरसागरशायिनम् ॥
अनन्तभोगशय्यायां शयितं पङ्कजेक्षणम् । शङ्खचक्रगदापद्मान् धारयन्तं चतुर्भुजम् ॥
श्रिया चरणयोर्जुष्टं श्यामलं पीतवाससम् । श्रीवत्साङ्कं प्रसन्नाभं कौस्तुभोज्वलवक्षसम् ॥
सेवितं वैनतेयेन संनिविष्टेन पार्श्वतः । . . . .

Parama I : 56*b*–59*a*

Lakṣmīnārayana

This is an unusually rare form of Viṣṇu to come upon, although its analogue found among Śaivite icons of Ardhanāriśvara (half Śiva, half Pārvatī) is more common. Here is §482 we have a 4- or 8-armed representation, on the right side—colored blue—Viṣṇu, on the left side—colored golden—Lakṣmī. It is said that this form may be shown sitting, standing, reclining or mounted on Garuḍa.

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 482

लक्ष्मीनारायणं कुर्याद्भुजाष्टकसमन्वितम् । यद्वा चतुर्भुजं शङ्खचक्राद्यायुधभूषितम् ॥
वामभागे तु हस्ताभ्यां वरदं पङ्कजं तु वा । इतराभ्यां च हस्ताभ्यामभयं चक्रमेव वा ॥
वपुषो दक्षिणे भागे विष्णुर्वामे सरोरुह । पीनस्तनतटो वामः श्रीवत्साङ्कस्तथेतरः ॥
वामे हेमनिभः श्यामो दक्षिणो भाग इष्यते । आसीनं वा शयानं वा गरुडारूढमेव वा ॥
स्थितं वा कल्पयेद्देवं ... ... । . . . .

Pādma "kr." XVIII : 50-54*a*

Śriyaḥpati

In this rather lengthy passage, §483, we learn that this form of the Lord may take a variety of aspects : Śriyaḥpati (Śrī's Consort) with two hands standing with Prakṛti is one ; another is as a beautiful young girl whose looks are stunning enough even to halt the demons ; as a blue-colored bearer of mace and *cakra*-discus ; as a 12-arm, green colored conqueror of the Pārijāta tree ; as another 12-arm "Lokanātha" form with Śrī seated on his lap—a benign, four-faced creature ; as a yogin ; as a resplendent ruler of all things ; as a child lying on a banyan leaf ; and as a creating-and-destroying being whose inhalation and exhalation brings about the cycles of universal creation and destruction.

§ 483

आत्मामृतमनौपम्यमहरध्वंसकर्मणा । ध्यायेत्कमलगर्भाभं देवदेवं श्रियःपतिम् ॥
कमलालयहेतीशविभूषितकरद्वयम् । द्वयं देवीपरिणये लीलयैव समर्पयन् ॥
प्रकाशयन्ननादित्वमात्मना प्रकृतेस्सह । मत्करैरनुविद्धेयं प्रकृतिः प्रकृतेरहम् ॥
यतोऽहमाश्रयश्चास्या मूर्तेर्मध्ये तदात्मिका । यामालब्य सुखेनैव दुस्तरं हि गुणोदधिम् ॥
निस्तरन्त्यचिरेणैव व्यक्तध्यानपरायणाः । मदविह्वलनेत्रं च देवमुद्भिन्नयौवनम् ॥
*फुल्लरक्ताम्बुजाभासमत्यजन्तं निजां स्मृतिम् । त्रैलोक्यविस्मयकरं कान्ताकृतिधरं स्मरेत् ॥
आनन्दामृतसम्पूर्णवदनेनेन्दुकान्तिना । कलशाकृतिरूपेन करस्थेन विराजितम् ॥
लीलाकटाक्षवाग्बाणैस्सूदयन्तं सुरद्विषम् । द्विरेफपटलाक्रान्तसहकारलताकरम् ॥

* * *

नीलनीरदवर्णाभं पद्मपत्रनिभेक्षणम् । मध्याह्नभास्कराकारं द्वादशारकरोद्यतम् ॥
श्रोणीतटनिविष्टेन वामहस्तेन लीलया । ध्रियमाणं गदां गुर्वीं निषण्णां धरणीतले ॥

* * *

* Īśvara[1] XXIV : 272-277*a* || Sāttvata XII : 81-85.

Digitized by Google Original from UNIVERSITY OF MICHIGAN

चक्रं खड्गं गदां बाणमङ्कुशं कुन्तमेव च । षट्सु दक्षिणहस्तेषु शक्तिं चापं च कार्मुकम् ॥
मुसलं मुद्गरं भीमं खेटकं वामबाहुषु । देव आम्रदलाभश्च संस्मार्यः पारिजातजित् ॥

* * *

दिव्यमाल्याम्बरधरं दिव्याभरणभूषितम् । चतुर्वक्त्रं सुनयनं वामोत्सङ्गार्पितप्रियम् ॥
खड्गं चक्रगदाबाणं मुसलं च तरूत्तमम् । षट्सु दक्षिणहस्तेषु शङ्खमङ्कुशकार्मुकम् ॥
छत्रं च फणभृत्पाशं विभोर्वामभुजेष्वमी । षष्ठेनालिङ्गिता देवी सारविन्देन बाहुना ॥
तदंसलग्नकरया देव्या तच्चिन्तयानिशम् । संवीज्यमानं विनयाच्चामरेण सितेन तम् ॥
लोकनाथं विशालक्षं सर्वदेवनमस्कृतम् । वरसिंहासनारूढं ध्यानोन्मीलितलोचनम् ॥
पद्मासनेनोपविष्टं पद्मगर्भोपमद्युतिम् । करुणाविष्टबुद्धिं च शङ्खपद्मकराङ्कितम् ॥

* * *

स्वप्रभानिकरेणैव भासयन्तं च सत्पथम् । मनस साह वायूनामागतिप्रतिषेधकृत् ॥

* * *

स एव द्विभुजो ध्येयो दण्डदर्भाक्षसूत्रधृक् । दन्तज्योत्स्नाजिताज्ञानं न्यग्रोधशयनं विभुम् ॥
निषण्णमीषदुत्तानं द्विभुजं शिशुरूपिणम् । एवमेव निरस्तास्त्रं शान्तनिद्रारसस्थितम् ॥
अनुज्झितस्वभावं च योगमायाबलेन च । त्यजन्तमाहरन्तं च श्वासोच्छ्वासद्वयेन तु ॥

Īśvara[1] XXIV : 272–279, 283–284, 288–289, 296–301, 304, 309-311

Yajñavāraha

This boar-form is not the same as the Varāha incarnation : here it is the symbol of a cosmic sacrifice. The different parts of the body stand for different parts of the sacrifice. He is black in color, and stands with hands folded in *añjali*.

§ 484

तं यज्ञपुरुषं ब्रह्म वासुदेवमजं हरिम् । ध्यायेद्वै सूकरात्मानमञ्जनाद्रिसमप्रभम् ॥
यज्ञाङ्गचिह्नितांघ्रिं च महाव्याहृतिदंष्ट्रिणम् । भूर्भुवःस्वःशरीरं च शब्दब्रह्मैकमानसम् ॥
निर्णुदन्तं प्रपन्नानामविद्यापङ्कमञ्जसा । वेद्यन पोत्रप्रान्तेन त्वक्षयेनाऽमलेन च ॥
वासनावासितानां च जीवानां भवशान्तये । महाविभूतिर्भगवान् पूर्णषाड्गुण्यविग्रहः ॥
स्वकाच्छान्ततराद् ब्रह्मतत्त्वादादायचाञ्जलिम् । करोति सेचनं दोषदग्धानां च स्वतेजसा ॥
स्थूलरूपेण तमजं बहिराराधनाविधौ । आध्मातं वायुना यद्वन्निर्धूमाङ्गारपर्वतम् ॥

Īśvara[1] XXIV : 238–243

Digitized by Google Original from UNIVERSITY OF MICHIGAN

Hari

In §485–§489 we have descriptions of Hari—a being with four hands, which, according to §489, hold conch, discus, a cup of ambrosia, his fourth hand being extended in a "Fear not" gesture. He is benign. In §487 it is stated he may be shown with Śrī, and in §488 he is described as appearing with Śrī, Bhū and Nīlā.

§ 485

हरिस्स्याच्छङ्खचक्राब्जदण्डायुध इति स्मृतः । . . . .

Mārkaṇḍeya VIII

§ 486

शङ्खचक्राब्जदण्डास्त्रः हरिः स्यात्कमलासन । . . . .

Pādma "kr." XVI : 42*a*

§ 487

शङ्खचक्रगदापद्मधारिणं भूपतिं विभुम् । सर्वाभरणभूषाङ्गं नमामि हरिमव्ययम् ॥

Parāśara XIII

§ 488

दिव्ये सैद्धे मानुषे च श्रीभूनीलाधिपं हरिम् । चक्रशङ्खगदापद्ममालिनं गरुडादिकम् ॥

Parāśara XIX : 27

§ 489

. . . शङ्खचक्रधरं सौम्यं अमृताभयधारिणम् ।
मुक्ताभरणभूषाङ्गं भजेऽन्नाधिपं हरिम् ॥ . . . .

Śeṣa XXIX : 9*b*–10*a*

Upendra

These two brief passages, §490 and §491, indicate only that Upendra possesses four arms holding conch, discus, mace and knife or lotus. In the latter passage he is said to be shown with Śrī.

§ 490

उपेन्द्रश्शङ्खदण्डारिपद्मायुधविभूषितः । . . . .

Mārkaṇḍeya VIII

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 491

चक्रशङ्खगदाखड्गधारिणं श्रीधरं विभुम् । सर्वाभरणभूषाङ्गमुपेन्द्रं देवमाश्रये ॥

Parāśara XIII

Puruṣottama

These short passages, §492–§496, give little iconographical description beyond the weapons he weilds in his four hands. In §496 it is said that the conch and discus are for the protection of his devotees.

§ 492

पुरुषोत्तमः पद्मदरगदाचक्रधरः स्मृतः । . . . .

Garuḍa [*ms.*]

§ 493

पुरुषोत्तमश्चक्रपद्मशङ्खकौमोदकीधरः । . . . .

Mārkaṇḍeya VIII

§ 494

चक्रपद्माम्बुजैः सार्धं गदावान् पुरुषोत्तमः । . . . .

Pādma "kr." XVI : 39*a*

§ 495

पुरुषोत्तमभेदांस्ते वर्णयिष्यामि सत्तम । सङ्कर्षेऽवसरप्राप्तान् स्थापयेत्तु यथाविधि ॥

Hayaśirṣa "Ādi" XXII : 4 [Adyar *ms.*]

§ 496

चक्रशङ्खधरं देवं भक्तरक्षार्थमादरात् । सर्वालङ्कारसंयुक्तं नमामि पुरुषोत्तमम् ॥

Parāśara XIII : 118

Jagannātha

In §497 we see this form of the Lord identified with Kapila, extending the "Fear not" gesture, and colored red. It is said that he is the inner witness of all beings, and that he will dispel the ignorance of his devotees and put them on the right path. In §498, with the symbolism of teaching carried through, he is said to have a book in his left hand while with

Digitized by Google Original from UNIVERSITY OF MICHIGAN

his right hand he instructs people (*upadeśa-mudrā*). It is he, it is said, who divided the Vedas into four parts. In §499 he is said to have a half-male (Balarāma), half-female (Subhadrā) body (*cf.* §482, above).

§ 497

फुल्लरक्ताब्जविभवं देवताद्यात्मसूत्रकम् । ध्यायेदभयपाणिं तं कपिलं तेजसां निधिम् ॥
योऽन्तस्सर्वेश्वरो देवः साक्षिभूतो व्यवस्थितः । स्फटिकोपलवद्भावान् स्वशक्त्युत्थान् बिभर्ति च ॥
अविद्याविष्कृतानां तु भक्तानां सत्प(म्प)दाप्तये । तमनादिं जगन्नाथं बहिस्स्थूलतरात्मनाम् ॥

Sāttvata XII : 25–27

§ 498

वहन्वै वामहस्तेन सर्वशास्त्रार्थपुस्तकम् । दक्षिणेन तु शास्त्रार्थमादिशंश्च यथास्थितम् ॥
युगानुसारिभेदानामखेदजननाय च । विभजंस्तु चतुर्धा वै वेदमेकं त्रिकालवित् ॥
दानधर्मरतानां च यागयज्ञानुयाजिनाम् । तपस्स्वाध्यायसक्तानां मुक्तानामपुनर्भवात् ॥
संरक्षणाय योग्यत्वविज्ञानव्यक्तयेऽपि च । समुदेति जगन्नाथस्तेषां हृत्कमलावनेः ॥
मनोवाजिनमाक्रम्य त्वादायात्मगुणायुधान् । नूनमुत्पाटयत्याशु जन्मान्तरशतोत्थितम् ॥

Īśvara[1] XXIV : 347–351

§ 499

जगन्नाथेति वामाङ्गं बलरामार्धरूपिणम् । सुभद्राख्यमहालक्ष्मीरूपसार्धाङ्गवेषिणम् ॥
स्वोच्छिष्टान्नादितीर्थैश्च दैवादीनां च पैतृके । ऋषीणां च द्विजातीनां सर्वेषां मुक्तिदायकम् ॥
भुक्तिमुक्तिप्रदं शान्तं स्वमुखाम्भोजदर्शनात् । प्रपन्नार्तिहरं सम्यक् पापिनां च सुमुक्तिदम् ॥
तं परात्परमव्यक्तं नमामि पुरुषोत्तमम् । . . . .

Parāśara XIII : 1–4a

Janārdana

In addition to the conch, discus and lotus, he carries a mace.

§ 500

पद्मं शङ्खं च चक्रं च दण्डायुधजनार्दनः । . . . .

Mārkaṇḍeya VIII

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 501

जनार्दनः पद्मचक्रशङ्खदण्डश्चतुर्भुजः । . . . .

Padma "kr." XVI : 41*a*

§ 502

शङ्खचक्रगदापद्मधारिणं श्रीपतिं हरिम् । सर्वालङ्कारसंयुक्तं तं नमामि जनार्दनम् ॥

Parāśara XIII

Acyuta

This form of the Lord has four arms, bearing conch, discus, mace and lotus. In §505, he is revealed with Śrī and Bhūmi.

§ 503

अच्युतो गदया सार्धं पद्मारिश्शङ्खहस्तवान् । . . . .

Mārkaṇḍeya VIII

§ 504

. . . अच्युतो दण्डपद्मारिशङ्खहस्तश्चतुर्भुजः ॥

Pādma "kr." XVI : 40*b*

§ 505

शङ्खचक्रगदापद्मधारिणं भूरमापतिम् । सर्वाभरणसंयुक्तमच्युतं तं नमाम्यहम् ॥

Parāśara XIII

Hayagrīva

This is the horse-faced form of the Lord (exception : *see* §512, where he has the head of Varāha) identified as the bestower of knowledge, since it was he who recovered the Vedas from the demons. He is shown with two arms and with four arms ; occasionally he is also shown with 8 or 12 arms. In addition to carrying the standard conch and discus he may also be carrying one or more of the following : book, rosary, mace, lotus, some hand-gesture. There are, of course, other items enumerated when he has the many-armed form.

His color is generally white, though §507 gives it as red. In most cases it must be understood that his mood is benign. Measurements are available in §512.

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 506

. . . वाजिवक्त्राः स्मृता वेदाः सम्पूर्णनरलक्षणाः ॥

Pauṣkara XXIV : 35*b*

§ 507

असृजन्मानसं पुत्रं रक्ताङ्गं तु चतुर्भुजम् । शङ्खचक्रगदापाणिः स पुनर्हयशीर्षकः ॥

Sanatkumāra "Indra" III : 60

§ 508

चन्द्रमण्डलमध्यस्थं हयग्रीवविभुं प्रभुम् । शचङ्खक्रधरं सौम्यं भजे विद्याप्रदायकम् ॥

Śeṣa XL : 7

§ 509

. . . सर्वाभरणभूषाङ्गं सच्चिदान्दविग्रहम् ॥

पञ्चचक्रधरं देवं हयग्रीवं नृकेसरिम् । . . . .

Śeṣa XXIX : 18*b*–19*a*

§ 510

क्लीं कवचं ह्रीं अस्त्रं श्वेतवर्णं चतुर्मुखम् । षडङ्गं षट्स्वरैर्न्यस्य पूर्वोक्तं संस्मरन् जपेत् ॥

वन्दे पूरितचन्द्रमण्डलगतं श्वेतारविन्दासनम्, मन्दाकिन्यमृताब्जकुन्दकुमुदक्षीरेन्दुभासं हरिम् ॥

मुद्रापुस्तकशङ्खचक्रविधृतश्रीधृमद्भुजामण्डलम्, निर्यन्निर्मलभारतीपरिमलं विश्वेशमश्वाननम् ॥

Śeṣa XXII : 22–23 [*cf.* Parāśara XV : 43]

§ 511

हयग्रीवं चतुर्बाहुं शुद्धस्फटिकसन्निभम् । अश्ववक्त्रं मकुटिनं धौतवस्त्रोत्तरीयकम् ॥

मुख्येनैकेन वरदं दक्षिणेनेतरेण तु । विज्ञानपुस्तकधरं जघन्ये च करद्वये ॥

अक्षसूत्रं च शङ्खं च बिभ्राणं सुपरिष्कृतम् । कल्पयेत्पुरुषाकारमनन्तं च किरीटिनम् ॥

भोगिभोगे सुखासीनं पृष्ठतः फणमण्डलैः । उन्नमद्भिः कृतच्छायं चतुर्हस्तं सितप्रभम् ॥

यद्वा तु श्यामलो वर्ण अनन्तस्य प्रकीर्त्यते । प्रकल्पयेन्मुख्यहस्तं वरदं वामहस्तकम् ॥

गदाधरं कटीदेशमवलाम्ब्याथवा स्थितम् । जघन्याभ्यां च हस्ताभ्यां शङ्खचक्रधरो भवेत् ॥

Pādma "kr." XXII : 2–7

Digitized by Google Original from UNIVERSITY OF MICHIGAN

Digitized by Google

Original from
UNIVERSITY OF MICHIGAN

HAYAGRĪVA

(*To face entry § 512, p. 195*)

Digitized by Google

Original from
UNIVERSITY OF MICHIGAN

§ 512

ममैव लक्षणं वक्ष्ये तन्निबोध सुरोत्तम ॥
वराहवन्मुखं कार्यं आयामाद्विंशदङ्गुलम् । वक्त्रदेशे हनू कार्ये आयते तु चतुष्कलम् ॥
सार्धकले तु सृक्किण्यौ ततश्चाष्टाङ्गुलं मुखम् । द्व्यङ्गुलं घ्राणरन्ध्रं तु कुटिलं द्व्यङ्गुलायतम् ॥
आयामात् त्र्यङ्गुले कार्ये द्व्यङ्गुले अधिकेऽक्षिणी । पञ्चाङ्गुलौ स्मृतौ कर्णौ त्र्यङ्गुलं विस्तृतौ कृतौ ॥
कर्णान्तरं चतुर्नेत्रं कलैकं चोन्नतं तु तत् । तालैकविस्तरा ग्रीवा पञ्चाङ्गुलसमायता ॥
सटाविभूषिता ग्रीवा शिरश्चालकभूषितम् । शेषं चतुर्भुजं देहं नृसिंहस्येव कीर्तितम् ॥
वामहस्तेऽस्य कुर्वीत वेदाश्चत्वार सुव्रत । त्वं चाप्यग्रे स्थितः कार्यो वेदग्रहपुरस्सरम् ॥
अपरे वामहस्ते तु शङ्खं दद्यात्सुरोत्तम । दक्षिणद्वितये दद्यात् गदां चक्रं विचक्षणः ॥

Hayaśīrṣa "Ādi" XXII : 16*b*–23 [Adyar *ms.*]

§ 513

शेषनागधृतं पादं वामं कार्यं ममानघ । दक्षिणं कूर्मपृष्ठस्थं पादं कुर्यात्सदैव मे ॥
शङ्खचक्रगदावेदपाणिं वा कारयेत माम् । अश्ववक्त्रं चतुर्बाहुम् एवमेव व्यवस्थितम् ॥
पुष्करासनमध्यस्थं देवीद्वितयसंयुतम् । एवं ममार्चा कर्तव्या सर्वज्ञत्वमभीप्सुभिः ॥

Hayaśīrṣa "Ādi" XXII : 24–26 [Adyar *ms.*]

§ 514

हयग्रीवमहं वन्दे चक्रपद्मधरं विभुम् । श्रीभूमिसहितं देवं सर्वाभरणभूषितम् ॥
* * *
शङ्खचक्रगदापद्मज्ञानपुस्तकधारिणम् । हयग्रीवमहं वन्दे किरीटादिविभूषितम् ॥
* * *
शङ्खचक्रगदापद्मज्ञानपुस्तकधारिणम् । पाशाङ्कुशधरं देवं हयग्रीवमहं भजे ॥
* * *
चक्रशङ्खगदापद्मपाशशार्ङ्गासिधारिणम् । ज्ञानादिपुस्तकधरं हयाननहरिं भजे ॥
* * *
शङ्खचक्रगदापद्मज्ञानपुस्तकधारिणम् । पाशाङ्कुशाग्निवज्रादिखेटकुन्तधरं विभुम् ॥
श्रीभूनीलाधिपं देवं वनमालाविराजितम् । हयग्रीवं भजे नित्यं सर्वाभरणभूषितम् ॥

Parāśara XXVIII : 6, 10, 14, 18, 22–23

§ 515

ध्यायेत्तद्वन्महादीप्तं वाजिवक्त्रमलाञ्छनम् । बद्धब्रह्माञ्जलीकस्थं द्रवत्कनकलोचनम् ॥
घोणाग्रेणाहरन्तं च त्रैलोक्योत्थं जलेन्धनम् । कृत्वा तद्भस्मसात्सम्यक् फूत्कुर्वन्तं मुखेन तु ॥
धर्मं सामान्यममलं अनादिनिधनं विभुम् । दुर्लभं यत्प्रबुद्धानां तत्प्रसादधिया विना ॥
तस्य स्थूलतरं रूपं शृणु तत्प्राप्तये परम् । तुहिनाचलसङ्काशं सौम्यवक्त्रं चतुर्भुजम् ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

कामार्थावुद्वहन्तं च शङ्खपद्मच्छलेन तु । साधुमार्गे स्थितानां तु संयच्छन्तं धिया च तौ ॥
सिताक्षमालागर्भं तु वरपाणिमतः स्मरेत् । वाङ्मयं निखिलं यस्य वस्तुजातमनश्वरम् ॥
शक्तित्वेन स्वभावस्थचिद्रूपस्यामितद्युतेः । वरवाजिमुखं ध्यायेदथ वागीश्वरं प्रभुम् ॥
Īśvara[1] XXIV : 244–250

Yajñamūrti

This is a form of the Lord associated with the sacrificial rites that form so essential a place in Śri-vaiṣṇava liturgical routines. In §516 he is described as having three heads, three feet, four horns and seven hands. Among the items he holds are the *sruk*-ladle and *sruva*-spatula to symbolize his connection with sacrificial offerings. In §519, he is shown standing in flames. He is benign.

§ 516

. . . यज्ञमूर्तिमतः शृणु । त्रिशीर्षं च त्रिपादं च चतुःशृङ्गं चतुर्मुख ॥
सप्तहस्तं जपातुल्यं वनमालाविभूषितम् । अभीतिदो मुख्यहस्तो दक्षिणोऽन्यो वरप्रदः ॥
पञ्चेतरकराश्च स्रुक्स्रुवाद्यायुधभूषिताः । . . . .
Pādma "kr." XVIII : 54–56*a*

§ 517

सूर्यकान्तादिसङ्काशमनेकभुजभूषितम् । कमलं चाक्षसूत्रं च वेदिं त्रेताग्निभूषितम् ॥
साज्यधारौ स्रुक्स्रुवौ तु विष्टरं सोमसंयुतम् । दर्भाजिनं मेखलांश्चाप्यपसव्येषु षट्स्वमी ॥
स्मरेद्वामकरेष्वस्य पुस्तकं शङ्खमेव च । दण्डं कमण्डलुं दर्वीमेकस्मिंस्त्रितयं करे ॥
पूर्णं ग्राम्यैस्तथारण्यैश्चरुबीजैस्तु पञ्चमे । स्रङ्मूलफलपात्रैस्तु यज्ञद्रव्यैः सदक्षिणैः ॥
सर्वाश्रमोपकरणैर्युक्तं च समभाजनम् । ध्येयमस्य भुजे षष्ठे वृतं मूर्तैर्ऋगादिभिः ॥
वेदाङ्गैरुपवेदैस्तु संस्कारैः समखैस्तथा । विकारवसुधाधारे ह्यभावे तु गुणोदधौ ॥
स्वशक्तिभावितं कृत्वा मनःपूर्वं चतुष्टयम् । प्रकृत्यन्तः समास्ते यः सर्वज्ञः पुरुषात्मना ॥
Īśvara[1] : XXIV 251–257

§ 518

चक्रशङ्खधरं देवं किरीटादिविभूषितम् । अग्निमण्डलमध्यस्थं ध्यायेद्यज्ञपतिं हरिम् ॥
Parāśara V : 15

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 519

. . . देवं श्वेताद्रिसङ्काशं त्रिपादं सप्तबाहुकम् ॥
वेदशृङ्गं द्विवदनं पीताम्बरधरं हरिम् । शङ्खचक्रगदापाणिं सप्तजिह्वं सुभूषणम् ॥
सौम्यं च सर्वाभरणैः दिव्यैः परिवृतं बुधैः । आग्नौ वह्निस्वरूपेण स्थितमर्चामुखं स्मरेत् ॥

Viṣvaksena XV : 88b-90

Haṁsa

The Lord may be worshipped in the form of a swan (§520 and §521). According to §522, the color of the swan-form is to be white. In the extended passage represented in excerpt §521 we also learn that the swan may hold either four, eight, ten or twelve weapons, the specifics of which are given.

§ 520

चक्रशङ्खधरं देवं सर्वालङ्कारसंयुतम् । श्रीभूमिसहितं देवं हंसरूपं हरिं भजे ॥

Parāśara XV : 7

§ 521

हंसवक्त्रं हरिं वन्दे सर्वाभरणभूषितम् । शङ्खचक्रगदापद्मधरं नीलोत्पलप्रभम् ॥

* * *

चक्रशङ्खगदापद्मशार्ङ्गबाणासिधरिणम् । वरहस्तधरं शान्तं सर्वाभरणभूषितम् ॥
श्रीभूमिसहितं देवं श्रीवत्साद्यादिधारणम् । परात्परमजं सत्त्वं हंसग्रीवमहं भजे ॥

* * *

चक्रशङ्खधरं देवं किरीटादिविभूषितम् । सत्यज्ञानमयं देवं हंसाननमहं भजे ॥

* * *

चक्रशङ्खगदापद्महलशार्ङ्गासिधारिणम् । वरबाणाभयधरं कौस्तुभाद्यैरलङ्कृतम् ॥
किरीटहारकेयूरकटकादिविभूषितम् । श्रीभूनीलाधिपं देवं हंसग्रीवमहं भजे ॥

* * *

इषुचक्रगदाशङ्खपद्मशार्ङ्गासिधारिणम् । हलपाशाङ्कुशाग्नि च देवं खेटधरं विभुम् ॥
किरीटहारेकयूरकटकादिविभूषितम् । श्रीभूमिसहितं देवं हंसग्रीवं परात्परम् ॥

* * *

चक्रपद्मगदाशङ्खचापखड्गादिधारिणम् । वज्रादिहलशूलेषुपाशखेटधरं विभुम् ॥
शक्तिकुन्तधरं देवं सर्वाभरणभूषितम् । ज्ञानानन्दमयं शान्तं भजे हंसहरिं सदा ॥

Parāśara XXVI : 21, 34–35, 16, 39–40, 46–47, 57–58

§ 522

भासयन्तं जगन्नाथं स्मरेत् हृत्कमलादिषु । हंसमूर्तिमथात्मानं ज्ञानयज्ञभुजं स्मरेत् ॥
कुन्देन्दुस्निग्धकान्ति च हेमकुण्डं महातनुम् । रजस्तमोर्ध्रि सत्सत्त्वविग्रहं परमेश्वरम् ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

धर्माधर्मेक्षणं ध्यायेदग्नीषोमात्मकेन तु । दक्षिणोत्तरसंस्थेन पक्षयुग्मेन राजितम् ॥
बहिस्तमेवोदकस्थं तुहिनाचलसन्निभम् । ध्यात्वार्चयेत्तु विधिवद्धंसविग्रहमच्युतम् ॥

Īśvara[1] XXIV : 231*b*–235*a*, Sāttvata XII : 40–43

Miscellaneous remarks about Mūrti-forms

The various *mūrti*-forms described in the preceding entries and in the preceding chapter may be worshipped also in various groupings and combinations. Excerpt §523 gives the proper combinations of the various forms when one wishes to worship 2, 3, 4, 5, 6, 7, 8, 9, 10, 11 and 12 or 24 *mūrtis* together. §524 gives general descriptions of the twenty-four, stating that they are all to be shown with Śrī and Bhū. §525 goes into more detail concerning the weapons to be shown with the twenty-four, adding that for those who wish to gain *bhoga*-rewards should institute worship of these " on the walls ".

§ 523

. . . एकमूर्तिर्वासुदेवो यद्वा नारायणः परः ॥
तौ द्विमूर्तिस्त्रिमूर्तिस्तु सत्यश्चाच्युतपूरुषौ । चतुर्मूर्तिर्वासुदेवो भवेत्सङ्कर्षणस्तथा ॥
प्रद्युम्नश्चानिरुद्धश्च पञ्चमूर्तिमतः शृणु । सत्याच्युतौ तथानन्तो वासुदेवश्च पूरुषः ॥
षण्मूर्तिरन्नाधिपतिः शक्तीशः कालनेमिजित् । त्रैलोक्यमोहनो यज्ञवराहश्चेति पञ्चमः ॥
शङ्खोदरो नृसिंहश्च सप्तमूर्तिरथोच्यते । चतस्रो वासुदेवादिमूर्तयः पूर्वमीरिताः ॥
पूषादयस्तथा तिस्रः सप्तमूर्तिरुदाहृता । हयग्रीवो मुकुन्दश्च बभ्रुश्चैव वृषाकपिः ॥
शौरिश्च दाशार्हश्चैव वैकुण्ठः पुरुषस्तथा । अष्टमूर्तिरिति प्रोक्तो नवमूर्तिरथोच्यते ॥
चतस्रः कथिताः पूर्वं वासुवादयस्तथा । नारायणो हयग्रीवो विष्णुर्नृहरिसूकरौ ॥
षडन्नेशादयः प्रोक्ता वासुदेवादिमूर्तयः । चतस्रो दशमूर्तिस्स्यादादिमूर्तिरिमा दश ॥
स्यादेकादशमूर्तिस्स्यात् प्रोक्ता द्वादशमूर्तयः । चतस्रो विंशतिश्चैव मूर्तयः पूर्वमीरिताः ॥
पञ्चमूर्तिप्रतिष्ठानमधुना समुदीर्यते । स्थापयेद्वासुदेवाभ्यां मूर्तिं गर्भगृहे सुधीः ॥
दिव्ये भागेऽथवा ब्राह्मे बहिः प्राग्दिशि पूरुषम् । सत्यमूर्तिं दक्षिणस्यां प्रतीच्यामच्युतं यथा ॥
अनन्ताख्यमुदीचीने चलां वा यदि वाऽचलाम् । धाम्नोऽन्तर्वासुदेवः स्याच्चतुर्मूर्तिषु पूर्ववत् ॥
सङ्कर्षणं दक्षिणस्यां बहिर्दिशि निवेशयेत् । प्रद्युम्नं च प्रतीचीने कौबेर्यामनिरुद्धकम् ॥
यां यां दिशमधिष्ठाय स्थिताः पूर्वोक्तमूर्तयः । तत्तद्दिगाभिमुख्येन कल्पयेत्कमलासन ॥
द्वारं वातायनं वापि कुर्याद्भित्तिं न कल्पयेत् । शङ्खचक्रगदायुक्ता मुख्यैरभयदा करैः ॥

Pādma "kr." XVIII : 56*b*–71

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 524

पीताम्बरधरास्सर्वे चतुर्विंशतिमूर्तयः । वनमालया श्रीवत्सेन कौस्तुभेन विराजितः ॥
भोगात्मनश्चेन्मूर्तेश्च देवीभ्यां स्थापयेत्पुरा । योगलक्ष्मी तु श्रीवत्सं भोगलक्ष्मी द्विपार्श्वयोः ॥
वरलक्ष्मी तु वैशेषं पृथग्भवनकल्पनम् । . . . .

Mārkaṇḍeya VIII

§ 525

दक्षिणं हस्तमारभ्य प्रादक्षिण्येन कारयेत् । मूर्तिचिह्नानि शङ्खादीन्यायुधानि विचक्षणः ॥
वासुदेवः पद्मनाभः नारायणजनार्दनौ । एतेषां वर्णभेदोऽस्ति न विशेषोऽस्ति चायुधैः ॥
पीताम्बरधराः सर्वाः चतुर्विंशतिमूर्तयः । श्रीवत्सकौस्तुभाः कल्पवनमालाविभूषिताः ॥
भोगार्थिनश्चेद्भित्तिस्थान् देवीभ्यां स्थापयेत्सह । विना ताभ्यां मोक्षकामाः स्थापयेयुर्यथाविधि ॥
आसनस्थानशयनयानादिषु यथाविधि । . . . .

Pādma "kr." XVI ; 43–47a

Viśvarūpa

The following six entries concern themselves with the multi-form known as Viśvarūpa. In §526 (*cf.* §529) he is said to have a normal body and a single neck, but four faces—those of Vāsudeva, Saṅkarṣaṇa, Pradyumna and Aniruddha—topped in an ascending pyramid of heads representing various gods, demigods and powers. §529 adds that this is best seen in a painted representation. The first passage states that a temple may be built to such a form ; but §532 indicates that such a temple—just as temples to Narasiṁha, Paraśurāma and certain others—should not be built in places easily frequented by people.

Other descriptions are also found—the most curious being §530. In this Viśvarūpa is said to have three eyes, three legs, and either 1500, 108, 8 or 7 hands. He is said there to be crystal in color. This might be compared with §531, a two-hand version said to be of " dark " color. §528 indicates that Viśvarūpa is to be thought of as filling the space between the earth and the heavens, having an infinite number of hands ; but for purposes of worship he should be shown to have 33 faces and from four to forty hands. The excerpt §527 says he is to be shown with 20 hands, and specifies the instruments and weapons to be held in each. It states that the measurements for Viśvarūpa are the same as those for Narasiṁha (*see* §319, above).

§ 526

. . . द्विहस्तमेककण्ठं च चतुर्दिक्षु चतुर्मुख ॥
वासुदेवादिवदनं प्रागादिषु यथाक्रमम् । वासुदेवाननादूर्ध्वं देवानां वदनान्यपि ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

ऋषीणां वदनानि स्युः सङ्कर्षणमुखोपरि । प्रद्युम्नवदनादूर्ध्वं दैत्यरक्षोमुखान्यपि ॥
अनिरुद्धमुखादूर्ध्वं नागगन्धर्वकिन्नराः । तत्तन्मुखानामुपरि विविधान्याननान्यपि ॥
पिशाचाजगरव्याघ्रनरपक्षिमुखान्यपि । क्रमेण कल्पनीयानि तत्तदूर्ध्वं पुनः पुनः ॥
कण्ठाधोदेशमारभ्य पादान्तं पुरुषः स्थितः । विश्वमूर्तिरियं ब्रह्मन् कथिता कमलापतेः ॥
प्रकारमिह वक्ष्यामि स्वतन्त्रपरतन्त्रयोः । कर्षणादिक्रियापूर्वं विमाने गर्भमन्दिरे ॥
सर्वावरणभूयिष्ठे बलिपीठादिसंयुते । प्रतिष्ठितस्स्वतन्त्रः स्यात्परिवारसमेधितः ॥

Viṣṇutilaka VI : 428*b*–435

§ 527

विंशबाहुं विश्वरूपं कुर्यात्तल्लक्षणं शृणु । चक्रं खड्गं च मुसलं अङ्कुशं पट्टिशं तथा ॥
मुद्गरं च तथा पाशं शक्तिं शूलं शरं तथा । दक्षिणे तु प्रदद्याद्वै वमे तु शृणु साम्प्रतम् ॥
शङ्खं शार्ङ्गं गदां पाशं तोमरं लाङ्गलं तथा । परशुं छुरिकां दण्डं चर्मप्रक्षेपणं तथा ॥
नृसिंहोक्तं परं मानं विश्वरूपस्य कीर्तितम् । चतुर्मुखं दक्षिणेऽस्य त्रिणेत्रं वामतो न्यसेत् ॥
स्तुवन्तो मुनयः कार्या विद्रवन्तो निशाचराः । . . . .

Hayaśīrṣa "Ādi" XXII : 5–9*a*

§ 528

तमनादिं जगन्नाथं बहिः स्थूलतरात्मना । द्यावापृथिव्योरन्तस्स्थं विश्वरूपमतः स्मरेत् ॥
अनेकवक्त्राङ्घ्रिनयनमनेकितकराङ्कितम् । यद्यप्यनेकवदनमनेकभुजभूषितम् ॥
तथापि वै त्रयस्त्रिंशद्वदनैर्विविधैर्युतम् । चतुरभ्यधिकैर्दिव्यैश्चत्वारिंशन्महाभुजैः ॥
ब्रह्मरुद्रेन्द्रदक्षार्कचन्द्रसिद्धास्तथा श्रुतिः । पौरुषस्य तु वक्त्रस्य चोर्ध्ववक्त्रस्थितास्त्वमी ॥
पिशाचाग्निमरुच्छैलद्वीपगन्धर्ववारिभिः । वक्त्रैरूर्ध्वस्थितैर्ध्यायेद्दक्षिणं वदनं विभोः ॥
पातालदिङ्महामेघलोकराशिगृहोत्थितैः । वक्त्रैस्तारसमेतैस्तु ध्यायेद्वक्त्रं तु पश्चिमम् ॥
यक्षान्तकाम्बुनागाद्यैर्वसुनक्षत्रगोगणैः । वक्त्रैर्वाराहवक्त्रोर्ध्वं ध्यायेच्चैवमतः शुभैः ॥
पद्माद्यं चातुरात्मीयमन्त्राणां दशकं महत् । प्रोच्छ्रितं हि सुवर्णाद्यं तल्लाञ्छनचतुष्टयम् ॥
लोके शास्त्राष्टकं चैव पुस्तकं चाक्षसूत्रकम् । दर्वीं कमण्डलुं हैममभयं हि वरान्वितम् ॥
दर्भाजिनं ततश्छत्रं सुशुभं चामरं सितम् । स्रुक्स्रुवौ चापि कलशौ वेदिर्वह्निसमन्विता ॥
चन्द्रार्कमण्डले पूर्णे नागेन्द्रो मणिदर्पणः । पुष्पस्रग्व्यजनं दिव्यं विश्वपत्रलता तथा ॥
स्मर्तव्यास्तु भुजेष्वस्य विभोः संस्थानकैः समैः । यथोदितक्रमेणैव व्यत्ययो न भवेद्यथा ॥

Īśvara[1] XXIV : 219–230 *cf.* Sāttvata XII : 28–39*a*

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 529

विश्वरूपं प्रवक्ष्यामि शृणु पङ्कजसम्भव । द्विपादमेककण्ठं च चतुर्दिक्षु चतुर्मुखम् ॥
वासुदेवमुखादूर्ध्वं सर्वदेवमुखानि तु । सङ्कर्षणमुखादूर्ध्वं सर्वर्षीणां मुखानि च ॥
प्रद्युम्नस्य मुखादूर्ध्वं दैत्यदानवरक्षसाम् । अनिरुद्धमुखादूर्ध्वं नागगन्धर्वकिन्नराः ॥
मुखान्येतानि चान्यानि यथाविभवमादरात् । कर्तव्यानि चतुर्वक्त्रसमर्थानि विचक्षणैः ॥
उपरिष्टाच्च वक्त्राणां किरीटमतिशोभनम् । कुर्याद्युगपदुद्भूतं सहस्रादित्यवर्चसम् ॥
अनेकभुजसंयुक्तमनेकायुधभूषितम् । अर्चितं ब्रह्मरुद्राभ्यां भित्तिभूमिषु देवताः ॥
चित्रेण सर्वे विहिता विश्वरूपस्स उत्तमः । सर्वे यथोक्ताः कुड्यस्था अर्धचित्रेण चेत् कृताः ॥
सनन्दसनकौ कुर्यात् पूजापीठस्य पार्श्वयोः । मध्यमा विश्वमूर्तिः स्यात् जघन्यामपि संशृणु ॥
आभासेनैव कुड्यस्था देव्यौ पूजासने स्थिते । चतुर्भिर्बाहुभिर्युक्तः वासुदेवश्च शाश्वतः ॥
मुख्याभ्यां धारयन् सव्यदक्षिणाभ्यां गदाम्बुजे । ऊर्ध्वाभ्यामितराभ्यां तु शङ्खचक्रे यथातथम् ॥
अथ वा दक्षिणो हस्तो वरदोऽभयदोऽपि वा । गदां विना वामहस्तः कटिदेशावलम्बितः ॥
द्विभुजो वा बहुभुजो युक्तोऽनेकैस्तथाननैः । एकेन वा सितो वर्णो वासुदेवस्सनातनः ॥
एवं नारायणोऽनादिर्नीलनीरदसन्निभः । . . . .

Pādma "kr." XVI : 17–29*a*

§ 530

किंशुकाकुसुमप्रख्यं त्रिणेत्रं भीमरूपिणम् । सहस्रं वा तदर्धं वा ह्यष्टोत्तरशतं तु वा ॥
अथवाष्टभुजं वापि कारयेत्सुमनोरमम् । पीताम्बरसमायुक्तं सर्वाभरणभूषितम् ॥
सर्वालङ्कारसंयुक्तं सर्वप्रहरणान्वितम् । एवंरूपं तु संचिन्त्य विश्वरूपमयं हरिम् ॥
दक्षिणोर्ध्वकरे चक्रं मुसलं चाधरे भुजे । अस्याधरे तु पाशं स्यादङ्कुशं चापरे न्यसेत् ॥
चक्रं वामाधरे हस्ते तस्योर्ध्वे लकुटं न्यसेत् । लकुटस्योर्ध्वहस्ते तु शङ्खं गोक्षीरसन्निभम् ॥
शङ्खोर्ध्वं सशरं चापमेवं प्रहरणं न्यसेत् । शेषाण्यस्त्राणि सर्वाणि यथाकामं न्यसेत्करे ॥
विश्वरूपस्य मत्प्रोक्तं लक्षणं जयवृद्धिदम् । शुद्धस्फटिकसङ्काशं त्रिपादं सप्तबाहुकम् ॥
वेदशृङ्गं द्विवदनं त्रिणेत्रं पीतवाससम् । शङ्खचक्रगदापाणिं सर्वाभरणभूषितम् ॥
सर्वावयवसंपूर्णं सर्वालङ्कारशोभितम् । एवं संक्षेपतः प्रोक्तं यज्ञेशं चाघनाशनम् ॥
दक्षिणेऽस्य करे चोर्ध्वे चक्रं कालाग्निसन्निभम् । लकुटं चापरे न्यस्य वामोर्ध्वे शङ्खमुद्वहन् ॥
अस्याधरेऽभयं हस्तं वरदं वा स्मरन् मुने । हविर्भागगृहीतारं त्रिहस्तेन समाहितम् ॥
एवं ध्यायेत् त्रिसंध्यायां यज्ञेशं परमं हरिम् । त्रिसंध्यमेकसंध्यं वा यज्ञेशं पूजयेद् द्विजः ॥
सर्वान् कामानवाप्नोति सर्वयज्ञफलं लभेत् । ध्यानेनोत्पद्यमानेन सम्यक् ज्ञानमवाप्यते ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

तस्मात्सर्वप्रयत्नेन मखेशं पूजयेद्बुधः । यज्ञेशस्त्वधुना प्रोक्तो वेदमूर्तिमथो शृणु ॥
श्यामं पर्वतसङ्काशं चतुर्बाहुं किरीटिनम् । सर्वावयवसंपूर्णं सर्वाभरणभूषितम् ॥
शङ्खचक्रगदापाणिं त्रिणेत्रं भीमधारिणम् । पीताम्बरसमायुक्तं सर्वालङ्कारभूषितम् ॥
सर्ववेदमयं सूक्ष्मं गुह्याद् गुह्यमनुत्तमम् । वेदमूर्तिरियं प्रोक्ता हेतिन्यासमथो शृणु ॥
अस्य दक्षिणहस्तोर्ध्वे चक्रं कालानलप्रभम् । पद्मं त्वधरहस्ते तु विन्यसेत्तु महामुने ॥
सर्वपार्श्वोर्ध्वहस्ते तु पाञ्चजन्यं त्वधो गदाम् । एवं चायुधविन्यासं श्रियादीनामथो शृणु ॥

Viṣvaksena XI : 236–254

§ 531

कृष्णमिन्दीवरश्याममूर्ध्वबाहुं जटाधरम् । पादेनैकेन तिष्ठन्तमाहरन्तं च मारुतम् ॥
एकत्रिषड्द्विषड्रात्राद्यतिकृच्छ्रपरायणम् । पक्षमासोपवासांश्च दिशन्तमनुचिन्तयेत् ॥
कृष्णाजिनोत्तरीयाश्च सर्वे काषायधारिणः । ब्रह्मलिङ्गधरास्सर्वे सर्वे ब्रह्मपरायणाः ॥
मुख्यकर्मपरिक्रान्ताः साधूनां प्रेरणाय च । कालानुकूलमाश्रित्य सर्वे सर्वे परायणाः ॥
असङ्गशक्त्या भगवान् सकुठाराभिधानया । छिनत्ति बन्धमूलान् यः कर्मवृक्षांस्तु कर्मिणाम् ॥
तमेव द्विभुजं ध्यायेदुदयादित्यवर्चसम् । कृष्णैणचर्मवसनं सत्कुठारकराङ्कितम् ॥
दशेन्द्रियाननं घोरं यो मनोरजनीचरम् । विवेकशरजालेन शमं नयति योगिनाम् ॥
ध्येयः स एव विश्वात्मा सतोयजलदप्रभः । रक्तराजीवनयनः धनुश्शरकराङ्कितः ॥

Īśvara[1] XXIV : 337–344

§ 532

विश्वरूपं नृसिंहं च वटशायिनमेव च । जामदग्न्यमिति ज्ञेयमुग्रकर्म द्विजोत्तम ॥
न जनाभिमुखं कुर्यान्नदीतीरेषु मन्दिरम् । पर्वताभिमुखं श्रेष्ठं प्रासादं कुरुते सदा ॥

Kapiñjala IX : 38–39

Some rare Mūrti-forms described

The following eight entries represent some *mūrti*-forms rarely encountered. These are: § 533, Trailokyamohana; § 534, Aśvagantā; § 535, Ekaśṛṅga; § 536, Rājopaladyuti; § 537, Nāmatrayadeva; § 538, Sahasranāmamūrti; § 539, Śaktiśa; and § 540, Harihara.

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 533

. . . अष्टबाहुं बुधः कुर्यात् देवं त्रैलोक्यमोहनम् ॥
गरुडासनगं देवं प्रथमे वयसि स्थितम् । चक्रं खड्गं च मुसलं साङ्कुशं दक्षिणे न्यसेत् ॥
शङ्खं शार्ङ्गं गदां पाशं वामहस्ते तु विन्यसेत् । लक्ष्मीः सरस्वती कार्ये पद्मवीणासमन्विते ॥

Hayaśīrṣa "Ādi" XXII : 1*b*–3 [Adyar *ms.*]

§ 534

वैषयं वासनाजालं शुद्धविज्ञानसिद्धये । ध्यायेद्वराश्वगं तं वै तनुत्रावृतविग्रहम् ॥
सितोष्णीषललाटं च नातिदीर्घजटाधरम् । द्रवत्कनकवर्णाभमिषुधिद्वयमध्यगम् ॥
शरचापकरव्यग्रखड्गकुन्तकुठारिणम् । यज्ञाध्ययनदानादि परिरक्षन्तमेव हि ॥
शान्तयन्तमवर्णानामधर्मनिरतात्मनाम् । सर्वतत्त्वाश्रयं तत्त्वं सर्वशक्तिमयं विभुम् ॥
सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् । निश्शेषभुवनानां च ध्यातव्यं तदधःस्थितम् ॥

Īśvara[1] XXIV : 352–356

§ 535

. . . * ज्ञानादिगुणबृन्देन पक्षभूतेन भूषितम् ॥
स्वोत्थं सन्निस्रुतं ब्रह्म मेकश्रृङ्ग(?)विराजितम् । कल्पावसानसमये वहन्तं चैव चिन्तयेत् ॥
नौरूपां विततां क्षोणिं प्रजापतिगणान्विताम् । मुक्ताफलगणेनैव वपुषा निर्मलेन च ॥
अनिमीलितनेत्रस्स मीनात्मा भगवानथ । यो नित्यं भवभीतानां बुधानां कृपया स्वयम् ॥
हृत्स्थो नियतिदण्डेन मार्ताण्डायुतसन्निभः । जित्वा ज्ञानबलं भीममिन्द्रियारिगणान्वितम् ॥
संयच्छत्यचिराद् ब्रह्म नन्दनं सत्सुखाय च । ध्यायेत्तमेव ह्रस्वाङ्गं श्यामं पद्मदलेक्षणम् ॥
अन्तर्निविष्टभुवनं जटावल्कलभूषितम् । छत्रं तद्वामहस्तेऽस्य दण्डमन्यत्र वैष्णवम् ॥
आक्रम्य जाग्रदादित्यसूर्येन्दुहुतभुक्प्रभाम् । तिष्ठत्यनन्तो भगवांस्तुर्याख्यश्चिद्विभूतिधृत् ॥
संप्रेरयन्ननिच्छातस्स्वपदादमृतप्रभाम् । आह्लादजननीं शक्तिं कर्मिणां भावितात्मनाम् ॥
त्रैलोक्यपूरकं ध्यायेत्तमेवं हरितद्युतिम् । नानामुद्रास्त्रयुक्तेन भुजबृन्देन भूषितम् ॥
खेटकेनाङ्घ्रिदण्डेन वहन्तमरिसूदनम् । वहन्तं सद्वैजयन्तीं देवानां च जयार्थिनाम् ॥
खड्गचक्र [अब्जखड्ग] गदादण्डबाणाङ्कुशसमुद्गराः । शक्तिः परशुशैलेन्द्रौ दश दक्षभुजेष्वमी ॥
शङ्खतोमरशार्ङ्गं च पाशशूलमहीरुहाः । कुलिशं क्षुरिका चैव लाङ्गलं मुसलं महत् ॥
वामहस्तेष्वमी ध्येया अन्ये मुद्रान्विता दश । भयविस्मयभृद्वेणीकण्ठग्रहणलक्षणाः ॥

* Sāttvata XII : 121*b*–141. || Īśvara[1] XXIV : 313*b*–333

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

ध्येया मुद्रा विभोः पञ्च सव्ये तु करपञ्चके । वराख्यां भूतिसंज्ञां च युक्ताख्यां साभयां तु वै ॥
गोपनीं दक्षहस्तेषु तत्संख्येषु च संस्मरेत् । जगत्सूत्रं सहा(भा)क्षैस्तु येनोक्तममितात्मनाम् ॥
गुणषट्कस्वरूपेण पूर्वोक्ताकृतिभिर्विना । स्मर्तव्यस्स चतुर्धा वै लाञ्छनास्त्रविवर्जितः ॥
सर्वदा परिरक्षन्तु जपपूर्वं चतुष्टयम् । योगक्रियातपोऽन्तं च सद्विभूत्यपवर्गदम् ॥
नराद्यः कृष्णनिष्ठश्च पृथगेकत्र चेच्छया । नरं तत्र प्रवालाभमर्धोन्मीलितलोचनम् ॥
अन्तर्निविष्टभावं च शब्दब्रह्मैकमानसम् । यदोपलक्षणं मन्त्रं लपमानमलक्षितम् ॥
स्फाटिकेनाक्षसूत्रेण करस्थेन च शोभितम् । गणयन्नक्षसूत्रीयानावर्तान् वामपाणिना ॥

Sāttvata XII : 121*b*-141

§ 536

निष्पन्दं बोधभावेन तं तु व्यक्तं स्मरेद्बहिः । नीलनीरदवर्णाभं पद्मपत्रनिभेक्षणम् ॥
मध्याह्नभास्कराकारं द्वादशारकरोद्यतम् । श्रोणीतटनिविष्टेन वामहस्तेन लीलया ॥
ध्रियमाणं गदां गुर्वीं निषण्णां धरणीतले । अविद्याख्या च या नेमिः कालचक्रस्य दुर्धरा ॥
समाधीयं समाश्रित्य विग्रहं विधुनोति च । जपयज्ञक्रियादीनां तामसेन बलेन च ॥
ध्यायेत्तत्प्रसरघ्नं च देवं राजोपलद्युतिम् । विज्ञानरश्मिभिर्दीप्तं सत्सत्त्वगरुडासनम् ॥
नानास्त्ररूपभूतात्मसद्विद्याभुजभूषितम् । चक्रं पद्मं गदां बाणमङ्कुशं कुन्तमेव च ॥
षट्सु दक्षिणहस्तेषु शक्तिपाशौ च कार्मुकम् । मुसलं मुद्गरं भीमं खेटकं वामबाहुषु ॥

Sāttvata XII : 91–97

§ 537

अच्युतानन्तगोविन्दरूपिणं विभुमव्ययम् । भजेऽहं वासुदेवं तं श्रीभूनीळादिसंयुतम् ॥
किरीटादिविभूषाङ्गं ब्रह्मरुद्रादिसेवितम् । चक्राब्जशङ्खासिगदाधनुर्बाणसमन्वितम् ॥

Parāśara XXIII

§ 538

. . . सहस्रनाममूर्तीनां शङ्खचक्रगदाभयम् ॥
. . . दक्षिणोर्ध्वकरे चक्रं प्रादक्षिण्येन सत्क्रमात् ॥
श्रीभूनीळाधिपं देवं सहस्रवपुषं हरिम् । सहस्रनामनामाङ्कं किरीटादिविभूषितम् ॥
शङ्खचक्रगदापद्मधारिणं वनमालिनम् । परसूक्ष्मस्थूलरूपं च तं भजेद्विश्वतोमुखम् ॥

Parāśara V : 6*b*, 7*b*, 8–9

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 539

. . . शक्तीशोऽप्यथ सञ्चिन्त्यः पुण्डरीकनिभेक्षणः ॥
इच्छारूपधरश्चैव सौम्यः प्रहसिताननः । व्यक्तये च फलादीनां भक्तानामनुकम्पया ॥
पिण्डयन् स्वाङ्घ्रियुग्मेन वसुधां च करद्वयम् । युगानुसारिकान्तिश्च चतुर्वक्त्रश्चतुर्भुजः ॥
मूर्तचक्रगदाहस्तस्वमूर्ताच्चाम्बुजाङ्कितः । शमं नयति सन्तापं कमलेनेन्दुकान्तिना ॥
नानामन्त्रमयीं विद्यां व्यञ्जयत्यमलात्मनाम् । सम्यग्वाक्पतिना चैव कम्बुना शब्दमूर्तिना ॥
आज्ञाप्रतीक्षकेनैव गदाचक्रद्वयेन तु । प्रेरितेन हिनस्त्याशु साधुसन्तापकारिणम् ॥
नारसिंहेन वक्त्रेण भवभीतिविघातकृत् । पुष्णाति सर्वभूतानि वाराहेणाऽमृतात्मना ॥
कुरुते पश्चिमस्थेन कापिलेनोपसंहृतिम् । भक्तिश्रद्धापराणां च स्मृतमात्रे सदैव हि ॥
हृन्मध्ये गगने भूमौ वह्निमध्ये जलान्तरे । चतुर्णां ब्राह्मणादीनां स्वयमेवानुकम्पया ॥
चातुरात्म्येन रूपेण चतुर्धा व्यक्तिमेति च । आत्मतुल्येन देहेन शङ्खपद्माङ्कितेन तु ॥
मूर्तिमद्भिर्हलाद्यैस्तु युक्तेन वदनैर्विना । वर्णानुरूपवर्णेन समेनाऽप्यसमेन तु ॥
अन्योन्यानुगतेनैव पूर्वोद्दिष्टेन नान्यथा । . . . .

Īśvara[1] XXIV : 200*b*–211*a*. Sāttvata XII : 9–19

§ 540

रुद्रार्धदेहं वा कुर्यात् चतुर्बाहुं जनार्दनम् । ईशानं दक्षिणे पार्श्वे कुर्याच्छूलाष्टधारिणम् ॥
गदाचक्रधरं चान्यं मुकुटेन विभूषितम् । जटाचन्द्रधरं रौद्रं वैष्णवं रत्नमण्डितम् ॥
कुण्डलोद्योतितं चैकं अपरं नागकुण्डलम् । व्याघ्रचर्मपरीधानं अपरं वस्त्रभूषितम् ॥
ब्रह्मसूत्रधरं चैकं अन्यन्नागोपवीतकम् । गौरी चैकेन पार्श्वेन लक्ष्मीश्चैकेन संस्थिता ॥
एवंलक्षणसंयुक्तं कारयेत् हरिशङ्करम् । . . . .

Hayaśīrṣa "Ādi" XXII : 12–16*a* [Adyar *ms.*]

The so-called "eight Mūrtis"

The group of the so-called "eight *mūrtis*" (*aṣṭamūrti*) are named in §541 : Brāhmi, Prājāpatyā, Vaiṣṇavi, Daivi, Āṛṣi, Mānuṣi, Āsuri and Paiśāci. The first of these is described in §542 and §543. The second of these is described in §544. Vaiṣṇavi is described in §545 and §546. The remaining ones are described in §547, §548, §549, §550 and §551 respectively. The colors for the first five of these eight may be found in the corresponding excerpts. All are to be given the standard decorations, garlanded, and afforded the "*śrīvatsa*" and "*kaustubha*" marks.

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 541

. . . अष्टौ वक्ष्ये परा मूर्तीस्तासु ब्राह्मी प्रशस्यते ॥
प्राजापत्या द्वितीया तु तृतीया वैष्णवी मता । दैवी चतुर्थी तदनु मूर्तिरार्षी चतुर्मुख ॥
षष्ठी तु मानुषी ज्ञेया सप्तमी मूर्तिरासुरी । पैशाची मूर्तिरन्या स्यात् तासां लक्षणमुच्यते ॥

Pādma "kr." XVI : 47*b*–49

§ 542

प्रथमाऽष्टभुजा तप्ततपनीयसमद्युतिः । भुजेषु मुख्यो वरदो दक्षिणेष्वितरे त्रयः ॥
चक्रासिबाणैः संयुक्तो वामे हस्तचतुष्टये । शङ्खं गदां तथा चर्म शार्ङ्गं कुर्याच्चतुर्मुख ॥
पीताम्बरधरो देवः वनमालाविभूषितः । मरीचिना च भृगुणा पूजितश्च महर्षिणा ॥

Pādma "kr." XVI : 50–52

§ 543

. . . द्विभुजा तु चतुर्वक्त्रा वेधसो रूपधारिणी ॥
हंसारूढा च पद्मस्था सर्वाभरणभूषिता । तस्या दक्षिणहस्ते तु प्रदातव्या गलन्तिका ॥
कुण्डिका वामहस्ते तु योगपट्टेन वेष्टिता । . . . .

Hayaśirṣa "Ādi" XXIV : 2*b*–4*a*

§ 544

शङ्खकुन्देन्दुवर्णाभः पीतवासाश्चतुर्भुजः । शङ्खचक्रगदापाणिरभयेन विराजितः ॥
वनमालाधरः सौम्यः सनकेन सुपूजितः । सनत्कुमारेण तथा मूर्तिरेषा प्रजापतेः ॥

Pādma "kr." XVI : 53–54

§ 545

. . . नवयौवनसंयुक्ता भूषिता बहुलोचनैः ॥
चतुर्भुजा वैष्णवी स्यात् शङ्खचक्रगदाम्बुजा । पक्षिराजसमारूढा सर्वाभरणभूषिता ॥

Hayaśirṣa "Ādi" XXIV : 6*b*–7

§ 546

भिन्नाञ्जनचयः सौम्यः शङ्खचक्रगदाधरः । पीताम्बरधरो देवो वनमालाविभूषितः ॥
वरदो दक्षिणो हस्तः स्वागताभयदोऽपि वा । वामेन स्पृष्टकटिभूः श्रीभूमिभ्यां सह स्थितः ॥
नारदेनापि भृगुणा वैष्णवी मूर्तिरर्चिता । . . . .

Pādma "kr." XVI : 55–57*a*

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 547

. . . शङ्खचक्रगदापद्मं धारयन्तं चतुर्भुजम् ॥
श्यामलं पीतवसनं वनमालाविभूषितम् । अर्चितं ब्रह्मरुद्राभ्यां दैवी मूर्तिरसौ भवेत् ॥

Pādma "kr." XVI : 57*b*–58

§ 548

शुद्धस्फटिकसङ्काशा पीतवस्त्रा चतुर्भुजा । दक्षिणे ज्ञानमुद्रा च शङ्खचक्रगदाधरा ॥
श्रीवत्साङ्का प्रसन्नास्या वनमालाविभूषिता । सनन्दसनकाभ्यां च पूजिता मूर्तिराऋषी ॥

Pādma "kr." XVI : 59–60

§ 549

मानुषी मूर्तिरधुना कथ्यते कमलासन । चतुरश्रायते धाम्नि दिव्ये भागे भुजद्वयम् ॥
शङ्खचक्रधरं सौम्यं स्थापयेन्मकुटोज्वलम् । देवस्य दक्षिणे पार्श्वे श्रियं देवीं प्रकल्पयेत् ॥
तस्या दक्षिणतो भागे बलभद्रं तु कारयेत् । दक्षिणे बलभद्रस्य प्रद्युम्नमपि कारयेत् ॥
देवस्य वामपार्श्वे तु अनिरुद्धं प्रकल्पयेत् । तस्य पार्श्वे तु वामे तु साम्बं कुर्याच्चतुर्मुख ॥
ब्रह्माणं दक्षिणे कुड्ये सव्ये तु विनतात्मजम् । स्थानके स्थानकाः प्रोक्ता आसीनेऽपि तथा भवेत् ॥
चतुर्भुजा तु कर्मार्चा द्विभुजा वापि सा भवेत् । उत्सवार्चाप्रतिकृतिः सर्वा चैव चतुर्भुज ॥
मानुष्यं वासुदेवस्य प्रोक्तं संक्षेपतो विधिः । . . . .

Pādma "kr." XVI : 61–67*a*

§ 550

. . . आसुरी मूर्तिरसिता एकवक्त्रा चतुर्भुजा ॥
दंष्ट्राकरालवदना भ्रुकुटीकुटिलेक्षणा । मुख्ये करद्वये बाणं धनुरूर्ध्वेऽरिशङ्खकम् ॥
शार्ङ्गहस्तं ललाटान्तमुद्धरेद्बाणहस्तकम् । नाभ्यन्तं कटिसूत्रान्तं भङ्गत्रयसमन्वितम् ॥

Pādma "kr." VI : 67*b*–69

§ 551

पैशाची मूर्तिराद्या तु खड्गकौमोदकी तथा । वरदाभयदं मुख्यं कालवर्णं करद्वयम् ॥
दंष्ट्राकरालवदनं भ्रुकुटीकुटिलेक्षणम् । अष्टौ च मूर्तयः सर्वाः सर्वाभरणभूषिताः ॥
श्रीवत्सकौस्तुभोरस्का वनमालाविभूषिताः । . . . .

Pādma "kr." XVI : 70–72*a*

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

THE ATTENDANT DEITIES

Ananta

The deathless (*an* + *anta*), serpentine form known as Ananta is always counted first among the "*nityasūri*" ever-liberated, chief attendants of the Lord. This is because he is never very far away from his Master. Wherever the Lord goes, Ananta serves as the many-hooded protective umbrella; whenever the Lord sits, Ananta serves as the seat; whenever the Lord reclines, Ananta serves as the couch; when the *yoganidrā* period of repose on the Milk Ocean comes, Ananta serves as the buoyant support.

Generally speaking, Ananta's color is said to be white. In all cases (§552–§556), he is said to possess 1,000 hoods, or at least numberless heads. While the conch and discus are standard items of his iconography, he is sometimes said also to bear a plow (§552 and §556), a lotus (§555), a rosary (§556) or a pestle (§556). In the passage represented by excerpt §552, he is said to be seated on the primordial tortoise.

§ 552

पातालदिग्गतं ध्यायेत् कूर्मारूढं हलायुधम् । सितं सहस्रफणभृद्योऽनन्तो नाम नागराट् ॥

Pauṣkara IV : 157. Pārameśvara XI : 100*b*–101*a*. Īśvara[1] IX : 98

§ 553

चक्रशङ्खधरं देवं सहस्रवदनं विभुम् । सर्पाकारेण संयुक्तं अनन्तं सततं भजे ॥

Parāśara XIX : 7

§ 554

शङ्खचक्रधरं देवं सहस्रवदनं शुभम् । वज्राभरणभूषाङ्गं अनन्तं सततं भजे ॥

Śeṣa XXVIII : 5

§ 555

तिर्यगूर्ध्वं तदाधारं ज्वालामालमिवोज्ज्वलम् । अनन्तशशिसङ्काशमनन्तमथ संस्मरेत् ॥
सहस्रफणमालाढ्यं सहस्रफणभूषितम् । स्वपाणिसंपुटेनैव शोभवत्? स्वाङ्गभूतलम् ॥
सितारविन्दशङ्खाक्षसूत्रचक्रकरान्वितम् । . . . .

Pauṣkara XXIV : 24–26*a*

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 556

तुहिनाचलसङ्काशं पूर्णचन्द्रसमाननम् । स्व(सु)मणिव्यञ्जितेनैव युक्तं फणगणेन तु ॥
प्रोद्वहन्तं हलं चक्रमपसव्यद्वयेन तु । वामहस्तद्वयेनैव शङ्खं मुसलमेव च ॥
नित्यसन्निहिताशेषशक्तिं सर्वज्ञमच्युतम् । . . . .

Sāttvata XII : 6–8*a*.=Īśvara[1] XXIV : 197*b*–199

Garuḍa

Of all the elements of Hindu iconography, few have gained such familiar usage in countries beyond India—especially in Southeast Asian areas like Thailand—as has the "vehicle" of Viṣṇu, namely Garuḍa. Especially among Vaiṣṇavas even to see this half-bird, half-human form is believed to be beneficial. The Garuḍa-figure, indeed, is a standard fixture, as it were, identifying a temple as having Viṣṇu's Presence within.

In the following excerpts, the Garuḍa-form is described as he occupies a separate shrine (§557, §558, §559, §561, §563, §564 and §565), as he is depicted on the temple flag (§574, §575, §576 and §577), and as he is used for a *vāhana*-vehicle (§578). In most cases he is said to be golden in color, although white is also given (*see*, in addition, however, §576). In §572, he is said to have either 2, 4 and 8 or 16 hands—the specifics for what is held by each being given ; *see* also §569. He is said to be garlanded with a captive snake. Measurements are available in §556 and §567 (for shrine figures), in §575 (for the flag-motif), and in §578 (for the vehicular variant).

In §570 and §571 we learn that there are five names by which this man-bird attendant is known : Satya, Suparṇa, Garuḍa, Tārkṣya and Vihageśvara. In the former of these two passages, the first four of these are associated with the four directions—that is, these are the specific names given to the Garuḍa-figures so often found on the temple walls at the four corners.

§ 557

श्वेतवर्णं विभुं शान्तं श्वेतपद्मोपरिस्थितम् । विश्वरूपधरं देवं पक्षिराजं भजाम्यहम् ॥

Śeṣa XLIX : 8

§ 558

. . . शङ्खचक्रधरं देवं सर्वाभरणभूषितम् ॥
दंष्ट्राकरालमत्युग्रं पक्षिराजं भजाम्यहम् । . . . .

Śeṣa XXVIII : 9*b*–10*a*

Digitized by Google Original from UNIVERSITY OF MICHIGAN

तस्मात्सर्वप्रयत्नेन मखेशं पूजयेद्बुधः । यज्ञेशस्त्वधुना प्रोक्तो वेदमूर्तिमथो शृणु ॥
श्यामं पर्वतसङ्काशं चतुर्बाहुं किरीटिनम् । सर्वावयवसंपूर्णं सर्वाभरणभूषितम् ॥
शङ्खचक्रगदापाणिं त्रिणेत्रं भीमधारिणम् । पीताम्बरसमायुक्तं सर्वालङ्कारभूषितम् ॥
सर्ववेदमयं सूक्ष्मं गुह्याद् गुह्यमनुत्तमम् । वेदमूर्तिरियं प्रोक्ता हेतिन्यासमथो शृणु ॥
अस्य दक्षिणहस्तोर्ध्वे चक्रं कालानलप्रभम् । पद्मं त्वधरहस्ते तु विन्यसेत्तु महामुने ॥
सर्वपार्श्वोर्ध्वहस्ते तु पाञ्चजन्यं त्वधो गदाम् । एवं चायुधविन्यासं श्रियादीनामथो शृणु ॥

Viṣvaksena XI : 236–254

§ 531

कृष्णमिन्दीवरश्याममूर्ध्वबाहुं जटाधरम् । पादेनैकेन तिष्ठन्तमाहरन्तं च मारुतम् ॥
एकत्रिषड्द्विषड्रात्राद्यतिकृच्छ्रपरायणम् । पक्षमासोपवासांश्च दिशन्तमनुचिन्तयेत् ॥
कृष्णाजिनोत्तरीयाश्च सर्वे काषायधारिणः । ब्रह्मलिङ्गधरास्सर्वे सर्वे ब्रह्मपरायणाः ॥
मुख्यकर्मपरिक्रान्ताः साधूनां प्रेरणाय च । कालानुकूलमाश्रित्य सर्वे सर्वे परायणाः ॥
असङ्गशक्त्या भगवान् सकुठाराभिधानया । छिनत्ति बन्धमूलान् यः कर्मवृक्षांस्तु कर्मिणाम् ॥
तमेव द्विभुजं ध्यायेदुदयादित्यवर्चसम् । कृष्णैणचर्मवसनं सत्कुठारकराङ्कितम् ॥
दशेन्द्रियाननं घोरं यो मनोरजनीचरम् । विवेकशरजालेन शमं नयति योगिनाम् ॥
ध्येयः स एव विश्वात्मा सतोयजलदप्रभः । रक्तराजीवनयनः धनुश्शरकराङ्कितः ॥

Īśvara[1] XXIV : 337–344

§ 532

विश्वरूपं नृसिंहं च वटशायिनमेव च । जामदग्न्यमिति ज्ञेयमुग्रकर्म द्विजोत्तम ॥
न जनाभिमुखं कुर्यान्नदीतीरेषु मन्दिरम् । पर्वताभिमुखं श्रेष्ठं प्रासादं कुरुते सदा ॥

Kapiñjala IX : 38–39

Some rare Mūrti-forms described

The following eight entries represent some *mūrti*-forms rarely encountered. These are: § 533, Trailokyamohana; § 534, Aśvagantā; § 535, Ekaśṛṅga; § 536, Rājopaladyuti; § 537, Nāmatrayadeva; § 538, Sahasranāmamūrti; § 539, Śaktiśa; and § 540, Harihara.

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 533

. . . अष्टबाहुं बुधः कुर्यात् देवं त्रैलोक्यमोहनम् ॥
गरुडासनगं देवं प्रथमे वयसि स्थितम् । चक्रं खड्गं च मुसलं साङ्कुशं दक्षिणे न्यसेत् ॥
शङ्खं शार्ङ्गं गदां पाशं वामहस्ते तु विन्यसेत् । लक्ष्मीः सरस्वती कार्ये पद्मवीणासमन्विते ॥

Hayāśirṣa "Ādi" XXII : 1*b*–3 [Adyar *ms.*]

§ 534

वैषयं वासनाजालं शुद्धविज्ञानसिद्धये । ध्यायेद्वराश्वगं तं वै तनुत्रावृतविग्रहम् ॥
सितोष्णीषललाटं च नातिदीर्घजटाधरम् । द्रवत्कनकवर्णाभमिषुधिद्वयमध्यगम् ॥
शरचापकरव्यग्रखड्गकुन्तकुठारिणम् । यज्ञाध्ययनदानादि परिरक्षन्तमेव हि ॥
शान्तयन्तमवर्णानामधर्मनिरतात्मनाम् । सर्वतत्त्वाश्रयं तत्त्वं सर्वशक्तिमयं विभुम् ॥
सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् । निश्शेषभुवनानां च ध्यातव्यं तदधःस्थितम् ॥

Īśvara[1] XXIV : 352–356

§ 535

. . . * ज्ञानादिगुणबृन्देन पक्षभूतेन भूषितम् ॥
स्वोत्थं सन्निस्रुतं ब्रह्म मेकश्रृङ्ग(?)विराजितम् । कल्पावसानसमये वहन्तं चैव चिन्तयेत् ॥
नौरूपां विततां क्षोणिं प्रजापतिगणान्विताम् । मुक्ताफलगणेनैव वपुषा निर्मलेन च ॥
अनिमीलितनेत्रस्स मीनात्मा भगवानथ । यो नित्यं भवभीतानां बुधानां कृपया स्वयम् ॥
हृत्स्थो नियतिदण्डेन मार्ताण्डायुतसन्निभः । जित्वा ज्ञानबलं भीममिन्द्रियारिगणान्वितम् ॥
संयच्छत्यचिराद् ब्रह्म नन्दनं सत्सुखाय च । ध्यायेत्तमेव ह्रस्वाङ्गं श्यामं पद्मदलेक्षणम् ॥
अन्तर्निविष्टभुवनं जटावल्कलभूषितम् । छत्रं तद्वामहस्तेऽस्य दण्डमन्यत्र वैष्णवम् ॥
आक्रम्य जाग्रदादित्यसूर्येन्दुहुतभुक्प्रभाम् । तिष्ठत्यनन्तो भगवांस्तुर्याख्यश्चिद्विभूतिधृत् ॥
संप्रेरयन्ननिच्छातस्स्वपदादमृतप्रभाम् । आह्लादजननीं शक्तिं कर्मिणां भावितात्मनाम् ॥
त्रैलोक्यपूरकं ध्यायेत्तमेवं हरितद्युतिम् । नानामुद्रास्त्रयुक्तेन भुजबृन्देन भूषितम् ॥
खेटकेनाङ्घ्रिदण्डेन वहन्तमरिसूदनम् । वहन्तं सद्वैजयन्तीं देवानां च जयार्थिनाम् ॥
खड्गचक्र [अब्जखड्ग] गदादण्डबाणाङ्कुशसमुद्गराः । शक्तिः परशुशैलेन्द्रौ दश दक्षभुजेष्वमी ॥
शङ्खतोमरशार्ङ्गं च पाशशूलमहीरुहाः । कुलिशं क्षुरिका चैव लाङ्गलं मुसलं महत् ॥
वामहस्तेष्वमी ध्येया अन्ये मुद्रान्विता दश । भयविस्मयभृद्वेणीकण्ठग्रहणलक्षणाः ॥

* Sāttvata XII : 121*b*–141. ‖ Īśvara[1] XXIV : 313*b*–333

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 559

ध्यायेद् द्वाराग्रदेशे तु गरुडं काञ्चनप्रभम् । कुटिलभ्रूसुवृत्ताक्षं पक्षमण्डलमण्डितम् ॥
लम्बोदरं सुपीनाङ्गं सर्वभूषणभूषितम् । मकुटाद्यैरलङ्कारैर्नूपुराद्यैर्विराजितम् ॥
नीलं वसानं वसनं नानामाल्योपशोभितम् । सम्मुखं देवदेवस्य भूगतं विधृताञ्जलिम् ॥
द्विभुजं तुहिनाभं तु सत्याख्यं विहगाधिपम् । प्राणाधिदैवतं चक्रे बलिमण्डलमध्यगे ॥
संस्थितं संस्मरेत्सर्वैरङ्गैः पुरुषरूपिणम् । प्रलम्बमानजठरं पक्षराजिविराजितम् ॥
दक्षिणेन करेणैव धारयन्तं गणित्रकम् । उत्तानितेतरकरं कुण्डलाद्यैर्विभूषितम् ॥
नीलकौशेयवसनं नीलमाल्यानुलेपनम् । अनाकुलाभ्यां नेत्राभ्यां वीक्षमाणं सदा विभुम् ॥

Īśvara[1] IX : 22–28.=Pārameśvara XI : 21*b*–28*a*

§ 560

संस्मरेत्तु ततोऽन्यस्मिन् शाखामूले महामते । सुस्थितं गरुडं विप्र तप्तकाञ्चनसन्निभम् ॥
सौम्यवक्त्रं विवृत्ताक्षं रक्ततुण्डं सुभीषणम् । पृथूदरं दीर्घपुच्छपक्षमण्डलमण्डितम् ॥
रक्ताम्बरधरं चैव रक्तस्रगनुलेपनम् । दंष्ट्राकरालवदनं भ्रुकुटीकुटिलेक्षणम् ॥
विचित्रकञ्चुकधरं भुजगेन्द्रैरलङ्कृतम् । मकुटाद्यैरलङ्कारैर्विविधैस्तु विभूषितम् ॥
भुजद्वये यच्चक्रस्य वामे सम्परिकीर्तितम् । दक्षिणे तद्भवेदस्य दक्षोक्तं वामगं भवेत् ॥

Pārameśvara XI : 114-118

§ 561

दण्डहस्ता विरूपाक्षाश्चतुर्बाहुसमन्विताः । प्राङ्गणे प्रथमे वाथ द्वितीये वापि मण्टपे ॥
अग्रदेशे प्रकुर्वीत मूलार्चाभिमुखं रमे । प्राञ्जलिं द्विभुजं वीरं करण्डिमकुटान्वितम् ॥
संस्थापयेद्वैनतेयं लोहेन शिलयापि वा । . . . .

Śripraśna XV : 13–15*a*

§ 562

सुस्थितं गरुडं विप्राः तप्तकाञ्चनसन्निभम् । सौम्यववत्रं विवृत्ताक्षं रक्ततुण्डं सुभीषणम् ॥
पृथूदरं दीर्घपुच्छं पक्षमण्डलमण्डितम् । रक्ताम्बरधरं चैव रक्तस्रगनुलेपनम् ॥
दंष्ट्राकरालवदनं भ्रुकुटीकुटिलेक्षणम् । विचित्रकञ्चुकधरं भुजगेन्द्रैरलङ्कृतम् ॥
मकुटाद्यैरलङ्कारैर्विविधैस्तु विभूषितम् । भुजद्वये यच्चक्रस्य वामे संपरिकीर्तितम् ॥
दक्षिणे तद्भवेदस्य दक्षोक्तं वामकं भवेत् । . . . .

Īśvara[1] IX : 112-116*a*

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 563

गरुडं कनकप्रख्यं नीलनासाग्रसंयुतम् । दक्षिणेतरविस्तीर्णं विचित्रपृथुवक्षसम् ॥
दंष्ट्राकरालवदनं भ्रुकुटीकुटिलेक्षणम् । करण्डिकामुकुटिनं सर्वाभरणभूषितम् ॥
विचित्रकञ्चुकधरं भुजगेन्द्रैरलङ्कृतम् । हृदि पुष्पाञ्जलिधरं स्थितमासीनमेव वा ॥
दक्षिणेतरयोरेकपादयोः कुञ्चितं भवेत् । पृष्ठतोऽन्यो यथायोगं यद्वा पद्मासनं भवेत् ॥

Pādma "kr." XXII : 8-11

§ 564

. . . पुरतो वैनतेयं च सुवर्णाभं कृताञ्जलिम् ॥
करण्डमकुटं नीलवाससं प्रियदर्शनम् । शङ्खचक्रगदापाणिं त्रिणेत्रं रक्तलोचनम् ॥
एवंरूपं तु संचिन्त्य प्रचण्डं तु ततः शृणु । शङ्खचक्रगदापाणिं रक्तवर्णं चतुर्भुजम् ॥
नीलाग्रनासिकायुक्तं नागाभरणभूषितम् । एवं तु गरुडं चिन्त्य बलरामस्य मूर्तिमत् ॥
यो भक्त्या देवमभ्यर्चेत्तथैव गरुडं भजेत् । भगवत्प्रमुखं पश्चाद् गरुत्मन्तं नियोजयेत् ॥

Viṣvaksena XX : 149*b*–153

§ 565

खगेशस्य प्रवक्ष्यामि तत्त्वरूपं सुशोभनम् । नरतुल्यं भवेदङ्गं नासिका चञ्चुसन्निभा ॥
षडङ्गुलोच्छ्रया सम्यक् चञ्चुरूपेण कल्पिता । मस्तके कुटिलं केशं नेत्रे चैवास्य वर्तुले ॥
आयतौ द्विभुजौ चास्य पक्षौ कार्यौ सुशोभनौ । कक्षप्रवेशसंलग्नौ ज्वलदग्निसमप्रभौ ॥
पादयोर्नखराः कार्याः सर्पकुण्डलमण्डिताः । नूपुरौ तस्य नागेशौ केयूरौ पद्मकम्बलौ ॥
कटिदेशेऽस्य कुलिकाः परिधानस्य वेष्टनाः । वृश्चिकैः कण्ठिका कार्या गरुडस्य महात्मनः ॥

Hayaśirṣa "Ādi" XVIII : 1–5 (Adayar *ms.*)

§ 566

सर्वेषां विद्धि सामान्यं विशेषाख्यमथोच्यते । ऊरुद्वयान्नयेद्व्यासमङ्गुलानां त्रयं तथा ॥
जङ्घाकाण्डोच्छ्रितेः कुर्याज्जङ्घाभ्यां चात्र वेष्टनम् । बिम्बाख्यं मणिबन्धस्य सममूलां महामते ॥
ज्वालदेशात्तदर्धेन सह चार्धाङ्गुलेन तु । पादे जालं परिज्ञेयं विस्तारेण षडङ्गुलम् ॥
शेषं सत्योदितं सर्वं सर्वेषां विद्धि सर्वदा । किन्तु पादोज्झितौ पक्षौ दैर्घ्यात्तद्दलविस्तृतौ ॥
एषां चोड्डीयमानानां स्वायामा पक्षविस्तृतिः । पञ्चानां च परिज्ञेया स्थितानामर्धलक्षणा ॥
एतदादाय मानं तु पुच्छभ्रूपक्षवर्जितम् । विद्धि वामनरूपस्य लक्षणं किन्तु लाङ्गलिन् ॥

Digitized by Google
Original from UNIVERSITY OF MICHIGAN

ललाटनासावक्त्रेभ्यः समादायाङ्गुलत्रयम् । मस्तकस्योपरिष्टात्तु जटाबन्धं प्रकल्पयेत् ॥
जटावसानमायामं यथा स्यात्पञ्चतालकम् । इत्युक्तं लेशतो बिम्बं लक्ष्मीपीठमथोच्यते ॥
Sattvata XXIV : 230-237

§ 567

. . . शृणुध्वं मुनयः सर्वे गरुडस्यार्चनं पुरा ॥
येन विज्ञातमात्रेण वाञ्छितं साधकोऽश्नुते । *विष्णोः सङ्कर्षणाख्यस्य विज्ञानबलशालिनः ॥
मूर्तिर्ज्ञानबलाख्या या सर्वाधारस्वरूपिणी । महिमेति जगद्धातुर्विज्ञेयो विहगेश्वरः ॥
सर्वरोगभयघ्नश्च क्षेपकः सर्वविद्विषाम् । ततः समर्चयेन्नित्यं प्रासादे स्थाप्य मन्त्रवित् ॥
प्राङ्गणे प्रथमे वाथ द्वितीये मूलमन्दिरात् । अग्रदेशे प्रकुर्वीत प्रासादं मण्डपाकृतिम् ॥
चतुर्द्वारसमोपेतं वर्गत्रयसमन्वितम् । वर्गषट्कान्वितं वाथ सर्वालङ्कारशोभितम् ॥
मूलगेहात् त्रिभागोच्चमर्धोच्चं वा सविस्तरम् । तस्मिन् ब्राह्मेऽथ दिव्ये वा दिव्ययुक्तेन मानुषे ॥
संस्थाप्य लोहजां वाऽथ शैलीमर्चां यथोदिताम् । त्रिकालमर्चयेन्नित्यं मुख्यमूर्त्यर्चनान्तिमे ॥

* * *

. . . मूलालयगते बिम्बे सुस्थिते वाथ यानगे ॥
स्थितैव गारुडी मूर्तिर्यानि वा गमनोन्मुखी । शयने चासने चैव त्वासीना वाथ सुस्थिता ॥
Īśvara[1] VIII : 2b-9, 15b-16

§ 568

भूयो मूर्तिविशेषोऽस्ति शृणु वक्ष्यामि भूपते । चक्रषट्कोणसंयुक्तं मध्ये गरुडवाहनम् ॥
वैनतेयश्चतुर्बाहुः पूर्वे बद्धाञ्जलिर्भवेत् । अपरे चक्रशङ्खाभ्यां तले कृत्वा विशेषतः ॥
अष्टबाहुधरो देवो षोडशं वा सशस्त्रकम् । शक्तिं पद्मधनुःपाशं खड्गदण्डं परश्वथम् ॥
शङ्खशूलं गदाचक्रबाणाशनिशिला इति । द्वाविंशोर्ध्वभुजा वा द्वाविंशद्भुजमन्यथा ॥
अष्टदेव्योरुभौ पार्श्वौ तार्क्ष्यपक्षे व्यवस्थिताः । कीर्तिस्मृत्यङ्कमारोप्य शेषाः पक्षोपरि स्थिताः ॥
Vihagendra III : 23-27

§ 569

सूत्रेण मध्यरेखायाः कोणात्कोणं च मध्यमे । आस्फालयेन्मध्यदेशाद् यावन्मस्तकपादयोः ॥
पक्षयोरवशिष्टं यत् परिहार्यं तु शिल्पिना । गरुडं गमनोद्युक्तं हेमाङ्गं कुटिलेक्षणम् ॥
नीलनासाग्रसंयुक्तं सर्वावयवसुन्दरम् । बद्धाञ्जलिपुटं सौम्यं शङ्खचक्रधरं विभुम् ॥
ललाटे न्यस्ततिलकं पक्षविक्षेपणान्वितम् । सर्वाभरणसंयुक्तं श्वेतवर्णं चतुर्भुजम् ॥

* Īśvara[1] VIII : 3b-9, 15b-16 = Pārameśvara VIII : 3b-9, 15b-16

Digitized by Google Original from UNIVERSITY OF MICHIGAN

करण्डिकामकुटिनं श्वेतवस्त्रोपशोभितम् । आकुञ्चितं सव्यपादमपरं पृष्ठतः स्थितम् ॥
मौलौ मालायितं नागं शङ्खं तु तुहिनप्रभम् । पद्मं च दक्षिणे कर्णे शोणाभं कुण्डलाकृतिम् ॥
महापद्मं पिङ्गलाभं वामकर्णस्य कुण्डलम् । मेघाभं गुलिकं कण्ठे कण्ठाभरणरूपिणम् ॥
रक्ताभं वासुकिं भीमं ब्रह्मसूत्रोपशोभितम् । कार्कोटकं धूम्रनिभं हाररूपिणमब्जजे ॥
तक्षकं पीतवर्णाभं कटिसूत्रोपशोभितम् । अनन्तं क्षौमवर्णाभं कटकं दक्षिणे करे ॥
वामे करे महाश्वेतं विलिखेत् कटकायितम् । परितः शङ्खचक्रं च गदाखड्गौ तथा धनुः ॥
तार्क्ष्यस्य शिरसिच्छत्रं पार्श्वयोश्चामरावपि । दीपस्तम्भौ पादपार्श्वे पालिकास्साङ्कुरास्तथा ॥

Śripraśna XXXIII : 8–18

§ 570

सत्यः सुपर्णो गरुडस्तार्क्ष्यश्च विहगेश्वरः । पञ्चात्मकस्य प्राणस्य विकारस्त्वेष पञ्चधा ॥
सत्याद्या दिक्षु चत्वारः कोणेषु विहगेश्वराः । ध्यानमेषां विशेषेण समासात्कथ्यतेऽधुना ॥
आचाङ्घ्रिगोचराः सर्वे यस्य देहास्तु पौरुषः । द्विभुजस्तुहिनाभस्तु स सत्यः प्राणदैवतम् ॥
सुपर्णः पद्मरागाभो निर्मलस्वर्णलोचनः । गरुडः काञ्चनाभस्तु कुटिलभ्रूवरुणेक्षणः ॥
केकराक्षस्तु तार्क्ष्यो वै प्रावृड्जलदसन्निभः । द्रवत्कनकनेत्रस्तु शबलाभश्च पञ्चमः ॥
चतुर्भुजाः सुपर्णाद्याः सौम्यरूपा ह्यनाकुलाः । पतत्रिचरणाः सर्वे पक्षमण्डलमण्डिताः ॥
लम्बोदराः सुपीनाङ्गाः कुण्डलाद्यैर्विभूषिताः । कुटिलभ्रूसुवृत्ताक्षा वज्रतुण्डाः सिताननाः ॥
अपानादिसमीराणामाधिपत्येन संस्थिताः । महाबला महाकाया रक्ततुण्डोऽत्र पञ्चमः* ॥
स्वस्वाङ्गुष्ठद्वयप्रोतगणित्रोभयपाणिना । पुष्पाञ्जलिधराः सर्वे मुख्येन विहगोत्तमाः ॥
सुपर्णः पश्चिमाभ्यां तु पाणिभ्यां दक्षिणादितः । मन्दारपुष्पस्तवकं दधद्विस्मयमुद्रिकाम् ॥
तथाविधाभ्यां गरुडस्ते धत्ते व्यत्ययेन तु । तार्क्ष्यः पश्चिमयोर्नित्यं धत्ते दक्षिणवामयोः ॥
कद्रूं तथामृतं कुम्भं पञ्चमो विहगेश्वरः । दक्षिणेन सुधाकुम्भं वामेन तु फणीश्वरम् ॥
नित्योदितस्य व्यूहस्य तथा शान्तोदितस्य च । प्राणापानादिवायूनां पञ्चानामपि नामभाक् ॥
गरुडः परिवारत्वे ध्वजत्वेऽपि विशेषतः । योजनीयस्तथान्येषु सुषुप्त्यदिपदेषु च ॥
वासुदेवादिमूर्तीनां चतुर्णां क्रमशस्त्वमी । सत्याद्यास्तार्क्ष्यपर्यन्ताः तत्तन्मूर्त्यन्तरेषु च ॥
त्रिषु त्रिषु समादेयाः सत्याद्याः केशवादिषु । पद्मनाभादिमूर्तीनां पञ्चमो विहगेश्वरः ॥
परात्परपरव्यूहव्यूहान्तरतनोर्विभोः । प्रादुर्भावतनोश्चापि जगद्रक्षणकांक्षिणः ॥
खगानां कारणत्वाच्च प्रागुक्तो वा खगेश्वरः । इति ते गरुडव्यूहप्रभावः संप्रकाशितः ॥

Īśvara[1] VIII : 40–57

* Īśvara[1] VIII : 40–47. || Īśvara[1] XXIV : 370–376. || Sāttvata XII : 178–184

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 571

*सत्यः सुपर्णो गरुडस्तार्क्ष्यस्तु विहगेश्वरः । पञ्चात्मकस्य प्राणस्य विकारास्त्वेकपञ्चधा ॥
आचाङ्घ्रिगोचरात्सर्वे यस्य देहस्तु पौरुषः । द्विभुजस्तुहिनाभश्च स सत्यः प्राणदैवतः ॥
सुपर्णः पद्मरागाभः निर्मलः स्वर्णलोचनः । गरुडः काञ्चनाभस्तु कुटिलभ्रूवरुणेक्षणः ॥
केकराक्षस्तु तार्क्ष्यो वै प्रावृड्जलदसन्निभः । द्रवत्कनकनेत्रस्तु शबलाभस्तु पञ्चमः ॥
चतुर्भुजाः सुपर्णाद्याः सौम्यरूपास्त्वनाकुलाः । पतत्रिचरणाः सर्वे पक्षमण्डलमण्डिताः ॥
लम्बोदराः सुपीनाङ्गाः कुण्डलाद्यैस्तु भूषिताः । कुटिलभ्रूसुवृत्ताक्षाः वक्रतुण्डाः स्मिताननाः ॥
अपानादिसमीराणामाधिपत्येन संस्थिताः । महाबला महाकाया रक्ततुण्डोऽत्र पञ्चमः ॥
आधेयचरणाधस्स्थसव्य आद्यस्य वै करः । दक्षिणश्चाक्षसूत्रेण सुसितेन च भासितः ॥
एवमेव सुपर्णस्य परिज्ञेयं भुजद्वयम् । नाभ्युद्देशे परो वाम उत्तानस्तु सविस्मयः ॥
पुष्पस्तबकसंपूर्ण ऊर्ध्ववक्त्रस्तु दक्षिणः । गरुडस्य द्वयं विद्धि हृद्देशेऽञ्जलिरूपिणम् ॥
तत्रैव सम्पुटाकारं चतुर्थस्य करद्वयम् । दक्षिणेऽमृतकुम्भस्तु वामे तु विषमं फणी ॥
पञ्चमस्य द्वयं शेषं त्रयाणां च द्वयोः समम् । आधेयचरणाक्रान्तो यदि वै दक्षिणः करः ॥
सञ्चारो विहितो वामे त्वक्षसूत्रस्य वै तदा । आधेयचरणाधस्स्थं यस्य पाणितलद्वयम् ॥
निरस्तसूत्रं तं विद्धि वाहनं भगवन्मयम् । अनुग्रहपरस्त्वास्ते पक्षिपक्षाब्जविष्टरे ॥
स्वतेजोनिजसामर्थ्यमसूरकवरान्विते । पद्मासनादिना चैव केवलं वा श्रियाऽन्वितः ॥
सुव्यक्तावयवस्थित्या विद्धि तं गरुडासनम् । मेढ्रभूः सोदरस्यैव गोपिताद्वेगगामिना ॥
वीर्यपातात्स्वशिरसा गच्छतश्चाण्डजेन तु । लोकान्तराणां कार्यार्थं वात्सल्याद् ध्यायिनामपि ॥
प्रत्यक्षदर्शनार्थं तु स्मृतो गरुडवाहनः । तस्माद्भगवतो विष्णोरेवंरूपधरस्य तु ॥
समाहृतस्य सिध्द्यर्थमासीनं संस्मरेत्स्थितम् । उपसंहृतवामाङ्घ्रिः कञ्जस्थो वा खगस्थितः ॥
वाममिच्छाफलानां यद् ध्वंसयत्यन्यचिन्तितम् । आजानोर्दक्षिणस्येवमविक्षिप्ते स्मृतोऽच्युत ॥
आमोक्षात्सर्वसिद्धीनां दक्षिणो ध्यायिनां भवेत् । सर्वमेव ऋजुस्थित्या संस्थितश्चार्थिनां स्मृतम् ॥
स्वस्तिकाद्यैर्भवत्येव किंतु ते वाहनं विना । विहितापीठकल्हारसिंहासनगतस्य च ॥
विहगाधिपतिश्चात्र योगैश्वर्याद्बिभर्ति च । सवक्त्रं भुजबृन्दं तु नागेन्द्रास्त्रवरान्वितम् ॥
विभोराज्ञावशेनैव तुष्टचर्थं वा स्वयं विभोः । जगज्जयोदयार्थं तु शान्तये शरणैषिणाम् ॥
विभिन्नेन च रूपेण नानालोकान्तरेषु च । अनिरुद्धगतिर्वीरो विचरत्येक एव हि ॥
तदारूढस्य यद्रूपं शक्तीशस्य च सांप्रतम् । अनेकभेदभिन्नं तु निबोध गदतो मम ॥
Īśvara[1] XXIV : 370–395

* Īśvara[1] XXIV : 370–388a. || Sāttvata XII : 178–196 ; *see* also Īśvara[1] VIII : 40–47 and Pārameśvara VIII : 396 ff.

Digitized by Google Original from UNIVERSITY OF MICHIGAN

. . . चिन्तयेन्मध्यमं देवं महामेरुसमप्रभम् ॥
आजानुतस्सुवर्णाभमाकट्यास्तुहिनप्रभम् । कुङ्कुमारुणमाकण्ठादाकेशान्तं सितेतरम् ॥
स्वस्तिकं दक्षिणं पादं वामपादं तु कुञ्चितम् । पातालस्पर्शिपादाग्रं ब्रह्माण्डगतमौलिनम् ॥
नीलोग्रनासिकावक्त्रं त्रियक्षं चारुकुण्डलम् । दंष्ट्राकरालवदनं किरीटमुकुटोज्ज्वलम् ॥
सर्वाभरणसंयुक्तं सर्वावयवसुन्दरम् । कपिलाक्षं गरुत्मन्तं सुवर्णसदृशप्रभम् ॥
दीर्घबाहुं बृहत्स्कन्धं नागाभरणभूषितम् । अनन्तो वामकटको यज्ञसूत्रं तु वासुकिः ॥
तक्षकः कटिसूत्रं तु हारः कार्कोटकस्स्मृतः । पद्मो दक्षिणकर्णे तु महापद्मस्तु वामतः ॥
शङ्खः शिरःप्रदेशे तु गुलिकस्तु भुजान्तरे । इत्येवं भूषणैर्युक्तं महापद्मस्थितं प्रभुम् ॥
महापक्षं महासत्त्वं मन्दस्मितमुखाम्बुजम् । अष्टबाहुधरं देवमष्टायुधविभूषितम् ॥
शङ्खं चक्रं सुधाकुम्भं नागमुष्टिं गदामसिम् । भगवत्पादविन्यस्तकरमष्टभुजं क्रमात् ॥
स्वांसे निधाय लक्ष्मीशं कालमेघमिवोत्थितम् । चतुर्बाहुमुदाराङ्गं पुण्डरीकायतेक्षणम् ॥
सर्वाभरणसञ्छन्नं शङ्खचक्रगदाधरम् । वरदाभयहस्तं च पीताम्बरधरं विभुम् ॥
वामाङ्के संस्मरेल्लक्ष्मीं पीतवर्णां शुचिस्मिताम् । आलिङ्ग्य दक्षिणकरे वामे पङ्कजधारिणीम् ॥
शुक्लमाल्याम्बरधरां सर्वाभरणभूषिताम् । उदियाय यथा मेरुः सविद्युद्वारिदं वहन् ॥
ध्यात्वैवं मध्यमे भागे स्थितमासीनमेव वा । द्विभुजं पूर्वदिग्भागे कृताञ्जलिपुटं विभुम् ॥
पीताभं शुक्लवसनं सर्वाभरणभूषितम् । सुपर्णं सुमुखं पूर्णं स्थितमासीनमेव वा ॥
दक्षिणे षोडशभुजं गरुडं भीमविग्रहम् । भीमाक्षं भीमवदनं रक्ताभं कृष्णवाससम् ॥
भीमाट्टहाससंयुक्तं दंष्ट्रादि (...) भयानकम् । कृष्णमाल्यानुलेपं च स्थितमासीनमेव वा ॥
प्रोद्यद्धस्तैर्दधानं रथचरणपवी सोमकुम्भं सिताद्रिं, नृत्यत्सर्पं च खेटं मुसलमपि सृणिं दक्षिणे लम्बिताग्रैः ।
वामैश्शङ्खं शताश्रं प्रचलिततटितं चायसं दण्डमुग्रं, श्येनास्यं मुष्टिमुद्रे गुणमतिजवनं चिन्तयेद्रक्तपद्मे ॥
पश्चिमे वैनतेयाख्यं सितं बाहुचतुष्टयम् । श्वेताम्बरधरं सौम्यं श्वेतमाल्यानुलेपनम् ॥
नागपाशं सुधाकुम्भं शङ्खचक्रे वहन् भुजैः । सितपङ्कजमध्यस्थं स्थितमासीनमेव वा ॥
उत्तरे संस्मरेत् तार्क्ष्यं रक्ताभं चित्रवाससम् । षड्भुजं शङ्खचक्रे च शतवक्त्राग्निमेव च ॥
श्वेताचलं तर्जनीं च तलप्रहरमेव च । मुकुटादिविभूषाङ्गं चित्रमाल्यानुलेपनम् ॥
ध्यायेत् पङ्कजमध्यस्थं स्थितमासीनमेव वा । . . . .

* * *

आकुञ्च्य सव्यमपरं प्रविसार्य पादं तिर्यङ्मुखं चटुलचक्रविवृत्तशङ्खम् ।
अन्योन्यघट्टितकरं ललशद्वयुक्तमुड्डीयमानमनिशं स्मर दुःखशान्त्यै ॥

Kāśyapa² II : 2b–26a, 31

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 573

*द्वितीयावरणक्षेत्रं षोढा कृत्वा तु पञ्चमे । भागे तु गरुडं विप्राः कृत्वा ध्यात्वाऽथवा न्यसेत् ॥
दीव्यच्चामीकराकारं भीमभ्रूकुटिलोचनम् । पृथुदंष्ट्रं पृथुघ्राणं पृथुगात्रं पृथूदरम् ॥
पक्षाङ्कुराञ्चितोरकं पक्षमण्डलमण्डितम् । हारकेयूरताटङ्कमकुटाद्यैस्तु भूषणैः ॥
भूषितं नीलवसनं नानामाल्यविभूषितम् । नानागन्धविलिप्ताङ्गं नागैकादशभूषितम् ॥
पुष्पस्तबकसंपूर्णमञ्जलिं दधतं द्विजाः । उन्नम्य दक्षिणं जानुमासनीकृत्य चेतरम् ॥
सुखासने समासीनं विभोराज्ञाप्रतीक्षकम् । . . . .

Īśvara[1] IX : 52–57a

§ 574

ध्वजमध्ये लिखेद्देवं गरुडं सर्पभूषणम् । गगने गमनाकारं पक्षविक्षेपणान्वितम् ॥
कुञ्चितं वामपादं तु दक्षिणं पृष्ठतः स्थितम् । पुष्पाञ्जलिपुटं रौद्रवृत्ताक्षं किञ्चिदायतम् ॥
नीलाग्रनासिकायुक्तं शान्तं प्रहसिताननम् । करण्डमुकुटं चैव हारकेयूरसंयुतम् ॥
कृक.....कटिसूत्रं पादकिङ्किणिशोभितम् । अङ्गुलीवलयं चैव प्रकोष्ठवलयं तथा ॥
मण्डले चोपवीतं च पुष्पमालासमावृतम् । तप्तहाटकवर्णाभं गरुडं नवतालकम् ॥
पिङ्गलाक्षं गरुत्मन्तं सुवर्णसदृशप्रभम् । दीर्घबाहुं बृहत्स्कन्धं नागाभरणभूषितम् ॥
अनन्तो वामकटकं यज्ञसूत्रं तु वासुकिः । तक्षकः कटिसूत्रं तु हारः कार्कोटकस्तथा ॥
पद्मो दक्षिणकर्णे तु महापद्मस्तु वामतः । शङ्खः शिरःप्रदेशे तु गुलिकस्तु भुजान्तरे ॥

Vasiṣṭha XII : 57–64

§ 575

. . . आलिखेद् गरुडं तत्र सुवर्णाभं सुवर्चसम् ॥
ध्रुवगगलनाभ्यन्तं गरुदुत्सेधमिष्यते । नवतालपरिच्छिन्नं मानोन्मानद्वयाश्रयम् ॥
किञ्चिदायतवृत्ताक्षं रक्ताक्षं नीलनासिकम् । उत्कुञ्चितं वामपादं दक्षिणः पृष्ठतोत्थितम् ॥
गगने गमनारम्भं पक्षविक्षेपणान्वितम् । पुष्पाञ्जलिपुटोपेतं रौद्रन्तु विनतासुतम् ॥
नागाभरणसंयुक्तं स्मितास्यं कनकाङ्गदम् । करण्डमकुटं नीलवाससं प्रियदर्शनम् ॥
सुरक्तपाण्यङ्घ्रितलं दंष्ट्राभ्यामुज्वलाननम् । अनन्तो वा मकुटको यज्ञसूत्रं तु वासुकिः ॥
तक्षकः कटिसूत्रं तु हारं कार्कोटकस्तथा । पद्मो दक्षिणकर्णे तु महापद्मं तु वामतः ॥
शङ्खः शिरःप्रदेशे तु गुलकस्तु भुजान्तरे । एतैरष्टोरगैराद्यैर्भूषितं भुजगोत्तमैः ॥

* *cf.* Pārameśvara XI : 56–61

Digitized by Google Original from UNIVERSITY OF MICHIGAN

GARUḌA

(*To face entry § 574, p. 216*)

Digitized by Google

Original from
UNIVERSITY OF MICHIGAN

Digitized by Google

Original from
UNIVERSITY OF MICHIGAN

अनन्तगुलकौ विप्रौ रक्तौ वह्निसमुद्भवौ । पद्मकर्कोटकौ शूद्रौ कृष्णौ वायुसमुद्भवौ ॥
लिखित्वा गरुडं तत्र चित्रं चोपरि कल्पयेत् । अधोऽस्य तत्र कलशं पद्मं चैवात्र संलिखेत् ॥

Viṣvaksena XXVI : 35b–44

§ 576

. . . पटमध्ये लिखेद्देवं पञ्चवर्णेन शिल्पवित् ॥
द्विभुजं कनकाकारं करण्डमकुटोज्ज्वलम् । गगने गमनारम्भपक्षविक्षेपशोभितम् ॥
धृताञ्जलिपुटं नीलनासाग्रं प्रियदर्शनम् । दंष्ट्राकरालवदनं भ्रुकुटीकुटिलेक्षणम् ॥
उत्कुञ्चितं वामपादं दक्षिणं पृष्ठतः स्थितम् । अनन्तो वामकटको यज्ञसूत्रं तु वासुकिः ॥
तक्षकः कटिसूत्रं तु हारः कार्कोटकस्तथा । पद्मो दक्षिणकर्णे तु महापद्मस्तु वामतः ॥
शङ्खशिरःप्रदेशे तु गुलिकस्तु भुजान्तरे । एतैरष्टोरगैराद्यैर्भूषितं भुजगोत्तमैः ॥
छत्रं चोपरि विन्यस्य पार्श्वयोः श्वेतचामरे । दीपदण्डद्वयं पार्श्वे शङ्खं चक्रं तु पार्श्वतः ॥
अधस्तादम्बुजं पूर्णकुम्भपात्रं च पालिकाः । अन्तरालपदं कालकृष्णेनैव समालिखेत् ॥

* * *

स्कन्धासनस्थकमलासखवासुदेवं वेगावधूतपवमानसवेगयानम् । नागाधिपग्रहणलोलुपवक्रतुण्ड-
मावाहयामि विहगाधिपमुत्सवादौ ॥

Aniruddha XX : 38b–45, 71

§ 577

ध्वजं तु गरुडाकारमेकमूर्तेस्तु सत्तमाः । सत्यः सुपर्णो गरुडस्तार्क्ष्यश्च चतुरात्मनः ॥
पञ्चमूर्तेस्तु चत्वारो विहगेश्वरसंयुताः । सुपर्णतालमकरऋक्ष्या वा चतुरात्मनः ॥
तत ऊर्ध्वं तु सर्वेषां व्यूहानां गरुडो ध्वजः । पटमध्ये तु गरुडं द्विभुजं विधृताञ्जलिम् ॥
पुष्पाञ्जलिपुटं वाथ सुवर्णाचलसन्निभम् । गगने गमनारम्भपक्षविक्षेपणान्वितम् ॥
कुञ्चितो वामपादस्तु दक्षिणः पृष्ठतः स्थितः । किञ्चिदायतवृत्ताक्षं नीलदीर्घाग्रनासिकम् ॥
अतीव शान्तवेषं तु तथा प्रहसिताननम् । बालचन्द्रसमाकारं दंष्ट्राद्वयविराजितम् ॥
कुटिलभ्रूकुटीभङ्गं भङ्गुरालकशोभितम् । कम्बुग्रीवं बृहद्बाहुं पीनासं दृढवक्षसम् ॥
पृथूदरं निम्ननाभिं रोमराजिविराजितम् । सुवृत्तकनकस्तम्भपीवरोरुद्वयान्वितम् ॥
हेमरम्भासमाकारजङ्घाकान्तपदद्वयम् । करण्डमुकुटाक्रान्तपुष्पापीडविराजितम् ॥
वृत्ते वैपुल्यमानेन लोचने पद्मपत्रवत् । भ्रूयुग्मं तारसिंहोत्थं घ्राणाग्रं शुकतुण्डवत् ॥
सिंहवन्मध्यदेशस्तु तद्वंशं गजपृष्ठवत् । तदेवं दैवदीर्घेण विस्तृतं हंसपक्षवत् ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

स्वपक्षमानादिगुणं तत्पुच्छं शतशाखिनम् । सर्वेषामेव सामान्यं विशेषाख्यमथोच्यते ॥
मकुटादिसपादान्तं नानारत्नेन शोभितम् । हारकेयूरकटकब्रह्मसूत्रविभूषितम् ॥
प्रलम्बकर्णपाशान्तविश्वान्तशुभकुण्डलम् । ललाटतिलकोपेतं पुष्पकर्णावतंसकम् ॥
रत्नाङ्गुलीयकोपेतं शिञ्जिनीरञ्जिताङ्घ्रिकम् । अन्यैराभरणैर्दिव्यैर्भूषितं सर्पभूषितम् ॥
नीलाम्बरधरं नीलवारवाणविराजितम् । फुल्लरक्तोत्पलदलस्रग्भिर्मण्डितकन्धरम् ॥
तथा विचित्रकुसुमस्रग्भिरन्याभिरुज्वलम् । अनन्तो वामकटको यज्ञसूत्रं तु वासुकिः ॥
तक्षकः कटिसूत्रं तु हारः कार्कोटकस्तथा । पद्मो दक्षिणकर्णे तु महापद्मस्तु वामतः ॥
शङ्खः शिरःप्रदेशे तु गुलिकश्च भुजान्तरे । एतैरष्टोरगैराद्यैर्भूषितं भुजगोत्तमैः ॥
अनन्तः शुक्लवर्णाभो रक्तवर्णस्तु वासुकिः । तक्षकः पीतवर्णाभो धूम्रः कार्कोटकस्तथा ॥
शङ्खस्तुहिनवर्णाभो गुलिकस्त्वलिसन्निभः । पद्मः पद्मसमानाभो महापद्मस्तु पिङ्गलः ॥
पञ्चवर्णैर्लिखेदेवं देवं पञ्चायुधं तथा । चक्रं खड्गं शरं चैव शङ्खं शार्ङ्गं गदां तथा ॥
पटोर्ध्वे ह्युभये पार्श्वे विलिखेच्च यथाविधि । तदधो दक्षिणे पार्श्वे वह्निमण्डलमालिखेत् ॥
तद्वल्लिखेद्वामभागे स्वस्तिकं लक्षणान्वितम् । लेपयेत्पटशेषं तु श्यामलेनासितेन वा ॥
विचित्रपुष्पसंयुक्तपत्रवल्लीसमन्वितम् । एवं शिल्पिवरेणैव कारयेद्देशिकोत्तमः ॥
शूद्रेण वा द्विजश्रेष्ठाः दीक्षितेन यथाविधि । कुलालेनाथवा मन्त्री कारयेत्कुशलेन च ॥
Īśvara[1] X : 236–261

§ 578

प्रतिमा मन्त्रमूर्तीनां कृता भवति सिद्धिदा । यत्पुरा पञ्चधा प्रोक्तं वाहनं प्राणदैवतम् ॥
तस्य बिम्बसमुत्थेन तालेन मुखमण्डलम् । द्व्यङ्गुलं तु ललाटोक्तं जटाबन्धो द्विलोचनः ॥
द्व्यङ्गुलेनोन्नतः कर्ण उरः पञ्चकलं स्मृतम् । अष्टाङ्गुलं तदुदरं कटिः पञ्चाङ्गुलोन्नता ॥
नवाङ्गुलोन्नतावूरू जानुनी द्व्यङ्गुले स्मृते । अष्टाङ्गुलोच्छ्रिते जङ्घे द्व्यङ्गुले पदपिण्डके ॥
शममेकं कलाहीनं तद्ग्रीवायाश्च वेष्टनम् । बिम्बतुल्या परिज्ञेया सर्वदा साङ्गविस्तृतिः ॥
तद्विभागाधिकं वित्त वेष्टनं ह्युदरस्य च । परिधिः कटिदेशस्य चतुर्नेत्राधिकस्तु वै ॥
बिम्बोकसदृशं वित्त तदूर्वोर्मूलवेष्टनम् । तदेव जङ्घामध्यस्य जङ्घान्तस्य तदेव हि ॥
पादं पञ्चकलायामं चतुरङ्गुलविस्तृतम् । त्र्यङ्गुलं पार्ष्णिदेशाच्च अङ्गुष्ठोऽर्धकलासमः ॥
विज्ञेया अङ्घ्रिदेशाच्च यवेनाङ्गुलयः क्रमात् । नाभिरन्ध्रं सुविस्तीर्णं द्व्यर्धलोचनविस्तृतम् ॥
मध्यमाङ्गुलिपर्यन्तं मणिबन्धान्नवाङ्गुलम् । त्रिकलः पाणिविस्तारः तन्नखा निशितोन्नताः ॥
तद्बाहुमस्तकं वित्त उच्छ्रायेण द्विलोचनम् । भुजोपभुजयुग्मं यत्तत् द्वितालसमं स्मृतम् ॥
कलार्धेनाधिकं बिम्बबाह्वोस्तद्बाहुवेष्टनम् । बिम्बोष्ठां सद्विधीर्ह्येवं स्तनभूर्लोचनोल्बणा ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

वृत्तवैपुल्यमानेन लोचने पद्मपत्रवत् । भ्रूयुग्मं नरसिंहोत्थं घ्राणाग्रं शुकचञ्चुवत् ॥
कलार्धमानं दीर्घं च तद्वंशं गजपृष्ठवत् । स्वायामदीर्घं तत्पक्षयुगलं कुक्षिदेशगम् ॥
तदेव दैर्घ्यादर्धेन विस्तृतं हंसपक्षवत् । स्वपक्षमानाद् द्विगुणं तत्पुच्छं शतशाखकम् ॥
सपक्षमिममायामं सत्यं त्ववयवान्वितम् । सर्वेषां वित्त सामान्यं विशेषाख्यमथोच्यते ॥
ऊरुद्वयान्नयेद्वासमङ्गुलानां त्रयं यथा । जङ्घाकाण्डोच्छ्रितेः कुर्याज्जङ्घाभ्यां चात्र वेष्टनम् ॥
बिम्बाख्यं मणिबन्धस्य सममूलान् महामते । जालदेशात्तदर्धेन सह चार्धाङ्गुलेन तु ॥
पादे जालं परिज्ञेयं विस्तारेण षडङ्गुलम् । शेषं सत्योदितं सर्वं सर्वेषां वित्त सर्वदा ॥
किन्तु पादोज्झितौ पक्षौ दैर्घ्यात्तद्दलविस्तृतौ । एषा चोड्डीयमानानां स्वायामा पक्षविस्तृतिः ॥
पञ्चानां च परिज्ञेया स्थितानामर्धलक्षणा । एतदादाय मानं तु पुच्छभ्रूपक्षवर्जितम् ॥

Īśvara[1] XVII : 215–235

Viṣvaksena

Just as Gaṇapati serves in some Śaivite temples as the commander-in-chief of the divine forces, so the Vaiṣṇava equivalent is Viṣvaksena. So also is he approached first before the worshipper approaches the Lord with ritualistic worship. These things being the case, he occupies a peculiar and honored place in Vaiṣṇava piety and practice.

Iconographically, he is shown with a round belly (§582), having two or—more often—four hands. In these he usually holds the conch and discus along with the mace; with the other hand he may display a comforting gesture or the "*jñāna-mudrā*". *See* §579, §583, §582 and §580. In §581 and §582 his color is stated to be dark; §583 adds to this that his hair is red, his nose is broad, his white teeth are revealed by his smile, his eyebrows curved, his nails pointed, *etc.* His aspect is further described there as benign, although now and then it reflects passing flashes of anger. In §580, §582 and §583 he is described as being crowned with a resplendent diadem.

§ 579

शङ्खचक्रधरं देवं वरदाभयदायिनम् । सर्वाभरणसंयुक्तं विष्वक्सेनमहं भजे ॥

Śeṣa XXVIII : 14

§ 580

शङ्खचक्रगदासर्वज्ञानमुद्रादिधारिणम् । किरीटादिविभूषाङ्गमासीनं पद्मपीठके ॥
प्रसार्य दक्षिणं पादं वामपादं सुकुञ्चितम् । विष्वक्सेनमहं वन्दे मुक्तिज्ञानादिसाधकम् ॥

Parāśara XIX

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 581

विष्वक्सेनोऽभ्रवर्णस्तु शङ्खचक्रगदाधरः । . . . .

Viṣṇu VI : 78a

§ 582

विष्वक्सेनं चतुर्बाहुं श्यामवर्णं किरीटिनम् । लम्बोदरं च मुख्येन करेणाऽभयदायिनम् ॥
दक्षिणेन प्रसव्येन समालम्ब्य कटिं स्थितम् । असीनमपराभ्यां च हस्ताभ्यां शङ्खचक्रिणम् ॥
अथवा पूर्वकरयोर्गदामेकत्र कल्पयेत् । अन्यत्र तर्जनीमुद्रां यद्वा दक्षिणहस्तयोः ॥
मुख्येऽभीतिरमुख्ये तु चक्रमन्यत्र हस्तयोः । गदां मुख्ये जघन्ये तु शङ्खं च परिकल्पयेत् ॥
शङ्खचक्रधरं यद्वा स्थितं मुख्ये करद्वये । बिभ्राणं क्षुरिकां वेत्रं कृताञ्जलिपुटं स्थितम् ॥
देवीं च विष्वक्सेनस्य वामपार्श्वे प्रतिष्ठिताम् । नाम्ना पुष्पधरां कुर्यात्कमलामिव लक्षिताम् ॥

Pādma "kr." XXII : 36-41

§ 583

. . . नवदूर्वाङ्कुराभं च त्वीषत् पीतलकान्तिभाक् ॥
चतुर्दंष्ट्रं चतुर्बाहुं चतुष्किष्कुं चतुर्गतिम् । पूर्णाङ्गं केसरिस्कन्धपृथूरस्स्थलराजितम् ॥
दक्षिणावर्तनिम्नेन नाभीरन्ध्रेण शोभितम् । आजानुबाहुं श्रीमन्तं पिङ्गलार्चिर्जटाधरम् ॥
द्रवत्कनकपिङ्गाक्षं चिपिटं पृथुनासिकम् । सितदीर्घनखश्रेणिशोभितं कुटिलभ्रुवम् ॥
विस्तीर्णगण्डवदनं बालेन्दुकुटिलोपमैः । नवकिंवरुणाकारैः लोमभिः पूर्णविग्रहम् ॥
शोभनेन प्रलम्बेन पृथुना प्रोन्नतेन च । माणिक्यकुण्डलाढ्येन युक्तं श्रोत्रद्वयेन तु ॥
मकुटेनोन्नतेनैव हाराद्यैरुपशोभितम् । चित्रकौशेयवसनं विचित्रस्रग्विमण्डितम् ॥
प्रलयद्वादशादित्यसहस्रगुणदीधितिम् । ईषदूर्ध्वं तथा तिर्यग्विनिपातितलोचनम् ॥
कुन्देन्दुकान्तिदशनं किञ्चिद्विहसिताननम् । स्वभावसौम्यममलं मायाक्रोधोपरञ्जितम् ॥
सविलासचलत्पादन्यासस्थानकसंस्थितम् । स्वेनान्तःकरणेनैव भावयन्तं परं पदम् ॥
अङ्गुष्ठादिकनिष्ठान्तं वामपाणौ लतात्रयम् । नमयित्वोन्नता चैका घ्राणाग्रे विनियोजिता ॥
सद्विघ्नभीतिप्रदया त्वनया मुद्रयान्वितम् । रथाङ्गशङ्खहस्तं च लम्बमानगदाधरम् ॥
श्रोणीतटनिविष्टेन सावहेलनपाणिना । इत्थंरूपधरं देवमनेकाद्भुतविग्रहम् ॥
उग्ररूपमिमं ध्यायेदाग्नेयमनलप्रभम् । दंष्ट्रातर्जननिर्मुक्तं साभयं शान्तलक्षणम् ॥
मुख्यदक्षिणहस्तेन भक्तानामभयप्रदम् । तथाविधेन वामेन लम्बमानगदाधरम् ॥
पृष्ठदक्षिणवामाभ्यां चक्रशङ्खधरं क्रमात् । एवं चतुर्भुजस्योक्तं द्विभुजस्यावधारय ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

उक्ताभ्यामुग्रशान्ताभ्यां चक्रशङ्खधरं विना । प्रागुक्तद्वितयं वाथ द्वितीयं चित्ततन्तु वा ॥
गदाविरहितं वाथ वामकट्यवलम्बितम् । स्थानकेनासने वाममूरुदेशे निवेशितम् ॥
गोपनीमुद्रया वाथ कटकाकारमुद्रया । उभाभ्यामपि पाणिभ्यां विश्रान्तं पीठपृष्ठतः ॥
अवष्टभ्य गदामूर्ध्वे मातङ्गमुसलाकृतिम् । प्राक्पद्मदलमाक्रम्य पादाभ्यां कर्णिकासनम् ॥
सुस्थितं कर्णिकायां वा प्राग्वदन्यैरलङ्कृतम् । एवं ध्यानविशेषेषु त्वेकं स्थाप्य विधानतः ॥

Īśvara[1] VIII : 110*b*–130

Sudarśana

Sudarśana is the Lord's protective (and menacing) Discus personified. While the discus, as one of the *āyudha*-weapons, is highly honored in its own right (*see* §726–§729, below, in Chapter Eight), Sudarśana is entitled to be worshipped separately in his own shrine. Although he is often depicted as of ferocious mein, to the true devotee he offers succour. To him, a pious devotee may go in search of his benediction and, by offering him special honors, may gain wealth, relief from disease and other benefits.

Iconographically, Sudarśana is presented as a figure standing within the circle of a flaming wheel (*see* §592). He may have four (§591), six (§588), eight (§591 and §595), sixteen (§585 and §595) or thirty-two (§595) hands—the *astra*-weapons for which are specified (§591 and §595). Such an icon may be made of gold, silver or copper (§593). In terms of meditating upon him, one is to think of Sudarśana as having the color of flames (§585 and §590). According to §594, his measurement is to be undertaken in the "*navatāla*" division.

Two unusual descriptions are encountered in the excerpts below—in §587 he is said to be revealed dancing, and in §597 he is depicted in combination with Narasiṁha (*cf.* §338 and §339, above).

§ 584

सहस्रादित्यसङ्काशं सहस्रवदनाम्बुजम् । सहस्रदोस्सहस्रारं प्रपद्येऽहं सुदर्शनम् ॥

Śeṣa XXIV : 6

§ 585

शङ्खं चक्रं च चापं परशुमसिमिषुं शूलपाशाङ्कुशाग्निम्, बिभ्राणं वज्रखेटं हलमुसलगदाकुन्तमत्युग्रदंष्ट्रम् ।
ज्वालाकेशं त्रिनेत्रं ज्वलदनलनिभं हारकेयूरभूषं, ध्यायेत् षट्कोणसंस्थं सकलरिपुजनप्राणसंहारचक्रम् ॥

Parāśara XVI : 7

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 586

. . . ध्यायेत्क्षितितले शुद्धे सहस्रदलपङ्कजे ॥
कर्णिकायां चक्रधरं द्विभुजं वृत्तलोचनम् । दंष्ट्राकरालवदनं भ्रुकुटीकुटिलेक्षणम् ॥
महोदरं महाकायं जपाकुसुमसन्निभम् । करण्डमुकुटोपेतं रक्ताम्बरविभूषितम् ॥
धारयन्तं शिखारत्ने चक्रमेकसमप्रभम् । नाभिनेमिसमायुक्तं ज्वालामण्डलदुःसहम् ॥
ज्वलत्षडरसंयुक्तमयुतार्कसमप्रभम् । पद्ममेवंस्थितं ध्यायेत्तन्नाभौ च सुविस्तृते ॥
चक्राभिमानिनं देवं द्विहस्तं पुरुषं स्थितम् । रक्ताम्बरधरं रक्तं रक्तचन्दनपङ्किलम् ॥
करण्डमुकुटोपेतं सर्वाकल्पपरिष्कृतम् । दंष्ट्राकरालवदनं भ्रुकुटीकुटिलाननम् ॥
उद्गिरन्तं हुतवहं खरण्डैर्मारुतानुगम् । विष्फुलिङ्गान् दुर्विषहान्विसृजन्तमनेकशः ॥
कामरूपसहस्रेभ्यः प्रलयाम्बुदनिस्वनम् । तर्जनं वामतर्जन्या बिभ्राणं दक्षिणे करे ॥
निपीडिताङ्गुलिं शत्रुं प्रहरन्निव भीषणम् । दहन्निव च नेत्राभ्यां पिबन्निव महोदधिम् ॥
ध्यात्वैवमर्चयेद्भोगैरर्घ्यादिभिरतन्द्रितः । . . . .

Īśvara[1] X : 20*b*–30*a*

§ 587

. . . तृतीयावरणद्वारे शाखामूले तु दक्षिणे ॥
सुदर्शनं चतुर्हस्तं ह्रस्वकायं ज्वलत्प्रभम् । क्रोधरक्तेक्षणं दैत्यदानवासृग्विलेपनम् ॥
नृत्यन्तं मदमत्तं च सहस्रारान्तरस्थितम् । दंष्ट्राकरालवदनं कुटिलभ्रूलतायुतम् ॥
कल्पान्तपावकाकारं स्वरश्मिपरिवेष्टितम् । दक्षिणे भुजयुग्मे तु पूर्वेण च सुदर्शनम् ॥
धारयन्तं ततोऽन्येन विश्रान्तां भूतले गदाम् । शङ्खं मुख्येन वामेन ह्यपरेण गणित्रकम् ॥
हारकेयूरताटङ्कमकुटादिविभूषणैः । विभूषितं विचित्रैस्तु श्वेतमाल्याम्बरादिकैः ॥
विघ्नानुत्पाटयन्तं तु दीप्तेन स्वेन तेजसा । . . . .

Īśvara[1] IX : 105*b*–111*a* = Pārameśvara XI : 108–113

§ 588

. . . षट्कोणचक्रमध्ये च मूर्तिः षड्भुज उच्यते ॥
पङ्कजं हेतिराजं च गदां दक्षिणबाहुभिः । शङ्खं च मुसलं शार्ङ्गं धारयेद्वामबाहुभिः ॥
भ्रान्तं षट्कोणचक्रस्य षडरैस्सहितं मतम् । . . . .

Puruṣottama VII : 40*b*–42*a*

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 589

. . . सहस्रारं महाचक्रमयुताग्नि चयोत्कटम् ॥
षडध्वमयमुद्भ्रान्तं भगवच्छक्तिजृम्भितम् । अक्षस्थं परमात्मानं नारायणमनामयम् ॥
चक्ररूपिणमीशानं दिव्यकुङ्कुमसन्निभम् । पिङ्गाक्षं पिङ्गकेशाढ्यं रक्ताम्बरधरं विभुम् ॥
महौजसं महाकायं भुजैरष्टभिरन्वितम् । दंष्ट्रानिष्ठ्यूतघोराग्निज्वालाकोलाहलाकुलम् ॥
कुटिलभ्रुकुटीभङ्गभङ्गुरालकषट्पदम् । ललाटनयनोद्गीर्णज्वालाज्वलितदिङ्मुखम् ॥
ऊर्ध्वज्वालागणालीढकिरीटतटशोभितम् । श्रीवत्सकौस्तुभोरस्कं दिव्यमालाविभूषितम् ॥
उद्यज्जानुमनेकास्त्रं स्थितं परमशोभनम् । गदाङ्कुशौ च मुसलं चक्रमत्युग्रतेजसम् ॥
शङ्खं च सशरं चापं पाशं कौमोदकीं क्रमात् । मुख्यदक्षिणहस्तादिमुख्यवामकरावधि ॥
दधानमतुलं वीरं दिव्याभरणभूषितम् । निजाट्टहाससन्त्रस्यद्दैत्यदानवसञ्चयम् ॥
अयुतायुतवह्नीनामास्पदे दीप्ततेजसाम् । अध्वषट्कमये चक्रे चक्रिणं चक्रमुत्तमम् ॥

Īśvara[1] VII : 194b–203

§ 590

न्यस्ताङ्गश्चक्रमुद्राभिर्वह्निप्राकारमध्यगः । सहस्रारमहाचक्रमयुताग्निचयोत्कटम् ॥
षडध्वमयमुद्भ्रान्तं ध्यायेन्मच्छक्तिजृम्भितम् । अक्षस्थं परमात्मानं नारायणमनामयम् ॥
चक्ररूपिणमीशानं ध्यायेत् कुङ्कुमसन्निभम् । पीताम्बरधरं दिव्यं मुक्तालङ्कारमण्डितम् ॥
एनमष्टभुजं ध्यायेन्महाव्यसनसंप्लवे । उद्यज्जानुमनेकास्त्रं स्थितं परमशोभनम् ॥
चक्रं मुसलमुद्दाममङ्कुशं सरसीरुहम् । याम्ये करचतुष्केऽथ वामे भुजचतुष्टये ॥
शङ्खं बाणयुतं चापं पाशं गुर्वीं गदामपि । दधानं दक्षिणं दिव्यं दंष्ट्राभास्वरिताननम् ॥
पिङ्गाक्षं पिङ्गकेशाढ्यं ज्वालामालापरिष्कृतम् । अथ षोडशहस्तं च ध्यायेद्देवं सुदर्शनम् ॥
परैः परिभवे प्राप्ते प्रतीकारविवर्जिते । स्थितावनवक्लृप्तायामपि निर्जित्य वैरिणः ॥
भये महति सञ्जाते चोरव्याघ्रद्विपादिभिः । प्रत्यालीढस्थितं देवं वैरिवर्गदिगुन्मुखम् ।
प्रहारोद्योगिभिः पीनैर्भुजैरूर्ध्वैरलङ्कृतम् । शक्त्या दीप्तेन खड्गेन वह्निना च शतर्चिषा ॥
अङ्कुशेनाथ दण्डेन कुन्तेनाथ जलत्त्विषा । परश्वधेन चक्रेण दक्षिणाधःकरैः क्रमात् ॥
शङ्खेन चापमुख्येन पाशेनाथ हलेन च । कुलिशेन गदास्त्रेण मुसलेनाथ शूलतः ॥
ऊर्ध्वादधःस्थितैर्वामैः प्रदीप्तैरायुधैर्हितम् । दंष्ट्रानिष्ठ्यूतघोराग्निज्वालाकोलाहलाकुलम् ॥
संस्यूततत्त्वयाकीर्णं दिव्यया वनमालया । घोराट्टहाससंत्रासद्रवद्दैत्येन्द्रदानवम् ॥
ज्वालाकुलज्वलद्दैत्यमेदोमेदुरपावके । अयुतायुतवह्नीनामास्पदे दीप्ततेजसाम् ॥
अध्वपट्कमये चक्रे चक्रिणं चक्रमुत्तमम् । ध्यायेदेवंविधं देवं भये महति मानवः ॥

Lakṣmī Tantra XXXI : 45–60

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 591

. . . सर्वेषां धार्यते देवमूर्तीनामायुधं भवेत् ॥
चक्रषट्कोणतन्मध्ये चतुर्व्यूहादिद्वादशीम् । चतुर्बाहुं यथापूर्वं चक्रायुधचतुष्टयम् ॥
चक्रषट्कोणतन्मध्येऽवतारदशकं भवेत् । मत्स्यादिकर्तृपर्यन्तं आयुधं पूर्ववद्भवेत् ॥
सुदर्शनस्यायुधानि चत्वारश्चाष्टकेऽपि वा । चक्रषट्कोणतन्मध्ये पुष्पबाणेक्षुचापकम् ॥
दशबाहुसमायुक्तं कामचक्रमिहोच्यते । चक्रषट्कोणमध्ये तु गोपालवपुषं परम् ॥
वीणां वेणुं च शक्तिं च सहस्रद्वादशं भुजम् । रक्तवर्णमुदाराङ्गं देवीनामष्टसंयुतम् ॥
चक्रगोपालमाख्यातं सर्वदेवात्परात्परम् । चक्रषट्कोणमध्ये तु बाह्वोः षोडशचक्रधृक् ॥
पारिषादेवसंयुक्तं महासौदर्शनं परम् । चक्रषट्कोणतन्मध्ये पुष्पबाणेक्षुचापकम् ॥
दशबाहुसमायुक्तं कामचक्रमिहोच्यते । चक्रषट्कोणमध्ये तु गोपालवपुषं परम् ॥
वीणां वेणुं च शक्तिं च सशस्त्रद्वादशं भुजम् । रक्तवर्णमुदाराङ्गं देवीनामष्टसंयुतम् ॥
चक्रगोपालमाख्यातं सर्वदेवात्परं परम् । चक्रषट्कोणमध्ये तु बाह्वोः षोडशचक्रधृक् ॥
पारिषादेवसंयुक्तं महासौदर्शनं परम् । चक्रषट्कोणतन्मध्ये अन्यथा रूपकं भवेत् ॥
पद्माद्यष्टायुधधरं रक्तवर्णं त्रिलोचनम् । जटामकुटनागेन्द्रचन्द्रजान्विधिसंयुतः ॥
दंष्ट्राकरालवदनो रौद्रचक्रेति नामतः । सौदर्शनस्य संभेदं संज्ञा वै कथ्यते बुधैः ॥

Vihagendra III : 656–78

§ 592

. . . चक्रमध्यस्थितं श्रीशं जपाकुसुमसन्निभम् ॥
ज्वालाकेशं चक्रधरं द्विहस्तं कुटिलेक्षणम् । दंष्ट्राकरालवदनं भयस्यापि भयङ्करम् ॥
रक्तवर्णाम्बरधरं किरीटादिविभूषितम् । प्रणतार्तिहरं ध्यायेत् सहस्रारविराजितम् ॥
किरीटवनमालादिमुद्राः स्वाङ्गे ततो न्यसेत् । मूलार्चां हृत्कजे ध्यात्वा जपान्तं मनसा यजेत् ॥
प्राग्वदर्घ्यादिभिर्भोगैरर्चयेच्च सुदर्शनम् । महाचक्रं सहस्रारमयुतादित्यवर्चसम् ॥
ध्यात्वा तत्कर्णिकामध्ये देवं कुङ्कुमसन्निभम् । ललाटनयनोद्गीर्ण ज्वालाज्वलितदिङ्मुखम् ॥
दंष्ट्रानिष्ठ्यूतसंरावात् भीतराक्षसदानवम् । रक्तचन्दनलिप्ताङ्गं रक्तभूषाम्बरावृतम् ॥
श्रीवत्सकौस्तुभोरस्कं वनमालाविराजितम् । महौजसं महाकायमष्टभिश्शोभितं भुजैः ॥
पाशाङ्कुशौ च मुसलं चक्रमत्युग्रतेजसम् । शङ्खं कौमोदकीं चापं शरं चन्द्रार्धसंनिभम् ॥
दधानमतुलं वीरं सङ्कर्षणसमुद्भवम् । एवं ध्यात्वा मूलबेरे ततस्त्वर्घ्यादिना यजेत् ॥
ततश्चावाहनं पाद्यं षोडशारं रविप्रभम् । सूर्यचक्रं स्मरेत्तस्मिन् तीक्ष्णदंष्ट्रं त्रिलोचनम् ॥
रक्तजिह्वं करालास्यं भ्रुकुटीकुटिलेक्षणम् । उग्रपिङ्गलकेशान्तं ज्वालामालाविराजितम् ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

Digitized by Google

Original from
UNIVERSITY OF MICHIGAN



SUDARŚANANARASIṂHA (OBVERSE)

(*To face entry* § *597, p. 227*)

Digitized by Google

Original from
UNIVERSITY OF MICHIGAN

रक्ताम्बरधरं रक्तपुष्पमालाभिरुज्ज्वलम् । ऊर्ध्वज्वालागणालीढकिरीटतटशोभितम् ॥
माणिक्यमयकेयूरकटकादिविभूषितम् । श्रीवत्सकौस्तुभोरस्कं दीप्तकुण्डलशोभितम् ॥
अष्टारं चक्रमत्युग्रं मुसलं चाङ्कुशं तथा । पद्मं च दक्षिणे भागे चतुर्भिर्बाहुभिर्धृतम् ॥
दोर्भिर्वामैः शङ्खपाशगदासेषुधनुर्धरम् । निजाट्टहासवित्रस्तपिशाचासुरराक्षसम् ॥
एवं ध्यात्वा कर्मबिम्बे मन्त्रन्यसनमाचरेत् ॥ . . . .

Śrīpraśna XXX : 197*b*–213*a*

§ 593

कारयेन्मुनिशार्दूल सौवर्णादिक्रमेण तु । स्वर्णेन रजतेनापि ताम्रलोहेन वा मुने ॥
कारयेद्धेतिराजानमुत्तमाधममध्यमः । उत्तमं हेतिराजानमुत्तमाधममध्यतः ॥
उत्तमं हेतिराजस्य लक्षणं प्रथमं शृणु । अङ्गुष्ठाङ्गुलमानेन द्वादशाङ्गुलमायतम् ॥
भ्रमयेच्चक्ररूपेण विस्तारायामतादृशम् । अथवाऽत्र मुनिश्रेष्ठ मानमार्गं विधीयते ॥
ग्रामराजानुकूलेन नक्षत्रेणैव कारयेत् । शिल्पशास्त्रानुसारेण कारयेत् शिल्पवित्तमैः ॥
षड्दिश्याथ चतुर्दिश्या विलिखित्वानिरूपिणम् । चक्रेण द्विगुणीकृत्य दण्डाकारायतं भवेत् ॥
षडङ्गुलं तु तन्नाहं पद्ममष्टाङ्गुलोच्छ्रयम् । विंशत्यङ्गुलमानं तु.....पादायतं क्रमात् ॥
कर्णिका द्वादशाङ्गुला कारयेत् सुमनोरमा । कारयेच्चक्रमध्ये तु शक्तिं तद्वैष्णवं महत् ॥
सुवृत्तान्तर्गतं ध्यात्वा तत्तन्मूर्त्यनुसारतः । रविरग्निश्च रुद्रश्च ब्रह्मा विष्णुस्तथैव च ॥
कालश्च बडबाग्निस्तु शिखायामग्निमेव च । कालरूपं तु दण्डे च ज्योतिश्चक्रं तु तत्प्रभा ॥
अष्टशक्तिसमोपेतं चक्रं तं देवमाकृतिम् । एवं तु हेतिराजस्य लक्षणं कथितं मया ॥

Viṣvaksena XXXII : 3–13

§ 594

. . . भुजैः षोडशभिर्युक्तं अष्टाभिर्वाऽनलप्रभम् ॥
पिङ्गलोचनकोशाढ्यं रक्ताम्बरधरं विभुम् । दंष्ट्राकरालवदनविवरोद्भूतपावकम् ॥
कुटिलभ्रुकुटीभङ्गभङ्गुरालकषट्पदम् । ललाटलोचनोद्गीर्णज्वालाज्वलितदिङ्मुखम् ॥
ऊर्ध्वज्वालागणालीढकिरीटतटशोभितम् । श्रीवत्सकौस्तुभोरस्कं ग्रैवेयकविराजितम् ॥
पादावलम्बिनीं दिव्यां दधानमुपवीतवत् । प्रत्यालीढेन तिष्ठन्तं चक्राक्रमणरूपिणा ॥
पादयोर्दक्षिणाङ्गुष्ठप्रान्तरेखात् तथेतरात् । पार्ष्णेः स्वमध्यतो मानं देहलब्धाङ्गुलेन च ॥
चत्वारिंशत् साष्टकं स्यात् प्रत्यालीढं चिरान्वितम् । मुख्यदक्षिणहस्तादिमुख्यवामकरावधि ॥
द्विरष्टबाहुभिर्धत्ते प्रादक्षिण्यक्रमेण तु । शक्तिं खड्गं तथाचाग्निमङ्कुशं दण्डकुन्तके ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

परशुं च महत्खारं दरं च मशरं धनुः । पाशं हलं ततो वज्रं गदां च मुसलं तथा ॥
त्रिशूलमेतान्यस्त्राणि प्रत्येकं वीर्यवन्ति च । दुष्प्रधर्षं भयघ्नानि वहन्तमरिसूदनम् ॥
अन्यथाष्टभुजो धने मुख्यदक्षकरादिकैः । पद्माङ्कुशौ च मुसलं चक्रमन्युग्रतेजसम् ॥
शङ्खं च मशरं चापं पाशं कौमोदकीं क्रमात् । कृत्वैवमर्वचित्रं तु नवतालेन शिल्पिना ॥
पादयोरन्तरे तस्य निष्ठतः कर्णिकावनौ । . . . .

Pārameśvara XXIII : 39b-51a

§ 595

. . . भूयो बिम्बं वदाम्यहम् ॥
आलीढं प्रत्यगालीढं स्थानकं वा भवेद्बुधः । आलीढं वामपादाग्रं उत्तराभिमुखस्थितः ॥
स्थित्वा दक्षिणपादाग्रं दक्षिणाभिमुखो भवेत् । प्रत्यालीढमिदं चैव बाहूनां च विशेषणम् ॥
भुजषोडशकं वाथ द्वात्रिंशद्वा यदृच्छया । वटवृक्षशिफाकारो बाहूनां निर्गमं भवेत् ॥
हस्तकोर्परसंस्थानं वक्त्रं बन्धूलकण्ठवत् । हस्तानां चोभयोः पार्श्वौ तालपत्रविकासवत् ॥
अष्टकं वा द्विरष्टं वा.....ह द्वात्रिंशमेव वा । पूर्वहस्तावुभौ पूर्वे निर्गमं सौम्य तत्समम् ॥
बेरोत्सेधाष्टभागं स्यात्पादः पाण्यायुधा भवेत् । पादस्य पादयोश्छिद्रं चतुर्भागं भवेद्बुधः ॥
कटिकोर्परयोः सन्धौ भागमेकं प्रकल्पयेत् । मणिबन्धहस्तहस्तौ तु एकभागं क्रमात्भवेत् ॥
अङ्कुशं पद्महस्तौ च पद्मं चापं च पार्श्वयोः । द्विभागमन्तरं चैव हस्तहस्तौ पृथक् पृथक् ॥
इति षोडशहस्तः स्याद् द्वात्रिंशात् हस्तकं भवेत् । बेरात् षोडशभागैकं हस्तयोर्हस्तमन्तरम् ॥
चतुष्षष्टिभुजं कुर्यात्तदर्धं हस्तहस्तयोः । तदूर्ध्वे हस्तकं कुर्याद्यथाशोभं भवेद्बुधः ॥
द्विभागजानुजान्वोश्च शिरोज्वालं द्विभागिकम् । तस्य द्विभागयोर्मध्ये संगृह्य ग्रामयेद्बुधः ॥
वृत्तादूर्ध्वं विभागं स्यादूर्ध्वंजालं समध्यमम् । तिर्यगूर्ध्वं द्विसूत्रं स्यात् काकपादेव मध्यमे ॥
तिर्यक् सूत्रं द्विभागान्तं ज्वालाग्रारम्य सूत्रयुक् । मध्यज्वालामुभौ पार्श्वे ज्वालं त्रित्रिचतुर्ष्वपि ॥
सूत्रपर्यन्तज्वालाग्रं यवमात्रं च नाहकम् । मूलादारम्य ज्वालानां सूत्रनेत्रसमं भवेत् ॥
यामावसाने कम्पादौ बाह्यकम्पे च केसरौ । ज्वालावसानोर्ध्वज्वालौ शिरोज्वालावसानकौ ॥
शिरोज्वालं च केशोभं किञ्चिद्धस्तितपद्मवत् । आलीढे वामनासाग्रे प्रत्यालीढे च दक्षिणे ॥
ऊर्ध्वाधः कोणहृदयो सूत्रपातं तथैव च । जानुमध्यद्विभागं स्यात् पञ्चधा विभजो भवेत् ॥
सुत्रात्पूर्वे त्रिभागं स्याद् द्विभागमपरे तथा । इत्येवं क्रमशः कुर्यादालीढस्य विशेषणम् ॥
आलीढस्थावरे कुर्याज्जङ्गमे स्थानकं भवेत् । . . . .

Vihagendra VII : 41b-60a [*sic.*]

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

Digitized by Google

Original from
UNIVERSITY OF MICHIGAN

SUDARŚANANARASIṂHA (REVERSE)

(*To face entry § 597, p. 227*)

Digitized by Google

Original from
UNIVERSITY OF MICHIGAN

§ 596

रक्तवर्णं चतुर्बाहुं.....वा मुनीश्वर । सर्वाभरणसंयुक्तं सर्वशोभनशोभितम् ॥
कालाग्निसदृशाकारं चक्रधृङ्मकुटान्वितम् । एवं चक्राधिदेवं तु पूजयेत् द्वारपार्श्वके ॥

Viṣvaksena XX : 154–155

§ 597

शृणु राजन् महावीर चक्रमूर्तिविशेषकम् । पूर्वं सुदर्शनं देवमपरेण नृसिंहकम् ॥
अष्टबाहुस्तथाप्यष्टौ षोडशे षोडश स्मृतः । यावद्बाहुविवृद्धिः स्यात् तावद्बाहुविवृद्धिकम् ॥
सर्वेषु चक्रं बिभृयात् अपराङ्गे विशेषतः । अष्टायुधधरं देवमष्टायुधधरेण च ॥
नृहरिस्थानके पूर्वे पद्माद्यष्टायुधं भवेत् । अपरे सुदर्शनं चैव चक्रधृक् चक्रबाहुकः ॥
अष्टबाहुस...को देवो तत्कुर्यात् स्थानकं भवेत् । आलिख्य षोडशभुजमपराङ्गे नृसिंहकम् ॥
सुदर्शननृसिंहं च नरसिंहं सुदर्शनम् । सुदर्शने नृसिंहे वा एकरूपमिहोच्यते ॥

Vihagendra IV : 1–6

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

CHAPTER SEVEN

THE DIVINE BEINGS IN THE TEMPLE PRECINCTS

The temple, with the icon of the Lord at its vital center, pulsates in all its parts with the enlivening presence of divine beings that populate, protect and sanctify its holy precincts. In this chapter we turn to descriptions of the various *parivāradevatās*, or divinities, that "surround" the *sanctum sanctorum*. In every courtyard, at all gateways, facing in each direction, and as part of every structure we find specific gods and demigods, goddesses and guardians installed, saluted and honored in daily worship routines.

Aside from the theological dimensions of their presence, in terms of our present concerns, these figures when properly depicted in their places add beauty and comliness to the compound (§598).

Digitized by Google Original from UNIVERSITY OF MICHIGAN

In this chapter, after a brief summary section surveying the entire temple with its population of divine beings (§599–§605), we turn to passages describing the *dvārapālakas* or doorway guardians, then to the deities of the first courtyard, and from there outward in an increasingly expanding view to the farther courtyards and finally to the outer limits of the temple precincts. Because most of these beings are subsidiary divines only, we shall treat them in larger blocks of excerpts than in preceding chapters.

§ 598

पूजार्थं परिवाराणां शोभार्थं मन्दिरस्य च । प्रथमावरणाद्येषु कल्पनीया विशेषतः ॥

Śriprasna XV : 1

§ 599

श्यामवर्णं तु भूमिस्स्याद्रक्तवर्णां हरिप्रियाम् । दुर्गां च कोमलश्यामां श्वेतरूपविनायकम् ॥
शङ्खपद्मनिधी चैव श्वेतरत्ननिभौ मुने । गङ्गाञ्च यमुनाञ्चैव श्वेतरत्ननिभौ मुने ॥
उत्कर्षणीं तु रक्तां वै कर्षणीं रक्तमेव च । एवं द्वारं तु संचिन्त्य त्रिसंध्यायां प्रपूजयेत् ॥
नार्चयेदुपसंध्यायां चण्डादीन् द्वारपालकान् । अज्ञानादर्चयेन्मोहात् स्थाननाशं भविष्यति ॥
दुर्भिक्षं जायते राष्ट्रं धनधान्यविनाशकृत् । तस्मात्सर्वप्रयत्नेन विधिनोक्तं समाचरेत् ॥
विमानाग्नेययाम्ये तु तन्मध्ये गणनायकम् । अक्षमालाधरं देवमष्टाक्षरपरायणम् ॥
त्रिणेत्रं श्येनसंकाशं सौम्यं सेमार्धधारिणम् । नारदाद्यृषिसंघैश्च सेवितं दक्षिणामुखम् ॥
एवं रहस्यरूपं ते संक्षेपेण विधीयते । तस्य दक्षिणपार्श्वे तु मातॄणामुत्तरामुखम् ॥
कल्पयेन्मुनिशार्दूल सर्वसंपत्सुखावहम् । आलयस्योत्तरे मात्रैः कल्पयेद्वा मुनीश्वरम् ॥
तेषां नामक्रमाद् गुह्यं शृणुष्वावहितोऽधुना । वागीश्वरी क्रिया कीर्तिः लक्ष्मी सृष्टिस्तथैव च ॥
विद्या कान्तिश्च सप्तैताः कथिता विष्णुमातरः । उत्तरे पश्चिमे चैव हयश्च श्रीधरस्तथा ॥
वीरभद्रगणेशौ वा मातॄणां द्वारपालकौ । साधकेच्छानुरूपेण कल्पयेद्विष्णुमातरः ॥
मातरञ्च सुवर्णाभां श्रीधरश्श्याम एव वा । हयशीर्षस्सुवर्णाभो वर्णा एताः प्रकीर्तिताः ॥
तथैव वीरभद्रादिवर्णं तु परिपठ्यते । विमाने पृष्ठभागे तु अनन्तमथ साधकः ॥
पञ्चास्यपन्नगोर्ध्वे तु पञ्चवक्त्रैस्समावृतम् । चतुर्मुखं समासीनं शङ्खचक्रगदाधरम् ॥
इत्थं हि लक्षणोपेतं सर्वदेवैर्नमस्कृतम् । सौम्यस्येशानयोर्मध्ये दुर्गां श्यामनिभां भजेत् ॥
तस्योत्तरे तु विन्यस्य मम रूपं चमूपते । श्यामलं पिङ्गलाक्षं तु पिङ्गशूलं सनातनम् ॥
शङ्खचक्रगदापाणिं चतुर्बाहुं किरीटिनम् । पीताम्बरधरं सौम्यं विवृत्ताक्षसमन्वितम् ॥
तर्जयन्तं च तर्जन्या नासाग्रासन्नया जगत् । एवं हि मम रूपं ते पठ्यते मुनिसत्तम ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

परिवारं विधानोक्तमथ बाह्येषु विन्यसेत् । द्वारस्य शङ्खचक्रं तु दक्षिणोत्तरतः स्मरेत् ॥
दक्षिणे शङ्खवर्णं तु शङ्खचक्रगदाधरम् । चतुर्भुजं त्रिणेत्रं तु मूर्ध्नि शङ्खं न्यसेत्तदा ॥
वामपार्श्वे न्यसेच्चक्रमग्निरूपं चतुर्भुजम् । त्रिणेत्रं भीमसङ्काशं शङ्खचक्रगदाधरम् ॥
तन्मूर्ध्नि विन्यसेच्चक्रं नीलाम्बरकिरीटिनम् । त्रिशिखं रक्तवर्णाभं रक्तमाल्यैरलङ्कृतम् ॥
त्रिपदञ्चाष्टपादं च रक्तनेत्रत्रयं मुने । रक्तकेशनखश्मश्रुवह्निरूपं सशक्तिकम् ॥
धर्मराजं ततो ध्यायेत्सर्वलक्षणलक्षितम् । कालमेघनिभाकारं द्विभुजं दण्डपाणिकम् ॥
किरीटहारकेयूरमकुटादिविभूषितम् । सर्वप्रेताधिनाथस्य लक्षणं कथितं मया ॥
ततस्तु रक्षसामीशं निर्ऋतिं रक्तमूर्धजम् । खड्गबाहुं महाकायं रक्तवर्णं त्रिनेत्रकम् ॥
एतत्तु लक्षणं प्रोक्तं राक्षसाधिपतेस्ततः । सर्वलक्षणसंयुक्तं सर्वालङ्कारभूषितम् ॥
श्यामलं पाशहस्तं च जलेशं पङ्कजाननम् । धूम्रवर्णनिभाकारध्वजयुक्तं महाभुजम् ॥
द्विपादञ्च द्विहस्तञ्च सर्वेषां प्राणसंज्ञितम् । इत्थं ते मुनिशार्दूल लक्षणं परिपठ्यते ॥
ध्यायेत्सौम्ये तु मतिमान् यक्षेश्वरमनुत्तमम् । तप्तहाटकसङ्काशं सर्वलक्षणलक्षितम् ॥
द्विपादं द्वयहस्तञ्च दण्डपाणिं धनेश्वरम् । श्वेताद्रिशिखराकारं द्विपादञ्च चतुर्मुखम् ॥
वृषध्वजं त्रिणेत्रञ्च शूलपाणीन्दुमौलिनम् । एवं ध्यायेत् क्रमात् सर्वान्स्वनाम्ना पूजयेत्पृथक् ॥
एतत् तृतीयावरणे द्वारपार्श्वेन्दुसूर्ययोः । रक्तवर्णं महाकायं कम्बुग्रीवं चतुर्भुजम् ॥
शङ्खचक्रगदापाणिं त्रिणेत्रं भीमरूपिणम् । चिन्तयेद्दक्षिणे पार्श्वे तृतीयद्वारके रविम् ॥
कुन्दपुष्पनिभाकारं शङ्खचक्रगदाधरम् । चतुर्भुजं त्रिणेत्रञ्च पीतवासञ्च चिन्तयेत् ॥
द्वारस्य वामपार्श्वे तु शशाङ्काकृतिमुत्तमम् । मौलिपृष्ठस्य सूर्यादौ चिन्तयेन्मण्डलाकृतिम् ॥
एवं शशिं रविं ध्यात्वा तृतीयद्वारपार्श्वयोः । कुमुदादीनि सर्वाणि न्यसेत्पूर्वादिषु क्रमात् ॥
कुमुदः कुमुदाक्षश्च पुण्डरीकोऽथ वामनः । शङ्कुकर्णस्सर्पनेत्रः सुमुखस्सुप्रतिष्ठितः ॥
एतेषां लक्षणं विद्वान् तं ध्यात्वास्मिन् महोत्सवे । तद्वत् ज्ञात्वात्र भूतेशान् पूजयेत्साधकोत्तमः ॥
पुरतः स्थापयेत्सर्वान् विष्णुपारिषदान् बहून । सर्ववर्णधरास्सर्वे सर्वे शस्त्रपाणयः ॥
महापीठेषु संस्मृत्य सर्वान् भूतगणान्वितान् । पूजाकाले ततो ध्यायेत् स्वरूपं पूजकः क्रमात् ॥

Viṣvaksena XX : 158-199

§ 600

प्रतापी जयभद्रश्च तृतीयस्तु महाबलः । उत्साहश्चेति वर्गोऽयं जयानुचरसंज्ञितः ॥
रक्ताम्बरधराः सर्वे चतुर्हस्ता महाबलाः । धनुर्बाणकराश्चैव गदाचक्रधरास्तथा ॥
इत्थं तेऽनुचरा ज्ञेयाः पुष्पाभरणभूषिताः । पद्मनाभोऽनलारूढोऽजितः कालस्तथैव च ॥

Lakṣmī Tantra XLV : 70-72

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 601

अन्तर्मण्डलसंज्ञस्य सालस्य द्वारपार्श्वयोः । जयश्च विजयश्चैव प्रतिष्ठाप्यौ वरानने ॥
अन्तर्हारस्य पूर्वस्यां द्वारि पद्मगदाधरौ । खड्गशार्ङ्गधरौ द्वारि दक्षिणस्यां प्रकल्पयेत् ॥
प्रतीच्यां वज्रमुसलधारिणौ स्थापयेद् गुरुः । उत्तरस्यां भवेतां तौ पाशाङ्कुशधरौ रमे ॥
मध्यान्तर्हारसालस्य प्राच्यादिषु यथाक्रमम् । दिक्षु धातृविधातारौ ततो भद्रसुभद्रकौ ॥
कृतान्तासुरविध्वंसौ कुबेराक्षकुबेरकौ । एवमेवेष्यतेऽन्येषां चतुर्दिक्षु च गोपुरे ॥
प्राच्यादिषु तथा दिक्षु मर्यादासालगोपुरे । दुर्जयप्रबलौ स्यातां विश्वभावनपुष्करौ ॥
सम्भवः प्रभवश्चैव सुशोभनसुभद्रकौ । जघन्यावरणद्वारे प्राच्यादिषु च कल्पयेत् ॥
कुमुदः कुमुदाक्षश्च पुण्डरीकश्च वामनः । शङ्कुकर्णस्सर्वनेत्रः सुमुखः सुप्रतिष्ठितः ॥
अष्टौ द्वौ द्वौ प्रतिद्वारं कल्पनीया यथाविधि । विष्णुपारिषदा एते सेनाभिः कोटिभिर्वृताः ॥

Śripraśna XV : 4-12

§ 602

एकावरणके धाम्नि परिवारानिमान् शृणु । नृत्तार्धमण्टपस्याग्रे कल्पनीयो विहङ्गराट् ॥
गोपुरस्योत्तरे साले मन्दिराभिमुखो रविः । तस्यैव दक्षिणे साले चन्द्रमाः परिकल्प्यते ॥
वह्नौ कामो यमो ब्रह्मा नैऋते स्याद् गजाननः । वारुणे षण्मुखो दुर्गा वायौ सौम्ये धनाधिपः ॥
ईशाने शङ्करस्तत्र क्षेत्रपालं प्रकल्पयेत् । सोमेशयोरन्तराले विष्वक्सेनं प्रकल्पयेत् ॥
अङ्गणे दक्षिणे सप्तमातरः श्रीस्तु नैऋते । इन्द्रादयो लोकपालाः पूज्याः स्वाशासु चाङ्गणे ॥
गोपुरस्य भवेदन्तर्बहिर्वा बलिपीठिका । अन्तर्हाराह्वयोपेते विशेषोऽथास्ति कथ्यते ॥
सूर्याचन्द्रमसोः स्थाने विशेषौ पुरुषाच्युतौ । सूर्याचन्द्रमसौ कल्प्यौ द्वितीयावरणे तथा ॥
हयग्रीवस्समस्थाने स्थाप्यस्संकर्षणो विधेः । वराहो विघ्नराट्स्थाने प्रद्युम्नः षण्मुखस्य च ॥
कात्यायिन्या अनन्तस्स्यादनिरुद्धो नरासने । नृकेसरी शङ्करस्य चाङ्गणे पीठिकासु चेत् ॥
इन्द्रादयस्समभ्यर्च्यास्तेषां स्थाने यथाक्रमम् । चक्री च मुसली शङ्खी खड्गी चैव गदाधरः ॥
शार्ङ्गी पद्मी तथा वज्री पूज्या दिव्यास्त्रधारिणः । प्रथमावरणे येषां स्थाना ये समुदीरिताः ॥
ज्ञेया द्वितीये ते सर्वे परिवारा यथाक्रमम् । मर्यादावरणे धाम्नि गोपुरोभयपार्श्वयोः ॥
शङ्खं चक्रं तथा स्थाप्य देवदेवायुधोत्तमौ । उपेन्द्रं गोपुरशिरोभागे स्थाप्य ततः परम् ॥
आग्नेयादिक्रमेणैव प्राकृतादीन्प्रकल्पयेत् । उपेन्द्रः प्राकृतः पुण्यः पुष्करो विश्वभावनः ॥
असुरघ्नः कृतान्तश्च भूतनाथोऽष्टमः स्मृतः । अङ्गणे पीठिकास्थाने कुमुदादीन् प्रकल्पयेत् ॥
कुमुदः कुमुदाक्षश्च पुण्डरीकश्च वामनः । शङ्कुकर्णस्सर्वनेत्रः सुमुखः सुप्रतिष्ठितः ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

विष्वक्सेनं तदाग्नेय्यां क्षेत्रपालं खगेश्वरम् । प्रधानवेद्यभिमुखं कल्पयेत्कुम्भसम्भवम् ॥
महापीठं च तत्रैव ध्वजयष्टिं च शार्ङ्गिणः । . . . .
Bhārgava Tantra III : 31-48a

§ 603

एते चतुर्भुजाः सर्वे अक्षसूत्रविभूषिताः । चिन्तयन्तः परं तत्त्वं वराभयकराः सदा ॥
दिव्याभरणदिग्धाङ्गा दिव्यमाल्याम्बरान्विताः । दिव्यरूपधराश्चैव दिव्यगन्धवहा द्विज ॥
एभ्यश्चतुर्भुजो ब्रह्मन् विज्ञातो वृषभध्वजः । द्विभुजास्त्रकराश्चान्ये वरदाभयदास्तु वा ॥
Pauṣkara IV : 159-161

§ 604

. . . वीरलक्ष्मीं नैर्ऋते वा दिक्ष्वन्यासु यथाक्रमम् ॥
परिकल्प्यालयं तस्मिन् चरस्थिरविभागतः । पूजने तु हरेः काले प्रत्येकं पूजयेद् गुरुः ॥
सोमेशानान्तरे देवि विष्वक्सेनं प्रकल्पयेत् । गोपुरस्य भवेदन्तर्बहिर्वा बलिपीठकम् ॥
बह्वावरणयुक्तस्य परिवाराः पुरोदिताः । एकावरणयुक्तस्य परिवारानिमान् शृणु ॥
पार्श्वयोर्गर्भगेहस्य चण्डं चापि प्रचण्डकम् । पुरतो वैनतेयं च वीरलक्ष्मीं तु नैर्ऋते ॥
ईशाने सेननाथं च कल्पयेत् कमलासने । एतान् विग्रहरूपेण स्थापयेच्च गुरूत्तमः ॥
ततः पूजोपकरणं कारयेल्लक्षणान्वितम् । शब्दब्रह्ममयी घण्टा हस्तोत्सेधसमुच्छ्रया ॥
Śrīpraśna XV : 15b-21

§ 605

बहुबेरविधाने तु परिवारान् प्रकल्पयेत् । उभयत्र प्रदातव्यं चण्डादीनां प्रपूजनम् ॥
ब्रह्माणं दक्षिणे पार्श्वे त्रिणेत्रं चोत्तरे तथा । चन्द्रादित्यौ तथा पृष्ठे शान्तिं चैव सरस्वतीम् ॥
पार्श्वयोरुभयोः कुर्यात् श्रीं महीं संनिवेशयेत् । अन्यानि पीठपार्श्वे तु मार्कण्डेयभृगुस्तथा ॥
उत्तमं तत्समुद्दिष्टं मध्यमं शृणु सुव्रत । ब्रह्मशङ्करहीनं तु मध्यमं तदुदाहृतम् ॥
इन्दुसूर्यविहीनं तु अधमं परिचक्षते । आसीनस्याथ वक्ष्यामि दक्षिणे दक्षमुच्यते ॥
मनुस्तथोत्तरे पार्श्वे रतिं चैव सरस्वतीम् । पृष्ठभागे तु कर्तव्यं चन्द्रादित्यौ तथैव च ॥
अर्चनापीठपार्श्वस्थौ भृगुश्चैव तु नारदः । उत्तमं परिवारस्तु मध्यमस्तु तथोच्यते ॥
मनुर्दक्षविहीनस्तु मध्यमं समुदाहृतम् । इन्दुसूर्यविहीनं तु अधमं परिचक्ष्यते ॥
शयनं संप्रवक्ष्यामि ब्रह्माणं च ततोपरि । दक्षं दक्षिणपार्श्वे तु नारदं चोत्तरे तथा ॥
चन्द्रादित्यौ तथा पृष्ठे कुर्यात्तन्त्रविचक्षणः । कूर्मं च दक्षिणे पार्श्वे वराहं कल्पयेत् सुधीः ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

उत्तरे नारसिंहं च कर्तव्यं द्विजपुङ्गव । श्रीभूमिपादपार्श्वे तु शयनस्य विशेषतः ॥
श्रीभूमीभ्यां विहीनं तु मध्यमं परिचक्ष्यते । नारसिंहविहीनं तु अधमं तदुदाहृतम् ॥
एते च यानकस्योक्ता उत्तमाधमयोगतः । स्थानके स्थानकं कुर्यादासने स्थानकासनम् ॥
यानके शयने चैव स्थानकं चासनं तु वा । समानं तु न कर्तव्यं इति निश्चित्य कारयेत् ॥
किञ्चित् सिंहासनं प्राहुर्न्यासं किञ्चित् प्रचक्षते । बाह्यानां तु तथा वक्ष्ये परिवारं विशेषतः ॥
चण्डप्रचण्डौ द्वारस्य दक्षिणोत्तरपार्श्वतः । विघ्नेशं चाग्निभागे तु मातॄणां दक्षिणे तथा ॥
अनन्तं पश्चिमे भागे ईशान्यामिन्द्रवासिनीम् । मौलिका द्वारपार्श्वे तु शङ्खं चक्रं प्रतिष्ठयेत् ॥
मण्टपश्चैन्द्रभागे तु माहेन्द्रं कल्पयेत् सुधीः । इन्द्रादीशानपर्यन्तं लोकपालान् द्वितीयके ॥
द्वारे तृतीये कर्तव्यं पञ्चविघ्नविनायकम् । कुमुदादीन् यथान्यासं इन्द्रादीशान् प्रकल्पयेत् ॥
तृतीये वरुणं ह्येतत् स्थापयेत् स्थापकोत्तम । तद्बाह्येशानभागे तु क्षेत्रपालं सुपूजयेत् ॥
तद्बाह्ये गोपुरे पार्श्वे भानुमिन्दुं सुपूजयेत् । बाह्ये तु बलिपीठे तु न्यसेत् पारिषदेश्वरम् ॥
विष्वक्सेनं तथा तार्क्ष्यं स्वगेहे स्थापयेत् सुधीः । परिवारास्तथा प्रोक्ताः बाह्ये काश्यपपुङ्गव ॥
बहुबेरैकबेरं तु चण्डादीनां स्वनामकम् । अवतारेषु सर्वेषु परिवारास्तदेव हि ॥
बाह्यमभ्यन्तरं चैव व्यतिरिक्तं न कारयेत् । कुम्भकुम्भैक(कुम्भतोयेन)संप्रोक्ष्य सर्वदेवान् स्वमन्त्रकैः ॥
अभ्यन्तरं समाविश्य पूजयेद् गरुडध्वजम् । . . . .

Kapiñjala XII : 165-189*a*

Guardians of the gates

In this section are presented passages that take up in detail the paired doorway guardians —first in general (§606-§609), and then in pairs : Caṇḍa/Pracaṇḍa (§610-§613), Dhātṛ/Vidhātṛ (§614-§616), Jaya/Vijaya (§617), Bhadra/Subhadra (§618), and certain figures subsidiary to these (§619).

§ 606

* चण्डप्रचण्डौ धाता च विधाता च जयस्तथा । विजयश्चापि भद्रश्च सुभद्रश्च गणेश्वरः ॥
एते गणेश्वरा ह्यष्टौ प्रभापुष्पाम्बरैर्विना । देहवक्त्राकृतैस्तुल्यास्तथैवाभरणायुधैः ॥
भक्तानां विघ्नजालस्य सर्वदिक्संस्थितस्य च । संसारफलदातुर्वै छेदनार्थं समुद्यताः ॥
परस्परमुखास्सर्वे स्थानकैस्संस्थितास्समैः । . . . .

Pārameśvara XI : 87-90*a*

* Pauṣkara IV : 180-181*a* ; Īśvara IX : 84*b*-87.

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 607

अर्धमण्टपकद्वारे शङ्खचक्रोत्तमाङ्किनौ । दंष्ट्राकरालौ भीमाक्षौ करण्डिमकुटान्वितौ ॥
दक्षिणोत्तरपार्श्वस्थौ मुनिवेषौ गदाधरौ । चण्डप्रचण्डौ कर्तव्यौ लोहैर्वा शिलयापि वा ॥
Śripraśna XV : 2-3

§ 608

मूलबिम्बं प्रतिष्ठाप्य गर्भगेहे विधेः पदे । यद्वा दैवे मानुषे वा ध्रुवस्थापनमाचरेत् ॥
चण्डप्रचण्डौ संस्थाप्य गर्भद्वारे यथाक्रमम् । अर्धमण्टपकद्वारे शङ्खचक्रोत्तमाङ्किनौ ॥
अन्तर्मण्डलसंज्ञस्य स्थलस्य द्वारपार्श्वयोः । जयश्च विजयश्चोभौ कर्तव्यौ मुनिपुङ्गव ॥
अन्तर्हाराह्वये धाम्नि द्वारि पद्मगदाधरौ । दुर्जयप्रबलौ स्थाप्यौ मर्यादा द्वारपार्श्वयोः ॥
Bhārgava Tantra III : 27-30

§ 609

सदध्वदेशधर्माख्ये द्वारद्विद्वितयान्विते । द्वारपालगणन्यासे विशेषोऽयं प्रकाश्यते ॥
चण्डाद्याश्च सुभद्रान्ताः प्रासादद्वाश्चतुष्टये । न्यसनीयाः क्रमेणैव पूर्ववद् द्वन्द्वयोगतः ॥
द्वारोर्ध्वोदुम्बरद्वन्द्वद्वितयस्था यथाक्रमम् । लक्ष्मीः कीर्तिर्जया माया देव्यः प्रागुक्तलक्षणाः ॥
सत्यः सुपर्णो गरुडस्तार्क्ष्यस्त्वग्रेषु संस्थिताः । अनिवर्ती महावृत्तिः दर्पहा सर्वजित् स्थिरः ॥
जयन्तो भयकृन्मानी त्वष्टमो द्विजसत्तमाः । दिगग्रमण्डपद्वारशाखापार्श्वसमास्थिताः ॥
अनिवर्ती महावृत्तिः कृष्णाभः शुकसन्निभः । दर्पहा सर्वजिच्चैव पाण्डुरक्तसुवर्णभौ ॥
स्थिरो जयन्तः सततं श्यामाञ्जनसमद्युती । भयकृच्चैव मानी च पिङ्गलः पाण्डुरोज्वलः ॥
द्विभुजाः सर्व एवैते दक्षिणेन करेण तु । नन्दकं शङ्खमन्येन दधानाः क्रूरविक्रमाः ॥
यदा चतुर्भुजा ध्येयास्तदा चैते गणेश्वराः । मुख्यदक्षिणहस्तेन खड्गवेत्रलतान्विताः ॥
तथा वामकरे शङ्खं पृष्ठगे दक्षिणादितः । पाणिद्वये चक्रपद्मे बिभ्रतो ज्वलनप्रभाः ॥
नानावस्त्रस्रगुष्णीषभूषणालेपनान्विताः । व्यत्यस्तहस्तचरणा लाञ्छनव्यत्ययान्विताः ॥
ऊर्जितश्चामृताङ्गस्तु सर्वाङ्गः सर्वतोमुखः । शुभ्राङ्गो वरदश्चैव वागीशः शब्दविक्रमः ॥
पाञ्चजन्यविशेषा हि द्वौ द्वौ चैव क्रमात् स्थितौ । सर्वतोभद्रसालस्थचतुर्द्वारेषु पूर्ववत् ॥
द्विबाहवस्तु संस्मार्याः दक्षिणेन करेण तु । गृहीतमुसलाः सर्वे शङ्खमन्येन पाणिना ॥
दधानाश्चैव चत्वारः पूर्वे बन्धूकसन्निभाः । अन्ये परभृताभास्तु सर्वभूषणभूषिताः ॥
बलेन महता क्षिप्तदेवासुरमहोरगाः । एकवीरासहायाश्च अप्रयत्नेन लीलया ॥
आब्रह्मभवनं शश्वत्परिवर्तयितुं क्षमाः । . . . .
Īśvara[1] IX : 243-259a

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

Digitized by Google

Original from
UNIVERSITY OF MICHIGAN



CAṆḌA

(To face entry § 611, p. 235)

Digitized by Google

Original from
UNIVERSITY OF MICHIGAN

§ 610

द्वारस्य दक्षिणे चण्डं कृष्णवर्णं चतुर्भुजम् । शङ्खचक्रगदापाणिं त्रिणेत्रं रक्तलोचनम् ॥
द्वारस्योत्तरपार्श्वे तु त्रिणेत्रं भीमरूपिणम् । पुरतो वैनतेयं च सुवर्णाभं कृताञ्जलिम् ॥
करण्डमकुटं नीलवाससं प्रियदर्शनम् । . . . .

Viṣvaksena XX : 148-150*a*

§ 611

*तरुणादित्यसंकाशो महोरस्कश्चतुर्भुजः । उन्नतश्चोन्नतांसश्च पूर्णांगो नातिमांसलः ॥
तनूदरो निम्ननाभो रोमराजिविराजितः । दंष्ट्राकरालवदनः पिङ्गश्मश्रुजटाधरः ॥
मधुपिङ्गलनेत्रश्च कुटिलभ्रूलतायुतः । प्रलम्बलोलश्रवणः पृथुघ्राणः स्मिताननः ॥
कुण्डलालङ्कृतश्चैव हारकेयूरभूषितः । बद्धोष्णीषललाटश्च तिलकेनाप्यलङ्कृतः ॥
शुक्लाम्बरधरः स्रग्वी भुजयुग्मेऽस्य दक्षिणे । प्रोद्यतं संस्मरेच्चक्रं प्रज्वलन्तीं गदां परे ॥
श्रोणीतटनिषण्णां च विश्रान्तां वसुधातले । पूर्वे वामकरे शङ्खमन्यस्मिंश्चाक्षसूत्रकम् ॥
एवं गणाधिपश्चण्डो विक्रमेणापराजितः । क्रुद्धो विघ्नायुतानां च क्षणात्संहरणक्षमः ॥
ध्येयो गर्भगृहद्वारशाखामूले तु दक्षिणे । . . . .

Pārameśvara XI : 12-19*a*

§ 612

. . . एवंरूपं तु संचिन्त्य प्रचण्डं तु तथा शृणु ॥
शङ्खचक्रगदापाणिं रक्तवर्णं चतुर्भुजम् । नीलाग्रनासिकायुक्तं नागाभरणभूषितम् ॥

Viṣvaksena XX : 150*b*-151

§ 613

क्रुद्धो विघ्नायुतानां तु क्षणात्संहरणक्षमः । ध्येयो गर्भगृहद्वारशाखामूले तु दक्षिणे ॥
†तत्रैवापरभागे तु प्रचण्डं त्वीदृशं यजेत् । किंतु सव्यापसव्याभ्यां भुजाभ्यां स्याद्विपर्ययः ॥
भुजद्वये यच्चण्डस्य वामे संपरिकीर्तितम् । दक्षिणे तत्प्रचण्डस्य ध्येयं वा परिकल्प्य वा ॥

Īśvara[1] IX : 19-21

§ 614

चतुर्बाहुं द्विबाहुं वा ध्यायेत् द्वारस्य वामके । धातारं पीतवर्णं तु विधातारमनुप्रभम् ॥

Viṣvaksena XX : 157

---

* *cf.* Pauṣkara IV : 163-169; *See* also Īśvara[1] IX : 12*b*-18

† *cf.* Pārameśvara XI : 19*b*-21*a*; *See* also Pauṣkara IV : 171*b*-172

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 615

अथाग्रमण्टपद्वारशाखायुगलसंस्थितौ । पद्मगर्भप्रतीकाशावतिभीमपराक्रमौ ॥
चण्डप्रचण्डसदृशौ भुजलाञ्छनभूषणौ । रक्ताम्बरधरौ चैव रक्तस्रगनुलेपनौ ॥
गणौ धातृविधातारौ ध्यात्वा संपूज्य तत्परः । . . . .

Īśvara[1] IX : 29-31*a* ; Pārameśvara XI : 28*b*-30

§ 616

दक्षिणे तत्प्रचण्डस्य ध्येयं वा परिकल्प्य च । पद्मगर्भप्रतीकाशौ तादृशौ भीमविक्रमौ ॥
रक्ताम्बरधरौ चैव रक्तस्रगनुलेपनौ । गणौ धातृविधातारौ देवौ दक्षिणतः स्थितौ ॥

Pauṣkara IV : 173-174

§ 617

अतसीकुसुमश्यामौ पीतमाल्याम्बरान्वितौ । पीतोष्णीषधरौ रौद्रौ प्राग्वद्भुजविभूषितौ ॥
गणौ चण्डाकृतिधरौ दुर्दर्शौ दुरतिक्रमौ । जयं च विजयं नाम्ना प्रत्यग्भागे तथा न्यसेत् ॥

Pauṣkara IV : 175-176=Īśvara[1] IX : 49*b*-51*a*=Pārameśvara XI : 54-55

§ 618

. . . *क्षीरकुन्दावदातौ च नीलकौशेयवाससौ ॥
नीलनीरजवर्णाभैः पुष्पैर्भूषितविग्रहौ । पूर्वोक्तगणसादृश्यौ नाम्ना भद्रसुभद्रकौ ॥
तद्द्वारबाह्यतः पश्चात्पार्श्वयोर्गोपुरस्थितौ । एतौ गणेश्वरौ न्यस्येत् ध्यात्वा वा परिकल्प्य वा ॥
अथवा द्विभुजावेतौ तदा भद्रस्य दक्षिणम् । करं तु तर्जनीयुक्तं वाममीषत्तु कुञ्चितम् ॥
गदाग्रोपरि विश्रान्तं गदामूलोपरि स्थितम् । व्यत्यस्तं दक्षिणं पादं वामं तु भुवि संस्थितम् ॥
भद्रस्य वामयोर्विप्रा यदुक्तं पाणिपादयोः । दक्षयोस्तत्सुभद्रस्य दक्षोक्तं वामकं भवेत् ॥
किंतु तद्वामहस्तं तु युक्तं विस्मयमुद्रया । यद्वा भद्रो दक्षकरेऽभीतिमुद्रासमन्वितः ॥
गदोपरिष्टाद्विश्रान्तवामहस्तो द्विजोत्तमाः । पश्चात्करद्वयेनापि चक्रशङ्खधरः क्रमात् ॥
सुभद्रस्तु गदान्यस्तदक्षहस्तस्तथेतरे । अभीतिमुद्रासंयुक्तश्चक्रशङ्खसमन्वितः ॥

Īśvara[1] IX : 75*b*-83

* *cf.* Pārameśvara XI : 81-86 ; *See* also Pauṣkara IV : 177-178*a*

Digitized by Google Original from UNIVERSITY OF MICHIGAN

BHADRA

(*To face entry § 618, p. 236*)

Digitized by Google

Original from
UNIVERSITY OF MICHIGAN

Digitized by Google

Original from
UNIVERSITY OF MICHIGAN

§ 619

. . . आसन्नप्रसवा पार्श्वेऽजामुखाः पुरुषाः स्थिताः ॥
दिव्यायुधधरा ह्यष्टौ स्वचिह्नाङ्कितमस्तकाः । चक्री मुसलवान् शङ्खी खड्गी चैव गदाधरः ॥
शार्ङ्गी पद्मी तथा वज्री नराकारा द्विपाणयः । दक्षिणे तर्जनीमुद्रा वामः कट्यवलम्बितः ॥

Pādma ' kr. ' XXII : 44*b*-46

Deities found in the inner (first) courtyard

Deities of the inner, or first, courtyard* are the following : Upendra (§620–§622) ; Sūrya (§623–§625) ; Candra (§626-§629) ; Kāma (§630–§632) ; Gajānana, also known as Vināyaka (§633-§641) ; Ṣaṇmukha (§642-§645) ; Kubera (§646-§649) ; Rudra (§650–§654) ; Kṣetreśa, also known as Vāstupuruṣa (§655-§658) ; and Brahmā (§659-§665). It should be understood that all of these beings are seen as devoted to the Lord Viṣṇu, bearing emblems and marks that pertain to Him. For examples, both Vināyaka and Rudra—usually depicted in Indian art and iconography as Śaivite deities—are clearly devotees here of Viṣṇu, the former carrying the conch and discus, the latter holding a rosary to symbolize his constant repetition of the "*aṣṭākṣara*"-*mantra* addressed to Nārayana.

§ 620

. . . उपेन्द्रः शङ्खदण्डारिपद्मायुधविभूषितः ॥

Pādma " kr. " XVI : 41*b*

§ 621

. . . उपेन्द्राद्यष्टकं चापि द्विहस्तमरिशङ्खगम् ॥

Pādma ' kr. ' XXII : 53*b*

§ 622

उपेन्द्रः पूर्वदिग्भागे संस्थितो द्विजसत्तम । वह्नौ तेजोधराख्यस्तु दक्षिणे दुरतिक्रमः ॥
नैर्ऋते तु महाकर्मा पश्चिमे तु महाह्रदः । अग्राह्यो वायुदिग्भागे वसुरेतास्तथोत्तरे ॥
पूर्वोत्तरे वर्धमानस्साक्षी गगनगोचरे । आधारनिलयं नाम्ना सर्वस्याधोगतं स्मरेत् ॥
एते स्फटिकवर्णाभाः श्वेतमाल्याम्बरान्विताः । गणित्रकं रथाङ्गं च शङ्खं चैव गदां तथा ॥
दधाना मुख्यदक्षादिमुख्यवामान्तमेव हि । करैश्चतुर्भिस्सुसमा मुकुटादिविभूषिताः ॥
तेजसा विघ्नजालानि प्रेरयन्तो महौजसः । स्थानकैस्संस्थितास्सर्वे ध्यानोन्मीलितलोचनाः ॥

* It should be noted that most of these deities may also have shrines of their own outside the temple precincts.

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

अथवा द्विभुजा एते वज्राद्यं दशकं क्रमात् । दक्षेण लोकपालीयं धारयन्तः करेण तु ॥
गणित्रकं तु वामेन वरदाभयदास्तु वा । तदा वर्णाङ्गरागाद्यैरिन्द्रादिसदृशास्तु वा ॥
Īśvara[1] IX : 59-66 = Pārameśvara XI : 64-71

§ 623

जपाकुसुमसङ्काशं पीतवस्त्रविभूषितम् । मकुटाङ्गदचित्राङ्गं द्विकरं कमलोज्ज्वलम् ॥
Nāradīya XXVIII : 47

§ 624

. . . मार्ताण्डं द्विभुजं रक्तं रक्ताम्बरधरं स्थितम् ॥
पृष्ठभागे शिरश्चक्रं स्थाने विपुलमण्डलम् । बिभ्राणं कमलद्वन्द्वं हस्ताभ्यां च किरीटिनम् ॥
उरःप्रदेशे विपुले स्यमन्तकमहामणिम् । आसीनं वा सुखं बिम्बे पद्मेऽष्टदलसंयुते ॥

* * *

आदित्या द्वादश तथा तद्रूपादि दिनेशवत् । . . . .
Pādma 'kr.' XXII : 12b–14, 47a

§ 625

. . . ग्रामस्योत्तरपार्श्वे तु सूर्यस्यायतनं भवेत् ॥
चतुर्द्वारं विधातव्यं प्राग्द्वारं वा यथाविधि । मण्डपं वाथ कूटं वा प्रासादं चैकभूमिकम् ॥
वृत्तं वा चतुरश्रं वा कारयेत् तत्र चायतम् । प्रतिमामारभेत् तत्र नवतालप्रमाणतः ॥
अरुणं पीतवस्त्रं च दीप्तकुण्डलधारिणम् । रक्तहस्ताङ्घ्रिनेत्रं च कवचेनोपशोभितम् ॥
नानारत्नाङ्कमकुटं रत्नमण्डलशोभितम् । रथासने समासीनं कुर्यात् सिंहासनेऽपि वा ॥
कुर्याच्चामरधारिण्यौ उषासंध्ये च पृष्ठतः । रक्ते शुक्लाम्बरे चैव चूडामकुटशोभिते ॥
यमः सुवर्चला चापि अर्चनापीठपार्श्वयोः । कृष्णो यमस्तु वर्णेन गौरी चैव सुवर्चला ॥
Sanatkumāra "Śiva" I : 142b-148

§ 626

. . . सोमस्सौम्याननः कार्यो द्विभुजोऽलङ्कृतश्शुभः ॥
Hayaśīrṣa "Ādi" XXIII : 8b

§ 627

पूर्वादौ वारिजदले मेषप्रभृतिराशिभिः । सेवितं कल्पयेत्सोमं द्वाभ्यां कुमुदधारिणम् ॥
Pādma 'kr.' XXII : 15

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 628

सिताभं रक्तवस्त्रं तु द्विभुजं शान्तिविग्रहम् । पद्मपत्रायताक्षं च कुक्कुटं सृणिभूषितम् ॥

Nāradiya XXVIII : 104

§ 629

. . . ग्रामस्योत्तरतः पार्श्वे सोमस्यायतनं भवेत् ॥
चतुरश्रं तु वृत्तं वा हस्तिपृष्ठमथापि वा । प्राग्द्वारं वापि कुर्वीत प्रत्यग्द्वारमथापि वा ॥
श्वेताश्वाङ्कं मृगाङ्कं वा शशाङ्कं वापि कारयेत् । नवतालप्रमाणेन प्रतिमां कारयेत् ततः ॥
शुक्लं रक्ताम्बरधरं शुक्लमण्डलशोभितम् । सिंहासने समासीनं कुर्यात् कुमुदमालिनम् ॥
बद्धपादद्वयं सोमं द्विभुजं रक्तलोचनम् । पश्चाच्चामरधारिण्यौ रेवती चैव रोहिणी ॥
शुक्लकृष्णाम्बरधरे पीतमाल्यविभूषणे । श्यामपीते तु वर्णेन चूडामकुटशोभिते ॥
ज्योत्स्ना चापि निशा चापि अर्चनापीठपार्श्वयोः । शुक्लकृष्णे च कर्तव्ये पीताम्बरविभूषणे ॥
प्रासादस्याग्रतः कुर्यात् श्वेताश्वस्थानमुत्तमम् । मृगस्थानं तु वा कुर्याद् यथाश्रद्धं विचक्षणः ॥

Sanatkumāra " Śiva " I : 343b-350

§ 630

कामं रक्तनिभं रक्तप्रसवाम्बरधारिणम् । हस्ताभ्यामैक्षवं चापं बिभ्राणं सुमनःशरान् ॥
चतुर्भुजं चतुर्वक्त्रं जटामुकुटधारिणम् । वरदाभयप्रदं मुख्यहस्ताभ्यामन्यहस्तयोः ॥
कुण्डिकामक्षसूत्रं च बिभ्राणं च सुखासनम् । . . . .

Pādma " kr. " XXII : 16-18a

§ 631

कन्दर्पं कारयेत्तत्र पीतवर्णं बृहद्भुजम् । रक्तवासःपरीताङ्गं रक्तपुष्पादिभूषितम् ॥
विचित्रमकुटं शान्तमुभयांसोपवीतकम् । विस्तीर्णोरःस्थलं कान्तं तनुमध्यं कृशोदरम् ॥
सुकुमारं सुगुप्ताङ्गं पुष्पबाणेक्षुधन्विनम् । पञ्चबाणान्वितं कुर्यादस्य वै दक्षिणं करम् ॥
इक्षुचापान्वितं कुर्याद्वामं कामस्य वै करम् । तापिनी मोहिनी चैव मर्दिनी च प्रमाथिनी ॥

Nāradiya XXVIII : 88-91

§ 632

. . . ग्राममध्ये च कोणे वा कंदर्पस्थानमाचरेत् ॥
प्रत्यग्द्वारं क्रमात् कृत्वा पूर्वोक्तैर्द्रव्यविस्तरैः । हस्तिपृष्ठं तु वा कुर्यात् परिवृत्तमथापि वा ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

हस्तिपृष्ठमशोकाङ्कं मकराङ्कमथोत्तरम् । अशोकं प्रतिमाशूलं कंदर्पस्य विशिष्यते ॥
नवतालप्रमाणेन प्रतिमां कारयेत् ततः । पीतवर्णं सितापाङ्गं रक्ताम्बरविभूषणम् ॥
रक्तगन्धानुलिप्ताङ्गं रक्तपुष्पोपशोभितम् । रक्ताशोकस्रजा युक्तं रक्ताङ्घ्रिकरपल्लवम् ॥
विचित्ररत्नमकुटमुभयांसोपवीतकम् । विस्तीर्णोरःस्थलोपेतं तनुमध्यं कृशोदरम् ॥
तं षोडशाब्ददेशीयं सुकुमारं मनोहरम् । पुष्पचापशरोपेतं तप्तकाञ्चनसन्निभम् ॥
सिंहासने समासीनं कारयेत् स्यन्दनेऽपि वा । बद्धदक्षिणपादं तु पीठस्थेतरपादकम् ॥
पश्चाच्चामरहस्ते तु हली चापि च वारुणी । वसन्तश्चापि सोमश्च कर्तव्यौ तस्य पार्श्वतः ॥
रागश्चापि मदश्चापि रक्तशुक्लाम्बरस्रजौ । पृष्ठतो भित्तिभागेऽस्य कुर्यात् पञ्चायुधानि तु ॥
तापनी मोहिनी चापि मर्दनी च प्रमाथिनी । हरिणी चेति पञ्चैता इषवः स्युर्मनोभुवः ॥
स्त्रीरूपधारिणीः कुर्यात् पुष्पाङ्कशिरसः पृथक् । तापनी रक्तवर्णा तु रक्ताशोकाङ्कमूर्धजा ॥
मोहिनी पीतवर्णा स्यात् संरक्तोत्पलमूर्धजा । मर्दिनी हरिवर्णा तु संरक्तोत्पलमूर्धजा ॥
प्रमाथिनी ततो गौरी कुमुदाङ्कितमूर्धजा । हरिणी धूम्रवर्णा स्यादुत्पलाङ्कितमूर्धजा ॥
दक्षिणां दिशमारभ्य वामान्तं तु समापयेत् । प्रासादस्याग्रतः कुर्यान्मकरस्थानमुत्तमम् ॥

Sanatkumāra "Śiva" I : 293b-307

§ 633

. . . गजाननं चतुर्बाहुं लम्बकुक्षिं सितप्रभम् ॥
करण्डिकामुकुटिनं लम्बयज्ञोपवीतिनम् । वामहस्तेन मुख्येन संगृहीतमहाफलम् ॥
इतरेण तु हस्तेन भग्नदन्तपरिग्रहम् । अपराभ्यां च हस्ताभ्यां पाशाङ्कुशधरं प्रभुम् ॥

Pādma "kr." XXII : 18b-20

§ 634

विनायको महाकारो बृहत्कुक्षिर्गजाननः । त्रिणेत्रोऽथ बृहच्छुण्डो नागयज्ञोपवीतवान् ॥
मुखं सप्तकलं तस्य विस्तारेण सुरोत्तम । दैर्घ्ये चाष्टकलं वक्त्रं शुण्डं षट्त्रिंशदङ्गुलम् ॥
कला द्वादश नासा तु ग्रीवा सार्धकलोच्छ्रिता । पीनवक्षा गणेशस्तु उन्नतोराः प्रशस्यते ॥
षट्त्रिंशदङ्गुलायामं कण्ठगुह्यान्तरं भवेत् । समं सुशोभनं तत्तु द्व्यङ्गुला नाभिरिष्यते ॥
ऊरूजङ्घे तथा पादे कर्तव्ये द्वादशाङ्गुले । द्व्यङ्गुलौ चोच्छ्रितौ पादौ द्वादशाङ्गुलमायतौ ॥
स्वदन्तं दक्षिणे हस्ते परशुं च निवेशयेत् । लड्डुकैः पूर्णपात्रं च उत्पलं वामतो न्यसेत् ॥
सुमुखः सुबिडालाक्षः पार्श्वद्वयव्यवस्थितौ । . . . .

Hayaśīrṣa "Ādi" XXIV : 14-19 [*sic*]

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 635

ग्रामस्य दक्षिणे पार्श्वे स्थानं गणपतेर्भवेत् । मण्डपं वाथ कूटं वा प्रासादं वाथ शक्तितः ॥
उत्तराभिमुखद्वारं कारयेत् तन्त्रवित्तमः । कारयेत् प्रतिमां पश्चात् पूर्वोक्तैर्द्रव्यविस्तरैः ॥
सितवर्णं चतुर्बाहुं महाकुक्षिं महाभुजम् । शूर्पकर्णं महानासमेकदंष्ट्रं गजाननम् ॥
कुर्यादपरिवारं तु गणेशं चासनाश्रितम् । अष्टतालप्रमाणेन रक्तास्यं रक्तलोचनम् ॥
वदन्ति सप्ततालेन षट्तालेनापि वा परे । मुण्डमालापरीतांसं चूडामकुटधारिणम् ॥

Sanatkumāra 'Śiva' I : 89-93

§ 636

. . . योऽसौ नारायणस्साक्षात्स हि विघ्नेश उच्यते ॥
योऽसौ विघ्नेश इत्युक्तः स हि नारायणः स्मृतः । वासुदेवमयत्वार्चाभ्यावृतत्वान्महामुने ॥
नैव जानन्ति तदिदं मुनयस्तत्त्वदर्शिनः । इदं तु नावम्मन्ये गुह्यादेकं तु नारद ॥
देवैरभिहितज्ञानं तव स्नेहात्प्रदर्शितम् । तस्मात् श्रियं च दुर्गां च वाणीं विघ्नेशमेव च ॥
स्वातन्त्र्येणार्चयेद्धीमान् सर्वकामार्थसिद्धये । श्रियादीनां तु बोद्धव्यं लक्षणं तन्त्रवित्तमैः ॥
तस्माच्छ्रियादिमूर्तीनां स्वातन्त्र्यं तु परार्थकैः । उत्तमात्मा तु पूजायां पूर्ववल्लक्षणं भवेत् ॥

Viṣvaksena X : 110*b*-115

§ 637

. . . गजाननो जयत्सेनो हरिवक्त्रो महाबलः ॥
कालप्रकृतिसंज्ञश्च चतुर्थः कमलोद्भव । गणराजेश्वराश्चैते चत्वारश्चण्डविग्रहाः ॥
आज्ञाप्रतीक्षकाश्चास्य सुश्वेतचमरोद्यताः । विनायकादयश्चैव विघ्नेशप्रवरास्तु ये ॥
अमीषां गणनाथानां नित्यमाज्ञानुपालिनाम् । ईशानादिषु कोणेषु पद्मबाह्ये स्थितान् यसेत् ॥
वीक्षमाणा विभोर्वक्त्रं तत्तुल्यस्थानके स्थिताः । तद्वत्कराङ्कितास्सर्वे किन्तु मुद्राविवर्जिताः ॥
ध्यानमेषां पृथग्भूतं शारीरमवधारय । भीमद्विपेन्द्रवदनं चतुर्दंष्ट्रं त्रिलोचनम् ॥
कम्बुग्रीवं चतुर्बाहुं पूर्णचन्द्रायुतद्युतिम् । हारनूपुरकेयूरमेखलादाममण्डितम् ॥
नानास्रग्गन्धवस्त्राढ्यमनौपम्यपराक्रमम् । ध्यायेद् गजाननमतो जयत्सेनं च संस्मरेत् ॥
महत्तुरङ्गवदनं पद्मरागाचलप्रभम् । द्रवच्चामीकराक्षं च त्वनेकाद्भुतविग्रहम् ॥
हरिवक्त्रमतो ध्यायेत् सटाच्छुरितमस्तकम् । निष्टप्तकनकप्रख्यं घोरघर्घरनिस्वनम् ॥
मृगराड्वदनं विप्राः कल्पान्तानलवेगिनम् । कालप्रकृतिनामानं भावयेदञ्जनाद्रिवत् ॥
दंष्ट्राकरालवदनं पिङ्गलश्मश्रुलोचनम् । झषकुण्डलभृद्रौद्रं मीनवन्निम्ननासिकम् ॥
गणराजेश्वरा ह्येते महापुरुषलक्षणैः । संयुक्ताश्चारिबलैर्विप्राः आपादात् कन्धरावधि ॥

Īśvara[1] VIII : 148*b*-160

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 638

. . . प्राग्भागे विघ्नराट् तासामग्रं चापि भुजद्वयम् ॥
पार्श्वतः स्थितयोः सख्योर्न्यस्य स्कन्धे स्थितं भवेत् । . . . .
Pādma "kr." XXII : 43*b*-44*a*

§ 639

. . . गजाननं चतुर्बाहुं लम्बकुक्षि सितप्रभम् ॥
करण्डिकामुकुटिनं लम्बयज्ञोपवीतिनम् । वामहस्तेन मुख्येन सङ्गृहीतमहाफलम् ॥
इतरेण तु हस्तेन भग्नदन्तपरिग्रहम् । अपराभ्यां च हस्ताभ्यां पाशाङ्कुशधरं प्रभुम् ॥
Pādma "kr." XXII : 18*b*-20

§ 640

. . . विघ्नेशं वैष्णवं वक्ष्ये सर्वविघ्नोपनाशनम् ॥
उत्पत्तिलक्षणं चास्य संक्षेपाच्छृणु नारद । नारायणांशकस्साक्षादाकाशत्मकमव्ययम् ॥
हस्तिवक्त्रसमायुक्तं लीलयाग्नौ समुद्भवम् । दुष्टप्रध्वंसनार्थाय यागाग्नौ परमं हरिम् ॥
अतस्तल्लक्षणं वक्ष्ये विविक्तेन शृणु क्रमात् । श्वेतं कृष्णं तथा श्यामं रक्तं वा मुनिसत्तम ॥
संज्ञात्वलक्षणोपेतं कारयेद्धस्तिवक्त्रकम् । सर्वावयवसंपूर्णं सर्वाभरणभूषितम् ॥
चतुर्भुजं (द्विनेत्रं वा?) त्रिनेत्रं वाथ कारयेत् । नागयज्ञोपवीताङ्गं श्वेताम्बरसमन्वितम् ॥
शङ्खचक्रसमायुक्तं परशुं रशनाङ्कुशम् । विन्यसेन्मुनिशार्दूल कर्तुरिच्छावशात् क्रमात् ॥
कारयेद्यागविघ्नस्य नाशार्थं विघ्ननायकम् । दक्षिणेऽस्य भवेच्चक्रमभयं तु परे भुजे ॥
वामे शङ्खं न्यसेदूर्ध्वं ह्यधस्ताल्लकुटं न्यसेत् । एवं चक्रादि संप्रोक्तं परत्वमधुना शृणु ॥
दक्षिणे परशुं न्यस्य ह्यधो पाशाङ्कुशं न्यसेत् । अक्षमालां न्यसेद्वामे पाशं वाऽधरदोष्णि ते ॥
विन्यसेन्मुनिशार्दूल हस्तिवक्त्राग्रके फलम् । द्विःप्रकारं मया प्रोक्तं विघ्नेशायुधकान् भवेत् ॥
विन्यसेन्मुनिशार्दूल साधकेच्छानुरूपतः । स्वतन्त्रे परतन्त्रे च रूपमेवं तु चिन्तयेत् ॥
आखुस्तद्वाहनं प्रोक्तो गरुडं वाग्रतो न्यसेत् । नारायणांशकत्वाच्च प्रोक्तस्तस्य खगेश्वरः ॥
एवं संकल्प्य विघ्नेशं पूजयेद् द्विजसत्तम । अत्र किञ्चिद्विशेषोऽस्ति शृणु त्वं मुनिपुङ्गव ॥
विमानलक्षणं चैव प्रतिमाद्रव्यमेव च । प्रतिष्ठालक्षणाश्चैव परिवारस्य लक्षणम् ॥
पूजनादीनि सर्वाणि मूर्तीनां मुनिपुङ्गव । साधारणक्रमं ज्ञात्वा आदिमूर्तिवदाचरेत् ॥
परमात्मादिमूर्तीनां विघ्नेशान्तं महामुने । स्वतन्त्रे परतन्त्रे च पूजयेत् स्वस्वविद्यया ॥
गणानां तु ऋचा तत्र विघ्नेशं योऽर्चयेद् द्विज । सर्वान् कामानवाप्नोति रणे तु विजयं भवेत् ॥
वामनं विघ्नराजस्य सतन्त्रं च मुनीश्वर । एकबेरं तु संस्थाप्य पूजयेत्तु दिने दिने ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

VIGHNEŚA

(*To face entry § 640, p. 242*)

Digitized by Google

Original from
UNIVERSITY OF MICHIGAN

Digitized by Google

Original from
UNIVERSITY OF MICHIGAN

षड्बेरं वा त्रिबेरं वा संस्थाप्य विधिनामुना । नेष्यतेऽस्मिन् श्रियादीनि शक्तिस्थापनकं परम् ॥
विशेषमन्त्रसंप्रोक्तं शेषं साधारणं भवेत् । लक्ष्मीं पुष्टिं च वाग्देवीं मेधां दुर्गां च तत्र वै ॥
स्वतन्त्रे परतन्त्रे च पूजयेत् स्वस्वविद्यया । विशेषमन्त्रसंप्रोक्तं पूजाभेदमथो शृणु ॥

Viṣvaksena XI : 285*b*-306

§ 641

वैनायकमभिप्रेतसकलार्थप्रसादकम् । मात्राङ्गुलिवशेनैव गृहार्चामानकल्पनम् ॥
नाधिकं हस्तमानाच्च न न्यूनं द्वादशाङ्गुलात् । कौतुकं भवनेऽभ्यर्च्यं शिलादार्वादिजं ध्रुवम् ॥
अङ्गुलैः प्रतिमामानं वर्णानामुच्यते क्रमात् । हस्तमानमितार्चा स्याद्भवने पूर्वजन्मनः ॥
अङ्गुलैरेकाविंशत्या प्रतिमा वसुधापतेः । विशामेकोनविंशत्या द्वाभ्यां शूद्रस्य हीनया ॥
अर्धचित्रं तदाभासं भवने भुक्तिवर्धनम् । द्वादशाङ्गुलमानार्चा लोहजा पूर्वजन्मनः ॥
नवाङ्गुला क्षत्रियस्य विशस्सप्ताङ्गुला मता । पञ्चाङ्गुला चतुर्थस्य प्रतिमा भवने भवेत् ॥
प्रतिमा यन्मयी क्लृप्ता प्रभापीठादि तन्मयम् । यद्वा सौवर्णबिम्बस्य राजतं ताम्रमेव वा ॥
लोहेन चेदुत्तमेन प्रतिमा निर्मिता भवेत् । तदनन्तरलोहेन प्रभापीठादि कल्पयेत् ॥
त्रिलोहजायामर्चायां सुवर्णं वा प्रभादिकम् । रत्नस्फटिकजानां तु प्रतिमानां प्रभादिकम् ॥
लोहजं स्मर्यते ब्रह्मन् रहस्यमिदमीरितम् । . . . .

Pādma ' kr.' XXXII : 27-35 [*sic.*]

§ 642

षण्मुखं च चतुर्बाहुं दाडिमीकुसुमप्रभम् । वराभयप्रदौ मुख्यौ जघन्यौ शक्तितोमरौ ॥
कल्पयेत् श्यामलां कात्यां चतुर्भिर्बाहुभिः क्रमात् । गदाधरामभयदां शङ्खचक्रवरायुधाम् ॥
हारकेयूरमुकुटनूपुरादिविभूषिताम् । अथवाष्टभुजां दुर्गां दक्षिणे दोश्चतुष्टये ॥
अभीतिशरनिस्त्रिंशचक्रमण्डलमण्डिताम् । वामे गदाधनुःखड्गशङ्खायुधरां वराम् ॥
अथवा द्वादशभुजां विशेषः समुदीर्यते । दक्षिणे परशुं शूलं वामे पाशाङ्कुशौ तथा ॥
घण्टेति पञ्च पूर्वाणि यद्वा द्वादशबाहुकाम् । अनुक्रमायुधं कल्प्यं भुजेऽन्यस्मिश्चतुष्टये ॥
द्वात्रिंशदपि वा हस्ता शस्त्रमूह्यं तु चोदितम् । . . . .

Pādma ' kr.' XXII : 21-27*a*

§ 643

. . . श्रीपत्रपुष्पसङ्काशं बालरूपं चतुर्भुजम् ॥
मुक्तिहस्तं विशेषेण बालाभरणभूषितम् । मयूरलाञ्छितं कुर्यात् प्रासादं तु विशेषतः ॥

Nāradiya XXVIII : 41*b*-42

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 644

. . . मयूरवरमारूढो द्विभुजो बालरूपधृक् ॥
कुक्कुटं वामहस्ते तु शक्तिं दक्षिणतो न्यसेत् । द्विभुजस्तु समाख्यात एकवक्त्रोऽग्निजस्स्वयम् ॥
षण्मुखष्षड्भुजो वापि भुजैर्द्वादशभिस्तथा । स्थापितः कार्तिकेयो वै दर्शनात्पापनाशनः ॥
Hayaśirṣa 'Ādi' XXIV : 20b-22

§ 645

. . . ग्रामस्योत्तरतः कुर्यात् स्कन्दस्यायतनं महत् ॥
प्राग्द्वारं ताम्रचूडाङ्कं हस्त्यङ्कं वा यथाविधि । असम्भवे चोत्तरस्या दिक्षु सर्वासु कारयेत् ॥
निर्ऋतीशानकोणं तु वर्जयित्वा विचक्षणः । निर्ऋते ग्रामनाशः स्यादीशाने राष्ट्रनाशनम् ॥
तस्मात् सर्वप्रयत्नेन कोणं तु परिवर्जयेत् । प्रासादस्यानुसारेण प्रतिमां कारयेत् ततः ॥
मृदा प्रशस्ता प्रतिमा तदलाभेऽन्यसङ्ग्रहः । दाडिमीपुष्पसंकाशं दशसंवत्सराकृतिम् ॥
चतुर्भुजं शक्तिधरं चूडामकुटधारिणम् । मुण्डमालापरीतास्यमुभयांसोपवीतिनम् ॥
वत्सकिङ्किणिपादं तु पीतमाल्याम्बरान्वितम् । शक्तिहस्तं तु रक्ताक्षं रक्ताङ्घ्रिकरपल्लवम् ॥
अष्टतालप्रमाणेन सप्ततालेन वा पुनः । षट्तालेनापि वा कुर्यादतो हीनं न कारयेत् ॥
स्कन्दमेव प्रकुर्वीत स्थितमासीनमेव वा । पादपीठं भवेत्पद्मं स्थानं मायूरवाहने ॥
चामरव्यग्रहस्ते तु विद्या प्रज्ञा च पृष्ठतः । दक्षिणे चोत्तरे कार्ये सिते रक्ताम्बरस्रजौ ॥
मुण्डमालापरीतांसे चूडामकुटशोभिते । प्रासादस्याग्रतः कुर्यान्मयूरस्थानमुत्तमम् ॥
Sanatkumāra 'Śiva' I : 118b-128

§ 646

. . . सुवर्णवर्णं धनदं पिङ्गाक्षं तुङ्गनासिकम् ॥
Nāradiya XXVIII : 29b

§ 647

धनदस्यालयं कुर्यात् ग्रामस्योत्तरपार्श्वतः । हस्तिपृष्ठं च नाम्ना तु दक्षिणद्वारमुत्तमम् ॥
त्रिभागहीनः प्रासादो गोपुरात्तु विधीयते । तस्मादर्धविहीनं च प्राकारस्योच्छ्रयं विदुः ॥
शिलाभिरिष्टकाभिर्वा कुर्यान्नान्यैः कदाचन । प्रासादयुक्त्या कर्तव्या प्रतिमा लोहमृण्मयी ॥
नवतालस्य मानेन स्थितं कुर्याद्धनेश्वरम् । अष्टतालस्य मानेन केचित्तं परिचक्षते ॥
त्रिपादं वृत्तपिङ्गाक्षं पीतरक्ताम्बरस्रजम् । सपट्टमुण्डमालं च चूलिकामौलिधारिणम् ॥
तुङ्गनासं च तुङ्गास्यं पिङ्गकेशं बृहद्भुजम् । धनेशं कारयेत् तत्र यथावित्तानुसारतः ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

परिवारद्वयं प्रोक्तमृद्धिगुप्ती च पृष्ठतः । चामरव्यग्रहस्ते तु स्थिते देव्यौ सितप्रभे ॥

* * *

तथैव जुहुयादाज्यं दधिक्षीरमधूनि च । द्वारस्योभयपार्श्वे तु पीनरूपौ सितप्रभौ ॥
शङ्खपद्मनिधी कार्यौ स्वासीनौ मृण्मयौ शुभौ । तस्य पूजां प्रवक्ष्यामि कुबेरस्य महात्मनः ॥

Sanatkumāra ' Śiva ' I : 72-78; 80-81

§ 648

सुपीनदेहो यक्षेशो हारकेयूरभूषितः । सर्वलक्षणसम्पूर्णो गदाशङ्खधरोऽनघः ॥
नानारत्नोज्वलेनाथ मकुटेन विभूषितः । कर्तव्यो वामनाकारो द्विभुजो नरवाहनः ॥

Hayaśirṣa " Ādi " XXV : 10-11 [Adyar *ms.*]

§ 649

. . . लम्बोदरं महाकायं कल्पयेद्धनदं ततः ॥
निष्टप्तकनकप्रख्यं वरदं दण्डिनं तथा । तस्य दक्षिणतः पार्श्वे जृम्भलो मणिभद्रकः ॥
कल्प्यः शङ्खनिधिं चैव वामपार्श्वे तु कल्पयेत् । नलकूबरमम्भोजनिधिं च शिबिकुण्डलम् ॥
जृम्भलो हेमवर्णाभो मणिभद्रो मणिप्रभः । नलकूबरनामा तु श्यामवर्णः प्रकीर्तितः ॥
शिबिः कुण्डलवान् रक्तः सर्वेऽभीतिवरप्रदाः । . . . .

Pādma ' kr. ' XXII : 27*b*-31*a*

§ 650

. . . अक्षमालाधरं देवमष्टाक्षरपरायणम् ॥
त्रिणेत्रं श्वेतसङ्काशं सौम्यं सोमार्धधारिणम् । नारदाद्यृषिसंघैश्च सेवितं दक्षिणामुखम् ॥

Viṣvaksena XX : 163*b*-164

§ 651

. . . द्विहस्तं शूलिनं रौद्रं नागाभरणभूषितम् ॥
व्याघ्रचर्मपरीधानं जटामकुटधारिणम् । त्रिनेत्रं रौद्रतारं च सुस्थितं शशिशेखरम् ॥

Nāradīya XXVIII : 54*b*-55

§ 652

ऐश्वर्यस्येति निर्दिष्टं ईश्वरस्य वदामि ते । कुन्देन्दुमुक्तसंकाशं द्विपादं च चतुर्भुजम् ॥
रक्ताक्षित्रयसंयुक्तं जटामकुटधारिणम् । पीताम्बरधरं सौम्यं परशुं शूलधारिणम् ॥
सर्वाभरणसंयुक्तं सर्वशोभितशोभनम् । इत्थं हरस्य रूपं तु देवर्षे विद्धि नारद ॥

Viṣvaksena XX : 95-97

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 653

रुद्रं त्रिनेत्रमरुणं जटामुकुटधारिणम् । चतुर्भुजं नीलकण्ठमिन्दुरेखाविभूषितम् ॥
वैयाघ्रचर्मवसनं सर्वाभरणभूषितम् । कराभ्यामपि मुख्याभ्यां वरदाभयदं स्थितम् ॥
अपराभ्यां च हस्ताभ्यां बिभ्राणं परशुं मृगम् । . . . .

Pādma 'kr.' XXII : 31-33a

§ 654

. . . प्रासादस्यानुरूपेण प्रतिमां कारयेद् बुधः ॥
आसीनमेव कुर्वीत स्वैरं पूर्वे च पश्चिमे । स्थितमन्यत्र कुर्वीत शयितं न तु कारयेत् ॥
पीतमष्टभुजं कुर्याच्चर्माम्बरधरं हरम् । बद्धनागोत्तरासङ्गं जटामकुटधारिणम् ॥
नीलकण्ठं त्रिनेत्रं च कुर्याच्छशिकलाधरम् । हरं पिङ्गलपद्माक्षमङ्गारसमतारकम् ॥
त्रिशूलपट्टसधरमर्कमालाविभूषितम् । आसीनं वा स्थितं वापि हरमेवं तु कारयेत् ॥
पद्मपीठं भवेत् स्थाने सिंहासनमथासने । पश्चाच्चामरधारिण्यौ गङ्गा च यमुना तथा ॥
दक्षिणे चैव वामे च स्थिते कार्ये सितासिते । उपमन्युरुमा चापि अर्चनापीठपार्श्वयोः ॥
दक्षिणे चोत्तरे कार्यौ रक्तश्यामौ कृताञ्जली । उपमन्युर्जटाधारी उमा वै मौलिधारिणी ॥
स्कन्दं सनत्कुमारं च तयोः कुर्वीत पृष्ठतः । दक्षिणे चोत्तरे चैव दशसंवत्सराकृती ॥
ब्रह्मा चाग्निश्च कर्तव्यौ देवस्योभयपार्श्वतः । दक्षिणं बाहुमाश्रित्य ब्रह्मा तिष्ठति यन्त्रितः ॥
वामबाहुं समाश्रित्य वह्निस्तिष्ठत्ययन्त्रितः । तयोस्तु पृष्ठतः कार्यौ चन्द्रादित्यौ यथाविधि ॥
उत्तमाः परिवारास्तु दशैते परिकीर्तिताः । कुमारद्वयहीनाः स्युः शेषास्त्वष्टौ च कीर्तिताः ॥
ब्रह्माग्निसोमसूर्यैश्च कुमारद्वितयेन च । विहीनास्त्वधमाः प्रोक्ताश्चत्वारः परिवारकाः ॥
पूर्ववल्लोकपालाश्च कर्तव्याः स्युर्यथादिशम् । प्रासादस्याग्रतः कुर्याद् वृषभस्थानमुत्तमम् ॥

Sanatkumāra 'Śiva' I : 175b-188

§ 655

क्षेत्रेशं द्विभुजं ध्यायेत् हेमाभवसनस्रजम् । नीलजीमूतसङ्काशं दण्डहस्तं महातनुम् ॥
मुष्टिकृद्वामहस्तेन यागक्षेत्रस्य पालकम् । कुण्डलाद्यैरलङ्कारैरेतौ शोभितविग्रहौ ॥
वीक्षमाणौ विभोर्वक्त्रं तेजसातीव निर्भरौ । . . . .

Īśvara[1] IX : 7-9a=Pārameśvara XI : 6b-8

§ 656

क्षेत्रपालं चतुर्बाहुं करण्डीमुकुटोज्वलम् । दंष्ट्राकरालवदनं भ्रुकुटीकुटिलेक्षणम् ॥
वामे करे दण्डधरं मुख्ये वामेतरे करे । दधानं तर्जनीमुद्रां पाशाङ्कुशममुख्ययोः ॥

Pādma 'kr.' XXII : 34-35

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 657

प्रासादद्वारबाह्ये तु ह्यधस्स्थौदुम्बरान्तिमे । वास्त्वीशक्षेत्रानाथौ द्वौ स्थितौ दक्षेतरक्रमात् ॥
शुक्लवक्त्रः कृष्णदेहो द्विभुजो रत्नपात्रधृक् । दक्षिणेन करेणैव सर्वामरसमाश्रयः ॥
पुण्डरीकसमानाभवस्त्रस्रगनुलेपनः । गदोद्यतकरो विप्राः ध्यातव्यो वास्तुपूरुषः ॥

Īśvara[1] IX : 4-6

§ 658

वास्त्वीशक्षेत्रनाथौ द्वौ स्थितौ दक्षेतरक्रमात् । शुक्लवस्त्रः कृष्णदेहो द्विभुजो रक्तपात्रधृक् ॥
दक्षिणेन करेणैव सर्वामरसमाश्रयः । पुण्डरीकसमानाभवस्त्रस्रगनुलेपनः ॥
गदोद्यतकरो विप्र ध्यातव्यो वास्तुपूरुषः । . . . .

Pārameśvara XI : 4-6*a*

§ 659

ब्रह्माणं पीतवर्णं तु चतुर्हस्तं चतुर्भुजम् । आसीनं वा स्थितं वापि हंसारूढं तु वा द्विज ॥

Nāradīya XXVIII : 25

§ 660

चतुर्मुखं चतुर्बाहुं जटामकुटधारिणम् । हिरण्यवर्णमासीनं पीताम्बरधरं प्रभुम् ॥
ब्रह्माणं कारयेत् तत्र पूर्वोक्तैर्द्रव्यविस्तरैः । आसीनमेव कुर्वीत न स्थितं शयितं न च ॥

Sanatkumāra 'Śiva' I : 36-37

§ 661

. . . *भचक्रं भ्राम्यमाणं तु दण्डहस्तं प्रजापतिम् ॥
हंसारूढं स्वसंस्थं तु ध्यायेत् ध्रुवमजं विभुम् । एते चतुर्भुजास्सर्वे अक्षसूत्रविभूषिताः ॥
चिन्तयन्तः परं तत्त्वं वराभयकरोद्यताः । दिव्याभरणदिग्धाङ्गा दिव्यमाल्याम्बरान्विताः ॥
दिव्यरूपधराश्चैव दिव्यगन्धवहा द्विज । रक्तशुक्लनिशापीतनीलचम्पकसप्रभैः ॥
व्योमस्फटिकमार्तण्डराजोपलनिभैस्तथा । माल्याङ्गरागवसनैर्महार्घैस्समलङ्कृताः ॥
भूषिता भूषणैश्चित्रैः करण्डमकुटादिभिः । एभ्यश्चतुर्भुजो ब्रह्मन् विज्ञेयो वृषभध्वजः ॥
द्विभुजास्त्वमराश्चान्ये वरदाभयदास्तु वा । इति लोकेश्वरेषूक्तं ततो वै द्विजसत्तम ॥

Pārameśvara XI : 101*b*-107

* *cf.* Pauṣkara IV : 158; also Īśvara[1] IX : 99

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 662

चतुर्मुखश्चतुर्बाहुः बृहज्जठरमण्डलः । ऊर्ध्वबद्धजटाजूटो लम्बकूर्चस्समेखलः ॥
शोभनं दक्षिणे हस्ते दद्यादस्याक्षसूत्रकम् । स्रुचञ्च दक्षिणे दद्यात् वामहस्ते च कुण्डिकम् ॥
आज्यस्थालीं कुशोपेतां वामहस्ते नियोजयेत् । शङ्खचक्रगदापाणिः कार्यो वाथ चतुर्मुखः ॥
सरस्वती च सावित्री वामदक्षिणसंस्थिते । कर्तव्या मुनयो वाथ परिवार्य व्यवस्थिताः ॥
विनिविष्टस्तदा ब्रह्मा कार्यो नेष्टस्ततोऽन्यथा । . . . .

Hayaśīrṣa XXI : 12-16a

§ 663

. . . पद्मासनसमायुक्तं विधिं कनकसन्निभम् ॥
चतुर्भुजं समासीनं चतुर्वक्त्रं सनातनम् । सर्वावयवसम्पूर्णं सर्वाभरणशोभितम् ॥
सर्वदेवमयं सूक्ष्मं सृष्टिस्थितिलयात्मकम् । एवंरूपं ततो ध्यायेत् ब्रह्माणं कमलोद्भवम् ॥
ब्रह्मणो दक्षिणे हस्ते स्रुक्स्रुवादिं च विन्यसेत् । वामहस्ते न्यसेत्पद्ममूर्ध्वे चैव कमण्डलुम् ॥
अभयं वरदं वापि वामहस्तापरं मुने । एवंरूपं तु संचिन्त्य ब्रह्माणं कमलासनम् ॥

* * *

तस्य दक्षिणपार्श्वे तु मेधां वामे सरस्वतीम् । विन्यसेत्तु स्वतन्त्रे तु परतन्त्रे तयोर्विना ॥
एवं कृत्वा विधानेन ब्रह्माणं कमलासनम् । पद्मानाभस्य मूर्ताङ्गं परतन्त्रमिति स्मृतम् ॥
स्वतन्त्रे मुनिशार्दूल शिल्पिभिस्सह मन्त्रयेत् । कल्पयेद्विधिवत् पद्मे संस्थाप्य कमलासनम् ॥
ब्रह्मस्थानेऽथवा पूर्वे दक्षिणे पश्चिमेऽथवा । ग्रामस्योत्तरपार्श्वे वा कल्पयेदास्पदक्रमान् ॥
नदीतीरे तटाकस्य तीरे वा मुनिसत्तम । यजमानेच्छया कल्प्यं प्रासादान् विधिवत् क्रमात् ॥
तद्वाह्यदैविकं वापि कारयेत्कमलासन । षड्वेरं तु त्रिबेरं वा स्थापयेत्तु विधानतः ॥

* * *

. . . ब्रह्मणोऽग्रे विमाने च हंसं तस्य पदे मुने ॥
कारयेद्वाहनार्थाय यथाकामं विचित्रितम् । गर्भागारे प्रवक्ष्यामि परिवारविशेषकम् ॥
पैशाचे द्वारदेशे च शृणु गुह्यमनुत्तमम् । कपिलः काश्यपो दक्षो दक्षिणं पक्षमाश्रितः ॥
रुद्रो वह्निर्मरुच्चापि वामपार्श्वं समाश्रिताः । भृगुश्च नारदश्चापि विमानद्वारपालकौ ॥
चन्द्रादित्यौ न्यसेत्तत्र द्वितीयद्वारपालकौ । शङ्खपद्मनिधी चैव तृतीयद्वारपालकौ ॥

Viṣvaksena XI : 206b-210; 213-218; 221b-225

§ 664

परिवारान् प्रवक्ष्यामि उत्तमाधममध्यमान् । उत्तमा द्वादश प्रोक्ता मध्यमाः षट् प्रकीर्तिताः ॥
अधमाश्चापि चत्वारः परिवारा यथाक्रमम् । कपिलः कश्यपो दक्षो दक्षिणं पक्षमाश्रिताः ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

रुद्रो वह्निर्मनुश्चापि वामपार्श्वं समाश्रिताः । पश्चाच्चामरहस्ते तु सावित्री च सरस्वती ॥
दक्षिणे चोत्तरे भागे स्थिते देव्यौ च पृष्ठतः । भृगुश्च नारदश्चापि अर्चनापीठपार्श्वयोः ॥
दक्षिणे चोत्तरे कार्यौ स्वासीनौ च कृताञ्जली । तयोस्तु पृष्ठतः कार्यौ चन्द्रादित्यौ ततः स्थितौ ॥
षण्णां तु कपिलादीनामासनं स्थानमेव वा । ब्रह्माणं दशतालेन नवतालेन चेतरान् ॥
त्रीन् मुनीनष्टतालेन कारयेत् तन्त्रवित्तमः । शुक्लो वर्णेन कपिलः कश्यपः पीतवर्णयुक् ॥
दक्षस्त्वजमुखः शुक्लो रुद्रोऽग्निश्चाग्निसंनिभौ । मनुः श्यामः सिते देव्यौ वर्णतः परिकीर्तिते ॥
पद्मकिञ्जल्कवर्णाभो भृगुः शुक्लश्च नारदः । शुक्लरक्तौ च चन्द्रार्कौ वर्णतः परिकीर्तितौ ॥
पद्मासनो भवेद् ब्रह्मा शेषाः सर्वे त्वनासनाः । सहासनं न कुर्वीत ब्रह्मणोऽन्यैस्तु दैवतैः ॥
यस्तु मोहेन वै कुर्याद् विनाशमचिराद् व्रजेत् । प्रासादस्याग्रतः कुर्याद् हंसस्थानं विचक्षणः ॥
ग्रामस्य मध्ये पूर्वे च पश्चिमद्वारमारभेत् । दक्षिणे चोत्तरे चैव पश्चिमे प्राङ्मुखं ततः ॥
न कुर्यात् कोणदेशेषु ब्रह्मणः स्थानमुत्तमम् । आग्नेये कोणदेशे तु राष्ट्रनाशं विनिर्दिशेत् ॥
नैर्ऋते कोणदेशे तु ब्राह्मणानां च विप्लवः । वायव्ये राजनाशः स्यादीशाने सर्वसंक्षयः ॥
तस्मात् सर्वप्रयत्नेन कोणं तु परिवर्जयेत् । मध्यमास्तु परीवारा वक्ष्यन्ते अनुपूर्वशः ॥
देव्यौ मुनी च चन्द्रार्कौ षडेते मध्यमाः स्मृताः । चत्वारो मुनिचन्द्रार्का अधमाः परिवारकाः ॥

Sanatkumāra 'Śiva' I : 38-53

§ 665

अनन्तरं अखिलमध्यस्थितमतितप्तहाटकनिभं, चतुर्वक्त्रं, चतुर्भुजं, अक्षसूत्रकमण्डलुधरं, पुष्पाञ्जलिपुटं, हंसाधिरूढं, पश्चिमाशाभिमुखं, कमलोद्भवं, कमलवासं, सिद्धधातृविधातृचारणप्रजापतिकेलाकेशलोकसृष्टिकर्तृब्रह्मात्मभूमुनिवर्यमुनिवेदविकारिसर्ववित्कमलोद्भवस्रुक्स्रुवप्रणीताज्यहोमऋत्विक्सप्तजिह्वसमोद्यतसंहृतिसंशयपूपापूपमखफलवेतालसुकालचपलरतिवर्धनाव्यक्तगुणवान्वद्गीतप्रणवबीजप्राच्यदिग्देवगर्भवेगहिरण्यगर्भविरिञ्चिशालिभुक्शालिशालिनिधिशशिककलञ्चजम्बूगोदोहवेदशल्मलीपुष्करभासनविकर्णरेवतजिनजयरथंतरऋग्यजुस्सामाथर्वणपुलस्त्यपुलह्यग्निरामनु तथा परिव्राट्क तु(?)प्राचेतसद्विजशरप्रभाषट्च्छिशिरकुसुमाकरहैमन्तग्रीष्मरोऽणाङ्गगर्भवर्धनैः, पक्षिगर्भवशानगैः, हिमरूपैः महाकायैः, असंख्यपरिवारैः, व्याघ्रवक्त्रैः, सिंहवक्त्रैः, मार्जारवक्त्रैः, शंखमुखैः, हस्तिमुखैः व्यालवक्त्रैः, कुक्कुटवक्त्रैः, शुकवक्त्रैः, वलाहकवक्त्रैः, हंसवक्त्रैः, मयूरवक्त्रैः, त्तिरीकास्यैः चक्रवाकाननैः, कपोतास्यैरेकनेत्रैर्बहुनेत्रैरेकपादैर्द्विपादैरेकवक्त्रैर्बहुवक्त्रैरसंख्येयैः परिवृतं विष्णुपार्षदेदश्वरगणमध्यस्थं सगणं ध्यात्वा, अर्घ्यादिभिरभ्यर्च्य, तद्दिनबलिद्रव्यं प्रदाय,

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

आचमनाञ्जलिं दर्शयित्वा, बिम्बाभिमुखं पुष्पाञ्जलिस्साधको नमस्कृत्य, समस्तमङ्गलमुखवादि-मुखवासं विधाय तद्देवतृप्त्यै शब्दादि घोषयेत् ।

Viṣvaksena XXVII

Deities of the second courtyard

The following deities, described iconographically in the excerpts below, are found in the second courtyard : Śaṅkhanidhi and Padmanidhi (the conch and lotus personified : §666) ; Kapila (§667) ; Virabhadra (§668–§669) ; Kumuda and Kumudākṣa (§670–§672) ; Puṇḍarika and Vāmana (§673–§675); Śaṅkukarṇa and Sarpanetra (§676–§678) ; Mānava and Pṛśnigarbha (§679) ; Sumukha and Supratiṣṭhita (§680–§681) ; and the twin Aśvins (§682–§683).

§ 666

द्वितीयगोपुरद्वारपार्श्वयोरन्तरस्थयोः । विन्यसेद् द्वारपालाख्यावेतौ वामादितो गणौ ॥
निधीशौ शंखपद्मौ तु निधिभाण्डोपरिस्थितौ । स्थूलदन्तौ च दान्तौ च द्विभुजौ भगवन्मयौ ॥
कुटिलभ्रूलतायुक्तौ किञ्चिदुन्नतवक्षसौ । लम्बोदरौ सुपीनांगौ ह्रस्वपाणिपदौ द्विज ॥
शंखपद्मसमानाभौ नीलशुक्लाम्बरस्रजौ । मकुटाद्यैस्तु विविधैरलंकारैरलंकृतौ ॥
दक्षिणेन करेणैव धारयन्तौ सरोरुहम् । इतरेण करेणैव ह्युत्तानेन निधिं स्वकम् ॥
अथवा वामहस्ताभ्यां प्रवेशाभीतिदान्वितौ । करद्वयेन शंखं वा पद्मं वा दधतौ द्विज ॥
वामेन धारयेत्पद्मं यद्वा शंखनिधीश्वरः । शङ्खपद्मधरौ वापि शिरसा मकुटोपरि ॥
शङ्खचक्रधरौ वापि साधकेच्छावशेन तु । उन्नम्य दक्षिणं जानुं ह्यासनीकृत्य चेतरत् ॥
एवं शंखनिधेः पद्मनिधेस्तु विपरीतवत् । तद्द्वारशाखानिष्ठौ तु संस्मरेद्दक्षिणादितः ॥

Pārameśvara XI : 72-80 *cf.* Īśvara[1] IX : 67*b*-75*a*

§ 667

विद्याधिदेवं भगवन् चतुर्वक्त्रं चतुर्भुजम् । लम्बकूर्चं जटादण्डकमण्डल्वक्षसूत्रिणम् ॥
फुल्लरक्ताम्बुजाभासं श्वेतपद्मकराङ्कितम् । श्रुती ऋगाद्या वक्त्रेभ्यः प्रोद्गिरन्तमतः स्मरेत् ॥
निर्धूमाङ्गारवर्णाभं शङ्खपद्माक्षसूत्रिणम् । फुल्लरक्तांशुविभवं देवताध्यात्मसूत्रकम् ॥
ध्यायेदभयपाणिं तं कपिलं तेजसां निधिम् । योऽन्तः सर्वेश्वरो देवः साक्षिभूतो व्यवस्थितः ॥
स्फटिकोपलवद्भावान् स्वशक्त्याऽर्थान् बिभर्ति च । अविद्याविकृतानां तु भक्तानां सत्पदाप्तये ॥

Īśvara[1] XXIV : 214-218

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 668

. . . रुद्ररूपी वीरभद्रस्तासां पश्चात्स्थितो भवेत् ॥

Pādma 'kr.' XXII : 43*b*

§ 669

. . . वीरभद्रो वृषारूढो वीणाहस्तस्त्रिलोचनः ॥

मातृणामग्रतः कार्यो जटाखण्डेन्दुमण्डितः । . . . .

Hayaśirṣa 'Ādi' XXIV : 1*b*-2*a* (Adyar *ms.*)

§ 670

*कुमुदः कुमुदाक्षश्च प्रसन्नवदनेक्षणौ । तुहिनाचलसङ्काशौ प्रथमे वयसि स्थितौ ॥
नानाभरणदिग्धाङ्गौ नानाकुण्डलभूषितौ । नानामाल्यान्वितौ चैव नानामौलिधरौ द्विज ॥
नानागन्धविलिप्ताङ्गौ नानावस्त्रविभूषितौ । कुमुदाख्यगणेशस्य ध्यातव्यो दक्षिणः करः ॥
चन्द्ररश्मिप्रतीकाशचामरेण विराजितः । अभिगच्छाभयं ध्यायेत् द्वितीयं दक्षिणं करम् ॥
भवभङ्गात्प्रपन्नानां परेषां गुणशासने । तस्यैवाद्यं वामकरं प्रबुद्धकमलोद्यतम् ॥
तूष्णीं भीसूचकं ध्यायेद्बहिःस्थानां करं परम् । एते द्वे कुमुदाक्षस्य वैपरीत्येन भावयेत् ॥
द्वाभ्यां द्वाभ्यां कराभ्यां तु अन्येषामेवमेव हि । पुण्डरीको वामनश्च द्वावेतौ हुतभुक्प्रभौ ॥
गरुडध्वजहस्तौ च शेषमन्यत्पुरोदितम् । कृत्वा ध्यात्वाऽथवा न्यस्य दक्षिणे भगवद्गृहे ॥
शङ्कुकर्णाभिधानो यः सर्वनेत्रश्च पौष्कर । द्वावेतौ चम्पकाभौ तु मायूरव्यजनोद्यतौ ॥
महाविभूतेर्देवस्य प्रत्यग्वायुदिगास्थितौ । सुमुखः सुप्रतिष्ठश्च वामभागगतौ विभोः ॥
चिन्त्यौ मुद्गफलश्यामौ आतपत्रकरोद्यतौ । नोक्तं शेषकराणां यत् तद्विद्धि कुमुदोद्यतम् ॥
एते भगवतो विप्र त्वन्तरङ्गा मयोदिताः । कर्मणा मनसा वाचा तद्भावगतमानसाः ॥

Pauṣkara IV : 183-194

§ 671

अथ खल्वखिलाण्डयोनेरशेषधिषणातुरप्रमेयस्यानवरतसुखिनो हरेः महोत्सवादिषु ग्रामादिवास्तुषु ऐन्द्रादिदिक्स्थितानां कुमुदादीनां वर्णरूपवाहनायुधपरिवारमन्त्रार्चनादि यथामति कथयिष्ये ।

कुमुदः—कुमुदस्तु पुनः कुमुदशुभ्रो मुकुन्दः कुन्दवासाः त्र्यक्षश्शङ्खचक्रधरः कृताञ्जलिपुटो ग्रामाभिमुखो हस्त्यारूढो देवग्रहगणमध्ये स्थितः । उत्कटः प्रकटोन्मुखो-

* *cf.* Īśvara[1] IX : 32*b*-38*a*; *see* also Pārameśvara XI : 32-38*a*

Digitized by Google Original from UNIVERSITY OF MICHIGAN

ऽश्वग्रीवोऽश्ववदनोऽश्वजिह्वो हस्तिवक्त्रो मुकुन्दो हस्तिपादः । केशववामननरकनक्रमन्ददृष्टि-कन्दककटुलोचनपटहाक्षविशालाक्षमकराक्षमकरपाण्डुरपाण्डुपृष्ठदुर्दिनसुदिनवामदेवमहानिर्मधुसूदन-कालकालभावनभगवद्भानुमद्भागधेयभास्करविश्वसेनविसेनविष्वक्सेनविसारविस्तारनिरस्तरविदण्डि-दण्डकार्मुककामभृत्कामनाशैः पञ्चाशद्भिः पार्षदैः सौम्यैः नानाविधैः नानाकारैः परिवृतं एवं संस्मृत्य अर्घ्यपाद्याचमनगन्धपुष्पादिधूपैरभ्यर्च्य अनन्तरं दिनबलिद्रव्यं निवेद्यं दत्वा आचमनाञ्जलिं दर्शयित्वा हरेर्मुखवासो विधाय तद्दिग्देवतृप्त्यर्थं शङ्खदुन्दुभिनृत्तगीतादि कारयेत् ।

Viṣvaksena XXVII

§ 672

कुमुदाक्षः—कुमुदाक्षं पुनराग्रे यागस्थितं नीलच्छविं नीलवासं त्रिणेत्रं चतुर्भुजं मुष्टियुद्धं हस्ते खड्गमुद्गरधारिणं महिषारूढं ग्रामाभिमुखमसुरग्रहणमध्यस्थं निधनाग्नि-जिह्वतानोऽग्निरूपाग्निकेशाग्निवर्णाग्निवक्त्रकमण्डकवरतदेवदेवलशाठघटशमकशङ्कुश्रवोमरीचिद्रोण-मरीचिमहिषकुम्भनासकुम्भकर्णकुम्भकविधारिविक्रमिमस्करिमस्करसूकरास्यशशमुखसिंहमुखनरसिंह-नलकालभुक्कालसूत्रिसूत्रिविनालिनालकर्णैः परिवृतममुं यथापूर्वमभ्यर्च्य तद्दिनबलिद्रव्यं निवेद्य, आचमनं दत्वा, अञ्जलिमुद्रां दर्शयित्वा, बलिबेरे मुखवासान्तं विधाय, तद्दिग्देवतृप्त्यर्थं तूर्याणि घोषयेत् ।

Viṣvaksena XXVII

§ 673

. . . द्वाभ्यां द्वाभ्यां कराभ्यां वै अन्येषामेवमेव हि ॥
*पुण्डरीको वामनश्च द्वावेतौ हुतभुक्प्रभौ । गरुडध्वजहस्तौ च शेषमन्यत्पुरोदितम् ॥
कृत्वा ध्यात्वाऽथवा न्यस्य दक्षिणे नैर्ऋतेऽपि च । शङ्कुकर्णाभिधानो यः सर्वदेवाभिसंज्ञितः ॥
द्वावेतौ चम्पकाभौ तु मायूरव्यजनोद्यतौ । महाविभूतेर्देवस्य प्रत्यग्वायुदिगास्थितौ ॥
सुमुखः सुप्रतिष्ठश्च विभोः सोमेशदिक्स्थितौ । चिन्त्यौ मुद्गफलश्यामावातपत्रकरोदितौ ॥

Īśvara[1] IX : 38b-42

* Īśvara[1] IX : 39-40a || Pārameśvara IX : 38b-39

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 674

पुण्डरीकः—पुनरन्तकाशास्थितं पुण्डरीकं पुण्डरीकच्छविं, पुण्डरीकवदनं, त्रिलोचनं, चतुर्भुजं, शङ्खचक्रधरं, कृताञ्जलिपुटं, ग्रामाभिमुखमश्वारूढं, गन्धर्वग्रहगणमध्यस्थं, यमधर्मधर्मधरधर्मराजधनुर्धरविनयप्रश्रयनिश्रेयकिरणालसत्कुणपकबाहुकुब्जप्रांशुविमर्दानिष्णान्तपतिरनुकेशनिर्मलनिवहव्यूहोताहाहाहूहूरक्षणैलकपालककंकणककटुकावटुशङ्खचक्रिशार्ङ्गधन्विशार्ङ्गधरवासुदेव विभद्रककेतुमत्केतुकभक्षमीधर्मविद्धर्मनित्यदण्डभृन्महिषासनविवस्वत्पाशहृत्शूलहृत्त्वष्टांशुमत्प्रभृतिभिः परिवारैः परिवृतं इमं पूर्वमभ्यर्च्य, तद्दिनबलिद्रव्यं निवेद्य, आचमनाञ्जलिं दर्शयित्वा, अनन्तरं बलिकौतुके मुखवासो विधाय तद्दिग्देवतृप्त्यर्थं शङ्खादि घोषयेत् ।

Viṣvaksena XXVII

§ 675

ततो निर्ऋतिदिशि स्थितं वामनं धूम्रवर्णधरं धूम्रवाससं, त्रिणयनं, चतुर्भुजं, शूलखड्गमुद्गरधरं, मुष्टियुद्धहस्तं, शकटारूढं, ग्रामाभिमुखं यक्षग्रहणान्तःस्थितं, निर्ऋतिप्रकृतिविकृतिसुकृतिदारुणदमकरक्षसलक्षकासहमासपक्षनिष्ठुरकरभाषणप्रलयंबबलाबलंवकप्रमाणवीरसेन....क्षकामरूपिविरूपणसर्वगसगसर्वविद्गौरसंभवप्रवहनिवहैकतनिवहकर्तृवरुणससुमर्दनमदनकपर्दिवृषनान्दकिनन्दककीनाशवरुणरणादिभिः परिवारैः परिवृतं पूर्ववदभ्यर्च्य तद्दिनबलिं निवेद्य, आचमनं विधाय, अञ्जलिं निर्वर्त्य कौतुकमुखवासो विधायानन्तरं तूर्याणि घोषयेत् ।

Viṣvaksena XXVII

§ 676

शङ्कुकर्णाभिधानो यस्सर्वनेत्राभिसंज्ञितः । द्वावेतौ चम्पकाभौ तु मयूरव्यजनोद्यतौ ॥
महाविभूतेर्देवस्य प्रत्यग्वायुदिगास्थितौ । सुमुखस्सुप्रतिष्ठश्च विभोस्सोमेशदिक्स्थितौ ॥
चिन्त्यौ मुद्गफलश्यामावातपत्रकरोद्यतौ । नोक्तशेषकराणां तु तद्विद्धि कुमुदोदितम् ॥

Pārameśvara XI : 40-42

§ 677

वरुणदिगालयं, शङ्कुकर्णं, पीतवर्णं, त्रिवीक्षणं, पीतवाससं, चतुर्भुजं, शङ्खचक्रधरं, कृताञ्जलिपुटं, ग्रामाभिमुखं, व्याघ्रारूढं, पितृगृहगणमध्यस्थं, वारुणवरुणपाशीपाशधरगरुत्क्षेपणक्षौमवर्णनारदपर्वतरविसुनामावामनहंसवैकुण्ठपरमपराहहनूमत्पुमान्भद्रविभद्रप्रभवमहाकर्णविकर्णशशंकलकविवानरकर्णिकर्णिकांशुमच्छङ्खभृद्धन्त्रीज्ञान्वाहविनाहककुतवदक्षिणदसुप्रदसुगन्ध-

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

पूजितगन्धतार्क्ष्यगरुडविरोधककन्यादिभिः परिवृतं पितृगृहगणमध्यस्थं पूर्ववदभ्यर्च्य, तद्दिनबल्याचमनाञ्जलिं कृत्वा बलिबेरमुखवासं दत्वा, शङ्खादीन् घोषयेत् ।

Viṣvaksena XXVII

§ 678

अथ पुनरनिलं द्यनिलं, अतितप्तहाटकनिभं, सर्पनेत्रं, त्रिनेत्रं, चतुर्भुजं, हारिद्रवाससं, परशुपाशधरमुष्टिसन्नद्धहस्तं, ग्रामाभिमुखमभ्रगरुढं, नागाभरणभूषितं, नागगणस्थितं, मरुन्मारुतगोगर्ववायुसतानिलगलवर्तकं(?)मार्गणोपेतगण[२६६]बलाबलनिधिवीरधौरेयकविधवसयसङ्गाधिकर(?)मालिमालनिधिविश्वस्तसमस्तसाहसवसवकककूटकटकगन्धवहपटुपित्तरोगिसेवनसेवकसमौषधभोजनरोगारोगबलकारकारणगर्तकर्तपारविरिबलावलैः स्वपरिवारैः परिवृतं यथोक्तमभ्यर्च्य, आचमनाञ्जलिं दर्शयित्वा, बलिबिम्बान्नवासः निर्वृत्य तद्दिनबलिं दत्वा, दिग्देवतातृप्त्यर्थं शङ्खादीन् घोषयेत् ।

Viṣvaksena XXVII

§ 679

मानवः पृश्निगर्भश्च जगत्यम्बरसंस्थितौ । तप्तकाञ्चनवर्णाभौ करण्डमकुटोज्वलौ ॥
दंष्ट्राकरालवदनौ नानामाल्यधरौ द्विज । तत्र मानवसंज्ञश्च पक्षनागविभूषितः ॥
तस्य दक्षिणहस्तश्च शङ्खराजेन शोभितः । तत्पृष्ठे कटके हस्ते अंगुष्ठान्तरलोलगा ॥
अक्षमालेति सा प्रोक्ता सर्वसिद्धिकरी सदा । मुख्यवामकरे चक्रं तत्पृष्ठे चोर्ध्वगा गदा ॥
एतद्धि पृश्निगर्भस्य वैपरीत्येन भावयेत् । कटिहस्ताद् गदां ध्यात्वा पक्षनागौ विना द्विज ॥

Pārameśvara XI : 43-47

§ 680

अनन्तरं अमृतकराशास्थितं, श्यामच्छायं, श्यामाम्बरधरं, कृताञ्जलिपुटं, ग्रामाभिमुखं रक्षोग्रहगणमध्यस्थं, सुमुखमेषारूढं, सोमसोमलकसामवित्सामवित्सामनाशनसुधासुधाताधाताङ्गिसुरराष्ट्रकामुककलिकलावान्कालचक्रकालकूटविषोज्वलभूतामृतनाम्भःकेयूरीकेवलीवलीकृष्णविशङ्गीरेखालेखेपिकशुकोलूकपञ्चकश्येनमुखमार्जारवत्क्रगुल्मकर्णवकङ्कणविशेषोच्छेदकर्दमपूतिविग्रहसामलरसावत्सरवेगीवेगचतुरैः राक्षससहस्रगणैर्नायकैः परिवृतमेनं सगणध्यानं यथापूर्वमभ्यर्च्य, तद्द्वारि बलिद्रव्यं निवेद्य, अञ्जलिं दर्शयित्वा, प्रतिमामुखवासो विधाय, आशादेवतातृप्त्यर्थं तूर्यादि घोषयेत् ।

Viṣvaksena XXVII

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 681

अथ पुनः ईशानाशाप्रतिष्ठितं, सुप्रतिष्ठितं, सिंहारूढं, रजतवर्णं, रजतवाससं, त्रिणेत्रं, चतुर्भुजं, शङ्खमुद्गरधरं, मुष्टियुद्धहस्तं, अग्रहाराद्यभिमुखं, पिशाचग्रहगणमध्यस्थं, ईशानेश्वरव्यापिव्यासविनसवसुलाकापाकविशपशकुनिशकुनावटवृक्षरूक्षमकरक्षान्तिमारोमाकपिञ्जलब्रह्माण्डब्रह्मब्रह्मिब्रह्मबह्मसाधनवदीदेविदुद्वधमतिमाच्छाङ्करशाकंरथिमान्यष्टिरिष्टात्मादुष्टमर्मरकृद्विनेत्रविकलावादिनिदीपकर्णेकभुक्सर्वभुक्सर्वगसर्वभागसनातनगोविन्दगोपतिगोपाभिः परिवृतं ईशानीयं यथापूर्वमभ्यर्च्य, तद्दिनबलिं प्रदाय, अञ्जलिं दर्शयित्वा बलिबेरमुखवासान्तं कृत्वा, तद्दिग्देवतृप्त्यर्थं तूर्याणि घोषयेत् ।

Viṣvaksena XXVII

§ 682

पीतवस्त्रधरौ कान्तौ तथा पीतस्रगुज्वलौ । अश्विनौ तत्र कुर्वीत सहितौ ब्रह्मचारिणौ ॥
मकुटादिविचित्राङ्गौ पुष्पमालोपशोभितौ । . . . .

Nāradīya XXVIII : 100–101*a*

§ 683

. . . ग्राममध्ये महादिक्षु स्थानं स्यादश्विनोः शुभम् ॥
प्राग्द्वारं ग्राममध्ये स्याद् ग्रामाभिमुखमन्यतः । आयतं चतुरश्रं वा आयतं वृत्तमेव वा ॥
प्रासादमश्विनोः कुर्यादश्वाङ्कं चैकभूमिकम् । नवतालप्रमाणेन प्रतिमां कारयेत् ततः ॥
अष्टतालेन वा कुर्यात् सप्ततालेन वा पुनः । दाडिमीपुष्पसंकाशौ दशसंवत्सराकृती ॥
मुण्डमालापरीतांसौ चूडामकुटधारिणौ । पीताम्बरस्रजौ नित्यमुभयांसोपवीतिनौ ॥
फुल्लरक्तोत्पलाक्षौ तु किङ्किणीबद्धपादकौ । सिंहासने समासीनौ सहितौ ब्रह्मचारिणौ ॥
अश्विनौ तत्र कुर्वीत पूर्वोक्तैर्द्रव्यविस्तरैः । नासत्यश्चापि दस्रश्च तावुभौ नामतः स्मृतौ ॥
नासत्यो दक्षिणे स्थाप्यो वामे दस्रस्तथैव च । बद्धदक्षिणपादस्तु नासत्यः परिकीर्तितः ॥
प्रबद्धवामपादस्तु दस्रश्चापि तथा भवेत् । वामदक्षिणपादौ तु स्यातां पीठस्थितौ तयोः ॥
पश्चाच्चामरधारिण्यौ चिकित्सा चापि रोपिणी । रक्तशुक्लाम्बरे चैव चूडामकुटधारिके ॥
दक्षिणे चैव वामे च कर्तव्ये पृष्ठतस्तयोः । आयुर्वेदधनुर्वेदौ कर्तव्यौ पार्श्वतस्तयोः ॥
शुक्लरक्तौ तु वर्णेन शुक्लाम्बरधरावुभौ । धन्वन्तरिस्तथात्रेयश्चार्चनापीठपार्श्वयोः ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

आसीनौ दक्षिणे वामे शुक्लरक्तौ कृताञ्जलौ । पीतवल्कलसंवीतौ कृष्णाजिनधरावुभौ ॥
जटामौलिधरौ कार्यावष्टतालप्रमाणतः । मृतसंजीवनीं चापि विशल्यकरणीं तथा ॥
तयोस्तु पृष्ठतः कुर्याद्रक्तपीताम्बरस्रजौ । प्रासादस्याग्रतः कुर्यादश्वस्थानं विचक्षणः ॥

Sanatkumāra "Śiva" I : 318*b*-332

The eight directional deities

The eight directional deities (*diṅmūrts*) are to be afforded a shrine of their own within the temple precincts, although some may also find a place of their own outside the temple area proper. Included in the excerpts below, with iconographic descriptions, are the following : Indra (§686–§690) ; Agni (§691–§697) ; Yama (§698–§702) ; Nirṛuti (§703–§705) ; Vāyu (§709–§712) ; Kubera, called Soma here (§713–§714) and Īśāna (§715 §717). The reader will note that there is no description included here of Varuṇa.

In the opening excerpt it should be noticed the sectarian alteration that is given to the usual list, naming Nara, Nārāyaṇa, Hari and Kṛṣṇa (in place of?) the first four above. In this same excerpt, §684, it is stipulated that when the main icon of the temple stands, they stand ; when the main icon is revealed as reclining, they too should be shown lying down ; *etc.*

§ 684

दिङ्मूर्तयस्त्वधस्ताच्च चतस्रः संप्रकीर्तिताः । नरो नारायणश्चैव हरिः कृष्णस्तथैव च ॥
ऐन्द्रादिसोमपर्यन्तं चतस्रो मूर्तयः स्मृताः । केचिच्च वासुदेवादीनाचार्याः परिचक्षते ॥
अपरे पुरुषाद्यास्तु दिशामूर्तीः प्रचक्षते । एतेषामपि सर्वेषां प्रत्येकं पद्ममासनम् ॥
चित्रे चाप्यर्धचित्रे च चित्राभासेऽपि वा पुनः । स्थानासनादि कुर्वीत शयनं यानगं तथा ॥
स्थिता एव दिशामूर्तीः स्थिते देवे प्रचक्षते । आसीनाश्च तथासीने उभयं वापि कुर्वते ॥
एवं शास्त्रान्तरान्वेषी कारयेत् तन्त्रवित्तमः । . . . .

Sanatkumāra "Br." VIII : 40-44 [*sic.*]

§ 685

एते चतुर्भुजाः सर्वे अक्षसूत्रविभूषिताः । चिन्तयन्तः परं तत्त्वं वराभयकरोद्यताः ॥
दिव्याभरणदिग्धाङ्गा दिव्यमाल्याम्बरान्विताः । दिव्यरूपधराश्चैव दिव्यगन्धवहा द्विजाः ॥
रक्तशुक्लनिशापीतनीलचम्पकसप्रभैः । व्योमस्फटिकमार्ताण्डराजोपलनिभैस्तथा ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

माल्याङ्गरागवसनैः महार्घैः समलङ्कृताः । भूषिता भूषणैश्चित्रैः करण्डमकुटादिभिः ॥
एभ्यश्चतुर्भुजस्त्वत्र विज्ञेयो वृषभध्वजः । द्विभुजास्त्वथवा चान्ये वरदाभयदास्तु वा ॥
इति लोकेश्वरेषूक्तं ततो वै द्विजसत्तमाः । . . . .

Īśvara[1] IX : 100-105*a*

§ 686

शतधामनिभं ध्यायेच्चतुर्बाहुं पुरन्दरम् । (दिव्यद्विपेन्द्र)संस्थं तु सुतीक्ष्णं कुलिशोद्यतम् ॥

Pauṣkara IV : 149 = Īśvara[1] IX : 90 = Pārameśvara XI : 92*b*-93*a*

§ 687

श्यामः किरीटी द्विभुजो वासवो वज्रिदक्षिणः । वामावलम्बितकटिः सर्वकल्पपरिष्कृतः ॥

Pādma " kr. " XXII : 56

§ 688

ऐरावतगजारूढो वज्रहस्तस्सुराधिपः । द्विभुजो बहुनेत्रश्च सर्वाभरणभूषितः ॥
सर्वलक्षणसम्पूर्णः कार्यस्त्विन्द्रो नृपोपमः । . . . .

Hayaśīrṣa " Ādi " XXV : 1-2*a* [Adyar *ms.*]

§ 689

शक्रस्यायतनं कुर्यात् प्राच्यां वा ग्राममध्यमे । प्राच्यां तु पश्चिमद्वारं प्राग्द्वारं ग्राममध्यमे ॥
माहेन्द्रं नाम नाम्ना तु चतुरश्रं त्रिभूमिकम् । ततश्च प्रतिमां कुर्यान्नवतालप्रमाणतः ॥
शिलामयीं मृन्मयीं वा ततो लोहमयीं तु वा । द्वितीयभूमौ कुर्वीत नानारत्नविभूषिते ॥
सिंहासने विचित्रे तु समासीनं शतक्रतुम् । किरीटहारकेयूरप्रलम्बकटकान्वितम् ॥
दूर्वामरकतश्यामं पद्मायतविलोचनम् । पीतमाल्याम्बरधरं कल्पद्रुमसमाश्रितम् ॥
सर्वरत्नोपवीतं च सर्वाभरणभूषितम् । प्रबद्धवामपादान्तं पीठस्थेतरपादकम् ॥
एवं देवेश्वरं कुर्यात् सौम्यं कुलिशधारिणम् । कार्ये चामरधारिण्यावुर्वशी च तिलोत्तमा ॥
दक्षिणे चैव वामे च पीतवर्णे सिताम्बरे । बृहस्पतिश्च शुक्रश्च कर्तव्यौ शक्रपार्श्वयोः ॥
पीतमाल्याम्बरधरौ शुद्धस्फाटिकसन्निभौ । दक्षिणे चैव वामे च स्थितौ मौलिजटाधरौ ॥
अत्रिश्चापि शची चापि अर्चनापीठपार्श्वयोः । शुक्लरक्तौ सुखासीनौ शुक्लरक्ताम्बरस्रजौ ॥
अत्रिर्मुनिर्जटाधारी शची वै मौलिधारिणी । सर्व एव च कर्तव्याश्चाष्टतालप्रमाणतः ॥
कुर्यादैरावतस्थानं प्रासादस्याग्रतस्ततः । . . . .

Sanatkumāra " Śiva " I : 252-263*a*

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 690

शचीमाग्नेयदिग्भागे नैऋत्यां चाप्युपश्रियम् । अहल्यां वायुदेशे तु न्यसेत्कुलिशमीश्वरे ॥

Nāradiya XXVIII : 74

§ 691

अग्निरूपं प्रवक्ष्यामि तन्निबोध सुलोचने । एकं ग्रीवं त्रिवक्त्रं च द्विनासिकषडक्षकम् ॥
त्रिमेखलं त्रिपादं च सप्तजिह्वाभिरावृतम् । अजारूढं चतुःशृङ्गं जटामण्डलमण्डितम् ॥
सव्यभागे चतुर्हस्तं त्रिहस्तमपसव्यके । स्रुक्स्रुवौ चाक्षमाला च शक्तिर्दक्षिणहस्तके ॥
तोमरव्यजनं चैव घृतपात्रं तु वामके । हिरण्या कनका रक्ता कृष्णा चैव तु सुप्रभा ॥
अतिरिक्ता बहुरूपा सप्तजिह्वाः प्रकीर्तिताः । हिरण्या वारुणा जिह्वा कनका मध्यमे स्थिता ॥
रक्ता चोत्तरजिह्वा स्यात् कृष्णा याम्यदिशि स्थिता । सुप्रभा पूर्वजिह्वा स्यादतिरिक्ताग्निदिक्स्थिता ॥
बहुरूपा ईशजिह्वा.....स्थानं प्रकीर्तितम् । . . . .

Īśvara² [Nṛsiṁhakalpa] VII : 14-20a

§ 692

चतुर्भुजमुदाराङ्गं दिव्यदीप्त्युपशोभितम् । सप्तजिह्वासमोपेतं पञ्चवक्त्रविभूषितम् ॥
कोटियोजनविस्तीर्णं ज्वालापिङ्गल(भू)षितम् । भोग्यासनसमासीनं वृत्तास्यमभयङ्करम् ॥

Īśvara² [Nṛsiṁhakalpa] : XIII [*ms.*]

§ 693

ज्वालामण्डलमध्यस्थो ज्वलनो द्विभुजो भवेत् । वरदः शक्तिहस्तश्च करण्डिमुकुटोज्वलः ॥

Pādma " kr. " XXII : 57

§ 694

. . . अजारूढं स्मरेद्रक्तं शक्तिपाणिं हुताशनम् ॥
सहस्रार्चिभिराकीर्णं सहस्रादित्यभासुरम् । . . . .

Pauṣkara IV : 150=Īśvara¹ IX : 91=Pārameśvara XI : 93b-94a

§ 695

ज्वालामण्डलमध्यस्थः कूर्चालः श्मश्रुलस्तथा । योगपट्टसमोपेतो ब्रह्मसूत्रविभूषितः ॥
अविस्थोऽथ द्विबाहुर्वै कार्यो वह्निविलोहितः । दक्षिणे चाक्षसूत्रं तु कुण्डिकां वामतो न्यसेत् ॥

Hayaśīrṣa " Ādi " XXV : 3-4

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 696

. . . पूर्वे किंशुकपुष्पाभो दक्षिणे शोणितप्रभः ॥
जपाकुसुमसंकाशस्तृतीयः पश्चिमे भवेत् । पिण्डीतकप्रसूनाभश्चतुर्थाग्निस्तथोत्तरे ॥
विशेषादजचिह्नं तु वह्नेः प्रासादकोणके । रक्ताभं रक्तवस्त्रं च रत्नभूषणभूषितम् ॥
पार्श्वयोः पृष्ठतः पादास्त्रयोऽस्य विहिताश्शुभाः । पञ्चवस्त्रं त्रिवक्त्रं च सप्तजिह्वं विभावसुः ॥

Nāradīya XXVIII : 15*b*-18

§ 697

वह्नेरायतनं कुर्याद् वह्निस्थाने विचक्षणः । प्रत्यग्द्वारं तथेशाने नान्यत्र तु कथञ्चन ॥
शिलाभिरिष्टकाभिर्वा काष्ठैर्वा मृद्भिरेव वा । कुर्यात् प्रासादविस्तारं पूर्वोक्तक्रमयोगतः ॥
प्रासादयुक्त्या प्रतिमां नवतालविधानतः । कारयेल्लोहपाषाणमृदामन्यतमेन च ॥
त्रिशिखं रक्तवर्णं तद्रक्तमाल्याम्बरस्रजम् । द्विमुखं च त्रिरक्ताक्षं त्रिपदं चाष्टबाहुकम् ॥
रक्तकेशनखश्मश्रु वह्निरूपं तु कारयेत् । चत्वारः परिवाराश्च तस्य प्रोक्ता हविर्भुजः ॥
स्वधा चैव सुधा चापि पश्चादुत्तरदक्षिणे । कार्ये चामरहस्ते तु पीते शुक्लाम्बरस्रजौ ॥
स्वाहा चापि मनुश्चापि अर्चनापीठपार्श्वयोः । उत्तरे दक्षिणे कुर्यात् श्यामे रक्ताम्बरस्रजौ ॥
कृताञ्जली अथासीने किञ्चित्प्रह्वशिरोधरे । स्थिते चामरहस्ते तु स्थितो देवो हुताशनः ॥
आसनं शयनं यानं प्रतिषिद्धं हविर्भुजः । . . . .

Sanatkumāra 'Śiva' I : 3-11*a*

§ 698

महामहिषसंस्थं तु त्वञ्जनाद्रिसमप्रभम् । सुभीमदण्डहस्तं तु स्मरेद्देवं पितृश्वरम् ॥

Pauṣkara IV : 151 = Īśvara [1] IX : 92 = Pārameśvara XI : 94*b*-95*a*

§ 699

वैवस्वतश्च द्विभुजः किरीटी मेचकच्छविः । दक्षिणाभयदो दण्डी निर्ऋतिर्भीमदर्शनः ॥

Pādma 'kr.' XXII : 58

§ 700

पाशदण्डायुधोपेतो द्विबाहुर्महिषासनः । वैवस्वतः पीनकायो दिव्याभरणभूषितः ॥
विरूपैः किङ्करैर्युक्तो लक्षणैर्विविधैर्युतः । पार्श्वद्वयेऽस्य पुरुषौ कर्तव्यौ भीषणाकृती ॥

Hayaśīrṣa 'Ādi' XXV : 5-6 [Adyar *ms.*]

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 701

यमस्यायतनं कुर्यात् ग्रामादीनां तु दक्षिणे । महिषाङ्कं विशेषेण दशम्यां पूजयेत्सुधीः ॥
द्विभुजं पीतवर्णं तु दण्डमेव चतुर्दशम् । मकुटादिविचित्राङ्कं सर्वलक्षणलक्षितम् ॥

Nāradīya XXVIII : 66-67

§ 702

ग्रामस्य दक्षिणे पार्श्वे यमस्यायतनं भवेत् । तत् कुर्याद् दक्षिणद्वारं पूर्वोक्तैर्द्रव्यविस्तरैः ॥
न चान्यत्र प्रकुर्वीत यमायतनमण्डपम् । वृत्तं वा चतुरश्रं वा महिषीणां तथा भवेत् ॥
प्रतिमां कारयेत् तत्र नवतालप्रमाणतः । मेघश्यामं तु रक्ताक्षं द्विभुजं दण्डधारिणम् ॥
पीतमाल्याम्बरधरमुभयांसोपवीतकम् । विचित्रमकुटं भीमं किङ्किणीबद्धपादकम् ॥
सिंहासने समासीनं न स्थितं शयितं न च । प्रबद्धवामपादाग्रं पीठस्थेतरपादकम् ॥
कुर्याद्वैवस्वतं देवं सौम्याग्नेयगुणान्वितम् । सुधर्मा च विधर्मा च वालव्यजनशोभिते ॥
चूडामकुटधारिण्यौ पीताम्बरविभूषणे । रक्तोत्पलनिभे ते तु नीलनीरजलोचने ॥
दक्षिणे चैव वामे च स्थिते कार्ये तु पृष्ठतः । चित्रगुप्तः कलिश्चैव कर्तव्यौ यमपार्श्वयोः ॥
दक्षिणे चित्रगुप्तस्तु गौरवर्णः सिताम्बरः । नीलवर्णः कलिर्वामे पीताम्बरविभूषणः ॥
कृतान्तं चैव मन्युं च अर्चनापीठपार्श्वयोः । आसीनौ श्यामलौ कार्यौ रक्ताम्बरविभूषणौ ॥

Sanatkumāra 'Śiva' I : 231-240

§ 703

दंष्ट्राकरालवदनं कृष्णमेघसमप्रभम् । घोरं प्रेतासनं ध्यायेत् खड्गधृग्राक्षसेश्वरम् ॥

Pauṣkara IV : 152 = Īśvara[1] IX : 93 = Pārameśvara XI : 95*b*-96*a*

§ 704

दंष्ट्राकरालवदनो भ्रुकुटीकुटिलेक्षणः । दक्षिणो भीतिरुत्खड्गो करण्डिमकुटोज्वलः ॥

Pādma 'kr.' XXII : 58

§ 705

द्विबाहुः पीनदेहस्तु खड्गहस्तोऽञ्जनप्रभः । विभूषितस्सदा कार्यो राक्षसो रक्षसां पतिः ॥

Hayaśīrṣa 'Ādi' XXV : 7 [Adyar *ms.*]

§ 706

मुक्ताफलद्युतिसमं भीमं पाशकरोद्यतम् । नागकन्यासहस्राढ्यं मकरस्थमपां पतिम् ॥

Pauṣkara IV : 153 = Īśvara[1] IX : 94 = Pārameśvara XI : 96*b*-97*a*

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 707

वरुणः श्यामलः पाशहस्तो वामेऽभयप्रदः । करण्डिमकुटश्चैव . . .

Pādma 'kr.' XXII : 60

§ 708

द्विबाहुः पाशहस्तश्च मकरस्थो विभूषितः । कर्तव्यो वरुणो देवः कुण्डलाभ्यां विभूषितः ॥

Hayaśirṣa 'Ādi' XXV : 8 [Adyar *ms.*]

§ 709

नीलतोयदसङ्काशं महाध्वजपटान्वितम् । ध्यायेत्समीरणं देवं संस्थितं हरिणोपरि ॥

Pauṣkara IV : 154 = Īśvara[1] IX : 95 = Pārameśvara XI : 97*b*-98*a*

§ 710

. . . . . वायुर्धूम्रो द्विबाहुकः ॥

अङ्कुशो दक्षिणे हस्ते वामः कट्यवलम्बनः । . . . .

Pādma 'kr.' XXII : 60*b*-61*a*

§ 711

द्विबाहुर्ध्वजहस्तस्तु मृगारूढस्सलक्षणः । सर्वाभरणसंयुक्तः कार्यो वायुस्सुरोत्तमः ॥

Hayaśirṣa 'Ādi' XXV : 9 [Adyar *ms.*]

§ 712

. . . मरुतो वायुना तुल्याः . .

Pādma 'kr.' XXII : 61*b*[1]

§ 713

. . . . . सोमः सोमवदिष्यते ॥

Pādma 'kr.' XXII : 61*b*[2]

§ 714

. . . सोमं तारागणोपेतं शङ्खगोक्षीरपाण्डरम् ॥

बृहच्छशकपृष्ठस्थं शिशिरास्त्रकरं स्मरेत् । . . . .

Pauṣkara IV : 155 = Īśvara[1] IX : 96 = Pārameśvara XI : 98*b*-99*a*

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 715

वृषारूढश्चतुर्बाहुः शङ्खकुन्देन्दुसुप्रभः । कपालं वामहस्तेऽस्य शूलं हस्ते तु दक्षिणे ।
नागपाशं तथा वामे दक्षिणेन वरप्रदः । ईशानं कारयेद्देवं सर्वविद्येश्वरं प्रभुम् ॥

Hayaśirṣa 'Ādi' XXV : 22-23 [Adyar *ms.*]

§ 716

सितभूतिविलिप्ताङ्गं त्रिणेत्रं वृषवाहनम् । त्रिशूलायुधहस्तं च त्वीशानं ज्ञानिनं स्मरेत् ॥

Pauṣkara IV : 156=Īśvara[1] IX : 97=Pārameśvara XI : 99*b*-100*a*

§ 717

ईशानो रुद्रवत्कल्प्यस्तेषां वाहनमुच्यते ॥ . . . .

Pādma 'kr.' XXII : 61*a*

The nine Planetary Deities

The nine planetary deities (*navagrahas*) are personifications of the solar system, as understood by the astrologically-oriented Hindus. Here, the excerpts are all drawn from one source, the *Hayaśirṣa-saṃhitā* ("Ādi-kāṇḍa"). The following eight are described (Candra was described §626–§629, above): Ketu (§718), Rāhu (§719), Śani (§720), Śukra (§721), Guru (§722), Budha (§723), Maṅgala (§724) and Sūrya (§725 ; *cf.* §623–§625).

§ 718

भुजगार्धतनुः केतुरुपवीती च धूमलः । सव्योरुस्थितदोर्दण्डो दक्षिणेनाभयप्रदः ॥

Hayaśirṣa " Ādi " XXIII : 12 [Adyar *ms.*]

§ 719

. . . करालास्यः स्मृतो राहुः छिन्नदेहः कृताञ्जलिः ॥

Hayaśirṣa " Ādi " XXIII : 10*b* [Adyar *ms.*]

§ 720

. . . केकरस्सौरिरुच्यते . . . .

Hayaśirṣa " Ādi " XXIII : 10*a* [Adyar *ms.*]

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 721

काणस्तु भार्गवः कार्यः . . . .

Hayaśirṣa " Ādi " XXIII : 10*a* [Adyar *ms.*]

§ 722

. . . गुरुस्सौम्योऽब्जसंस्थितः ॥

Hayaśirṣa " Ādi " XXIII : 9*b*[2] [Adyar *ms.*]

§ 723

. . . बालरूपो बुधः कार्यः . . . .

Hayaśirṣa " Ādi " XXIII : 9*b*[1] [Adyar *ms.*]

§ 724

निबिडाङ्गोऽङ्गारकस्तु सर्वलक्षणलक्षितः । . . . .

Hayaśirṣa " Ādi " XXIII : 9*a* [Adyar *ms.*]

§ 725

. . . आदित्यो द्विभुजः प्रोक्तो युवालक्षणलक्षितः ॥
कम्बुग्रीवः पीनवक्षाः अलङ्कारं कृतश्शुभः । सर्वाभरणसंयुक्तो दीप्तस्सौम्यो द्विलोचनः ॥
पद्मस्थः खटिकागुप्तपादो वा रथसंस्थितः । एकचक्रो रथस्तस्य सप्ताश्वोऽरुणसारथिः ॥
हस्तयोः पङ्कजौ तस्य कार्यौ स्कन्धमितौ शुभौ । दण्डपिङ्गलकौ कार्यौ प्रतीहारौ विभूषितौ ॥
खड्गखेटकहस्तस्तु रथस्थो दण्डनायकः । मषीभाजनहस्तस्तु पिङ्गलो लेखनीकरः ॥
संज्ञा वत्सायुता चैव कार्ये पार्श्वद्वयस्थिते । शरकार्मुकहस्ते ते वामदक्षिणसंस्थिते ॥
आदित्यं कारयेद्देवं सर्वरोगविनाशकम् । चित्रे तु लेखयेत् भानुं कञ्चुकागुप्तविग्रहम् ॥
भेदानस्यापरान् सौरेः वर्णयिष्यामि तेऽखिलान् . . . .

Hayaśirṣa " Ādi " XXIII : 1*b*-8*a* [Adyar *ms.*]

Cakra and Śaṅkha

The personifications of the Divine Discus and Conch are here described (as they appear in the third courtyard?). The Cakra-form is described both as a human-like figure (§727 and §728) and in its more usual disc-like appearance (§726 and §729, *cf.* §584–§597). The Śaṅkha-form is described as having a human-form (§730).

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 726

अथोत्सवार्थं चक्रस्य लक्षणं वक्ष्यतेऽधुना । सुवर्णेनाथ रूप्येण ताम्रेणैवायसेन वा ॥
गजदन्तेन वृक्षेण कुर्याच्चक्रं स्वशक्तितः । मूलबेराङ्गुलेनैव चतुर्विंशतिकोत्तमः ॥
अष्टादशाङ्गुलं मध्यं कन्यसं षोडशाङ्गुलम् । आयामसमवृत्तं तद्विस्तारं चाष्टधा भवेत् ॥
बहिः पादस्य भागं तदराणां च द्विभागतः । तन्मध्ये चारकूटस्य द्विस्तारं तु द्विभागिका ॥
कूटमध्ये तु भागेन चक्रबिम्बं तु कारयेत् । सिंहं वा मकरास्यं वा पद्मकर्णिकमेव वा ॥
कारयेत् फलकार्धेन तत्सिंहोदरसंयुतम् । शताष्टायुतं श्रेष्ठं पञ्चाशदरसंयुतम् ॥
मध्यमं तु चतुर्विंशदराणां तु कनीयसम् । मध्ये तत्पृष्ठपार्श्वे तु कुर्यात् भागौ तु पद्मवत् ॥
पार्श्वयोरुभयोर्मूर्ध्नि त्र्यग्रानलशिखायुतम् । अधस्तं पट्टिकायुक्तं तद्बिम्बं भागमानता ॥
पार्श्वयोः फलकाः स्थाप्य सिंहं तद्भागमानतः । चक्रस्य त्रिगुणी दैर्घ्यं दण्डनाळं विभागतः ॥
कुंभमण्डयुताग्रे तु मूले पीठं प्रकल्पयेत् । चक्रविस्तारतुल्यं स्यात् तस्यार्धमूर्ध्वगं भवेत् ॥
शेषं युक्त्या तु कर्तव्या प्रोक्तं चक्रस्य लक्षणम् । अन्यथा चक्रमिच्छन्ति कुर्याद्विक्रमिहोच्यते ॥
मानाङ्गुलेन मानेन सप्ताष्टनवमेन वा । दश चैकादशेनैव द्वादशं च त्रयोदश ॥
चतुर्दशं पञ्चदशमुत्तमादित्रयो गुणाः । चक्रार्धं हि द्विषट् स्यात् द्वियंशं नेमिरुच्यते ॥
अराणां च चतुर्भागमध्यर्धं नाभिरुच्यते । त्रिभागं पद्ममेवं स्यात् अर्धांशा हीनमेव च ॥
अक्षमेकांशकं कुर्यात् चक्रलक्षणमेव तु ।

चक्रस्य चार्धं द्विषट्कालं द्वयंशेन नेमिर्द्विकलैरराणाम् ।
नाभेस्तदर्धं यनले त्रिमात्रं मण्डर्धं भीकः क्षया क्रमेण ॥

पूर्वोक्तेनैव मानेन पीठादीन् परिकल्पयेत् । त्रिद्व्येकाङ्गुलं वापि जाललक्षणमुच्यते ॥
तस्यार्धं नाहमेवं तु त्र्यग्रानलसंयुतम् । एतन्मानमिदं प्रोक्तं सर्वसंपत्सुखावहम् ॥

Viṣṇutattva XXXVI : 1-17

§ 727

रक्तवर्णं चतुर्बाहुं.....वा मुनीश्वर । सर्वाभरणसंयुक्तं सर्वशोभनशोभितम् ॥
कालाग्निसदृशाकारं चक्रध्वजमकुटान्वितम् । एवं चक्राधिदेवं तु पूजयेत् द्वारपार्श्वके ॥

Viṣvaksena XX : 158-159

§ 728

पुष्पः कीर्तिमुखं चैव शिरश्चक्रं तथैव च । पद्मं चक्रं गदा खड्गं चापं शङ्खेति षट् क्रमात् ॥
सृष्टिः स्थितिः लयो वृद्धिः विजयो मोक्ष इत्यपि । इत्येवं योगमूर्तिः स्यात् भोगमूर्तिं वदाम्यहम् ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

भोगमूर्तिविशेषं स्यात् चक्राकारं सुपुष्पकम् । अरं चतुर्विंशयुतं अष्टज्वालासमावृतम् ॥
अथवा मूर्तिकं चैव षट्कोणं नेमिसंयुतम् । मध्ये बद्धाञ्जलिर्भूत्वा ज्वालामालासमावृतः ॥
चतुर्बाहुसमायुक्तः शङ्खचक्रधृतो भवेत् । अभयं वरदं चापि पाशमङ्कुशमेव वा ॥
आलयाश्रयबिम्बं स्यात् बलिबेरमथार्चनम् । उत्सवं स्नानशयनं दीक्षाबेरं च हीनकम् ॥

Vihagendra II : 25-30

§ 729

. . . बिम्बोत्सेधेति षट्पट्टं षोडशांशैकविस्तरम् ॥
सममर्धं समं वाथ त्रिकोणं भवसंपुटम् । न रयव्यतिरेकेण षट्कोणं समसम्पुटम् ॥
पादादुष्णीषधीमन्तमूर्ध्वाधःकोणमेव च । ऊर्ध्वपट्टं स्तनादूर्ध्वं मज्जोन्मानमधस्तथा ॥
स्तनजानुसमं वापि बाह्वोर्वृत्तं विशेषतः । त्रिभुजं चर्तुगुणं वापि बेरादेकांशनेमिकम् ॥
चक्रस्य मध्ये स्थूलाभमन्तर्बाह्ये च सूक्ष्मकम् । मध्ये स्थूलमुभौ पार्श्वौ सोपानक्रमसूक्ष्मकम् ॥
तच्चक्रं सप्तधा कृत्वा सप्तांशं क्रमशो भवेत् । षट्कोणस्य च तद्बाह्ये वृत्तमेकांशकं भवेत् ॥
घनषट्कोणवत्कुर्याल्लम्बधामविचित्रितम् । तद्बाह्ये वृत्तमेकांशं घनमर्धाधिकं भवेत् ॥
वज्रशालैरलङ्कृत्य दलं च परिकथ्यते । अर्धांशं कम्पकं बाह्ये सार्धांशमधिकं घनम् ॥
महावृत्तविभागं स्यात् सयमायामविस्तरम् । वेत्रं वृत्ताकृतीरेव महावृत्तं प्रशस्यते ॥
पुष्पजालैरलङ्कृत्य मणिमालैरलङ्कृतम् । तद्बाह्यकम्पमध्यांशं पूर्ववत् परिकल्प्यते ॥
तद्बहिर्वृत्तमेकांशं केसरोऽयं प्रशस्यते । तदमेव च तत्कुर्याद्वज्रजालैरलङ्कृतम् ॥
तद्बाह्ये वृत्तमेकांशं घनं षट्कोणमब्रवीत् । अष्टोत्तरसहस्रं स्याच्छतमष्टोत्तरं भवेत् ॥
ज्वालामालासमायुक्तं चतुर्ज्वालोन्नतं भवेत् । अथवाष्टज्वालं स्याद्भागं तद्द्विगुणीकृतम् ॥
ज्वालैरनेकसंयुक्तं महाज्वालं विना भवेत् । सामन्दलं च कम्पं स्यान्महावृत्तं च कम्पकम् ॥
केसरज्वालपंक्तिः स्यात्सप्तांशैर्नामितः क्रमात् । अथवा कम्पभागैकं चतुर्थांशं प्रचक्रमेत् ॥
भागस्य भागयोर्मध्ये कम्पं कुर्यात् पृथक् पृथक् । सुषिरं सुषिरं वापि ज्वाले मूले च याम्यके ॥
महावृत्तमुभौ पार्श्वे अन्तर्बाह्यमुखं भवेत् । चक्रमन्तर्मुखं त्रीणि वृत्तं त्रीणि बहिर्मुखम् ॥
इति चक्रप्रमाणं स्यात् । . . . .

Vihagendra VII [*ms.*]

§ 730

शङ्खाभं सौम्यरूपं तु सर्वाभरणभूषितम् । उपवीतयुतं श्वेतं शङ्खयुङ्मकुटान्वितम् ॥
चतुर्बाहुं द्विबाहुं वा ध्यायेद् द्वारस्य वामके । . . . .

Viṣvaksena XX : 156-157*a*

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

The divine beings of the outer courtyards

The various divine beings (*gaṇas*) may be personifications of certain lesser weapons of the Lord, or they may be certain female deities like Durgā, Māheśvarī, Sarasvatī, *et. al.*, or they may be lesser female attendants of the preceding, or they may be personifications of rivers like Gaṅgā and Godāvarī (§731-§743)—and these will be found in the fourth courtyard. Or, they may be certain minor male deities (§744)—found in the fifth courtyard. Or, they may be minor functionary gods (§745)—in the sixth courtyard. Or, they may simply be gate-keepers in the seventh and eighth court-yards (§746–§747 and §748–§749).

§ 731

वज्रं शक्तिस्तथा दण्डः खड्गः पाशो ध्वजस्तथा । शिशिराख्यं त्रिशूलश्च लाङ्गलं मुसलं तथा ॥
पूर्वादिक्रमयोगेन चतुर्थावरणे स्थिताः । एतेषां क्रमशो ध्यानं समाकर्णय साम्प्रतम् ॥
वज्रं वज्रोपलाभं तु सितदीर्घनखाङ्कितम् । दंष्ट्राकरालवदनं ज्वलत्कनकलोचनम् ॥
सौदामिनीप्रभां शक्तिं शान्ताग्निवदनेक्षणाम् । घनघर्घरनिर्घोषमुद्गिरन्तीं मुहुर्मुहुः ॥
बद्धमुष्टिं स्मरेद्दण्डं रक्ताङ्गं रक्तलोचनम् । क्रोधमूर्तिं स्वदशनैर्दशन्तमधरं स्वकम् ॥
स्वरश्मिखचितं ध्यायेत् नृत्यमानं च नन्दकम् । शरदाकाशसङ्काशं दशन्तं दशनावलीम् ॥
पाशं गुणगणाकीर्णं विद्युज्जिह्वं भयानकम् । हेमालिपाण्डराभं च घोरास्यं रक्तलोचनम् ॥
शरज्जलदसङ्काशं ध्वजं कुटिललोचनम् । स्वतेजसा जगत्सर्वं द्योतयन्तं बलोत्कटम् ॥
शिशिरं शीतधामाभं पीनाङ्गं पृथुविग्रहम् । जटाकलापधृक्सौम्यं पुण्डरीकनिभेक्षणम् ॥
उदयार्कसहस्राभं त्रिशूलं भीषणाकृतिम् । कल्पान्तपावकाकारस्वरश्मिपरिवेष्टितम् ॥
संध्याजलदसङ्काशं लाङ्गलं भीमलोचनम् । क्षामाङ्गमुन्नतांसं च वज्रकायं बलोत्कटम् ॥
कुन्दावदातं मुसलं सौम्यमीषत्स्मिताननम् । रवं रवन्तं मधुरं श्रोत्रेन्द्रियसुखावहम् ॥
नीलरक्तसितापीतपावकाञ्जनसन्निभैः । हेमचन्द्रहिमाकाशसमानाभैः क्रमेण तु ॥
माल्याङ्गरागवसनै रुचिरैस्समलंकृताः । दिव्यैराभरणैर्युक्ताः स्वचिह्नाङ्कितमस्तकाः ॥
तर्जयन्तश्च दुष्टौघं दक्षिणेन करेण तु । वामेन कटिमालम्ब्य सुसमैस्स्थानकैस्स्थिताः ॥
चतुर्थावरणद्वारदक्षिणोत्तरशाखयोः । गङ्गां च यमुनां चैव ध्यात्वा सम्पूजयेत् क्रमात् ॥
भगवत्पादसम्भूतां गङ्गां कुमुदसन्निभाम् । नवयौवनलावण्यसौकुमार्यगुणैर्युताम् ॥
नीलाङ्गरागवसनां नीलमाल्यैरलङ्कृताम् । द्विभुजां सौम्यवदनां पुण्डरीकनिभेक्षणाम् ॥
हारनूपुरकेयूरकुण्डलाद्युपशोभिताम् । संसारतापसन्तप्तानारुरुक्षून् परं पदम् ॥
वासनाकर्मपङ्कानि क्षालयन्तीं स्वतेजसा । वहन्तीं दक्षिणेनैव कलशं वारिपूरितम् ॥
वामेन तर्जयन्तीं च करेण प्राकृतान् जनान् । यमुनां नीलरत्ना(क्ता)भां नीलकुञ्चितमूर्धजाम् ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

सिताङ्गरागवसनां सितमाल्योपशोभिताम् । दक्षिणे तर्जनीमुद्रा वामे तु कलशस्स्मृतः ॥
अन्यत्सर्वं तु गङ्गोक्तमत्रापि स्यान्महामते । . . . .

Īśvara[1] IX : 116*b*-138=Pārameśvara XI : 119-141*a*

§ 732

एवं संक्षेपतः प्रोक्तं दुर्गामूर्तिमथो शृणु । श्यामाद्रिशिखराकारां त्रिनेत्रां पङ्कजाननाम् ॥
द्विनेत्रां वा मुनिश्रेष्ठ चतुर्हस्ताष्टकां तु वा । सर्वावयवसम्पूर्णां मकुटादिविराजिताम् ॥
शङ्खचक्राभयभुजां पद्मस्योपरि संस्थिताम् । दुर्गा चैव मया प्रोक्ता हेतिन्यासमथो शृणु ॥
दक्षिणोर्ध्वकरे चक्रमभयं चापरे शुभे । वामोर्ध्वकं तु विन्यस्य ह्यधस्तात् करिहस्तकम् ॥
एवं चतुर्भुजं प्रोक्तमष्टहस्तमतः शृणु । तस्य दक्षिणहस्तोर्ध्वं चक्रं कालाग्निसन्निभम् ॥
अस्याधरे तु शङ्खं स्यात्खड्गं चाधरदोर्ष्णि तु । सशूलं विद्रुमप्रख्यं विन्यसेदपरे शुभे ॥
एवं दक्षिणपार्श्वे तु प्रोक्तं वामे ह्यतः शृणु । चापं वामेर्ध्वहस्ते स्यादधस्ताच्छङ्खमेव च ॥
परिघाप्यधरे हस्ते गदां चैवापरे करे । एवं संक्षेपतः प्रोक्ता महिषान्तकरी शुभा ॥
अत्र किञ्चिद्विशेषोऽस्ति दुर्गापूजाविधिं क्रमम् । संहिता(रतो) गृह्य पूजयेद्विधिचोदितम् ॥
विशेषमन्त्रसंप्रोक्तं शेषं साधारणं स्मृतम् । . . . .

Viṣvaksena XI : 276-285*a*

§ 733

. . . चतुर्भुजा तु रुद्राणी वृषारूढा त्रिलोचना ॥
शूलं शरं दक्षिणे तु वामे वज्रं तु कार्मुकम् । . . . .

Hayaśīrṣa 'Ādi' XXIV : 4*b*-5*a* [Adyar *ms.*]

§ 734

. . . स्कन्दरूपा तु कौमारी बालाकारा समांसला ॥
मयूरवरमारूढा द्विभुजा शक्तिधारिणी । . . . .

Hayaśīrṣa 'Ādi' XXIV : 5*b*-6*a* [Adyar *ms.*]

§ 735

. . . वराहास्या तु वाराही बृहत्कण्ठा महोदरा ॥
महिषस्था दण्डहस्ता शङ्खचक्रगदाम्बुजा । सप्ततला तु वाराही कर्तव्या शुभलक्षणा ॥

Hayaśīrṣa 'Ādi' XXIV : 7*b*-8 [Adyar *ms.*]

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 736

. . . . माहेन्द्री तु गजारूढा द्विभुजा वरधारिणी ॥
नवयौवनसंयुक्ता भूषिता बहुलोचना । . . . .

Hayaśirṣa 'Ādi' XXIV : 9*b*-10*a* [Adyar *ms.*]

§ 737

. . . चतुर्भुजा तु चामुण्डा कोटराक्षी त्रिलोचना ॥
निर्मांसा अस्थिसारा च ऊर्ध्वकेशी कृशोदरी । नागयज्ञोपवीताङ्गी द्वीपिचर्मोत्तरच्छदा ॥
मुण्डमालाधरा देवी अस्थिखण्डैर्विभूषिता । कपालं पट्टिशं वामे शूलं कर्त्री च दक्षिणे ॥
शवारूढा सुदुष्प्रेक्ष्या चामुण्डेयं प्रकीर्तिता । . . . .

Hayaśirṣa 'Ādi' XXIV : 10*b*-13*a* [Adyar *ms.*]

§ 738

. . . पुष्टिं वामे न्यसेत्तस्याः लक्षणं शृणु सुव्रत ॥
श्यामां सुरक्तां द्विभुजां.....पङ्कजाननाम् । सर्वावयवसंपूर्णां मकुटादिविराजिताम् ॥
रक्तपद्मोर्ध्वगां देवीं सर्वाभरणभूषिताम् । दिव्यमाल्याम्बरधरां दिव्यरत्नविराजिताम् ॥
रक्तपद्मकरां देवीं ध्यायेत्पुष्टिं हरिप्रियाम् । . . . .

Viṣvaksena XI : 261*b*-264*a* (*see* also *ibid.* XVIII : 17*b*-18)

§ 739

. . . एवं ध्यात्वा मुनिश्रेष्ठ कारयेत्सुमनोरमाम् ॥
एवं पुष्टिं तु संचिन्त्य सर्वदुःखाघनाशिनीम् । मेधामूर्तिमथो वक्ष्ये सर्वविद्याप्रदायिनीम् ॥
रक्तपद्मदलप्रख्यां पद्मासनगतां शुभाम् । सर्वलक्षणसम्पन्नां सर्वाभरणभूषिताम् ॥
द्विभुजां द्विदृशां देवीं मेधां मकुटधारिणीम् । मेधा चेयं मया प्रोक्ता वाग्देवीमधुना शृणु ॥

Viṣvaksena XI : 264*b*-267

§ 740

शान्तस्फटिकसङ्काशां श्रियं पद्मरजःप्रभाम् । सरस्वतीं तथारूपां रतिं श्यामां तु चिन्तयेत् ॥

Viṣṇu VI : 68

§ 741

शुद्धस्फाटिकसङ्काशां श्वेतपद्मगतां शुभाम् । पद्मासनसमोपेतां चतुर्हस्तसमन्विताम् ॥
श्वेताम्बरसमायुक्तां मुक्ताभरणभूषिताम् । त्रिदृशां द्विदृशां वापि ह्यक्षमालाधरां शुभाम् ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

व्याख्यानपुस्तकैर्युक्तां वाग्देवीं मकुटान्विताम् । एवं सरस्वतीं ध्यायेत्सर्वदेवमयीं पराम् ॥
परतन्त्रविधानं चेत् प्रवक्ष्यामि सरस्वतीम् । सर्वलक्षणसम्पन्नां सर्वावयवशोभिताम् ॥
सर्वाभरणसंयुक्तां द्विभुजां द्विदृशां पराम् । विशेषमन्त्रसंप्रोक्तं शेषं पूर्ववदाचरेत् ॥
इत्येवं परतन्त्रे तु लक्षणं परिपठ्यते । गणनावलयं चोर्ध्वे वामस्योर्ध्वे कमण्डलुम् ॥
पुस्तकं चापरे हस्ते सर्वविद्यार्णवैर्वृताम् । प्रतिपादनमुद्रां च दक्षिणाधरहस्तके ॥
परतन्त्रे मुनिश्रेष्ठ पद्महस्तां शुभाननाम् । अङ्घ्रिपार्श्वेऽशुकं गृह्य एवं वाणीं प्रकल्पयेत् ॥

Viṣvaksena XI : 268-275

§ 742

अङ्गमन्त्रान्निबोधाद्य गदन्त्या मे निशामय । करालमनलारूढं कृत्वा संयोज्य पूर्ववत् ॥
आनन्दाद्यैः स्वरैश्चन्द्रिव्यापियुक्तैः श्रियो यथा । अङ्गमन्त्रा इमे कीर्तेः सखीरूपामनु शृणु ॥
द्युतिः सरस्वती मेधा श्रुतिः सख्य इमाः स्मृताः । द्विभुजा हेमवर्णाभाः कीर्तिरूपाः स्मिताननाः ॥
सुपुस्तकं करे वामे दक्षिणे चामरं करे । मन्त्रान् कीर्तिसखीनां तु गदन्त्या मे निशामय ॥
मदनं चामृतं चैव प्रधानं शङ्करं तथा । एतान् कृत्वानलारूढान् मायया परिभूषयेत् ॥
चन्द्रिणं व्यापिनं दद्यात् सखीमन्त्रानिमान् स्मरेत् । कीर्तेरनुचराणां तु नामरूपादिकं शृणु ॥
वागीशो जयदश्चैव प्रसादस्त्राण एव च । ध्येयाः किंशुकवर्णाभाः कान्तरूपा मनोहराः ॥
श्वेताम्बराश्चतुर्हस्ताः सर्वाभरणभूषिताः । वामदक्षिणहस्ताभ्यां मुख्याभ्यां तेषु चिन्तयेत् ॥
शङ्खमिन्दुशताभं च कदम्बाख्यं महाद्रुमम् । सपुष्पं षट्पदोपेतमपराभ्यां निबोध मे ॥
पूर्णचन्द्रोपमं वामे दर्पणं दक्षिणे करे । मयूरव्यजनं शुभ्रं दधतश्चारुलोचनाः ॥
वराहमादिदेवाढ्यमप्रमेयं च केवलम् । पवित्रमनलारूढं स्रग्धरं च तथाविधम् ॥

Lakṣmī Tantra XLV : 45-55

§ 743

. . . गङ्गा च यमुना गोदा नदी च महती तथा ॥
वितस्ता नर्मदा चैव जम्ब्वाख्या च सरस्वती । नद्यश्चतुर्थसालस्य दिग्द्वारेषु क्रमात् स्थिताः ॥
गङ्गायमुनयोरुक्तं वर्णरूपादिकं पुरा । ताभ्यामन्याः समानास्तु वर्णशोभां विनैव तु ॥
सितारुणाः सितस्वर्णसितकुन्दसमप्रभाः । प्रमत्तप्रौढवेषाश्च नानाभरणभूषिताः ॥
सर्वधातुविचित्राङ्गाः सर्वरत्नविराजिताः । सुधाकुम्भधरा द्वाभ्यां कराभ्यां पूर्ववच्च ताः ॥

Īśvara[1] IX : 274b-278

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

लोहिताक्षो महावीर्यस्त्वप्रमेयः सुशोभनः । वीरहा विक्रमो भीमः शतावर्तस्तु चाष्टमः ॥
ऐश्वरीदिक्क्रमेणैव पश्चिमावरणे स्थिताः । ध्यायेच्चन्द्रप्रतीकाशं लोहिताक्षं बलोत्कटम् ॥
नीलाम्बरधरं नीलमाल्यं नीलानुलेपनम् । महावीर्यं महाकायं पीतवर्णं महाभुजम् ॥
प्रवालाभाम्बरधरं रक्तस्रगनुलेपनम् । संस्मरेदप्रमेयाख्यमप्रमेयबलोत्कटम् ॥
हरिताकृतिमापीतवसनस्रग्विलेपनम् । सुशोभनं शोभनाङ्गं मुक्ताफलनिभं स्मरेत् ॥
अतसीपुष्पसङ्काशवासोमाल्यानुलेपनम् । वीरघ्नं वीरहाख्यं च ध्यायेच्चम्पकसन्निभम् ॥
वाह्लीकारञ्जितारक्तवसनस्रग्विमण्डितम् । विक्रमं विक्रमावासं चापोदरनिभं स्मरेत् ॥
कुन्देन्दुकान्तिवसनं सितमाल्यानुलेपनम् । भीमं भीमाकृतिं ध्यायेत्तप्तकाञ्चनसन्निभम् ॥
पाण्डरारुणकौशेयं तद्वद् गन्धस्रगन्वितम् । अतसीकुसुमश्यामं शतावर्तं तु भावयेत् ॥
पीताम्बरधरं पीतमाल्यगन्धविभूषितम् । भुजद्वयान्विता ह्येते चान्तर्मुदितमानसाः ॥
दक्षिणैः पाणिभिः सर्वे ज्वलन्तं परशुं तथा । वामैः शङ्खवरं दीप्तं दधानाश्चारुकुण्डलाः ॥
समाः समविभक्ताङ्गाः प्रशान्ताकृतयस्तथा । स्थानकैः संस्थिताः सर्वे सप्रभाभिर्विराजिताः ॥
प्रसन्नवदनाः सौम्याः त्रैलोक्योद्धरणक्षमाः । हारनूपुरकेयूरपूर्वभूषाविभूषिताः ॥
तदाज्ञाप्रेक्षकाश्चैव दुष्टदोषोपशान्तिदाः । बलेन महता क्षिप्तदेवासुरमहोरगाः ॥
एकवीरासहायश्च त्वप्रयत्नेन लीलया । आब्रह्मभवनं शश्वत्परिवर्तयितुं क्षमाः ॥
एतदावरणद्वारचतुष्के द्वारदेवताः । न्यस्येद्युग्मप्रयोगेण पूर्वद्वारादितः क्रमात् ॥
वज्रनाभं हरीशं च पूर्वस्यां दक्षिणोत्तरे । ध्यायेत्तु वज्रनाभाख्यं शतधामसमप्रभम् ॥
मुख्यदक्षिणहस्तेन निषेधाभिनयान्वितम् । वेत्रलतां द्वितीयेन चक्रराजं तृतीयतः ॥
मुख्यवामकरेणैव श्रोणीतटकृतार्पणम् । शङ्खराजं द्वितीयेन तथा वज्रं तृतीयतः ॥
धारयन्तं तथा रुक्मभूषणैर्विविधैरपि । रक्तमाल्याम्बरधरं रक्तस्रगनुलेपनम् ॥
एवं वामे हरीशं च निषेधाभिनयोज्झितम् । प्रवेशाभिनयाख्येन पाणिना किन्तु चिह्नितम् ॥
एको ह्यत्र निषेधं च त्वभक्तानां करोति वै । भक्तानामपरश्चैव प्रवेशं संप्रयच्छति ॥
द्वारे द्वारे प्रतीहारद्वयस्यैवं प्रयोजनम् । दक्षोक्तं वज्रनाभस्य तद्धरीशस्य वामगम् ॥
आद्यवामगतं सर्वमन्यदक्षिणपाणिगम् । धर्माध्यक्षनियन्त्रीशौ दक्षिणे दक्षिणोत्तरे ॥
कुर्यादन्तकसादृश्यौ पूर्ववद्भुजभूषितौ । पीतकौशेयवसनौ पीतमाल्यविलेपनौ ॥
किन्तु दण्डगदाहस्तौ वज्रचक्रविवर्जितौ । शुद्धाक्षममृतानन्दं प्रतीच्यां दक्षिणादितः ॥
बाणकार्मुकमेकस्मिन् पाणौ पाशमथापरे । आद्यं करचतुष्कं यत्तद्वद्यग्रं पूर्ववद्भवेत् ॥
आकृतौ जलनाथस्य सदृशौ सर्वदैव हि । नीलकौशेयवसनौ नीलस्रगनुलेपनौ ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

वसुनाथं सुधानन्दमुदग्दिग्दक्षिणोत्तरे । खड्गमुद्गरहस्तौ च प्राग्वच्छेषं चतुष्टयम् ॥
कराणामनयोः कार्यं रूपेणोडुपतेः समौ । अतसीकुसुमश्यामकौशेयस्रग्विलेपनौ ॥
भूषणैर्भूषिता ह्येते विविधैर्वज्रनाभवत् । . . . .

Īśvara[1] IX : 139-169*a*=Pārameśvara XI : 141-171

§ 745

शृणुध्वं ध्यानमधुना तत्त्वतो मुनिपुङ्गवाः । पूर्वादीशानपर्यन्तं षष्ठावरणसंस्थिताः ॥
एताश्च देवता विप्रास्तेजोरूपसमन्विताः । कालोऽपि यन्नियन्ता च शास्त्रं नानाङ्गलक्षणम् ॥
विद्याधिपतयश्चैव सरुद्रः सगणः शिवः । प्रजापतिसमूहस्तु इन्द्रः सपरिवारकः ॥
मुख्ये द्वारचतुष्के तु पूर्ववत्संस्थिताः क्रमात् । शङ्खचक्रौ पद्मगदे लाङ्गलं मुसलं शराः ॥
शार्ङ्गं चैते क्रमाद् ध्येयाः विद्युत्तुहिनकुन्दभाः । पीतनीलसितारक्तसितगोक्षीरसन्निभैः ॥
हरितालारुणाभैस्तु वस्त्रमाल्यानुलेपनैः । सर्वरत्नमयैर्युक्तैर्भूषणैरप्यलङ्कृताः ॥
महाबला महावीर्यास्त्वेकवक्त्रा द्विबाहवः । एते तु नायकाः सर्वे स्वचिह्नाङ्कितमस्तकाः ॥
दुष्टौघं तर्जयन्तश्च दक्षिणेन करेण तु । कटिमालम्ब्य वामेन स्थानकैः सुसमैः स्थिताः ॥
दृढव्रतो बहुशिरा महाकायो महाबलः । जितक्रोधो दुरावर्षो महोत्साहस्त्रिविक्रमः ॥
अतुलो दुष्टहार्चिष्मान् सर्वदृग्दुरतिक्रमः । विषमो गहनोऽमोघष्षोडशोपप्रवेशदाः ॥
शक्राग्निमध्यमारभ्य शक्रेशानन्तरावधि । शुक्लशोणसुवर्णालिपिङ्गरक्तसितासिताः ॥
रक्तपीतातसीहेमशोणशुभ्रसितासिताः । वर्णानुरूपसद्वस्त्रमाल्यालेपनभूषणाः ॥
नामानुरूपचारित्राः शङ्खमुद्गरधारिणः । सव्येतरक्रमेणैव प्रवेशकनिषेधकाः ॥
क्षणाद्भुवनसंहारसृष्टिस्थितिकृतिक्षमाः । उक्तानेतान् क्रमेणैव पूर्ववत्संप्रपूजयेत् ॥

Īśvara[1] IX : 170-183 *cf.* Pārameśvara 172-185

§ 746

सम्भवः प्रभवश्चैव पूर्णः पुष्कर एव च । आनन्दो नन्दनश्चैव वीरसेनः सुषेणकः ॥
तन्मुख्यद्वारशाखास्थौ द्वौ द्वौ दक्षिणवामयोः । सम्भवः श्वेतवर्णस्तु प्रभवः कुन्दसन्निभः ॥
पूर्णस्तु रक्तवर्णाभस्त्वतिरक्तस्तु पुष्करः । आनन्दः पीतवर्णस्तु हेमाभो नन्द उच्यते ॥
कृष्णाभो वीरसेनस्तु सुषेणोऽञ्जनसन्निभः । मकुटाङ्गदचित्राङ्गा गदाहस्ता द्विबाहवः ॥
चतुर्भुजा वा विप्रेन्द्राः शङ्खचक्रगदाधराः । पूर्ववत्पाणिनाऽन्येन प्रवेशकनिषेधकाः ॥
दंष्ट्राकरालवदना निग्रहानुग्रहक्षमाः । . . . .

Īśvara[1] IX : 186-191*a*=Pārameśvara XI : 188*b*-193

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 747

. . . क्षेमकृच्छिवकृत्प्राज्ञो होमकृद्भूतभावनः ॥
युगान्ताग्न्यशनश्चैव संवर्तो भीषणस्तथा । सङ्क्रन्दनश्चानिमिषः शतपर्वा शताननः ॥
औदुम्बरः प्रकृतिको विरामश्चांशुमाल्यपि । औपदौवारिकं त्वेतद् गणषोडशकं क्रमात् ॥
दृढव्रतादिसदृशं वर्णतः षड्भुजान्वितम् । वामदक्षिणयोगेन पृष्ठतः पूर्वपश्चिमम् ॥
शङ्खमुद्गरपद्माक्षवराभयसमन्वितम् । नानावर्णस्रगुष्णीषवस्त्रालेपनभूषणम् ॥
प्रागुक्तगुणशौर्याढ्यं सर्वकर्मकृतिक्षमम् । तच्छोभाष्टकरक्षार्थं शतमन्युर्विरोचनः ॥
अप्रतर्क्यस्त्वनुल्लङ्घ्यस्त्वप्रमेयाभिधानकः । अमर्षी च महाभूतश्चकोराक्षस्तथाष्टमः ॥
इन्द्राग्निमध्योपद्वारपार्श्वशोभास्वनुक्रमात् । एकैकशः स्थिताः शूराः प्रवेशकनिषेधकाः ॥
नीलपीतजपाश्यामसितहिङ्गुलकेन्दुभाः । महाबला महावीर्याः सुदुर्लङ्घ्यपराक्रमाः ॥
नानाविधाम्बरस्रग्भिर्भूषणैरनुलेपनैः । अन्यैरनुपदिष्टैश्च यथाशोभमलङ्कृताः ॥
षाङ्गुण्यमहिमायुक्ताश्चतुर्हस्ताः क्रमेण तु । पृष्ठदक्षिणवामाभ्यां चक्रशङ्खसमन्विताः ॥
गदाग्रोपरिविश्रान्तमुख्यहस्तद्वयान्विताः । द्वारोपद्वारशोभेशानेतान् संपूजयेत्क्रमात् ॥

Īśvara[1] IX : 191*b*-202=Pārameśvara XI : 194-205*a*

§ 748

. . . विद्या चैवापरा विद्या पावकश्चैव मारुतः ।
चन्द्रार्कौ वारिवसुधेत्येतास्संसारदेवताः । सूक्ष्मरूपेण तिष्ठन्ति बाह्यावरणभूतले ॥
अमरेशो विरूपाक्षस्सुधर्मिष्ठो नियामकः । सर्वसत्त्वाश्रयश्चातिगहनस्तदनन्तरम् ॥
महाराजेश्वरश्चापि धनाध्यक्षेश्वरस्तथा । एते गणेश्वरास्त्वष्टौ तन्मुख्यद्वारपालकाः ॥
ध्येयाश्चतुर्भुजास्सर्वे मुख्यपाणिद्वयेन तु । अमरेशविरूपाक्षौ वज्रवेत्रलताकरौ ॥
पृष्ठगाभ्यां तु पाणिभ्यां चक्रशङ्खसमुज्वलौ । कुङ्कुमाञ्जनसङ्काशौ दंष्ट्रया विकृताननौ ॥
दक्षिणोत्तरयोगेन लाञ्छनव्यत्ययान्वितौ । द्वारदक्षिणवामस्थौ प्रवेशकनिषेधकौ ॥
सुधर्मिष्ठो नियन्ता च सुसितश्यामलप्रभौ । सुभीमदण्डहस्तौ च वज्रायुधविवर्जितौ ॥
यथाक्रमोदितानन्यान् धारयन्तौ यथाविधि । सर्वसत्त्वाश्रयश्चातिगहनः श्यामलस्सितः ॥
किन्तु पाशकरावेतौ पूर्ववद् भुजभूषितौ । महाराजेश्वरो रक्तो धनाध्यक्षेश्वरोऽसितः ॥
शिशिरायुधसंयुक्तौ त्रिकमन्यद्यथा पुरा । महाबला महावीर्या दुष्टदोषभयङ्कराः ॥
दुर्निरीक्षाश्च दुर्धर्षाः दैत्यदानवहिंसकाः । नानामहार्घवासोभिर्भूषालेपैरलङ्कृताः ॥

Īśvara[1] IX : 203*b*-214=Pāramesvara XI : 205*b*-216

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 749

. . . रक्ताभरणभूषाङ्गं सहस्रायुतधारिणम् ।
तेजोमयमुदाराङ्गं कार्तवीर्यमहं भजे । . . . .

Śeṣa XXIX : 10*b*-11a

For further details regarding the numerous subsidiary functionary gods protecting the areas, directions, corners, *etc.*, of the temple precincts not already assigned to superior deities, see *Pārameśvara-saṃhitā* XI : 217-322 and *Īśvara-saṃhitā*[1] IX : 215-242—the latter passage of which contains data on the *gopura-devatās* as well. These passages have not been included here because iconographical representations of these very minor divines are rarely attempted.

Iconographical forms for abstract principles described

In this closing section, we have the iconographical forms for certain abstract principles described—namely, Dharma/Adharma (§750–§751), Jñāna/Ajñāna (§752–§753), Vairāgya/Avairāgya (§754–§755), Aiśvarya/Anaiśvarya (§756–§757).

§ 750

. . . शङ्खचक्रधरं सौम्यं पीताम्बरसमन्वितम् ।
जातिपुष्पदलप्रख्यं सर्वाभरणभूषितम् । धर्ममूर्तिरिति ख्यातं ज्ञानमूर्तिं ब्रवीमि ते ॥

Viṣvaksena XX : 87*b*-88

§ 751

रक्तवर्णं महाकायं कम्बुग्रीवं चतुर्भुजम् । एकवक्त्रं बृहत्कुक्षिमेतत्त्रयसमन्वितम् ॥
रक्ताम्बरधरं रौद्रं खड्गमुद्गरधारिणम् । अधर्मस्यैवमुक्तं तु . . . .

Viṣvaksena XX : 95-96

§ 752

. . . द्विपादं च चतुर्बाहुं चतुर्वक्त्रं सनातनम् ॥
नीलोत्पलदलप्रख्यं शङ्खचक्रगदाधरम् । ज्ञानमूर्तिरितिख्यातं वैराग्यस्य वदाम्यहम् ॥

Viṣvaksena XX : 89*b*-90

Digitized by Google Original from UNIVERSITY OF MICHIGAN

The divine beings of the outer courtyards

The various divine beings (*gaṇas*) may be personifications of certain lesser weapons of the Lord, or they may be certain female deities like Durgā, Māheśvarī, Sarasvatī, *et. al.*, or they may be lesser female attendants of the preceding, or they may be personifications of rivers like Gaṅgā and Godāvarī (§731–§743)—and these will be found in the fourth courtyard. Or, they may be certain minor male deities (§744)—found in the fifth courtyard. Or, they may be minor functionary gods (§745)—in the sixth courtyard. Or, they may simply be gate-keepers in the seventh and eighth court-yards (§746–§747 and §748–§749).

§ 731

वज्रं शक्तिस्तथा दण्डः खड्गः पाशो ध्वजस्तथा । शिशिराख्यं त्रिशूलश्च लाङ्गलं मुसलं तथा ॥
पूर्वादिक्रमयोगेन चतुर्थावरणे स्थिताः । एतेषां क्रमशो ध्यानं समाकर्णय साम्प्रतम् ॥
वज्रं वज्रोपलाभं तु सितदीर्घनखाङ्कितम् । दंष्ट्राकरालवदनं ज्वलत्कनकलोचनम् ॥
सौदामिनीप्रभां शक्तिं शान्ताग्निवदनेक्षणाम् । घनघर्घरनिर्घोषमुद्गिरन्तीं मुहुर्मुहुः ॥
बद्धमुष्टिं स्मरेद्दण्डं रक्ताङ्गं रक्तलोचनम् । क्रोधमूर्तिं स्वदशनैर्दशन्तमधरं स्वकम् ॥
स्वरश्मिखचितं ध्यायेत् नृत्यमानं च नन्दकम् । शरदाकाशसङ्काशं दशन्तं दशनावलीम् ॥
पाशं गुणगणाकीर्णं विद्युज्जिह्वं भयानकम् । हेमालिपाण्डराभं च घोरास्यं रक्तलोचनम् ॥
शरज्जलदसङ्काशं ध्वजं कुटिललोचनम् । स्वतेजसा जगत्सर्वं द्योतयन्तं बलोत्कटम् ॥
शिशिरं शीतधामाभं पीनाङ्गं पृथुविग्रहम् । जटाकलापधृक्सौम्यं पुण्डरीकनिभेक्षणम् ॥
उदयार्कसहस्राभं त्रिशूलं भीषणाकृतिम् । कल्पान्तपावकाकारस्वरश्मिपरिवेष्टितम् ॥
संध्याजलदसङ्काशं लाङ्गलं भीमलोचनम् । क्षामाङ्गमुन्नतांसं च वज्रकायं बलोत्कटम् ॥
कुन्दावदातं मुसलं सौम्यमीषत्स्मिताननम् । रवं रवन्तं मधुरं श्रोत्रेन्द्रियसुखावहम् ॥
नीलरक्तसितापीतपावकाञ्जनसन्निभैः । हेमचन्द्रहिमाकाशसमानाभैः क्रमेण तु ॥
माल्याङ्गरागवसनै रुचिरैस्समलंकृताः । दिव्यैराभरणैर्युक्ताः स्वचिह्नाङ्कितमस्तकाः ॥
तर्जयन्तश्च दुष्टौघं दक्षिणेन करेण तु । वामेन कटिमालम्ब्य सुसमैस्स्थानकैस्स्थिताः ॥
चतुर्थावरणद्वारदक्षिणोत्तरशाखयोः । गङ्गां च यमुनां चैव ध्यात्वा सम्पूजयेत् क्रमात् ॥
भगवत्पादसम्भूतां गङ्गां कुमुदसन्निभाम् । नवयौवनलावण्यसौकुमार्यगुणैर्युताम् ॥
नीलाङ्गरागवसनां नीलमाल्यैरलङ्कृताम् । द्विभुजां सौम्यवदनां पुण्डरीकनिभेक्षणाम् ॥
हारनूपुरकेयूरकुण्डलाद्युपशोभिताम् । संसारतापसन्तप्तानारुरुक्षून् परं पदम् ॥
वासनाकर्मपङ्कानि क्षालयन्तीं स्वतेजसा । वहन्तीं दक्षिणेनैव कलशं वारिपूरितम् ॥
वामेन तर्जयन्तीं च करेण प्राकृतान् जनान्। यमुनां नीलरत्ना(क्ता)भां नीलकुञ्चितमूर्धजाम् ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

सिताङ्गरागवसनां सितमाल्योपशोभिताम् । दक्षिणे तर्जनीमुद्रा वामे तु कलशस्स्मृतः ॥
अन्यत्सर्वं तु गङ्गोक्तमत्रापि स्यान्महामते । . . . .

Īśvara[1] IX : 116*b*-138=Pārameśvara XI : 119-141*a*

§ 732

एवं संक्षेपतः प्रोक्तं दुर्गामूर्तिमथो शृणु । श्यामाद्रिशिखराकारां त्रिनेत्रां पङ्कजाननाम् ॥
द्विनेत्रां वा मुनिश्रेष्ठ चतुर्हस्ताष्टकां तु वा । सर्वावयवसम्पूर्णां मकुटादिविराजिताम् ॥
शङ्खचक्राभयभुजां पद्मस्योपरि संस्थिताम् । दुर्गा चैव मया प्रोक्ता हेतिन्यासमथो शृणु ॥
दक्षिणोर्ध्वकरे चक्रमभयं चापरे शुभे । वामोर्ध्वकं तु विन्यस्य ह्यधस्तात् करिहस्तकम् ॥
एवं चतुर्भुजं प्रोक्तमष्टहस्तमतः शृणु । तस्य दक्षिणहस्तोर्ध्वं चक्रं कालाग्निसन्निभम् ॥
अस्याधरे तु शङ्खं स्यात्खड्गं चाधरदोष्णि तु । सशूलं विद्रुमप्रख्यं विन्यसेदपरे शुभे ॥
एवं दक्षिणपार्श्वे तु प्रोक्तं वामे ह्यतः शृणु । चापं वामेर्ध्वहस्ते स्यादधस्ताच्छङ्खमेव च ॥
परिघाप्यधरे हस्ते गदां चैवापरे करे । एवं संक्षेपतः प्रोक्ता महिषान्तकरी शुभा ॥
अत्र किञ्चिद्विशेषोऽस्ति दुर्गापूजाविधिं क्रमम् । संहिता(रतो) गृह्य पूजयेद्विधिचोदितम् ॥
विशेषमन्त्रसंप्रोक्तं शेषं साधारणं स्मृतम् । . . . .

Viṣvaksena XI : 276-285*a*

§ 733

. . . चतुर्भुजा तु रुद्राणी वृषारूढा त्रिलोचना ॥
शूलं शरं दक्षिणे तु वामे वज्रं तु कार्मुकम् । . . . .

Hayaśirṣa 'Ādi' XXIV : 4*b*-5*a* [Adyar *ms.*]

§ 734

. . . स्कन्दरूपा तु कौमारी बालाकारा समांसला ॥
मयूरवरमारूढा द्विभुजा शक्तिधारिणी । . . . .

Hayaśirṣa 'Ādi' XXIV : 5*b*-6*a* [Adyar *ms.*]

§ 735

. . . वराहास्या तु वाराही बृहत्कण्ठा महोदरा ॥
महिषस्था दण्डहस्ता शङ्खचक्रगदाम्बुजा । सप्तताला तु वाराही कर्तव्या शुभलक्षणा ॥

Hayaśirṣa 'Ādi' XXIV : 7*b*-8 [Adyar *ms.*]

Digitized by Google Original from UNIVERSITY OF MICHIGAN

§ 753

. . . अज्ञानस्य वदामि ते ॥
पीतवर्णं बृहत्कुक्षिं महाकायं चतुर्भुजम् । शूलखड्गधरं रौद्रं सर्वाभरणभूषितम् ॥
एतदज्ञानरूपं स्यात् . . . .
Viṣvaksena XX : 96*b*-98a

§ 754

रक्ताक्षत्रयसंयुक्तं चतुर्वक्त्रं चतुर्भुजम् । पीताम्बरधरं सौम्यं शङ्खचक्रधरं सदा ॥
कर्णिकारदलप्रख्यं वायव्यं दिशमाश्रितम् । वैराग्यस्येति निर्दिष्टमैश्वर्यस्य वदामि ते ॥
Viṣvaksena XX : 91-92

§ 755

. . . अवैराग्यं वदाम्यहं । दूर्वाश्यामनिभं ब्रह्मन् द्विपादं च चतुर्भुजम् ॥
परशुपाशधरं रौद्रं रक्ताम्बरधरं सदा । अक्षित्रयसमोपेतं जटामकुटधारिणम् ॥
अवैराग्यस्य रूपं स्यात् . . . .
Viṣvaksena XX : 98-100*a*

§ 756

रक्तोत्पलदलप्रख्यं चतुर्वक्त्रं चतुर्भुजम् । पीताम्बरधरं सौम्यं शङ्खचक्रधरं सदा ॥
सिताननसमायुक्तं मुक्ताहारसमन्वितम् । ऐश्वर्यस्येति निर्दिष्टं ईश्वरस्य वदामि ते ॥
Viṣvaksena XX : 93-94

§ 757

. . . अनैश्वर्यं वदामि ते । धूम्राकारं बृहत्कुक्षिं चतुर्बाहुं महाननम् ॥
एकवक्त्रं महाकायं महाकेशसमन्वितम् । अश्रीकरं च सौम्यं च अक्षित्रयसमन्वितम् ॥
अनैश्वर्यस्य रूपं तु निर्दिष्टमधुना मुने । . . . .
Viṣvaksena XX : 100-102*a*

Digitized by Google Original from UNIVERSITY OF MICHIGAN

CHAPTER EIGHT

DECORATIONS, WEAPONS AND INSTRUMENTS OF WORSHIP

No icon is complete without certain decorations, just as no sanctuary is fully furnished without certain instruments of worship. In the preceding iconographical descriptions, considerable attention has already been given to the decorative elements that characterize the various forms of the Lord—His weapons, *etc.* Here, then, we present in our final chapter excerpts that treat exclusively and in some detail with these items (§758–§767). Further, in regard to instruments of worship, there are two groups of excerpts, those describing the *Pādukā*-" foot-stool " found at the feet of the main icon and to which liturgical honors are daily given (§768–§770), and the miscellaneous paraphernalia used in liturgical worship that also find a place in the sanctuary

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

(§771–§779). Finally, a section is given over to excerpts describing the *sruk*-ladle and the *sruva*-spatula used in *homa* fire-libations outside the sanctuary proper but within the temple precincts (§780–§790).

An " Appendix " contains a solitary reference (§791) to the measurements and construction of *ratha*-wagons.

Decorations and weapons of icons

The crowning element on most icons is the " *kirīṭa* ". Such a diadem may be either a structural part of the icon, and immovable, or it may be made later and separately, of other materials than the icon it crowns, and removable. There are at least four types of *kirīṭa*-crowns differing from one another in terms of their shapes and measurements as well as which aspect of the Divine Being they appropriately decorate (*see* §759, §760, §761 and §763).

In addition to the *kirīṭa*, there are a number of other *ābharaṇa*-decorations that should be noted. Some of these, needless to say, are more often seen than others. All of them, however, have their own significance (*see* §762), are to be meditated upon (*see* §764), and are to be executed with the utmost skill and care (*see* §763). For ready reference they are listed below, with the excerpt-reference, in alphabetical order :

aṅgada-upper armband (=*keyūra* ; §758 and §763), *aṅgulīyaka*-rings (§758), *aṅkuśa*-goad (§764), *antarīya*-underclothing (§758), *astra*-arrow (§767), *brahmasūtra*-sacred thread (§763), *cakra*-discus (§758, §764, §766 and §767), *daṇḍa*-staff (§767), *dukūla*-garment (=*pītavastra* ; §758 and §766), *gadā*-mace (§758, §762, §764 and §766), *hala*-plow (=*lāṅgala* ; §762, §765 and §767), *hāra*-necklace (§758), *kamala*-lotus (=*padma* ; §758, §762, §764, §766 and §767), *kāñcīdāma*-belt (=*kaṭisūtra* ; §758 and §763), *kārmuka*-bow (§762, §764 and §765), *kaṭaka*-lower armbands (§758 and §763), *kaṭisūtra* (=*kāñcīdāma*-belt ; §758 and §763), *kaustubha*-pendant (§758 and §762), *kheṭka*-shield (§762 and §765), *keyūra*-upper armband (=*aṅgada* ; §758 and §763), *kuṇḍala*-ear-rings (§758), and *kūrmamudrā*-gesture (§762). Also : *lāṅgala*-plow (=*hala* ; §762, §765 and §767), *makara*-buckle motif (§763), *mudgara*-hammer (§765), *musala*-pestle (§762 and §767), *nandaka*-machette (§762 and §765), *nūpura*-anklets (§763), *padma* (=*kamala* ; §758, §762, §764, §766 and §767), *paraśu*-ax (§765 and §767), *pāśa*-noose (§764 and §767), *pītavastra* (=*dukūla*-garment ; §758, §766), *śaṅkha*-conch (§758, §762, §764 and §766), *śiraścakra*-head disc (§766), *śrīvatsa*-triangular breast-mole (§758 and §762), *śūla*-trident (§767), *uttarīya*-uppercloth (§758), *vajra*-thunderbolt (§762 and §765), *valaya*-bangles (§763), and *vanamālā*-garland (§758 and §763).

§ 758

अङ्गुष्ठतर्जनीमध्ये सनालं कमलं भवेत् । वरदे कमलाकारं लिखेत्करतलोदरे ॥
अधोमुखे वामहस्ते मुख्ये कुर्याद् गदां शुभाम् । जघन्ययोस्सुकरयोः शङ्खं चक्रं निवेशयेत् ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

बाहुष्वष्टसु देवस्य तानि तान्यायुधान्यपि । निवेशयेद्यथाकामं शिल्पी शास्त्रविचक्षणः ॥
किरीटकुण्डले हारान्यङ्गुलसूत्राङ्गुलीयके । कौस्तुभं वनमालां च श्रीवत्सं दक्षिणोरसि ॥
अङ्गदे कटके रम्ये काञ्चीदाम च नूपुरे । दुकूलमुत्तरीयं च सोत्तरीयं निवेशयेत् ॥
देशकालोपलभ्यानि भूषणानि निवेशयेत् । . . . .

Bhārgava Tantra IV : 83-88a

§ 759

देवस्य मकुटादीनां भूषणानां तु लक्षणम् । अर्चानुरूपतः प्रोक्तं सौवर्णं राजतं तु वा ॥
सहजाभरणाकारं तुल्यं रत्नैस्तु वान्वितम् । जपेद्वै मूलमन्त्रस्थसंस्कृतिर्भूषणादिभिः ॥

Nāradīya XXVII : 32-33

§ 760

नमस्तेऽस्तु किरीटाय सर्वेषामुपरिस्थित । प्रभाविशेषजगता सर्वलक्षणलक्षित ॥
त्वया संपूजयामीशं नारायणमनामयम् । ह.....रत्नदोषां त्वमृद्धियुक्तः सदा भवेत् ॥
इत्युक्त्वा ब्रह्मयानेन तं नयेत्स्नानमण्डपे । बिम्बे स्नानं ततः कुर्यात्किरीटे प्रोक्षणं चरेत् ॥
अलङ्कारविशेषेण किरीटे चार्चयेत्सुधीः । पाद्यार्घ्यादीनि वेद्यान्तं सर्वं मौलिर्निवेदयेत् ॥
गन्धानुलेपवस्त्राद्यैर्देवेनैवं प्रपूजयेत् । . . . .

Vasiṣṭha XI : 12-16a

§ 761

किरीटलक्षणं वक्ष्ये शृणु वत्स समाहितः । देवदेवस्य विप्रर्षे परब्रह्मस्वरूपिणः ॥
किरीटं शिखरं चैव मौलितन्त्रं किरीटकम् । चतुर्विधं समाख्यातं तन्त्रेऽस्मिन् तन्त्रवेदिभिः ॥
किरीटं वासुदेवस्य सर्वावासस्य चक्रिणः । सङ्कर्षणद्वितीयं तु मकुटं समुदाहृतम् ॥
प्रद्युम्नस्य तृतीयं तु चतुरश्रं चतुर्थकम् । एतेषां मानमव्यग्रं शृणु त्वं मुनिपुङ्गव ॥
किरीटं हस्तमुत्सेधं विस्तारं तु तदर्धकम् । मौलिघट्टस्य विस्तारं एकहस्तं च मण्डपम् ॥
मध्ये तस्यैव मध्यं स्यात्तदन्तेन तदर्धकम् । मणिरत्नप्रवालानां यथालाभेनां कारयेत् ॥
परं युक्तिमतां देव मकुटादीनि कारयेत् । अन्येषां चैव देवानां मौलिकेन वशं कुरु ॥

Vasiṣṭha X : 1-7

§ 762

. . . किरीटस्सौम्यवदनः काञ्चनाभो महातनुः ॥
भाभिराकृतियुक्ताभिर्नानारूपाभिरावृतः । स्थितो वैद्याधरीयेण स्थानकेनान्तरिक्षगः ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

पद्मरागाचलाकारं कौस्तुभं रत्ननायकम् । दिशो दश द्योतयन्तं संलग्नाङ्घ्रि स्थितं स्मरेत् ॥
वहन्तं वक्षसो मध्ये स्वहस्तकृतसंपुटम् । सन्धारयन्तमपरं तथा वै शिरसोपरि ॥
स्फटिकाद्रिप्रतीकाशं श्रीवत्समथ भावयेत् । बद्धपद्मासनासीनं न्यस्तहस्तं स्वपार्श्वयोः ॥
वहन्तं कूर्ममुद्रां च मुख्यहस्तद्वयेन तु । ध्येया भगवती माला चित्ररूपा मनोहरा ॥
सर्वगन्धान्विता सौम्या ईषद्विकसिताननां । स्वरश्मिमण्डलान्तस्स्थं वल्गन्तं हेतिपं स्मरेत् ॥
विभोराज्ञां प्रतीक्षन्तं ह्रस्वाङ्गं रक्तलोचनम् । कुन्दा (न्ता) वदातं कमलं सौम्यमीषत्स्मिताननम् ॥
रवं सुवन्तं मधुरं श्रोत्रेन्द्रियसुखावहम् । गदां हेमाद्रिसङ्काशां तन्वीं कुवलयेक्षणाम् ॥
स्वोत्थेन रश्मिजालेन भासयन्तीं नभस्स्थलम् । तुहिनाचलसङ्काशं शङ्खं कमललोचनम् ॥
सदागमादिसारं तमुद्गिरन्तं स्वकैर्मुखैः । सन्ध्याजलदसंकाशं लाङ्गलं भीमलोचनम् ॥
क्षौ(क्षा)माङ्गमुन्नतांसं च वज्रकायं बलोत्कटम् । कृशोदरं च मुसलं रश्मिजालावलीवृतम् ॥
अङ्गारराशिसदृशं प्रलम्बमतिनिष्ठुरम् । नीलोत्पलदलश्याममिष्वस्त्रं बहु(बाल)विग्रहम् ॥
नानारूपं च निशितं दीर्घदृक्चण्डविक्रमम् । कार्मुकं हेमगौरं च किङ्किणीजालमण्डितम् ॥
आस्फोटयन्तं स्वकरं महाजलदनिस्वनम् । स्वरश्मिखचितं ध्यायेन्नृत्यमानं च नन्दकम् ॥
शरदाकाशसङ्काशं दशन्तं दशनावलिम् । सूर्यमण्डलसङ्काशं खेटकं सौम्यमूर्तिकम् ॥
ग्रसन्तमस्त्रपूगानि स्ववक्त्रेणानिशं बलात् । बद्धमुष्टिं स्मरेद्दण्डं रक्ताङ्गं रक्तलोचनम् ॥
क्रोधमूर्तिं स्वदशनैर्दशन्तमधरं स्वकम् । शक्रकार्मुकवर्णं च परशुं भीमविक्रमम् ॥
द्रवत्कनकनेत्रं च ज्वलज्ज्वालाजटाधरम् । पाशं फणगणाकीर्णं विद्युज्जिह्वं भयानकम् ॥
हेमालिपाण्डराभं च घोराम्यं रक्तलोचनम् । कृशाङ्गं दीर्घबाहुं च पिङ्गलाक्षं तु चाङ्कुशम् ॥
विकरालमुखं रौद्रं भिन्नाञ्जनगिरिप्रभम् । मुद्गरं शतधामाभं पीनांसं पृथुविग्रहम् ॥
जटाकलापधृत् सौम्यं पुण्डरीकनिभेक्षणम् । वज्रं वज्रोपलाभं तु सितदीर्घनखान्तिकम् ॥
दंष्ट्राकरालवदनं ज्वलत्कनकलोचनम् । सौदामिनीं प्रभाशक्तिं शान्ताग्निवदनेक्षणाम् ॥
घनघर्घरनिर्घोषमुद्गिरन्तीं मुहुर्मुहुः । एतेऽस्त्रनायकाः सर्वे विभोराज्ञाप्रतीक्षकाः ॥
प्रोत्थिता विचलन्तश्च कुसुमैस्स्थानकैस्थिताः । श्रोणीतटार्पितकराश्चामरव्यजनोद्यताः ॥
सपद्मं तु किरीटाद्यं वर्जयित्वा चतुष्टयम् । तर्जयन्तं च दुष्टौघमन्येषां दक्षिणं करम् ॥
स्मर्तव्यं ध्यानकाले तु सर्वेषामथ मस्तके । ध्येयं स्वकं स्वकं चिह्नं सुप्रसिद्धं निराकृति ॥
किरीटो हुतभुग्वेद्यः कौस्तुभस्तु प्रभाकरः । . . . .

Sāttvata XIII : 3*b*-30*a*

Digitized by Google Original from UNIVERSITY OF MICHIGAN

. . . सहजानां भूषणादिकिरीटानां चतुर्मुख ॥
वक्ष्यामि मानमधुना यथातथमनुक्रमात् । चतुर्विंशाङ्गुलायामं यद्वा पञ्चदशाङ्गुलम् ॥
*मूलमध्याग्रनहनं किरीटस्य यथाक्रमम् । त्रिशता सप्तभिर्द्वाभ्यां एकेनापि तथाङ्गुलैः ॥
तस्य मध्ये चतुर्दिक्षु पूरितानि तथाङ्गुलैः । तस्य मध्ये चतुर्दिक्षु पूरितानि प्रकल्पयेत् ॥
शोभयेच्च महारत्नैरग्रे चैकशिखामणिम् । चतुर्दशाङ्गुलोत्सेधं कल्पयेत्केशबन्धनम् ॥
मूलपट्टं किरीटस्य विस्तीर्णं द्वयङ्गुलं भवेत् । एकाङ्गुलममुष्याग्रं त्र्यङ्गुलं च शिखामणिः ॥
पद्ममष्टदलं कुर्यादधस्ताच्च शिखामणेः । द्विगोलकायतं चित्रैरन्यैरपि च शोभयेत् ॥
शिरसः पृष्ठभागे स्याच्छिरश्चक्रं तु चक्रवत् । विनाकृतं तु ज्वालाभिः पद्मं यद्वा यथारुचि ॥
प्रकल्प्यं मध्यतो दाम चक्रे गोलकमायतम् । नहनं द्वयङ्गुलं तस्य नालं स्याद् गोलकायतम् ॥
मकरं गोलकोत्सेधं कुर्यादष्टाङ्गुलायतम् । तद्वक्त्रात्सुमनोदाम निःसृतं बालचन्द्रवत् ॥
द्वयङ्गुलं कर्णसुमनः कर्णदाम च लम्बयेत् । हारं त्र्यङ्गुलविस्तारमग्रयोर्नेत्रबन्धनम् ॥
मुक्ताविभूषितं मध्ये महारत्नपरिष्कृतम् । कुर्याच्च दक्षिणे वक्षःस्थले श्रीवत्समङ्गुलम् ॥
अर्धाधिकं त्रिकोणं च तन्मध्ये कमलालयाम् । द्विहस्तामुद्यदम्भोजधारिणीं श्रियमद्भुताम् ॥
अपराभ्यां च हस्ताभ्यां वराभयसमन्विताम् । किरीटहारकेयूरसर्वाभरणभूषिताम् ॥
कुर्याद् दोलकविस्तारं मुखे पञ्चाङ्गुलायतम् । त्रिगुणं ब्रह्मसूत्रं स्यान्नाभेश्चापि प्रदक्षिणम् ॥
एकाङ्गुलं चोत्तरीयं नेत्रबन्धेन बन्धयेत् । विस्तीर्णं द्वयङ्गुलं मध्ये त्वग्रमेकाङ्गुलं भवेत् ॥
मुक्तादामपरिष्कारं सर्वाभरणभूषितम् । कुक्षिबन्धनमाश्चर्यं नेत्रबन्धेन योजयेत् ॥
मुक्तादाम च केयूरं कुर्यात्पूरितसन्निभम् । सप्ताङ्गुलैश्च विस्तीर्णं नानारत्नपरिष्कृतम् ॥
गुलिकाङ्गुलविस्तीर्णा आयता द्वयङ्गुलेन च । गुलिकानां त्रयं कुर्यान्नेत्रबन्धेन बन्धयेत् ॥
सर्वरत्नपरिष्कारान् वलयांस्त्रीन् प्रकल्पयेत् । एकाङ्गुलपरीणाहान् कटकैश्चोपशोभितान् ॥
सौवर्णान्यङ्गुलीयानि बद्धानेकमणीनि च । परिणाहो भवेत्तेषां द्वियवस्त्रियवोऽपि वा ॥
मध्यमामङ्गुलिं नैव मण्डयेदङ्गुलीयकैः । त्र्यङ्गुलः कटिसूत्रस्य विस्तारो रत्नशोभितः ॥
तन्मध्ये मकरी चैव पञ्चाङ्गुलसमायता । चतुरङ्गुलविस्तारा दंष्ट्राकुटिलमाननम् ॥
वृत्ताक्षं भ्रुकुटीयुक्तमास्यनिःसृतमौक्तिकम् । कुर्यान्मौक्तिकदामानि त्रीण्यागुल्फं प्रकल्पयेत् ॥
पादाकल्पं त्रिकटकं द्वयङ्गुलं परिणाहतः । नूपुरं च तथा कुर्यात् किङ्किणीजालमण्डितम् ॥
वस्त्रं च पीतपूर्वं तदागुल्फं पार्श्वलम्बितम् । कल्पयेद्वनमालां तु नानापुष्पसमुज्वलाम् ॥
नानारत्नमयीं वापि यद्वा केवलपङ्कजाम् । कर्णतश्चरणं यावल्लम्बयेदद्भुताकृतिम् ॥

* Pādma 'kr.' XX : 103-123 || Mārkaṇḍeya IX : 44-64

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

अथवा वल्लिकाकारं नाहतश्चतुरङ्गुलाम् । प्रद्योतनसहस्राभं द्योतमानं च कौस्तुभम् ॥
लम्बयेदुरसि स्वच्छमिन्दिरासोदरं मणिम् । रूपस्याभरणानां च नियमः संप्रदर्शितः ॥
नह्यशेषेण रूपं मे प्रतिकर्माणि वा पुनः । निर्मातुं भवता शक्यं किमुतान्यैः कुशिल्पिभिः ॥
तथापि शास्त्राण्यालोच्य तज्ज्ञैः शास्त्रं विमृश्य च । न्यूनातिरेकरहितं बिम्बं कुर्याद्यथातथम् ॥
न्यूनातिरेके वा दोषो महान् वक्तुं न शक्यते । . . . .

Pādma " kr." XX : 101*b*-132*a*

§ 764

ध्यायेदेवंविधं देवं चिन्तितार्थफलप्रदम् । ध्यायेच्च हृदयादीनि किरीटादीनि पूर्ववत् ॥
आयुधानामथ ध्यानं शृणुध्वं द्विजसत्तमाः । चक्रशङ्खगदाः पद्मं प्राग्वद् ध्यायेद् गुरूत्तमः ॥
कृशाङ्गं दीर्घबाहुं च पिङ्गलाक्षं तु चाङ्कुशम् । विकरालमुखं रौद्रं भिन्नाञ्जनगिरिप्रभम् ॥
कृशोदरं च मुसलमग्निज्वालावलीवृतम् । अङ्गारराशिसदृशं प्रलम्बमतिनिष्ठुरम् ॥
नीलोत्पलदलश्याममिष्वस्त्रं बाणविग्रहम् । नानारूपं च निशितं दीर्घदिग्बन्धविक्रमम् ॥
कार्मुकं हेमगौरं च किङ्किणीजालमण्डितम् । आस्फोट्य तु स्वकरौ महाजलदनिस्वनम् ॥
पाशं फणिगणाकीर्णं विद्युज्जिह्वं भयानकम् । हेमालिपाण्डराभं च घोरास्यं रक्तलोचनम् ॥
ध्येयाः स्वरुचिसंयुक्ता द्विभुजाः पुरुषोत्तमाः । एतेऽस्त्रनायकाः सर्वे विभोराज्ञाप्रतीक्षकाः ॥
प्रोत्थिता विचलन्तश्च सुसमैः स्थानकैः स्थिताः । श्रोणीतटार्पितकराश्चामरव्यजनोद्यताः ॥
सपद्मं तु किरीटाद्यं वर्जयित्वा चतुष्टयम् । तर्जयन्तश्च दुष्टौघमन्येषां दक्षिणं करम् ॥
स्मर्तव्यं ध्यानकाले तु सर्वेषामथ मस्तके । ध्येयं स्वकं स्वकं चिह्नं सुप्रसिद्धं निराकृति ॥
अधिष्ठातृक्रमस्तेषां कथ्यते मुनिसत्तमाः । ज्ञातव्यश्चाङ्कुशः कामो मुसलं नागनायकः ॥
शब्दादयः सायकास्त्रं धनुर्विद्धि समीरणम् । पाशो मायेति विज्ञेय एवं ध्यात्वा समर्चयेत् ॥
आसनाद्यैश्च सांस्पर्शैर्हृदयङ्गमपश्चिमैः । प्रीणयेत्तु विधानेन होमान्तं वा जपान्तिमम् ॥
एवमेव स्वयंव्यक्तं दिव्यं सैद्धमथापि वा । स्थापितं मनुजैर्वापि शैलमृल्लोहसम्भवम् ॥
अष्टबाहुं चतुर्बाहुं तथा षोडशबाहुकम् । चलस्थिरविभागेन स्थापितं च यथारुचि ॥

Īśvara[1] VII : 204-219

§ 765

इत्येवं भगवद्ध्यानं सर्वमूर्तं मुनीश्वराः । दिव्यायुधानां केषांचिद् ध्यानमुक्तं पुरैव तु ॥
शेषाणामायुधानां तु ध्यानं वक्ष्येऽधुना द्विजाः । सन्ध्याजलदसङ्काशं लाङ्गलं भीमलोचनम् ॥
क्षामाङ्गमुन्नतांसं च वज्रकायं बलोत्कटम् । स्वरश्मिखचितं ध्यायेन्नृत्यमानं च नन्दकम् ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

शरदाकाशसङ्काशं दशन्तं दशनावलिम् । सूर्यमण्डलसङ्काशं खेटकं सौम्यमूर्तिकम् ॥
ग्रसन्तमस्त्रपूगानि स्ववक्त्रेणानिशं बलात् । बलमुष्टिं स्मरेद्दण्डं रक्ताङ्गं रक्तलोचनम् ॥
क्रोधमूर्तिं स्वदशनैर्दशन्तमधरं स्वकम् । शक्रकार्मुकवर्णं च परशुं भीमविग्रहम् ॥
द्रवत्कनकनेत्रं च ज्वलज्ज्वालाजटाधरम् । मुद्गरं शतधामाभं पीनांसं पृथुविग्रहम् ॥
जटाकलापधृक् सौम्यं पुण्डरीकनिभेक्षणम् । वज्रं वज्रोपलाभं तु स्थितं दीर्घनखाङ्कितम् ॥
दंष्ट्राकरालवदनं ज्वलत्कनकलोचनम् । सौदामिनीप्रभां शक्तिं शान्ताग्निवदनेक्षणाम् ॥
घनघर्घरनिर्घोषमुद्गिरन्तं मुहुर्मुहुः । अन्यत् सर्वं तु पूर्वोक्तं ध्यानमेषां मुनीश्वराः ॥
अधिष्ठातृक्रमस्त्वेषामोषध्यो लाङ्गलं द्विजाः । नन्दकं सर्वशास्त्राणि खेटकं वसुधा स्मृता ॥
ज्ञेयो हि दण्डो नियतिर्वैराग्यं परशुस्स्मृतः । मुद्गरस्तु परिज्ञेयो ह्यहङ्कारो मुनीश्वराः ॥
विज्ञानमण्डलं वज्रं समाधिश्शक्तिरुच्यते । भिन्नरूपस्य च विभोर्य उक्तस्सुन्दरीगणः ॥

Īśvara[1] XXIV : 438-450

§ 766

देवबिम्बमुपादेयं शङ्खाद्यायुधभूषितम् ॥
सर्वाभरणसंयुक्तं सर्वलक्षणलक्षितम् । शङ्खं चक्रं गदां पद्मं धारयन्तं चतुर्भुजम् ॥
सृष्टिबीजं तथा पद्मचक्रस्थितिनिबन्धनम् । गदां संहारकामाहुः शङ्खमूर्तिनिबन्धनम् ॥
कटिकालम्बितं वामं भावितस्य विशेषतः । वामहस्ते तदा तस्य गदां चैव तु कारयेत् ॥
दक्षिणेनोर्ध्वहस्तेन धारयेच्चक्रमुत्तमम् । अष्टारं द्वादशारं वा चतुर्विंशदरं तु वा ॥
नेमिं तु मध्यमे चैव ज्वालाषड्भिस्समन्वितम् । विष्कम्भषट्कोपेतं च सुवृत्तं च सुशोभनम् ॥
धारयेच्चक्रराजानं वामोर्ध्वेन करेण च । शङ्खायामं तथा तालं ज्वालायुक्तं सितप्रभम् ॥
तर्जनीमध्यमाभ्यां तु शङ्खं चक्रं च धारयेत् । तद्धारणकराग्रेण बाहुसीमान्तमेव च ॥
कर्णान्तं वा ललाटान्तं ज्वालान्तं शङ्खचक्रयोः । दक्षिणाभयहस्ते तु धारयेत् पद्मकुड्मलम् ॥
अङ्गुष्ठतर्जनीमध्ये अङ्गुष्ठाच्चोत्थितं शुभम् । तले विकसितं हस्ते लिखेत् पद्मं सुशोभितम् ॥
अधोमुखे वामहस्ते चतुस्तालं गदां न्यसेत् । गुल्फान्तं पीतवस्त्रेण छादयेत्कौतुकं हरेः ॥
ललाटान्तं शिरस्पृष्ठे शिरश्चक्रं तु कारयेत् । तन्मध्ये चक्रनालं स्यात् चक्रज्वालां विना क्रमात् ॥
कुर्याद्वै चक्रवृत्तं तु प्रभासहितमेव च । एवं चतुर्भुजानां तु बेराणां शयनं तथा ॥

Vasiṣṭha IV : 102*b*-114

§ 767

शृणु नारायणास्त्रस्य स्वरूपं प्रथमं मुने । सहस्रधारमत्युग्रं सहस्रार्कसमप्रभम् ॥
तैजसं विस्तृताग्रं तन्मोहिनीकुसुमोपमम् । प्रतिपच्चन्द्रसङ्काशमध्यष्टाश्रविदीपितम् ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

शतधारं तडिद्दीप्तमेतत्पाशुपतं मतम् । सहस्रारसमायुक्तं विद्युत्पुञ्जोपमाकृति ॥
प्रस्तरप्रतिमं मुष्टिग्राह्याग्रं ब्राह्ममीरितम् । दंष्ट्राकरालं दष्टोष्ठं पिङ्गलाक्षं विभीषकम् ॥
गृहीतपिङ्गकेशाग्रमेतद् ब्रह्मशिरो मतम् । विष्णुचक्रमिति ख्यातं सहस्रारं सुदर्शनम् ॥
जृम्भणं त्वष्टवक्राङ्गं दण्डमेवं विदुर्बुधाः । भीमाकारं पाशमेव कालपाशमिति स्मृतम् ॥
षट्कोणाग्रं ज्वलज्ज्वालमस्त्रमाग्नेयमुत्तमम् । ज्वालाविलं वाजिवक्त्रमस्त्रं हयशिरो मतम् ॥
प्रस्वापनं कुवलयस्तबकस्तम्बसन्निभम् । सतोयतोयदप्रख्यं तामसास्त्रमुदीरितम् ॥
कालास्त्रं भीषणं दण्डं षष्टिघण्टासमाकुलम् । आद्यन्तचक्रयुग्दण्डं दण्डचक्रमिति स्मृतम् ॥
कालचक्रं चतुष्कोणं पर्यन्तस्थितराशिमत् । धर्मचक्रं सुवृत्तं स्याद्दशयज्ञायुधाङ्कितम् ॥
शैवं शतमुखाग्निस्तु दण्डवत्परिकीर्त्यते । शूलं तु त्रिदलं प्रोक्तं तीक्ष्णधारं सुदण्डकम् ॥
परशू रौद्रमस्त्रं च तीक्ष्णधारं भयावहम् । शूलत्रयाङ्कितमुखं त्रिशूलं दण्डवद्भवेत् ॥
घोरं नाराचरूपं स्यादस्त्रमाहुर्मनीषिणः । कृष्णास्यं पिङ्गनयनं ज्वालाकेशोर्ध्वबन्धनम् ॥
अघोरास्त्रमिदं प्रोक्तं...मसिधारकम् । अस्त्रं संमोहनं नाम कमलं नालसंयुतम् ॥
ऐषीकं शरनालाभमस्त्रमाहुर्विचक्षणाः । वज्राङ्कितचतुष्कोणं नटाभममितद्युति ॥
ऐन्द्रचक्राख्यमस्त्रं तत्परवैरिभयङ्करम् । सदा ज्वलितसर्वाङ्गं महिषाकृतिभीषणम् ॥
शुष्काशनिरिदं प्रोक्तमस्त्रमङ्गारसन्निभम् । तादृशं शुक्लवर्णं तदार्द्राशनिरिति स्मृतम् ॥
पैनाकमस्त्रं परमं धनुस्तक्षकसंनिभम् । कङ्कालाख्यं भवेदस्त्रं पिशाचाकृति भीषणम् ॥
कपालमालिकामाहुः कापालास्त्रमनुत्तमम् । सौरमस्त्रं समाख्यातं सूर्यबिम्बपरम्परा ॥
अस्त्रं वरुणपाशाख्यं शीताकृति सुदारुणम् । लकुटं शङ्कुजालाढ्यं सन्तापनमिदं विदुः ॥
वारुणं जालकाकारं द्वात्रिंशच्छिद्रसंयुतम् । सर्वतत्त्वमयं धाम धर्मपाशमिति स्मृतम् ॥
शक्तिरेका प्रसिद्धैव शक्त्यन्तरमथोच्यते । द्विशिरस्कैकनाला च दशघण्टाविभूषिता ॥
वायव्यमस्त्रं सारङ्गः सशृङ्ग इव पठ्यते । मौसलं मुसलं प्रोक्तं विद्युद्दण्डमिवोज्ज्वलम् ॥
गान्धर्वमस्त्रमादिष्टं वीणादण्डोपमाकृति । दर्पणं दर्पणं प्रोक्तमस्त्रं पूर्णेन्दुसन्निभम् ॥
शोषणं विकटं शृङ्गमस्त्रं परविशेषणम् । पैशाचमस्त्रं परममुल्कामुखमुदाहृतम् ॥
तेजःप्रभं स्मृतं प्रासप्रतिमं परदारणम् । ऐन्द्रमस्त्रं वज्ररूपं तेजसां निलयं स्मृतम् ॥
अस्त्रं विलापनं नाम धाराधरमुदाहृतम् । वैद्याधरास्त्रमाहुस्तत् पुष्पमालां तु मोहिनीम् ॥
अस्त्रं कङ्कालसंज्ञं स्यान्महाघण्टानिनादितम् । मोदकी नाम परमा वल्लरी पुष्पशालिनी ॥
शिखरं नाम खट्वाङ्गमायुधं परिचक्षते । क्रौञ्चमस्त्रं महत्पक्षी क्रौञ्चाकृतिरिहोच्यते ॥
असिरत्नाह्वयं दिव्यमस्त्रं खड्गो महाद्युतिः । अस्त्रं प्रशमनं नाम प्रोच्यते ध्वजसन्निभम् ॥
कन्दर्पदयितं चास्त्रमिक्षुः परमशोभनम् । मदनं चामरप्रख्यमस्त्रं परभयावहम् ॥
सौमनं शिबिकाभं तदस्त्रमस्त्रविदो विदुः । स्थूलमुक्ताक्षमालेव सत्यास्त्रं सर्वसाधकम् ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

अस्त्रं संवर्तकं नाम महाशङ्खः प्रकीर्त्यते । मायाधराह्वयं प्राहुरस्त्रं शाखिनमेव च ॥
सोमास्त्रमर्धचन्द्राभं सायकं संप्रचक्षते । त्वाष्ट्रमस्त्रं चैत्यसमं सदण्डमभिधीयते ॥
शीतेषु नाम कुम्भास्या स्रवन्ती सरिदुत्तमा । त्रिकोणं दण्डवद्विद्याद्भृगास्त्रममितद्युति ॥
संदामनं समाख्यातं चक्रं निररमुच्यते । सत्यवन्तं महाभूतं व्यात्ताननमिदं विदुः ॥
वारणं नाम सर्पास्यं वारणं परमाङ्कुशम् । धृष्टं कबन्धमुदरं व्यात्ताननमुदाहृतम् ॥
भृशाश्वतनयं नाम द्विधारं क्रकचं स्मृतम् । सत्यकीर्तिस्तु मकरो व्यालवक्त्रोऽभिधीयते ॥
मोहः सर्पशिरो व्यात्तवक्त्रमस्त्रं विदुर्बुधाः । रभसं तारसङ्काशमस्त्रं सर्वास्त्रसादनम् ॥
सर्वनाभाह्वयं चास्त्रं कमण्डलुरिहोच्यते । पराङ्मुखाह्वयं चास्त्रं पञ्चाननशिरो विदुः ॥
जृम्भकं नाम रक्ताक्षं त्रिपञ्जरमुदीर्यते । प्रतिहाराख्यमस्त्रं तु कुन्तः परमभास्वरः ॥
ऋक्षास्यं भूतमुद्दिष्टमवाङ्मुखसमाह्वयम् । धनाख्यमस्त्रं मुकुटसमानममितद्युति ॥
धान्यास्त्रमेतत्परमं शालिस्तबकबन्धनम् । वृषाक्षं वृषवक्त्राङ्कं महाभूतं प्रचक्षते ॥
कामरूपं महास्त्रं तु प्रतिसूर्यकसन्निभम् । दृढनाभाख्यमस्त्रं स्यान्नागो बहुफणान्वितः ॥
अस्त्रं कामरुचिर्नाम स्वस्तिकं परिचक्षते । सुनाभं क्षुरिका तीक्ष्णा प्रोच्यतेऽस्त्रमनुत्तमम् ॥
मकरी नाम दिव्यास्त्रं दीपिकादण्डसन्निभम् । दशाक्षमेतज्जानीयात्कौक्षेयकमवारितम् ॥
वृत्तिमन्तं चोष्ट्रमुखं वेतालमभिधीयते । एकस्था दशवक्त्री तु दशवक्त्रमुदाहृतम् ॥
रुचिराख्यं भवेदस्त्रं हलं परमदारुणम् । दशवर्षा काकमुखी दशकर्णमुदीर्यते ॥
योगंधरं दिवाभीतव्यात्तवक्त्रमिति स्मृतम् । अमित्रघ्नं वारुणं स्यात् परास्त्रविनिवारणम् ॥
अनिद्रमस्त्रमुन्निद्रकल्पकं कथयन्ति वै । भेत्तारमस्त्रमाख्यातं कुठारं परभेदनम् ॥
शतोदरास्त्रं भूतं स्याच्छतोदरसमन्वितम् । अस्त्रं सौमनसं नाम जपाकुसुममञ्जरी ॥
पद्मनाभं महाभूतं पद्मालङ्कृतनाभिमत् । महानाभाख्यमस्त्रं तु बको विकटकन्धरः ॥
ज्यौतिषं नाम परमं विमानमभिधीयते । क्रमणं क्षेपणं प्रोक्तं परास्त्रक्रमणं महत् ॥
त्रैराशिर्वानरमुखं सपक्षं नरपादवत् । सार्चिमालि महाभूतमेकपाद्बहुहस्तकम् ॥
विमलास्त्रमिदं विद्यात् स्फाटिकाकारडोलिकाम् । वराहसिंहमनुजकुक्कुरेभमुखैर्युतम् ॥
भूतं पुराविदो ब्रूयुर्धृतिकास्त्रं सुदारुणम् । . . . .

Ahirbudhnya XL : 9-64*a*

The "foot-stool" of the Lord

Vaiṣṇava piety reckons that the highest attainment beyond this life is to win a place at the Feet of the Lord. As reminder of this, either in the main shrine at the foot of the main deity or in a shrine dedicated solely to it, will be found some iconographical representation

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

of the "foot-stool" of the Lord. This may be in the form of sandals made out of wood or gems or metal, or in the form of a drawing, or in the form of a dome-shaped "*pādukā*" (more popularly known nowadays as "*śaṭhakopa*"). Wherever it may be, in whatever form it may take, it receives daily liturgical attentions during regular *pūjā*-cycles of worship. Three excerpts relate to the *pādukā*, below, §768–§770.

§ 768

अस्वतन्त्रं स्वतन्त्रं वा सालङ्कारोपशोभितम् । रत्नजे लोहजे वापि दारुजे वापि चित्रके ॥
अर्चापदानं रूपेण पादुके समुदीरिते । . . . .

Nāradīya XXVII : 62-63*a*

§ 769

. . . पादुकालक्षणं वक्ष्ये शृणु राजकुलोद्भव ॥
एकपादं द्विपादं वा वृत्ताकारं तु चक्रवत् । तन्मध्ये चतुरङ्गुल्यं छिद्रितानां सुवृत्तकम् ॥
पादुकालक्षणं प्रोक्तम्..... . . . .

Mārkaṇḍeya XI : 14*b*–16*a*

§ 770

. . . पादुके देवदेवस्य कल्पयेत् कनकादिभिः ॥
पीठं तयोः स्वर्णमयं विकसत्पङ्कजाकृति । कर्णिकायां स्थापयेत् ते पादुके पङ्कजस्य तु ॥

Śrīpraśna XV : 61*b*-62

Miscellaneous paraphernalia found in the Sanctuary

There are a number of items to be provided that, while they are not strictly the concern of the *sthapati*-sculptor or artist, are to reflect in their execution certain iconographical details. Because of this, they are rightly to be included in a sourcebook of Vaiṣṇava iconography. In the following nine excerpts, we have arranged these data as they relate to some of the miscellaneous paraphernalia found in the shrine.

In §771, §772 and §773 we have detailed descriptions of the *ghaṇṭā*-bell used in worship* —its varieties, measurements and symbolism. The motifs on the handle may vary considerably more than in fact is found on most bells readily available today ; but whatever its shape and decoration, its tone is to remind the worshipper of the Ultimate Principle of Sound (*śabdabrahman*).

* According to Teṅgalai practices, the bell is used only in accompaniment of temple rituals, never in domestic worship. Vaḍagalais, however, encourage the use of the bell both in temple and domestic worship.

Digitized by Google Original from UNIVERSITY OF MICHIGAN

The *Chatra*-umbrella, a smaller and finer version of what is used during processions, is to be made of gold or silver, and studded with gems, decorated with pearls, and advanced to the *karmabera*-during *pūjā*-routines. *See* §774 and §775.

A *vyajana*-fan, made of peacock feathers and having a gold handle studded with gems, is also to be provided for use in *pūjā*-routines, according to excerpt §776. So also a *darpaṇa*-mirror is to be provided, its size determined by the size of the pedestal of the (*utsavabera*-) icon to which it will be offered during certain liturgies. *See* §777 and §778. A final entry in this section concerning items found in the sanctuary, §779, describes the three-, five-, or seven-tiered lamp-stand (*dīpa-pātra*) in general terms.

§ 771

. . . शब्दब्रह्ममयी घण्टा हस्तोत्सेधसमुच्छ्रया ॥
ब्रह्माण्डगोलकाकारा सौराष्ट्रावयवैः कृता । अधोमुखी तालमानविस्तारा शोभनाकृतिः ॥
घण्टादण्डस्तालमानः स्यादूर्ध्वे पक्षिभूपतिम् । चक्रं शङ्खं पङ्कजं वा कल्पयेत् पद्मसंभवे ॥
पूजादिसर्वकार्येषु सर्वदैवोपयोगिनी । . . . .

Śrīpraśna XV : 21*b*-24*a*

§ 772

. . . शब्दब्रह्ममयी घण्टा हस्तोत्सेधप्रमाणिका ॥
ब्रह्माण्डगोलकाकारा सौराष्ट्रावयवो भवेत् । अधोमुखस्तालमानविस्तारोत्सेधसंमितः ॥
प्रदीपतुल्यसंस्थानस्तीक्ष्णाभ्यन्तरतालुकः । तालो न दण्डमूले स्यादग्रे सुस्थितपक्षिराट् ॥
चक्राग्रं पङ्कजाग्रं वा घण्टैषा परिकीर्तिता । नालबन्धाश्चतस्रोऽन्या घण्टा प्रतिदिशं कृता ॥
एतस्यामेव घण्टायां यद्वा वित्तानुसारतः । . . . .

Pādma 'kr.' XXIII : 30*b*-34*a*

§ 773

शब्दब्रह्मैकदेहायाः लक्षणं कमलोद्भव । प्रमाणमतिशुद्धं च सप्रमेयं निबोधतु ॥
सममर्धसमं ज्येष्ठमायाम(धम)मथ मध्यमम् । तत् त्रिभागसमं विद्धि चतुर्थांशं तु कन्यसम् ॥
त्रिभागेन तदुच्छ्रायात् द्वादशांशान्वितेन तु । प्रमाणेन तु विस्तारं त्रिविधं तु विधीयते ॥
कृत्वा सूत्रपरिच्छिन्नं प्राक्प्रत्यग्दक्षिणोत्तरम् । चतुरश्रायतं क्षेत्रमेवमापाद्य वै पुरा ॥
तिर्यगूर्ध्वगतैस्सूत्रैर्भङ्क्त्वा संपूर्यते ततः । तत्र पञ्चोर्ध्वसूत्राणि दद्यादेकादशानि च ॥
भुजाख्यानि च वै यानि विभागमथ मे शृणु । सार्धैस्तु पञ्चभिर्भागैः शब्दक्षेत्रं विधीयते ॥
तत्र चक्रं च कमलं सर्वदृश्यं प्रकल्प्य च । शङ्खं कमलसंभूतमुक्ताहारादिकं क्रमात् ॥

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

वलयत्रितयान्तस्स्थं मुक्ताहारं सुवर्तुलम् । भागार्धेनाग्रतः कुर्यात् त्यक्त्वार्धार्धं तदूर्ध्वतः ॥
शिष्टेनांशेन महता भागार्धेन तदूर्ध्वतः । नाभिक्षेत्रान्वितं चक्रं द्वादशारं विधीयते ॥
केवलं कर्तरीभिर्वा मिश्रं क्ष्मामिश्रितैर्वशात् । षोडशारं तु वा विप्र शतशृङ्गं मनोहरम् ॥
सांशेनाथोर्ध्वभागेन कर्णिकाकेसरान्वितम् । चतुर्विंशद्दलं पद्ममापाद्य कमलोद्भव ॥
चक्रनाभेर्दलाग्राणां वर्जयित्वान्तरं धिया । यथाभिमतमानं च सुश्लक्ष्णरचनोज्झितम् ॥
दलमध्यनिविष्टं च किञ्जल्कनिचयं शुभम् । कुर्याद्वा कर्णिकालग्नमुच्छ्रितं च सुसंहतम् ॥
ऊर्ध्वे मार्गद्वयेनाथ भागेन शुभलक्षणम् । कर्णिकावनिविश्रान्तमर्धदृश्यं च शङ्खराट् ॥
भुवनावलियोगेन वलीभूतेन भूषितम् । ओङ्कारावर्तरूपेण कुम्भं तस्यांशसंमितम् ॥
कुम्भोपर्यथ चार्धेन भागेन तु शनैश्शनैः । कलशं कु(कृ)शतां नीत्वा छिद्रदेशावधेः क्रमात् ॥
शङ्खकुम्भावधेर्विप्र शातनीयं च दिग्द्वयात् । मत्स्यवल्लाञ्छनं चैव अर्धमर्धं पदद्वयात् ॥
चतुरंशार्धविस्तीर्णा प्रथमा भुवनावली । द्वितीया विरता चान्या तृतीया भागसंमिता ॥
आ अग्रात् स्वधियात्वीषदूर्ध्वान्तं कमलोद्भव । अनुपातवशान्मध्यं क्षामं क्षेत्रं विधीयते ॥
शङ्खोपरि यथा कार्यं तथा तदवधारय । सार्धभागचतुष्केण तदुच्छ्रायं महामते ॥
विस्तारं सार्धभागेन गदायां विहितं तु वै । मुष्टिसंज्ञं तु यत्पीठं कुर्याद्भागोन्नतं द्विज ॥
चतुरश्रं तु वा श्लक्ष्णं चित्रकर्मविभूषितम् । वृत्तायां चतुरश्रं तु तुर्याश्रं वर्तुले स्मृतम् ॥
तुल्यरूपं हि वा ब्रह्मन् करग्राहं च तत्र यत्। तत्त्वष्टाग्रं (श्रं) तु वा वृत्तं सामान्यं सर्वतः स्मृतम् ॥
मुष्टेरूर्ध्वगतं कुर्याद् गदास्तम्भं च पूर्ववत् । विद्धि तं सप्तपर्वं तु मन्थिकाशुक्तिभिर्युतम् ॥
मुक्तावलिगणोपेतं तीक्ष्णाश्रं(ग्रं) चतुरश्रकम् । वलयाकृतिरूपेण युक्तं तारागणेन च ॥
शुक्तिबृन्दसमेतेन वर्तुलं वा समाप्य च । रचनारहितं श्लक्ष्णं केवलं चतुरश्रकम् ॥
अष्टाश्रं वा सुवृत्तं वा स्वप्रमाणेन लक्षितम् । कुर्यादेवं गदास्तम्भमथ तन्मस्तकोपरि ॥
भागद्वयोन्नतं कुर्यात् द्विभुजं वा चतुर्भुजम् । प्रागुक्तं प्रविभक्ताङ्गं पक्षमण्डलमण्डितम् ॥
तत्पक्षविस्तृतं कुर्याच्चतुर्भागसमं द्विज । त्रिभागविततं चाथ पुच्छपक्षद्वयं हि तत् ॥
तत्समं विततं चैव मुख्यपाणियुगं तु वै । विधेयं कमलोद्भुत तस्य संपुटवद्यथा ॥
पक्षवत् प्रसृतं खस्थं वेदाध्ययनचिह्नितम् । मन्त्रजातरतं चैव विधेयं वा सविस्तरम् ॥
प्रसार्य विधिनानेन स्वयं क्षितितले ततः । शिल्पिनश्चैव द्रष्टव्यं प्रमाणेनाकृतैस्सह ॥
न्यूनत्वमतिरिक्तं वा अतो हेतोस्तदग्रतः । पूरयेद्धृदयेनैव स्वधिया कर्मणा स्वयम् ॥
चलन्तं गर्भमानेन तीक्ष्णलोहेन निर्मितम् । भागार्धेनाधिकं क्षेत्रात् शब्दव्यञ्जकमब्जज ॥
एतावदाद्यं विहितं निर्माणं तैजसं महत् । व्यक्तं यत्राश्रितं कालं नाभिस्थं कमलोद्भव ॥
तत्र चाक्रमराबृन्दं स्वकं द्वादशकं स्मृतम् । तमेव षोडशारं च वर्णैस्सह नपुंसकैः ॥

Digitized by Google Original from UNIVERSITY OF MICHIGAN

वर्णानां त्रिविधं रूपं सर्वेषां कमलोद्भव । संस्थितं वैखरीनिष्ठं पश्यन्तीपूर्वमब्जज ॥
अराश्रितद्विषट्कारे वाक्स्वरूपं परं हि यत् । तत्रैव षोडशारे च तत्रैवाकर्तरीषु च ॥
मध्यमाख्यस्वरूपेण नित्यमेव हि वर्तते । अत ऊर्ध्वं चतुर्विंशत्संख्यं वर्णगुणं हि यत् ॥
दलजालं हि यत्पद्मं परिज्ञेयं महामते । मकारसंज्ञं यद्वर्णं विद्धि सा पद्मकर्णिका ॥
शङ्खं यकारवर्णं तु समुष्टीके गदाग्रहे । रादयस्सप्त ये वर्णा हान्ताः पर्वगदात्मकाः ॥
क्षान्तं पतत्रिराड् विद्धि एवं कमलसम्भव । शब्दब्रह्मरूपं च घण्टाविग्रहलक्षणा ॥

Pauṣkara XXXIV : 15-56

§ 774

मुक्तातपत्रं धवलं शशिबिम्बसमप्रभम् । सितातपत्राणि तथा बर्हिपत्रमयानि च ॥
आतपत्राण्यनेकानि हैमदण्डानि पद्मज । व्यजनानि च भूयांसि कल्याणानि महान्ति च ॥

Pādma 'kr.' XXIII : 38-39

§ 775

. . . मुक्तातपत्रं धवलं स्वर्णादिभिरलङ्कृतम् ॥
शुद्धस्वर्णेन वा कुर्याद्रजतेनाथवा रमे । स्वर्णदण्डं राजतं वा रत्नजालसमन्वितम् ॥
छत्रमेवंविधं कुर्याच्चामराणि च कल्पयेत् । . . . .

Śrīpraśna XV : 49b-51a

§ 776

. . . चत्वारि कनकाद्यैश्च कृतदण्डानि वै रमे ॥
व्यजनानि विचित्राणि उशीरैः शिखिपिञ्छकैः । अलङ्कृतैश्च रत्नाद्यैश्चत्वारि परिकल्पयेत् ॥

Śrīpraśna XV : 51b-52

§ 777

. . . ततस्तु दर्पणं कुर्यात् देवासनसमं शुभम् ॥
वृत्तमाधारसंयुक्तमनाधारं तु वाऽमलम् । कांस्योत्थं स्फाटिकोत्थं वा हेमाद्यैर्भूषितं तु वा ॥

Nāradīya XXVII : 63b-64

§ 778

*दर्पणं प्रतिमामानं तदर्धं वा सुशोभनम् । वृत्तं कांस्यं महारत्नखचितं वा यथावसु ॥
पादयुक्तमयुक्तं वा मुखमानमथापि वा । कार्तस्वरमयी वृत्ता राजती वाथ पावनी ॥

Pādma 'kr.' XXIII : 18-19

* Pādma 'kr.' XXIII : 18 = Śrīpraśna XV : 56

Digitized by Google
Original from
UNIVERSITY OF MICHIGAN

§ 779

नालदण्डं हस्तमात्रं त्रिपाद्वापि द्विपादकम् । प्रोतानां दीपपात्राणां चक्राकारेण शोभिनम् ॥
सप्त वा पञ्च वा त्रिर्वा क्रमहीनं तु वै भवेत् । प्रथमे दीपपात्रे च वर्तिस्थानशतं भवेत् ॥
द्वितीयादिषु हीनं स्यादन्ते कुमुदकुट्मलम् । दीपपात्रमिदं प्रोक्तं स्नानासनमथो शृणु ॥

Śripraśna XV : 32-34

The Sruk-ladle and Sruva-spatula used in Homa-fire-oblations

In this final section we have collated eleven passages from the *Pāñcarātrāgama* literature, all dealing with the instruments used for making libations into the *homa*-fire. While these do not reveal any iconographical symbols, nonetheless their execution requires skill and attention to detail; their construction is assigned to *śilpins* under the direction of the *ācārya*. In general terms, they are long-handled instruments made of wood (although §783 says that even gold or silver may be used). The amount of attention given them in the texts simply reflects the importance attached to the fire-offerings and every detail connected with them.

Detailed measurements for the *sruk*-ladle and the *sruva*-spatula will be found in §784, §787, §788, §789 and §790.

§ 780

